सुतुर्कः । सुप्रायणाः । अप्रायुवः । च्यवनः । रजः । हरः । जुहुरे । व्यंतः । क्राणाः । वाशी । विषुणः । जामिः । पिता । शंयोः । अदितिः । एरिरे । जसुरिः । जरते । मंदिने । गौः । गातुः । दंसयः । तूताव । चयसे । वियुते । ऋधक् । अस्याः । अस्येतिद्विषष्टिःपदानि ॥ १ ॥ सस्निं । वाहिष्ठः । दूतः । वावशानः । वार्यं । अंधः । असश्चंती । वनुष्यति । तरुष्यति । भंदनाः । आहनः । नदः । सोमोअक्षाः । श्वात्रं । ऊतिः । हासमाने । पड्भिः । ससं । द्विता । व्राः । वराहः । स्वसराणि । शर्याः । अर्कः । पविः । वक्षः । धन्व । सिनं । इत्था । सचा । चित । आ । द्युम्नं । पवित्रं । तोदः । स्वंचाः । शिपिविष्टः । विष्णुः । आघृणिः । पृथुज्रयाः । अथर्युं । काणुका । अध्रिगुः । आंगूषः । आपांतमन्युः । श्मश्रा । उर्वशी । वयुनं । वाजपस्त्यं । वाजगंध्यं । गध्यं । गाधिता । कौरयाणः । तौरयाणः । अह्रयाणः । हरयाणः । आरितः । व्रंदी । निष्षपी । तूर्णाशं । क्षुंपं । निचुंपुणः । पादं । पादुः । वृकः । जोषवाकं । कृत्तिः । श्वघ्नी । समस्य । कुटस्य । चर्षणिः । शंबः । केपयः । तूतुमाकृषे । असंत्रं । काकुदं । वीरिटे । अच्छ । परि । ईं । सीं । एनं । एनां । सृणिरितिचतुरुत्तरमशीतिःपदानि ॥ २ ॥ आशुशुक्षणिः । आशाभ्यः । काशिः । कुणारुं । अलातृणः । सललूकं । कत्पयं । विस्रुहः । वीरुधः । नक्षद्दाभं । अस्कृधोयुः । निशृंभाः । बृबदुक्थं । ऋदूदरः । ऋदूपे । पुलुकामः । असिन्वती । कपना । भाऽर्ऋजीकाः ।

रुजानाः । जूर्णिः । ओमना । उपलप्रक्षिणी । उपसि । प्रकलवित् । अभ्यर्धयज्वा । ईक्षे । क्षोणस्य । अस्मे ।
पार्थः । सवीमनि । सप्रथाः । विदथानि । श्रायंतः । आशीः । अजीगः । अमूरः । शशमानः । देवोदेवाच्या-
कृपा । विजामातुः । ओमासः । सोमानं । अनवायं । किमीदिने । अमवान् । अमीवा । दुरितं । अप्वा ।
अमतिः । श्रुष्टी । पुरंधिः । रुशत् । रिशादसः । सुदत्रः । सुविदत्रः । आनुषक् । तुर्वणिः । गिर्वणसे । असूर्ते-
सूर्ते । अम्यक् । यादृश्मिन् । जारयायि । अग्रिया । चनः । पचता । शुरुधः । अमिनः । जज्झतीः । अप्रति-
ष्कुतः । शाशदानः । सूप्रः । सुशिप्रः । शिप्रे । रंसु । द्विबर्हाः । अक्रः । उराणः । स्तियानां । स्तिपाः । जबारु ।
जरूथं । कुलिशः । तुंजः । बर्हणा । ततनुष्टिं । इलीबिशः । कियेधाः । भ्रिमिः । विष्पितः । तुरीपं । रास्पिनः ।
ऋंजतिः । ऋजुनीती । प्रतद्वसू । हिनोत । चोष्कूयमाणः । चोष्कूयते । सुमत् । दिविष्टिषु । दूतः । जिन्वति ।
अमत्रः । ऋचीषमः । अनर्शराति । अनर्वा । असामि । गल्दया । जल्हवः । बकुरः । बेकनाटान् । अभिधेतन ।
अंहुरः । बतः । वाताप्यं । चाकन् । रथर्यति । असश्चा । आधवः । अनवब्रवः । सदान्वे । शिरिंबिठः ।
पराशरः । क्रिविर्दती । करूळती । दनः । शरारुः । इदंयुः । कीकटेषु । बुंदः । वृंदं । किः । उल्बं । ऋबीसमृ-
बीसमितित्रयस्त्रिंशच्छतंपदानि ॥ ३ ॥ जहासस्त्रिमाशुशुक्षणिस्त्रीणि ॥ इतिनैघंटुकेचतुर्थोऽध्यायः ॥ ४ ॥

॥ १५ ॥

॥ ॐ अग्निः । जातवेदाः । वैश्वानरइतित्रीणिपदानि ॥ १ ॥ द्रविणोदाः । इध्मः । तनूनपात् । नराशंसः । इळः । बर्हिः । द्वारः । उषासानक्ता । दैव्याहोतारा । तिस्रोदेवीः । त्वष्टा । वनस्पतिः । स्वाहाकृतयइतित्रयोदशपदानि ॥ २ ॥ अश्वः । शकुनिः । मंडूकाः । अक्षाः । ग्रावाणः । नराशंसः । रथः । दुंदुभिः । इषुधिः । हस्तघ्नः । अभीशवः । धनुः । ज्या । इषुः । अश्वा । अश्वाजनी । उलूखलं । वृषभः । द्रुघणः । पितुः । नद्यः । आपः । ओषधयः । रात्रिः । अरण्यानी । श्रद्धा । पृथिवी । अप्वा । अग्नायी । उलूखलमुसले । हविर्धाने । द्यावापृथिवी । विपाट्छुतुद्री । आर्त्नी । शुनासीरौ । देवीजोष्ट्री । देवीऊर्जाहुतीतिषट्त्रिंशत्पदानि ॥ ३ ॥ वायुः । वरुणः । रुद्रः । इंद्रः । पर्जन्यः । बृहस्पतिः । ब्रह्मणस्पतिः । क्षेत्रस्यपतिः । वास्तोष्पतिः । वाचस्पतिः । अपांनपात् । यमः । मित्रः । कः । सरस्वान् । विश्वकर्मा । तार्क्ष्यः । मन्युः । दधिक्राः । सविता । त्वष्टा । वातः । अग्निः । वेनः । असुनीतिः । ऋतः । इंदुः । प्रजापतिः । अहिः । अहिर्बुध्न्यः । सुपर्णः । पुरूरवाइतिद्वात्रिंशत्पदानि ॥ ४ ॥ श्येनः । सोमः । चंद्रमाः । मृत्युः । विश्वानरः । धाता । विधाता । मरुतः । रुद्राः । ऋभवः । अंगिरसः । पितरः । अथर्वाणः । भृगवः । आप्त्याः । अदितिः । सरमा । सरस्वती । वाक् । अनुमतिः । राका । सिनीवाली । कुहूः । यमी । उर्वशी । पृथिवी । इंद्राणी । गौरी । गौः ।

धेनुः । अघ्न्या । पथ्या । स्वस्तिः । उषाः । इळा । रोदसीतिषट्त्रिंशत्पदानि ॥ ५ ॥ अश्विनौ । उषाः । सूर्या । वृषाकपायी । सरण्यूः । त्वष्टा । सविता । भगः । सूर्यः । पूषा । विष्णुः । विश्वानरः । वरुणः । केशी । केशिनः । वृषाकपिः । यमः । अजएकपात् । पृथिवी । समुद्रः । अथर्वा । मनुः । दध्यङ् । आदित्याः । सप्तऋषयः । देवाः । विश्वेदेवाः । साध्याः । वसवः । वाजिनः । देवपत्न्योदेवपत्न्यइत्येकत्रिंशत्पदानि ॥ ६ ॥ अग्निर्द्रविणोदाअश्वोवायुःश्येनोश्विनौषट् ॥ इतिनैघंटुकेपंचमोऽध्यायः ॥

इदं पुस्तकं पणशीकरोपाह्वलक्ष्मणशर्मतनुजनुषा वासुदेवशर्मणा संस्कृतं तच्च पांण्डुरंग जावजी इत्यतैः स्वीये “ निर्णयसागराख्य ” मुद्रणालये मुद्रयित्वा प्रकाशितम् । शके १८५५, सन १९३४.

॥ शिक्षादिवेदांगचतुष्टयंसमाप्तम् ॥

॥ अथनिरुक्तपूर्वषट्कप्रारंभः ॥

श्रीगणेशायनमः ॥ हरिःॐ ॥ समाम्नायःसमाम्नातःसव्याख्यातव्यस्तमिमंसमाम्नायंनिघंटवइत्याचक्षतेनिघंटवःकस्मा
न्निगमाइमेभवंतिच्छंदोभ्यःसमाहृत्यसमाहृसत्यसमाम्नातास्तेनिगंतवएवसंतोनिगमनान्निघंटवउच्यंतइत्यौपमन्यवो
ऽपिवाहननादेवस्युःसमाहताभवंतियद्वासमाहृताभवंतितद्यान्येतानिचत्वारिपदजातानिनामाख्यातेचोपसर्गनिपाता
श्चतानीमानिभवंतितत्रैतन्नामाख्यातयोर्लक्षणंप्रदिशंतिभावप्रधानमाख्यातंसत्त्वप्रधानानिनामानितद्यत्रोभेभावप्रधा
नेभवतःपूर्वापरीभूतंभावमाख्यातेनाचष्टेव्रजतिपचतीत्युपक्रमप्रभृत्यपवर्गपर्यंतंमूर्तंसत्त्वभूतंसत्त्वनामभिर्व्रज्यापक्तिरि
त्यदइतिसत्त्वानामुपदेशोगौरश्वःपुरुषोहस्तीतिभवतीतिभावस्यास्तेशेतेव्रजतितिष्ठतीतींद्रियनित्यंवचनमौदुंबरायणः
॥ १ ॥ तत्रचतुष्ट्वंनोपपद्यतेयुगपदुत्पन्नानांवाशब्दनामितरेतरोपदेशःशास्त्रकृतोयोगश्चव्याप्तिमत्त्वात्तुशब्दस्याणी
यस्त्वाच्चशब्देनसंज्ञाकरणंव्यवहारार्थंलोकेतेषांमनुष्यवद्देवताभिधानंपुरुषविद्यानित्यत्वात्कर्मसंपत्तिर्मंत्रोवेदेषड्भाव
विकाराभवंतीतिवार्ष्यायणिर्जायतेऽस्तिविपरिणमतेवर्धतेऽपक्षीयतेविनश्यतीतिजायतइतिपूर्वभावस्यादिमाचष्टेना
परभावमाचष्टेनप्रतिषेधत्यस्तीत्युत्पन्नस्यसत्त्वस्यावधारणंविपरिणमतइत्यप्रच्यवमानस्यतत्वाद्विकारंवर्धतइतिस्वांगा
भ्युच्चयंसांयौगिकानांवार्थानांवर्धतेविजयेनेतिवावर्धतेशरीरेणेतिवाऽपक्षीयतइत्येतेनैवव्याख्यातःप्रतिलोमंविनश्य
तीत्यपरभावस्यादिमाचष्टेनपूर्वभावमाचष्टेनप्रतिषेधति ॥ २ ॥ अतोऽन्येभावविकाराएतेषामेवविकाराभवंतीतिह

स्माहंतेयथावचनमभ्यूहितव्यांननिर्बद्धाउपसर्गाअर्थान्निराहुरितिशाकटायनौनामाख्यातयोस्तुंकर्मोपसंयोगद्योतका
भवंत्युंच्चावचाःपदार्थाभवंतीतिगार्ग्यस्तद्यऽएषुपदार्थःप्राहुंरिमेतन्नामाख्यातयोरर्थविकरणमाइत्यर्वागर्थंप्रपरेत्येतस्य
प्रातिलोम्यंमभीत्याभिमुख्यंप्रतीत्येतस्यप्रातिलोम्यंमतिसुइत्यभिपूजितार्थंनिर्दुरित्येतयोःप्रातिलोम्यंन्यवेतिविनिग्र
हार्थीयांउदित्येतयोःप्रातिलोम्यंसमित्येकीभावंव्यपेत्येतस्यप्रातिलोम्यंमन्वितिसादृश्यापरभावंमपीतिसंसर्गमुपेत्युप
जनंपरीतिसर्वतोभावमधीत्युपरिभावंमैश्वर्यंवैवमुच्चावचानर्थान्प्राहुंस्तउपेक्षितव्याः ॥ ३ ॥ अथनिपातांउच्चाव
चेष्वर्थेषुनिपतंत्यंप्युपमार्थेऽपिकर्मोपसंग्रहार्थेऽपिंपदपूरणांस्तेषामेतेचत्वारउपमार्थेभवंतींवेतिभाषायांचान्वध्यायं
चांग्निरिवेंद्रइवेतिंनेतिप्रतिषेधार्थीयोभाषायांमुभयमन्वध्यायंनेंद्रंदेवममंसतेतिंप्रतिषेधार्थीयःपुरस्तादुपाचारंस्तस्य
यत्प्रतिषेधतिंदुर्मदासोनसुरायामित्युपमार्थीयउपरिष्टादुपाचारंस्तस्ययेनोपमिमीतेंचिदित्येषोऽनेककर्माचार्यश्चिदिदं
ब्रूयादितिपूजायांमाचार्यःकस्मादांचार्यआचारंग्राहयत्याचिनोत्यर्थांनाचिनोतिबुद्धिमितिवांदधिचिदित्युपमार्थंकु
ल्माषांश्चिदाहरेत्यवकुत्सितेंकुल्माषाःकुलेषुसीदंतिंनुइत्येषोऽनेककर्मेदंनुकरिष्यतीतिहेत्वपदेशेंकथंनुकरिष्यतीत्यनुपृ
ष्टेंनन्वेतदकार्षींदितिचांथाप्युपमार्थेभवति ॥ वृ॒क्षस्य॒नुतेंपुरुहूतव॒याः ॥ वृक्षस्येवतेपुरुहूतशाखावयाःशाखावेते
वांतायनाभवंतिंशाखाःखशयाःशक्नोतेर्वाथयस्यागमादर्थपृथक्त्वमहविज्ञायतेंनत्वौद्देशिकमिवविग्रहेणंपृथक्त्वात्सक

र्मोपसंग्रहश्चेतिसमुच्चयार्थउभाभ्यांसंप्रयुज्यतेऽहंचत्वंचवृत्रहन्नित्येतस्मिन्नेवार्थेदेवेभ्यश्चपितृभ्यएत्याकारोवेतिविचा
रणार्थेहंताहंपृथिवीमिमांनिदधानीहवेहवेत्यथापिसमुच्चयार्थेभवति ॥ ४ ॥ वायुर्वात्वामनुर्वात्वेति । अहइतिचह
इतिचविनिग्रहार्थीयौपूर्वेणसंप्रयुज्येतेअयमहेदंकरोत्वयमिदमिदंहकरिष्यतीदंनकरिष्यतीत्यथाप्युकारएतस्मिन्नेवा
र्थेउत्तरेणमृषेमेवदंतिसत्यमुतेवदंतीत्यथापिपदपूरणइदमुतदुहीत्येषोऽनेककर्मेदंहिकरिष्यतीतिहेत्वपदेशेकथंहिकरि
ष्यतीत्यनुपृष्टेकथंहिव्याकरिष्यतीत्यसूयायांकिलेतिविद्याप्रकर्षएवंकिलेत्यथापिननन्वित्येताभ्यांसंप्रयुज्यतेऽनुपृष्टेन
किलैवंनन्वकिलैवंमेतिप्रतिषेधेमाकार्षीर्माहार्षीरितिचखल्वितिचखलुकृत्वाखलुकृतमथापिपदपूरणएवंखलुतद्बभूवेति
शश्वदितिविचिकित्सार्थीयोभाषायांशश्वदेवमित्यनुपृष्टएवंशश्वदित्यस्वयंपृष्टेनूनमितिविचिकित्सार्थीयोभाषायामुभ
यमन्वध्यायंविचिकित्सार्थीयश्चपदपूरणश्चागस्त्यइंद्रायहविर्निरुप्यमरुद्भ्यःसंप्रदित्सांचकारसइंद्रएत्यपरिदेवयांचक्रे
॥ ५ ॥ ननूनमस्तिनोश्वःकस्तद्वेदयदद्भुतं । अन्यस्यचित्तमभिसंचरेण्यमुताधीतंविनश्यति ॥ ननूनमस्त्यद्यतनं
नोएवश्वस्तनमद्यास्मिन्द्यविद्युरित्यह्नोनामधेयंद्योततइतिसतःश्वउपाशंसनीयःकालोह्योहीनःकालः ॥ कस्तद्वेदयद
द्भुतं ॥ कस्तद्वेदयदभूतमिदमपीतरदद्भुतमभूतमिवान्यस्यचित्तमभिसंचरेण्यमभिसंचार्यन्योनानेयश्चित्तंचेततेरुता
धीतंविनश्यतीत्यप्याध्यातंविनश्यत्याध्यातमभिप्रेतमथापिपदपूरणः ॥ ६ ॥ नूनंसातेप्रतिवरंजरित्रेदुहीयदिन्द्रद

क्षिणामघोनी । शिक्षास्तोतृभ्योमातिधग्भगोनोबृहद्वदेमविदथेसुवीराः ॥ सातेप्रतिदुग्धांवरंजरित्रेवरोवरयितव्यो
भवतिजरितागरितादक्षिणामघोनीमघवतीमघमितिधननामधेयंमंहतेर्दानकर्मणोदक्षिणादक्षतेःसमर्धयतिकर्मणो
व्यृद्धंसमर्धयतीत्यपिवाप्रदक्षिणागमनादिशमभिप्रेत्यदिग्घस्तप्रकृतिर्दक्षिणोहस्तोदक्षतेरुत्साहकर्मणोदाशतेर्वास्याद्दा
नकर्मणोहस्तोहंतेःप्राशुर्हननेदेहिस्तोतृभ्यःकामान्मास्मानतिदंहीर्मास्मानतिहायदाभगोनोऽस्तुबृहद्वदेमस्वेवेदनेभ
गोभजतेर्बृहदितिमहतोनामधेयंपरिवृढंभवतिवीरवंतःकल्याणवीरावावीरोवीरयत्यमित्रान्वेतेर्वास्याद्गतिकर्मणोवी
रयतेर्वासीमितिपरिग्रहार्थीयोवापदपूरणोवा । प्रसीमादित्योअसृजत् ॥ प्रासृजदितिवाप्रासृजत्सर्वतइतिवाविसीम
तःसुरुचोवेनआवरितिचव्यवृणोत्सर्वतआदित्यःसुरुचआदित्यरश्मयःसुरोचनादपिवासीमेत्येतदनर्थकमुपबंधमाद
दीतपंचमीकर्माणंसीम्नःसीमतःसीमातोमर्यादातःसीमामर्यादाविषीव्यतिदेशावितित्वइतिविनिग्रहार्थीयंसर्वनामानु
दात्तमर्धनामेत्येके ॥ ७ ॥ ऋचांत्वःपोषमास्तेपुपुष्वान्गायत्रंत्वोगायतिशक्करीषु । ब्रह्मात्वोवदतिजातविद्यांयज्ञस्यमा
त्रांविमिमीतउत्वः ॥ इत्यृत्विक्कर्मणांविनियोगमाचष्टेऋचामेकःपोषमास्तेपुपुष्वान्होतर्गर्चनीगायत्रमेकोगायतिशक्क
रीषूद्गातागायत्रंगायतेःस्तुतिकर्मणःशक्कर्यऋचःशक्नोतेस्तद्यदाभिर्वृत्रमशकद्धंतुंतच्छक्करीणांशक्करीत्वमितिविज्ञायते
ब्रह्मैकोजातेजातेविद्यांवदतिब्रह्मासर्वविद्यःसर्वंवेदितुमर्हतिब्रह्मापरिवृढःश्रुततोब्रह्मपरिवृढंसर्वतोयज्ञस्यमात्रांविमि ॥ ३ ॥

मीतएकोऽध्वर्युरध्वर्युरध्वरयुरध्वरंयुनक्त्यध्वरस्यनेताध्वरंकामयतइतिवापिवाधीयानेयुरुपबंधोऽध्वरइतियज्ञनाम ध्वरतिर्हिंसाकर्मातत्प्रतिषेधोनिपातइत्यैकेतत्कथमनुदात्तप्रकृतिनामस्याद्दृष्टव्ययंतुभवत्युतत्वंसख्येस्थिरपीतमाहुरि तिद्वितीयायामुतोत्वस्मैतन्वंविसस्रइतिचतुर्थ्यामथापिप्रथमाबहुवचने ॥ ८ ॥ अक्षण्वन्तःकर्णवंतःसखायोमनोजवे ष्वसमाबभूवुः । आदघ्नासउपकक्षासउत्वेह्रदाइवस्नात्वाउत्वेदहृश्रे ॥ अक्षिमंतःकर्णवंतःसखायोऽक्षिचष्टेरनक्तेरि त्याग्रायणस्तस्मादेतेव्यक्ततरेइवभवतइतिहविज्ञायतेकर्णःकृंततेर्निकृत्तद्वारोभवत्यृच्छतेरित्याग्रायणऋच्छंतीवखेउ दगंतामितिहविज्ञायतेमनसांप्रजवेष्वसमाबभूवुरास्यदघ्नाअपरउपकक्षदघ्नाअपरआस्यमस्यतेरास्यंदतएनदन्नमिति वादघ्नंदघ्यतेःस्रवतिकर्मणोदस्यतेर्वास्याद्विदस्ततरंभवतिप्रस्नेयाह्रदाइवैकेप्रस्नेयाददृशिरेस्नानार्हाह्रदोह्रादतेःशब्दक र्मणोह्लादतेर्वास्याच्छीतीभावकर्मणोऽथापिसमुच्चयार्थेभवतिपर्यायाइवत्वदाश्विनमाश्विनंचपर्यायाश्चेत्यथयेप्रवृत्तेऽ र्थेऽमिताक्षरेषुग्रंथेषुवाक्यपूरणाआगच्छंतिपदपूरणास्तेमिताक्षरेष्वनर्थकाःकमीमिद्विति ॥ ९ ॥ निष्टृक्कासश्चि दिन्नरोभूरितोकावृकादिव । बिभ्यस्यंतोववाशिरेशिशिरंजीवनायकं ॥ शिशिरंजीवनाय ॥ शिशिरंशृणातेःशंस्नाते र्वा । एमेनंसृजतासुते । आसृजतैनंसुते । तमिद्वर्धंतुनोगिरः । तंवर्धयंतुनोगिरःस्तुतयोगिरोगृणातेः । अयमुतेस मतसि । अयंतेसमतसीवोऽपिदृश्यतेसुविदुरिवसुविज्ञायेतेइवाथापिनेत्येषइदित्येतेनसंप्रयुज्यतेपरिभये ॥ १० ॥

हविर्भिरेके स्वरितः सं चंते सुन्वंत एके सवनेषु सोमान् । शचीर्मदंत उत दक्षिणाभिर्नेज्जिह्मायंत्यो नरकं पतामेतिं नरकंन्यर
कंनीचैर्गमनंनास्मिन्नमणंस्थानंमल्पमप्यस्तीति वांथापि न चेत्येष इदित्येतेनं संप्रयुज्यते नुपृष्टेन चेत्सुरां पिबंतीतिं सुरासुनो
तैरेवमुच्चावचेष्वर्थेषु निपतंतिं त उपेक्षितव्याः ॥ ११ ॥ इतीमानि चत्वारिं पदजातान्यनुक्रांतानिं नामाख्याते चोपस
र्गनिपाताश्चं तत्र नामान्याख्यातजानीतिं शाकटायनो नैरुक्तसमयश्चं न सर्वाणीति गार्ग्यो वैयाकरणानां चैकें तद्यत्र स्वरसं
स्कारौ समर्थौं प्रादेशिकेन गुणेनान्वितौ स्यातां संविज्ञातानि तानिं यथा गौरश्वः पुरुषो हस्तींत्यथ चेत्सर्वाण्याख्यातजानि
नामानि स्युंर्यः कश्च तत्कर्म कुर्यात्सर्वं तत्सत्वं तथाचक्षीरंन्यः कश्चाध्वानमश्नुवीतांश्वः स वचनीयः स्यांद्यत्किंचित्तृंद्यात्तृणं तं
दथापि चेत्सर्वाण्याख्यातजानि नामानि स्युर्यावद्भिर्भावैः संप्रयुज्येतं तावद्भ्यो नामधेयप्रतिलंभः स्यांत्तत्रैवं स्थूणा दरश
या वा संजनी च स्यात् ॥ १२ ॥ अथापि य एषां न्यायवान्कार्मनामिकः संस्कारों यथा चापि प्रतीतार्थानि स्युस्तथैनान्या
चक्षीरंन्पुरुषं पुरिशय इत्याचक्षीरंन्नष्टेत्यश्वं तर्दनमिति तृणमथापि निष्पन्नेऽभिव्याहारेंऽभिविचारयंतिं प्रथनात्पृथिवी
त्याहुः क एनामप्रथयिष्यंत्किमाधारश्चेत्यथानन्वितेऽर्थेंऽप्रादेशिके विकारें पदेभ्यः पदेतरार्धान्त्संचस्कार शाकटायनं ए
तेः कारितं चं यकारादिं चांतकरणमस्तेः शुद्धं च सकारादिं चांथापि सत्त्वपूर्वो भाव इत्यांहुरपरस्माद्भावात्पूर्वस्य प्रदेशो नोप
पद्यत इतिं तदेतन्नोपपद्यते ॥ १३ ॥ यथो हि नु वा एतं तद्यत्र स्वरसंस्कारौ समर्थौं प्रादेशिकेन गुणेनान्वितौ स्यातां सर्वं प्रा

देशिकमित्येवंसत्यनुपालंभएषभवतियथोएतद्यःकश्चतत्कर्मकुर्यात्सर्वंतत्सत्वंतथाचक्षीरन्निितिपश्यामःसमानकर्मणां
नामधेयप्रतिलंभमेकेषांनैकेषांयथातक्षापरिव्राजकोजीवनोभूमिजइत्येतेनैवोत्तरःप्रत्युक्तोयथोएतद्यथाचापिप्रतीता
र्थानिस्युस्तथैनान्याचक्षीरन्निितिसंत्यल्पप्रयोगाःकृतोप्यैकपदिकायथाव्रततिर्दमूनाजाट्यआट्णारोजागरूकोदर्विहोमी
तियथोएतन्निष्पन्नेऽभिव्याहारेभिविचारयंतीतिभवतिहिनिष्पन्नेऽभिव्याहारेयोगपरीष्टिःप्रथनात्पृथिवीत्याहुःकए
नामप्रथयिष्यत्किमाधारश्चेत्यथवैदर्शनेनंपृथुरप्रथिताचेदप्यन्यैरथाप्येवंसर्वएवदृष्टप्रवादाउपालभ्यंतेयथोएतत्पदे
भ्यःपदेतरार्धान्त्संचस्कारेतियोनन्वितेर्थेसंचस्कारसतेनगर्ह्यःसैषापुरुषगर्हानशास्त्रगर्हाइतियथोएतदपरस्माद्भावा
त्पूर्वस्यप्रदेशोनोपपद्यतइतिपश्यामःपूर्वोत्पन्नानांसत्वानामपरस्माद्भावान्नामधेयप्रतिलंभमेकेषांनैकेषांयथाबिल्वादो
लंबचूडकइतिबिल्वंभरणाद्वाभेदनाद्वा ॥ १४ ॥ अथापीदमंतरेणमंत्रेष्वर्थप्रत्ययोनविद्यतेऽर्थमप्रतियतोनात्यंतं
स्वरसंस्कारोद्देशस्तदिदंविद्यास्थानंव्याकरणस्यकात्स्न्र्यंस्वार्थसाधकंचयदिमंत्रार्थप्रत्ययायानर्थकंभवतीतिकौत्सोऽन
र्थकाहिमंत्रास्तदेतेनोपेक्षितव्यंनियतवाचोयुक्तयोनियतानुपूर्व्याभवंत्यथापिब्राह्मणेनरूपसंपन्नाविधीयंतेउरुप्रथस्वे
तिप्रथयतिप्रोहाणीतिप्रोहत्यथाप्यनुपपन्नार्थाभवंत्योषधेत्रायस्वैनंस्वधितेमैनंहिंसीरित्याहहिंसन्नथापिविप्रतिषिद्धा
र्थाभवंति । एकएवरुद्रोऽवतस्थेनद्वितीयः । असंख्यातासहस्राणियेरुद्राअधिभूम्याम् ॥ अशत्रुरिंद्रजज्ञिषेशतंसेना

अजयत्साकमिंद्रईत्यथापिजानंतंसंप्रेष्यंत्यग्नयेसमिध्यमानायांनुब्रूहीत्यथाप्याहादितिःसर्वमित्यंदितिद्यौंरदितिरंतरि
क्षमितितदुपरिष्टाद्याख्यास्यामोथाप्यविस्पष्टार्थाभवन्त्यम्यग्यादृश्मिन्जारयायिकाणुकेति ॥ १५ ॥ अर्थवंतःश
ब्दसामान्यांदेतद्वैयज्ञस्यसमृद्धंयद्रूपसमृद्धंयत्कर्मक्रियमाणंमृग्यजुर्वाभिवदतीतिचब्राह्मणंक्रीळंतौपुत्रैर्नप्तृभिरितिय
थोएतंन्नियतवाचोयुक्तयोंनियतानुपूर्व्याभवंतीतिंलौकिकेष्वप्येतंद्यथेंद्राग्नीपितापुत्राववितियथोऽएतंद्ब्राह्मणेनरूपसंप
न्नाविधीयंतईत्युदितानुवादःसभवतियथोऽएतंदनुपपन्नार्थाभवंतींत्याम्नायवचनादहिंसाप्रतीयेतंयथोऽएतद्विप्रतिषि
द्धार्थाभवंतीतिंलौकिकेष्वप्येतंद्यथासपत्नोऽयंब्राह्मणोऽनमित्रोराजेतिंयथोएतज्जानंतंसंप्रेष्यतीतिंजानंतमभिवादय
तेंजानतेमधुपर्कंप्राहेतिंयथोऽएतददितिःसर्वमितिंलौकिकेष्वप्येतंद्यथासर्वरसाऽअनुप्राप्ताःपानीयमितिंयथोएतदवि
स्पष्टार्थाभवंतीतिंनैषस्थाणोरपराधोंयदेनमंधोनपश्यतिंपुरुषापराधःसभवतिंयथाजानपदीषुविद्यातःपुरुषविशेषोभव
तिंपारोवर्यवित्सुतुखलुवेदितृषुंभूयोविद्यःप्रशस्योभवति ॥ १६ ॥ अथापीदमंतरेणंपदविभागोनविद्यते । अव
सायपद्वतेरुद्रमृळेतिंपद्वदवसंगावंःपथ्यदनमवतेर्गत्यर्थस्यासोनामकरणंस्तस्मान्नावगृह्णंत्यवसायाश्वानितिंस्यतिरुपसृ
ष्टोविमोचनेंतस्मादवगृह्णंतिंदूतोनिर्ऋत्याइदमाजगामेतिंपंचम्यर्थप्रेक्षावांषष्ठ्यर्थप्रेक्षावाःकारांतंपरोनिर्ऋत्याआचक्ष्वें
तिंचतुर्थ्यर्थप्रेक्षैकारांतंपरःसंनिकर्षःसंहितांपदप्रकृतिःसंहितांपदप्रकृतीनिसर्वचरणानांपार्षदांन्यथापियाज्ञेदैवतेंनब्रह ॥ ५ ॥

वःप्रदेशाभवंतितदेतेनोपेक्षितव्यंतेचेद्ब्रूयुर्लिंगज्ञाअंत्रस्मइतिं । इंद्रंनत्वाशवसादेवतावायुंपृणंतीतिवायुलिंगंचेंद्रलिंगं
चाग्नेयेमंत्रेऽग्निरिवमन्योत्विषितःसहस्वेतितथाऽग्निर्मान्यवेमंत्रेत्विषितोज्वलितस्त्विषिरित्यप्यस्यदीप्तिनामभवंत्यथा
पिज्ञानप्रशंसाभवत्यज्ञाननिंदाच ॥ १७ ॥ स्थाणुरयंभारहारःकिलाभूदधीत्यवेदंनविजानातियोर्थं । योर्थज्ञइत्स
कलंभद्रमश्नुतेनाकमेतिज्ञानविधूतपाप्मा । यद्गृहीतमविज्ञातंनिगदेनैवशब्द्यते । अनग्नाविवशुष्कैधोनतज्ज्वलतिकर्हि
चित् । स्थाणुस्तिष्ठतेरर्थोऽर्तेररणस्थोवा ॥ १८ ॥ उतत्वःपश्यन्नददर्शवाचमुतत्वःशृण्वन्नशृणोत्येनां । उतोत्वस्मै
तन्वं१ विसस्रेजायेवपत्यउशतीसुवासाः ॥ अप्येकःपश्यन्नपश्यतिवाचमपिचशृण्वन्नशृणोत्येनामित्यविद्वांसमाहार्ध
मप्येकस्मैतन्वंविसस्रइतिस्वमात्मानंविवृणुतेज्ञानंप्रकाशनमर्थस्याहानयावाचोपमोत्तमयावाचाजायेवपत्येकामयमा
नासुवासाऋतुकालेषुसुवासाःकल्याणवासाःकामयमानाऽऋतुकालेषुयथासएनांपश्यतिसशृणोतीत्यर्थज्ञप्रशंसातस्यो
त्तराभूयसेनिर्वचनाय ॥ १९ ॥ उतत्वंसख्येस्थिरपीतमाहुर्नैनंहिन्वंत्यपिवाजिनेषु । अधेन्वाचरतिमाययैषवाचं
शुश्रुवाँअफलामपुष्पां ॥ अप्येकंवाक्सख्येस्थिरपीतमाहूरममाणंविपीतार्थंदेवसख्येरमणीयेस्थानइतिवाविज्ञातार्थं
यंनाप्नुवंतिवाग्ज्ञेयेषुबलवत्स्वप्यधेन्वाह्येषचरतिमाययावाक्प्रतिरूपयानास्मैकामान्दुग्धेवाग्दोह्यान्देवमनुष्यस्थानेषु
योवाचंश्रुतवान्भवत्यफलामपुष्पामित्यफलास्माअपुष्पावाग्भवतीतिवाकिंचित्पुष्पफलेतिवार्थंवाचःपुष्पफलमाहया

ज्ञदैवतैंपुष्पफलेदेवताध्यात्मेवांसाक्षात्कृतधर्माणऋषयोबभूवुंस्तेऽवरेभ्योऽसाक्षात्कृतधर्मभ्यंऽउपदेशेनमंत्रान्त्संप्रादुं
रुपदेशायग्लायंतोऽवरैंबिल्मग्रहणायेमंग्रंथंसमाम्नासिषुर्वेदंचवेदांगानिर्चबिल्मंभिल्मंभासनमितिर्वैतावंतःसमानक
र्माणोंधातवोधातुर्दधातेंरेतावंत्यस्यसत्त्वस्यनामधेयान्येतावतामर्थानामिदमभिधानंनैघंटुकमिदंदेवतानामंप्राधान्ये
नेदमितिंतद्यदन्यदैवतेमंत्रेंनिपततिनैघंटुकंतत् । अश्वंनत्वावारंवंतं । अश्वमिवत्वावालवंतंवालादंशवारणार्थाभवं
तिंदंशोदशतेंः । मृगोनभीमःकुंचरोगिंरिष्ठाः । मृगइवभीमःकुचरोगिरिष्ठांमृगोमार्ष्टेर्गतिकर्मणोंभीमोबिभ्यत्यस्मां
द्धीष्मोऽप्येतस्मादेवंकुचरइतिचरतिकर्मकुत्सितंमथचेद्देवताभिधानंक्वायंनचरतीतिंगिरिष्ठागिरिस्थायींगिरिःपर्वतः
समुद्गीर्णोभवतिंपर्ववान्पर्वतंःपर्वपुनःपृणातेःप्रीणातेर्वार्धमासपर्वदेवानस्मिन्प्रीणंतीतिंतत्प्रकृतीतरंत्संधिसामान्यान्मे
घस्थायींमेघोपिगिरिरेतस्मादेवंतद्यानिनामानिंप्राधान्यस्तुतीनांदेवतानांतद्दैवतमित्याचक्षतेंतदुपरिष्टाद्व्याख्यास्या
मोंनैघंटुकानिनैगमानीहेह ॥ २० ॥ (समाम्नायस्तत्रचतुष्टंमतोऽन्येऽथनिपातांवायुर्वात्वाननूनंनूनंसातऋचांत्वो ॥ ६ ॥
क्षण्वंतोंनिष्टत्क्रासोहविर्भिंरितीमान्यथापियोयथोहिंन्वथापीदमर्थवंतोंऽथापीदंस्थाणुरयंमुतत्वःपश्यन्नुतत्वंसख्येविं
शतिः) ॥ इतिनिरुक्तपूर्वषट्केप्रथमोऽध्यायः ॥ १ ॥ ॥ छ ॥ ॥ छ ॥

ॐ ॥ अथनिर्वचनंतद्येषुपदेषुस्वरसंस्कारौसमर्थौप्रादेशिकेनगुणेनान्वितौस्यातांतथातानिनिर्ब्रूयादथानन्वितेऽ
र्थेऽप्रादेशिकेविकारेऽर्थनित्यःपरीक्षेतकेनचिद्वृत्तिसामान्येनाविद्यमानेसामान्येऽप्यक्षरवर्णसामान्यान्निर्ब्रूयान्नत्वेवन
निर्ब्रूयान्नसंस्कारमाद्रियेतविशयवत्योहिवृत्तयोभवंतियथार्थंविभक्तीःसंनमयेत्प्रत्तमवत्तमितिधात्वादीएवशिष्येतेअ
थाप्यस्तेर्निवृत्तिस्थानेष्वादिलोपोभवतिस्तःसंतीत्यथाप्यंतलोपोभवतिगत्वागतमित्यथाप्युपधालोपोभवतिजग्मतुर्ज
ग्मुरित्यथाप्युपधाविकारोभवतिराजादंडीत्यथापिवर्णलोपोभवतितत्त्वायामीत्यथापिद्विवर्णलोपस्तृचइत्यथाप्यादि
विपर्ययोभवतिज्योतिर्घनोबिंदुर्वाट्यइत्यथाप्याद्यंतविपर्ययोभवतिस्तोकारज्जुःसिकतास्तर्क्वित्यथाप्यंतव्यापत्तिर्भव
ति ॥१॥ ओघोमेघोनाधोगाधोवधूर्मध्वित्यथापिवर्णोपजनआस्थद्वारोभरूजेतितद्यत्रस्वरादनंतरांतस्थांतर्धातुभवति
तद्विप्रकृतीनांस्थानमितिप्रदिशंतितत्रसिद्धायामनुपपद्यमानायामितरयोपपिपादयिषेत्तत्राप्येकेऽल्पनिष्पत्तयोभवंति
तद्यथैतदूतिर्मृदुःपृथुःपृषतःकुणारुमित्यथापिभाषिकेभ्योधातुभ्योनैगमाःकृतोभाष्यंतेदमूनाःक्षेत्रसाधाइत्यथापिनै
गमेभ्योभाषिकाउष्णंघृतमित्यथापिप्रकृतयएवैकेषुभाष्यंतेविकृतयएकेषुशवतिर्गतिकर्माकंबोजेष्वेवभाष्यतेकंबोजाः
कंबलभोजाःकमनीयभोजावाकंबलःकमनीयोभवतिविकारमस्यार्येषुभाषंतेशवइतिदातिर्लवनार्थेप्राच्येषुदात्रमुदीच्ये
ष्वेवमेकपदानिनिर्ब्रूयादथतद्धितसमासेष्वेकपर्वसुचानेकपर्वसुचपूर्वंपूर्वमपरमपरंप्रविभज्यनिर्ब्रूयाद्दंड्यःपुरुषोदंडपुरु

षोदंडमर्हतीतिवादंडेनसंपद्यतइतिवादंडोददतेर्धारयतिकर्मणोऽक्रूरोददतेमणिमित्यभिभाषंतैदमनादित्यौपमन्यवो
दंडमस्याकर्षतेतिगर्हायांकक्ष्यारज्जुरश्वस्यकक्षंसेवतेकक्षोगाहतेःक्सइतिनामकरणंःख्यातेर्वानर्थकोऽभ्यासःकिमस्मि
न्ख्यानमितिकषतेर्वातत्सामान्यान्मनुष्यकक्षोबाहुमूलसामान्यादश्वस्य ॥ २ ॥ राज्ञःपुरुषोराजपुरुषोराजाराज
तेःपुरुषःपुरिषादःपुरिशयःपूरयतेर्वापूरयत्यंतरित्यंतरंपुरुषमभिप्रेत्य ॥ यस्मात्परंनापरमस्तिकिंचिद्यस्मान्नाणीयोन
ज्यायोऽस्तिकश्चित् । वृक्षइवस्तब्धोदिवितिष्ठत्येकस्तेनेदंपूर्णंपुरुषेणसर्वमित्यपिनिगमोभवतिविश्वकद्राकर्षोवीतिचक
द्रइतिश्वगतौभाष्यतेद्रातीतिगतिकुत्सनाकद्रातीतिद्रातिकुत्सनाचकद्रातिकद्रातीतिसतोऽनर्थकोऽभ्यासस्तदस्मिन्न
स्तीतिविश्वकद्रःकल्याणवर्णरूपःकल्याणवर्णस्येवास्यरूपंकल्याणंकमनीयंभवतिवर्णोवृणोतेरूपंरोचतेरेवंतद्धितसमा
सान्निर्ब्रूयान्नैकपदानिनिर्ब्रूयान्नावैयाकरणायनानुपसन्नायाऽनिदंविदेवानित्यंह्यविज्ञातुर्विज्ञानेऽसूयोपसन्नायतुनिर्ब्रू
याद्योवालंविज्ञातुंस्यान्मेधाविनेतपस्विनेवा ॥ ३ ॥ विद्याहवैब्राह्मणमाजगामगोपायमाशेवधिष्टेऽहमस्मि । अ
सूयकायानृजवेऽयतायनमाब्रूयावीर्यवतीतथास्यां । यआतृणत्त्यवितथेनकर्णावदुःखंकुर्वन्नमृतंसंप्रयच्छन् । तंमन्ये
तपितरंमातरंचतस्मैनद्रुह्येत्कतमच्चनाह । अध्यापितायेगुरुंनाद्रियंतेविप्रावाचामनसाकर्मणावा । यथैवतेनगुरोर्भो
जनीयास्तथैवतान्नभुनक्तिश्रुतंतत् । यमेवविद्याःशुचिमप्रमत्तंमेधाविनंब्रह्मचर्योपपन्नं । यस्तेनद्रुह्येत्कतमच्चनाहतस्मै

माब्रूयानिधिपायब्रह्मन्नितिनिधिःशेवधिरिति ॥ ४ ॥ अथातोऽनुक्रमिष्यामोंगौरितिपृथिव्यानामधेयँयद्दूरंगताभव
तिंयच्चास्यांभूतानिगच्छंतिगातेर्वौकारोनामकरणोंऽथापिपशुनामेहभवंत्येतस्मादेवांऽथाप्यस्यांताद्धितेनंकृत्स्नवन्निग
माभवंतिंगोभिःश्रीणीतमत्सरमितिंपयसोमत्सरंःसोमोमंदतेस्तृप्तिकर्मणोंमत्सरइतिलोभनामांभिमत्तएनेनधनंभवतिं
पयःपिबतेर्वाप्यायतेर्वांक्षीरंक्षरतेर्घसेर्वैरोनामकरणंउशीरमितियथांशुंदुहंतोअध्यासतेगवींत्यधिषवणचर्मणोंऽशुःशम
ष्टमात्रोभवंत्यननायशंभवतीतिवांचर्मचरतेर्वोंच्चृत्तंभवतीतिवांथापिचर्मचश्लेष्माचंगोभिःसंनद्धोअसिवीळयस्वेतिरथ
स्तुतांवथापिस्नावचश्लेष्माचंगोभिःसंनद्धापततिप्रसूतेतीषुस्तुतौंज्यापिगौरुच्यतेंगव्याचेत्ताद्धितंमथचेन्नगव्यागमय
तीषूनिति ॥ ५ ॥ वृक्षेवृ॑क्षे॒नियं॑तामीमय॒द्गौस्त॒तो॒वय॒ःप्रप॑तान्पूरु॒षाद॑ः । वृक्षेवृक्षेधनुषिधनुर्षिवृक्षोव्रश्चनांद्धृत्वाक्षा
न्तिष्ठतीतिवांक्षाक्षियतेर्निवासकर्मणोंनियतामीमयद्गौःशब्दंकरोतिंमीमयतिःशब्दकर्मांततोवयःप्रपतंतिंपुरुषानदना
यंविरितिशकुनिनामंवेतेर्गतिकर्मणोंऽथापीषुनामेहभवंत्येतस्मादेवांदित्यो(ऽपि)पौरुच्यते । उ॒तादः॑परु॒षेगवि॑ । पर्वव
तिभास्वतीत्यौपमन्यवोंऽथाप्यस्यैकोरश्मिश्चंद्रमसंप्रतिदीप्यतेंतदेतेनोपेक्षितव्यमादित्यतोऽस्यदीप्तिर्भवतीतिंसुषुम्नः
सूर्यरश्मिश्चंद्रमागंधर्वइत्यपिनिगमोभवतिंसोऽपिगौरुच्यते । अत्राहगोरमन्वतेतिंतदुपरिष्टाद्व्याख्यास्यामंःसर्वेऽपि
रश्मयोगावउच्यंते ॥ ६ ॥ ताव॒ांवास्तू॑न्युश्मसि॒गम॑ध्यै॒यत्र॒गावो॒भूरि॑शृंगाअ॒यास॑ः । अत्राह॒तदु॑रुगाय॒स्य॒वृष्णः॑पर॒मं

पदमवभातिभूरि । तानिवांवास्तूनिकामयामहेगमनाययत्रगावोभूरिशृंगाबहुशृंगाभूरीतिबहुनोनामधेयंप्रभवतीति
सतःशृंगंश्रयतेर्वाश्रृणातेर्वाशम्नातेर्वाशरणायोद्गतमितिर्वाशिरसोनिर्गतमितिर्वायासोऽयनास्तत्रतदुरुगायस्यविष्णो
र्महागतेःपरमंपदंपरार्ध्यस्थमवभातिभूरि । पादःपद्यतेस्तन्निधानात्पदंपशुपादप्रकृतिःप्रभागपादःप्रभागपादसामान्या
दितराणिपदान्येवमन्येषामपिसत्त्वानांसंदेहाविद्यंतेतानिचेत्समानकर्माणिसमाननिर्वचनानिनानाकर्माणिचेन्नाना
निर्वचनानियथार्थंनिर्वक्तव्यानीतीमान्येकविंशतिःपृथिवीनामधेयान्यनुक्रांतानितत्रनिर्ऋतिर्निरमणादृच्छतेःकृच्छ्रा
पत्तिरितरासापृथिव्यासंदिह्यतेतयोर्विभागस्तस्याएषाभवति ॥ ७ ॥ यईंचकारनसोअस्यवेदयईंददर्शहिरुगिन्नुत
स्मात् । समातुर्योनापरिवीतोअंतर्बहुप्रजानिर्ऋतिमाविवेश । बहुप्रजाःकृच्छ्रमापद्यतइतिपरिव्राजकावर्षकर्मेतिनैरु
क्तायईंचकारेतिकरोतिकिरतीसंदिग्धौवर्षकर्मणानसोऽस्यवेदमध्यमःसएवास्यवेदमध्यमोयोददर्शादित्योपहितंसमा
तुर्योनौमातांतरिक्षंनिर्मीयंतेऽस्मिन्भूतानियोनिरंतरिक्षंमहानवयवःपरिवीतोवायुनायमपीतरोयोनिरेतस्मादेवंपरियु
तोभवतिबहुप्रजाभूमिमापद्यतेवर्षकर्मणाशाकपूणिःसंकल्पयांचक्रेसर्वादेवताजानामीतितस्मैदेवतोभयलिंगाप्रादुर्बभू
वतांनजज्ञेतांपप्रच्छविविदिषाणित्वेतिसास्माएतामृचमादिदेशैषामद्देवतेति ॥ ८ ॥ अयंसशिङ्क्तेयेनगौरभीवृता
मिमातिमायुंध्वसनावधिश्रिता । साचित्तिभिर्निहिचकारमर्त्यंविद्युद्भवन्तीप्रतिवव्रिमौहत । अयंसशब्दायतेयेन

गौरभिप्रवृत्तांसिमातिमायुंशब्दंकरोतिंमायुमिवादित्यमितिवांवागेषामाध्यमिकांध्वंसनेमेघेऽधिश्रितांसाचित्तिभिः
कर्मभिर्नीचैर्निकरोतिमर्त्यैविद्युद्भवंतीप्रत्यूहतेवाम्रिंवम्रिरितिरूपनामवृणोतीतिसतोंवर्षेणप्रच्छाद्यंपृथिवींतत्पुनरादत्ते
॥ ९ ॥ हिरण्यनामान्युत्तराणिपंचदशंहिरण्यंकस्मांद्धियतऽआयम्यमानमितिवांह्रियतेजनाज्जनमितिवांहितरमणं
भवतीतिवांहृदयरमणंभवतीतिवांहर्यतेर्वास्यात्प्रेप्साकर्मणोंऽतरिक्षनामान्युत्तराणिषोळशांतरिक्षंकस्मांदंतराक्षांतंभवं
त्यंतरेमेइतिवांशरीरेष्वंतरक्षयमितिवांतत्रसमुद्रइत्येतंत्पार्थिवेनसमुद्रेणसंदिह्यतेंसमुद्रः कस्मांत्समुद्रवंत्यस्मादापःसम
भिद्रवंत्येनमापःसंमोदंतेऽस्मिन्भूतानिंसमुदकोभवतिंसमुनत्तीतिवातयोर्विभागस्तत्रेतिहासमाचक्षतेंदेवापिश्चार्ष्टिषे
णःशंतनुश्चंकौरव्यौभ्रातरौबभूवतुःसशंतनुःकनीयानभिषेचयांचक्रेंदेवापिस्तपःप्रतिपेदेंततःशंतनोराज्येंद्वादशवर्षाणि
देवोनववर्षेतमूचुर्ब्राह्मणांऽअधर्मस्त्वयाचरितोंज्येष्ठंभ्रातरमंतरित्याभिषेचितंतस्मात्तेदेवोनवर्षतीतिंसशंतनुर्देवापिंशि
शिक्षराज्येनंतमुवाचदेवापिःपुरोहितस्तेऽसानियाजयानिचत्वेतिंतस्यैतद्वर्षकामसूक्तंतस्यैषाभवति ॥ १० ॥ आर्ष्टि
षेणोहोत्रमृषिर्निषीदन्देवापिर्देवसुमतिंचिकित्वान् । सउत्तरस्मादधरंसमुद्रमपोदिव्याअसृजद्वर्ष्याअभि । आर्ष्टिषेण
ऋष्टिषेणस्यपुत्रइषितसेनस्येतिवांसेनासेश्वरासमानगतिर्वापुत्रःपुरुत्रायतेनिपरणाद्वांपुंनरकंततस्त्रायतइतिवांहोत्रमृ
षिर्निषीदन्नृषिर्दर्शनांत्स्तोमान्ददर्शेत्यौपमन्यवस्तद्यदेनांस्तपस्यमानान्ब्रह्मस्वयंभ्वभ्यानर्षत्तऋषयोऽभवंस्तदृषीणामृषि

त्वमितिविज्ञायतेंदेवापिर्देवानामाष्ट्यांस्तुत्याचप्रदानेनचंदेवसुमतिंदेवानांकल्याणींमतिंचिकित्वांश्चेतनावान् । सउ
त्तंरस्मादधरंसमुद्रं । उत्तरउद्धततरोभवंत्यधरोऽधोऽरोऽधोनधावतीत्यूर्ध्वगतिःप्रतिषिद्धांतस्योत्तराभूयसेनिर्वचनाय
॥ ११ ॥ यद्देवापिःशंतनवेपुरोहिंतोहोत्रायंवृतःकृपयन्नदींधेत् । देवश्रुतंवृष्टिवनिंरराणोबृहस्पतिर्वाचंमस्माऽअय
च्छत् । शंतनुःशंतनोस्त्वितिवांशमस्मैतन्वाऽअस्त्वितिवांपुरोहितःपुरएनंदधातिंहोत्रायवृतःकृपायमाणोऽन्वध्यायंदे
वश्रुतंदेवाएनंशृण्वंतिंवृष्टिवनिंवृष्टियाचिनंरराणोरातिरभ्यस्तोंबृहस्पतिर्ब्रह्मासींत्सोऽस्मैवाचमयच्छंद्बृहदुपव्याख्या
तं ॥ १२ ॥ साधारणान्युत्तराणिषड्दिवश्चादित्यस्यचंयानित्वस्यप्राधान्येनोपरिष्टात्तानिव्याख्यास्यामंआदित्यःक
स्मांदादत्तेरसानादत्तेभासंज्योतिषांमादीप्तोभासेतिवांदितेःपुत्रइतिवांल्पप्रयोगंत्वस्यैतदांर्चाभ्याम्नायेसूक्तभाक्सूर्यमा
दितेयमदितेःपुत्रमन्यासामपिदेवतानांमादित्यप्रवादाःस्तुतयोभवंतिंतद्यथैतन्मित्रस्यवरुणस्यांर्यम्णोदक्षस्यभगस्यांश
स्येत्यंथापिमित्रावरुणयोः । आदित्यादानुंनस्पतींदानपती । अथापिमित्रस्यैकस्य । प्रसमिंत्रमतोंऽअस्तुप्रयंस्वान्य
स्तआदित्यशिक्षतिव्रतेनेत्यपिनिगमोभवंत्यथापिवरुणस्यैकस्य । अथांवयमांदित्यव्रतेतवं । व्रतमितिकर्मनामंनिवृत्ति
कर्मवारयतींतिंसतइदमपीतरद्व्रतंमेतस्मादेववृणोतीतिसतोंऽन्नमपिव्रतमुच्यतेंयदावृणोतिशरीरं ॥ १३ ॥ स्वरादि
त्योभवतिंसुअरणःसुईरणंःस्वृतोरसान्स्वृतोभासंज्योतिषांस्वृतोभासेतिवैंतेनद्यौर्व्यांख्याता । पृश्निरादित्योभवतिं

प्राश्नुतएनंवर्णइतिनैरुक्ताः संस्प्रष्टारसान्त्संस्प्रष्टाभासंज्योतिषांसंस्पृष्टोभासेतिवाथद्यौःसंस्पृष्टाज्योतिर्भिःपुण्यकृद्भिश्च । नाकआदित्योभवतिनेतारसानांनेताभासांज्योतिषांप्रणयोऽथद्यौःकमितिसुखनामतत्प्रतिषिद्धंप्रतिषिध्येतनवाअमुंलोकंजग्मुषेकिंचनाकंनवाअमुंलोकंगतवतेकिंचनासुखंपुण्यकृतोह्येवतत्रगच्छंति । गौरादित्योभवतिगमयतिरसान्गच्छत्यंतरिक्षेऽथद्यौर्यत्पृथिव्याअधिदूरंगताभवतियच्चास्यांज्योतींषिगच्छंति । विष्टबादित्योभवत्याविष्टोरसानांविष्टोभासांज्योतिषामाविष्टोभासेतिवाथद्यौराविष्टाज्योतिर्भिःपुण्यकृद्भिश्च । नभआदित्योभवतिनेतारसानांनेताभासांज्योतिषांप्रणयोऽपिवाभनएवस्याद्विपरीतोननभातीतिवैतेनद्यौर्व्याख्याता ॥ १४ ॥ रश्मिनामान्युत्तराणिपंचदशरश्मिर्यमनात्तेषामादितःसाधारणानिपंचाश्वरश्मिभिर्दिङ्नामान्युत्तराण्यष्टौदिशःकस्माद्दिशतेरासदनादपिवाभ्यशनात्तत्रकाष्ठाइत्येतदनेकस्यापिसत्त्वस्यनामभवतिकाष्ठादिशोभवंतिक्रांत्वास्थिताभवंतिकाष्ठाउपदिशोभवंतीतरेतरंक्रांत्वास्थिताभवंत्यादित्योऽपिकाष्ठोच्यतेक्रांत्वास्थितोभवत्याज्यंतोऽपिकाष्ठोच्यतेक्रांत्वास्थितोभवत्यापोऽपिकाष्ठाउच्यंतेक्रांत्वास्थिताभवंतीतिस्थावराणां ॥ १५ ॥ अतिष्ठंतीनामनिवेशनानांकाष्ठानांमध्येनिहितंशरीरं । वृत्रस्यनिण्यंविचरंत्यापोदीर्घतमआशयदिंद्रशत्रुः । अतिष्ठंतीनामनिविशमानानामित्यस्थावराणांकाष्ठानांमध्येनिहितंशरीरंमेघःशरीरंशृणातेःशम्नातेर्वावृत्रस्यनिण्यंनिर्णामंविचरंतिविजानंत्यापइतिदीर्घंद्राघतेस्तमस्तनोतेराशयदाशेतेरिंद्रशत्रुरिंद्रोऽ

स्यशमयितावाशातयितावातस्मादिंद्रशत्रुस्तत्कोवृत्रोमेघइतिनैरुक्तास्त्वाष्ट्रोऽसुरइत्यैतिहासिकाअपांचज्योतिषश्चमि
श्रीभावकर्मणोवर्षकर्मजायतेतत्रोपमार्थेनयुद्धवर्णाभवंत्यहिवत्तुखलुमंत्रवर्णाब्राह्मणवादाश्चविवृध्याशरीरस्यस्रोतांसि
निवारयांचकारतस्मिन्हतेप्रसस्यंदिरआपस्तदभिवादिन्येषर्ग्भवति ॥ १६ ॥ दासपत्नीरहिगोपाअतिष्ठन्निरुद्धाआपः
पणिनेवगावः । अपांबिलमपिहितंयदासीद्वृत्रंजघन्वाँऽअपतद्ववार । दासपत्नीर्दासादिपत्न्योदासोदस्यतेरुपदासयति
कर्माण्यहिगोपाअतिष्ठन्नहिनागुप्ताअहिरयनादेत्यंतरिक्षेऽयमपीतरोऽहिरेतस्मादेवनिर्ह्रसितोपसर्गआहंतीति । निरु
द्धाआपःपणिनेवगावः । पणिर्वणिग्भवतिपणिःपणनाद्वणिक्पण्यंनेनेक्ति । अपांबिलमपिहितंयदासीत् । बिलंभरं
भवतिबिभर्तेर्वृत्रंजघ्निवानपववारतद्वृत्रोवृणोतेर्वावर्ततेर्वावर्धतेर्वायदवृणोत्तद्वृत्रस्यवृत्रत्वमितिविज्ञायतेयदवर्तततद्वृ
त्रस्यवृत्रत्वमितिविज्ञायतेयदवर्धततद्वृत्रस्यवृत्रत्वमितिविज्ञायते ॥ १७ ॥ रात्रिनामान्युत्तराणित्रयोविंशती
रात्रिःकस्मात्प्ररमयतिभूतानिनक्तंचारीण्युपरमयतीतराणिध्रुवीकरोतिरातेर्वास्याद्दानकर्मणःप्रदीयन्तेऽस्यामवश्या
याउषोनामान्युत्तराणिषोळशोषाःकस्मादुच्छतीतिसत्यारात्रेरपरःकालस्तस्याएषाभवति ॥ १८ ॥ इदंश्रेष्ठंज्यो
तिषांज्योतिरागाच्चित्रःप्रकेतोअजनिष्टविभ्वा । यथाप्रसूतासवितुःसवायँऽएवारात्र्युषसेयोनिमारैक् ॥ इदंश्रेष्ठंज्योति
षांज्योतिरागमच्चित्रंप्रकेतनंप्रज्ञाततममजनिष्टविभूततमंयथाप्रसूतासवितुःप्रसवायरात्रिरादित्यस्यैवंरात्र्युषसेयोनि

मरिचत्स्थानंस्त्रीयोनिरभियुतएनांगर्भस्तस्याएषापराभवति ॥ १९ ॥ रुशंद्वत्सारुशंतीश्वेत्यागादारैगुकृष्णासदनान्यस्याः । समानबंधूअमृतेअनूचीद्यावावर्णंचरतआमिनाने । रुशद्वत्सासूर्यवत्सारुशदितिवर्णनामरोचतेर्ज्वलतिकर्मणःसूर्यमस्यावत्समाहसाहचर्याद्रसहरणाद्वा रुशंतीश्वेत्यागात् । श्वेत्याश्वेततेररिचत्कृष्णासदनान्यस्याःकृष्णवर्णारात्रिःकृष्णंकृष्यतेर्निकृष्टोवर्णोऽथैनेसंस्तौतिसमानबंधूसमानबंधनेअमृतेअमरणधर्माणावनूचीअनूच्यावितीतरेतरमभिप्रेत्यद्यावावर्णंचरतस्तेएवंद्यावौद्योतनादपिवाद्यावाचरतस्तयासहचरतइतिस्यादामिनानेऽआमिन्वानेअन्योन्यस्याध्यात्मंकुर्वाणेऽअहर्नामान्युत्तराणिद्वादशाहःकस्मादुपाहरंत्यस्मिन्कर्माणितस्यैषनिपातोभवतिवैश्वानरीयायामृचि ॥ २० ॥ अहश्चकृष्णमहरर्जुनंचविवर्तेतेरजसीवेद्याभिः । वैश्वानरोजायमानोनराजावातिरज्योतिषाग्निस्तमांसि । अहश्चकृष्णंरात्रिःशुक्लंचाहरर्जुनंविवर्तेतेरजसीवेद्याभिर्वेदितव्याभिःप्रवृत्तिभिर्वैश्वानरोजायमानइवोद्यन्नादित्यःसर्वेषांज्योतिषांराजावाहन्नग्निर्ज्योतिषातमांसिमेघनामान्युत्तराणित्रिंशन्मेघःकस्मान्मेहतीतिसतआउपरउपलइत्येताभ्यांसाधारणानिपर्वतनामभिरुपरउपलोमेघोभवत्युपरमंतेऽस्मिन्नभ्राण्युपरताआपइतिवातेषामेषाभवति ॥ २१ ॥ देवानांमानेप्रथमाऽअतिष्ठन्कृंतत्रादेषामुपराउदायन् । त्रयस्तपंतिपृथिवीमनूपाद्वाबृबूकंवहतःपुरीषं । देवानांनिर्माणेप्रथमाऽअतिष्ठन्माध्यमकादेवगणाःप्रथमइतिमुख्यनामप्रतमोभवतिकृंतत्रमंतरिक्षंविकर्तनंमेघानांविकर्तनेनमेघानामुदकं

जायते ॥ त्र्यंस्तपंतिपृथिवीमंनूपाः । पर्जन्योवायुरादित्यंःशीतोष्णवर्षैरोषधीःपाचयंत्यनूपाअनुवपंतिलोकान्त्स्वेन
स्वेनकर्मणांयमपीतरोऽनूपंएतस्मादेवानूप्यतंऽउदकेनापिवांन्वाबितिस्याद्यथाप्रागितिंतस्यानूपइतिस्यांद्यथाप्राचीन
मिति । द्वाबृबूकंवहतःपुरीषं । वाय्वादित्याउदकंबृबूकमित्युदकनामंब्रवीतेर्वांशब्दकर्मणोभ्रंशतेर्वांपुरीषंपृणातेःपूर
यतेर्वा ॥ २२ ॥ वाङ्नामान्युत्तराणिसप्तपंचाशद्वाक्कस्मांद्व चेस्तत्रसरस्वतीत्येतस्यंनदीवद्देवतावच्चनिगमाभवंतितद्य
द्देवतावदुपरिष्टांत्तद्व्याख्यास्यामोंऽथैतन्नदीवत् ॥२३॥ इयंशुष्मेभिर्बिसखाऽइवारुजत्सानुगिरीणांतंविषेभिरूर्मिभिः।
पारावतघ्नीमवंसेसुवृक्तिभिःसरस्वतीमाविवासेमधीतिभिः । इयंशुष्मैःशोषणैःशुष्ममितिबलनामंशोषयतीतिसतोंबिसं
बिस्यतेर्भेदनकर्मणोवृद्धिकर्मणोवांसानुसमुच्छ्रितंभवतिसमुन्नुन्नमितिवांमहद्भिरूर्मिभिःपारावतघ्नींपारावारघातिनीं
पारंपरंभवत्यंवारमवरमवनायंसुप्रवृत्ताभिःशोभनाभिःस्तुतिभिःसरस्वतींनदींकर्मभिःपरिचरेमौदकनामान्युत्तराण्ये
कशतंमुदकंकस्मांदुनत्तीतिसतोंनदीनामान्युत्तराणिसप्तत्रिंशंन्नद्यःकस्मांन्नदनाइमाभवंतिशब्दवत्योंबहुलमासांनैघं
टुकंवृत्तमाश्चर्यमिवप्राधान्येनंतत्रेतिहासमाचक्षतेंविश्वामित्रऋषिःसुदासःपैजवनस्यंपुरोहितोबभूवंविश्वामित्रःसर्वमि-
त्रंःसर्वसंसृतंसुदाःकल्याणदानंःपैजवनःपिजवनस्यपुत्रंःपिजवनःपुनःस्पर्धनीयजवोवांमिश्रीभावगतिर्वांसवित्तंगृही
त्वांविपाट्छुतुद्र्योःसंभेदमाययांवनुययुरितरेंसविश्वामित्रोनदीस्तुष्टावंगाधाभवतेत्यंपिद्विवदपिबहुवंत्तद्यद्विवदुपरि

ष्टांत्तद्व्याख्यास्यामोऽथैतद्बहुवत् ॥ २४ ॥ रमंध्वंमेवचंसेसोम्यायऋतावरीरुपंमुहूर्तमेवैः । प्रसिंधुमच्छांबृहतीमंनी
षावस्युरंह्वेकुशिकस्यंसूनुः । उपरमध्वंमेवचसेसोम्यायंसोमसंपादिनंऋतावरीर्ऋतवत्यंऋतमित्युदकनामंप्रत्यृतंभवति
मुहूर्तमेवैरयनैरवनैर्वामुहूर्तोमुहुर्ऋतुर्ऋतुरर्तेर्गतिकर्मणोमुहुर्मूढइवकालोयावदभीक्ष्णंचेत्यभीक्ष्णमभिक्षणंभवतिक्षणः
क्षणोतेःप्रक्ष्णुतःकालःकालःकालयतेर्गतिकर्मणःप्राभिह्वयामिसिंधुंबृहत्यामहत्यामनीषयामनसईषयास्तुत्याप्रज्ञयावा
वनायकुशिकस्यसूनुःकुशिकोराजाबभूवंक्रोशतेःशब्दकर्मणःक्रंशतेर्वास्यात्प्रकाशयतिकर्मणःसाधुविक्रोशयितार्थानां
मितिवानद्यःप्रत्यूचुः ॥ २५ ॥ इंद्रोअस्माँऽअरदद्वज्रबाहुरपाहन्वृत्रंपरिधिंनदीनां । देवोऽनयत्सवितासुपाणिस्तस्य
वयंप्रसवेयामउर्वीः । इंद्रोअस्मानरदद्वज्रबाहूरदतिःखनतिकर्मापाहन्वृत्रंपरिधिंनदीनामितिव्याख्यातंदेवोऽनयत्स
वितासुपाणिःकल्याणपाणिःपाणिःपणायतेःपूजाकर्मणःप्रगृह्यपाणीदेवान्पूजयंति । तस्यवयंप्रसवेयामउर्वीः । उर्व्य
ऊर्णोतेर्वृणोतेरित्यौर्णवाभःप्रत्याख्यायांततआशुश्रुवुः ॥ २६ ॥ आतेकारोशृणवामावचांसियुयाथदूरादनंसारथे
न । निर्तेनंसैपीप्यानेवयोषामर्यायेवकन्याशश्वचैते । आशृणवामतेकारोवचनानियाहिदूरादनसाचरथेनचनिनमाम
तेपाययमानेवयोषापुत्रंमर्यायेवकन्यापरिष्वजनायनिनमाइतिवाऽश्वनामान्युत्तराणिषड्विंशतिस्तेषामष्टाउत्तराणिब
हुवदश्वःकस्मादश्नुतेऽध्वानंमहाशनोभवतीतिवातत्रदधिक्राइत्येतद्दधत्क्रामतीतिवादधत्क्रंदतीतिवादधदाकारीभव

तीतिवांतस्याश्ववद्देवतावच्चनिगमाभवंतितिद्यद्देवतावदुपरिष्टात्तद्व्याख्यास्यामोऽथैतदश्ववत् ॥ २७ ॥ उतस्यवाजी
क्षिपणिंतुरण्यतिग्रीवायांबद्धोअपिकक्षआसनि । क्रतुंदधिक्राअनुसंतवीत्वत्पथामंकांस्यन्वापनीफणत् । अपिसवाजी
वेजनवान्क्षेपणमनुतूर्णमश्नुतेऽध्वानंग्रीवायांबद्धोग्रीवागिरतेर्वागृणातेर्वागृह्णातेर्वापिकक्षआसनीतिव्याख्यातंक्रतुंद
धिक्राःकर्मवाप्रज्ञांवा । अनुसंतवीत्वत् । तनोतेःपूर्वयाप्रकृत्यानिगमःपथामंकांसिपथांकुटिलानिपंथाःपततेर्वापद्यते
र्वापंथतेर्वांकोऽचतेरापनीफणदितिफणतेश्चर्करीतवृत्तंदशोत्तराण्यादिष्टोपयोजनानीत्याचक्षतेसाहचर्यज्ञानायज्वलति
कर्माणउत्तरेधातवएकादशतावंत्येवोत्तराणिज्वलतोनामधेयानिनामधेयानि ॥ २८ ॥ (अथनिर्वचनमोघोराज्ञोवि
द्याहवाअथातोऽनुक्रमिष्यामोवृक्षेवृक्षेतावांवास्तूनियईचकारायंसशिङ्क्तेहिरण्यनामान्यार्ष्टिषेणोयद्देवापिःसाधारणा
निस्वरादित्योरश्मिनामान्यतिष्ठंतीनांदासपत्नीरात्रिनामानीदंश्रेष्ठंरुशद्वत्साहश्चकृष्णंदेवानांमानेवाङ्नामानीयंशुष्मे
भीरमध्वंमइंद्रोअस्मानातेकारंउतस्यवाज्यष्टाविंशतिः) ॥ इतिनिरुक्तेपूर्वषट्केद्वितीयोऽध्यायः ॥ २ ॥ ॥
ॐ ॥ कर्मनामान्युत्तराणिषड्विंशतिःकर्मकस्मात्क्रियतइतिसतोऽपत्यनामान्युत्तराणिपंचदशापत्यंकस्मादपततंभ
वतिनानेनपततीतिवातद्यथाजनयितुःप्रजैवमर्थीयेऋचाउदाहरिष्यामः ॥ १ ॥ परिषद्यंह्यरणस्यरेक्णोनित्यस्यरायः
पतयःस्याम । नशेषोअग्नेअन्यजातमस्त्यचेतानस्यमापथोविदुक्षः । परिहर्तव्यंहिनोपसर्तव्यमरणस्यरेक्णोऽरणो

पार्णोभवतिरेक्णइतिधननामरिच्यतेप्रयतोनित्यस्यरायःपतयःस्यामपित्र्यस्येवधनस्य । नशेषोअग्नेअन्यजातमस्ति । शेषइत्यपत्यनामशिष्यतेप्रयतोऽचेतयमानस्यतत्प्रमत्तस्यभवतिमानःपथोविदूदुषइतितस्योत्तराभूयसेनिर्वचनाय ॥२॥ नहिग्रभायारणःसुशेवोऽन्योदर्योमनसामंतवाउ । अधाचिदोकःपुनरित्सएत्यानोवाज्यभीषाळेतुनव्यः । नहिग्रहीतव्योऽरणःसुसुखतमोऽप्यन्योदर्योमनसापिनमंतव्योममायंपुत्रइत्यथसओकःपुनरेवतदेतियतआगतोभवत्योकइति निवासनामोच्यतएतुनोवाजीवेजनवानभिषहमाणःसपत्नान्नवजातःसएवपुत्रइत्यथैतांदुहितृदायाद्यउदाहरंतिपुत्रदायाद्यइत्येके ॥ ३ ॥ शासद्वह्निर्दुहितुर्नप्त्यंगाद्विद्वाँऽऋतस्यदीधितिंसपर्यन् । पितायत्रदुहितुःसेकमृंजन्त्संशग्म्येन मनसादधन्वे । प्रशास्तिवोढासंतानकर्मणेदुहितुःपुत्रभावंदुहितादुर्हितादूरेहितादोग्धेर्वानप्तारमुपागमद्दौहित्रंपौत्रमितिविद्वान्प्रजननयज्ञस्यरेतसोवांगादंगात्संभूतस्यहृदयादधिजातस्यमातरिप्रत्यृतस्यविधानंपूजयन्नविशेषेणमिथुनाःपुत्रादायादाइतितदेतदृक्श्लोकाभ्यामभ्युक्तं । अंगादंगात्संभवसिहृदयादधिजायसे । आत्मावैपुत्रनामासिसजीव शरदःशतमित्यविशेषेणपुत्राणांदायोभवतिधर्मतः । मिथुनानांविसर्गादौमनुःस्वायंभुवोऽब्रवीत् । नदुहितरइत्येके तस्मात्पुमान्दायादोऽदायादास्त्रीतिविज्ञायतेतस्मात्स्त्रियंजातांपरास्यंतिनपुमांसमितिचस्त्रीणांदानविक्रयातिसर्गाविद्यंतेनपुंसःपुंसोऽपीत्येकेशौनःशेपेदर्शनात् । अभ्रातृमतीवादइत्यपरं । अमूर्यायंतिजामयःसर्वालोहितवाससः ।

अभ्रातरइववयोषास्तिष्ठंतिहतवर्त्मनः । अभ्रातृकाइवयोषास्तिष्ठंतिसंतानकर्मणेपिंडदानायहतवर्त्मानइत्यभ्रातृकाया
अनिर्वाहऔपमिकस्तस्योत्तराभूयसेनिर्वचनाय ॥ ४ ॥ अभ्रातेवपुंसएतिप्रतीचीगर्तारुगिवसनयेधनानां । जायेवपत्य
उशतीसुवासाउषाहस्रेवनिरिणीतेअप्सः । अभ्रातृकेवपुंसःपितॄनेत्यभिमुखीसंतानकर्मणेपिंडदानायनपतिंगर्तारोहिणी
वधनलाभायदाक्षिणाजीगर्तःसभास्थाणुर्गृणातेःसत्यसंगरोभवतितंतत्रयापुत्रायापतिकासारोहतितांतत्राक्षैराघ्नंतिसा
रिक्थंलभतेश्मशानसंचयोऽपिगर्तउच्यतेगुरतेरपगूर्णोभवतिश्मश्मशानंश्मशयनंश्मशरीरंशरीरंशृणातेःशम्नातेर्वाश्म
श्रुलोमश्मनिश्रितंभवतिलोमलुनातेर्वालीयतेर्वानोपरस्याविःकुर्याद्यदुपरस्याविःकुर्याद्गर्तेष्ठाःस्यात्प्रमायुकोयजमानइ
त्यपिनिगमोभवतिरथोऽपिगर्तउच्यतेगृणातेःस्तुतिकर्मणःस्तुततमंयानं । आरोहथोवरुणमित्रगर्तमित्यपिनिगमोभ
वतिजायेवपत्येकामयमानासुवासाऋतुकालेषूषाहसनेवदंतान्विवृणुतेरूपाणीतिचतस्रउपमानाभ्रात्रीमुपयच्छेततोकं
ह्यस्यतद्भवतीत्यभ्रातृकायाउपयमनप्रतिषेधःप्रत्यक्षःपितुश्चपुत्रभावःपितायत्रदुहितुरप्रत्तायारेतःसेकंप्रार्जयतिसंदधा
त्यात्मानंसंगमेनमनसेत्यर्थैतांजाम्यारिक्थप्रतिषेधउदाहरंतिज्येष्ठंपुत्रिकायाइत्येके ॥ ५ ॥ नजामयेतान्वोरिक्थमा
रैक्कारगर्भंसनितुर्निधानं । यदीमातरोजनयंतवह्निमन्यःकर्तासुकृतोरन्यऋंधन् । नजामयेभगिन्यैजामिरन्येऽस्यां
जनयंतिजामपत्यंजमतेर्वास्याद्गतिकर्मणोनिर्गमनप्रायाभवतितान्वआत्मजःपुत्रोरिक्थंप्रारिचत्प्रादाच्चकारैनांगर्भनि

धानींसनितुर्हस्तग्राहस्यंयदिहमातरोजनयंतवह्निंपुत्रमवह्निंचस्त्रियमन्यतरः संतानकर्ताभवतिपुमान्दायादोऽन्यतरो
ऽर्धयित्वाजामिःप्रदीयतेपरस्मै ॥ ६ ॥ मनुष्यनामान्युत्तराणिपंचविंशतिर्मनुष्याः कस्मान्मत्वाकर्माणिसीव्यंतिमन
स्यमानेनसृष्टामनस्यतिःपुनर्मनस्वीभावेमनोरपत्यंमनुषोवातत्रपंचजनाइत्येतस्यनिगमाभवंति ॥ ७ ॥ तदद्यवाचः
प्रथमंमंसीययेनासुराँऽअभिदेवाऽअसाम । ऊर्जादउतयज्ञियासःपंचंजनाममहोत्रंजुषध्वं । तदद्यवाचःपरमंमंसीययेना
सुरानभिभवेमदेवाअसुराअसुरताःस्थानेष्वस्ताःस्थानेभ्यइतिवापिवासुरितिप्राणनामास्तःशरीरेभवतितेनतद्वंतःसोदे
वानसृजततत्सुराणांसुरत्वमसोरसुरानसृजततदसुराणामसुरत्वमितिविज्ञायते । ऊर्जादउतयज्ञियासः । अन्नादा
श्चयज्ञियाश्चोर्गित्यन्ननामोर्जयतीतिसतःपक्कंसुप्रवृक्णमितिवा । पंचंजनाममहोत्रंजुषध्वं । गंधर्वाःपितरोदेवाअसुरा
रक्षांसीत्येकेचत्वारोवर्णानिषादःपंचमइत्यौपमन्यवोनिषादःकस्मान्निषदनोभवतिनिषण्णमस्मिन्पापकमितिनैरुक्ताः ।
यत्पांचजन्ययाविशा । पंचजनीनयाविशापंचपृक्तासंख्यास्त्रीपुंनपुंसकेष्वविशिष्टाबाहुनामान्युत्तराणिद्वादशबाहूक
स्मात्प्रबाधतआभ्यांकर्माण्यंगुलिनामान्युत्तराणिद्वाविंशतिरंगुलयःकस्मादग्रगामिन्योभवंतीतिवाग्रगालिन्योभवंती
तिवाग्रकारिण्योभवंतीतिवाग्रसारिण्योभवंतीतिवांकनाभवंतीतिवांजनाभवंतीतिवापिवाभ्यंचनादेवस्युस्तासामेषा
भवति ॥८॥ दशावनिभ्योदशकक्ष्येभ्योदशयोक्त्रेभ्योदशयोजनेभ्यः। दशाभीशुभ्योअर्चताजरेभ्योदशधुरोदशयुक्ताव

हंव्यः । अवनयोंऽगुलयोभवंत्यवंतिकर्माणिकक्ष्याःप्रकाशयंतिकर्माणियोक्त्राणियोजनानीतिव्याख्यातंमभीशवोऽ
भ्यश्नुवतेकर्माणि । दशधुरोदशंयुक्तावहंव्यः । धूर्धूर्वतेर्वधकर्मणइयमपीतराधूरेतस्मादेवविहंतिवहंधारयतेर्वीकांतिक
र्माणउत्तरेधातवोऽष्टादशान्ननामान्युत्तराण्यष्टाविंशतिरन्नंकस्मादानतंभूतेभ्योऽत्तेर्वात्तिकर्माणउत्तरेधातवोदशंबल
नामान्युत्तराण्यष्टाविंशतिर्बलंकस्माद्बलंभरंभवतिबिभर्तेर्धननामान्युत्तराण्यष्टाविंशतिरेवधनंकस्माद्धिनोतीतिसतो
गोनामान्युत्तराणिनवंक्रुध्यतिकर्माणउत्तरेधातवोदशंक्रोधनामान्युत्तराण्येकादशगतिकर्माणउत्तरेधातवोद्वाविंशंश
तंक्षिप्रनामान्युत्तराणिषड्विंशतिःक्षिप्रंकस्मात्संक्षिप्तोविकर्षोऽतिकनामान्युत्तराण्येकादशांतिकंकस्मादानीतंभवतिसं
ग्रामनामान्युत्तराणिषट्चत्वारिंशत्संग्रामःकस्मात्संगमनाद्वासंगरणाद्वासंगतौग्रामावितिवातत्रखलइत्येतस्यनिगमाभ
वंति ॥९॥ अभीदमेकमेकोअस्मिनिष्षाळभीद्वाकिमुत्रयःकरंति । खलेनपर्षान्प्रतिहन्मिभूरिकिंमानिंदंतिशत्रवोऽनिं
द्राः । अभिभवामीदमेकमेकोऽस्मिनिष्षहमाणःसपत्नानभिभवामिद्वौकिंमात्रयःकुर्वंत्येकइतासंख्याद्वौद्रुततरासंख्या
त्रयस्तीर्णतमासंख्याचत्वारश्चलिततमासंख्याष्टावश्नोतेर्नवनवननीयानावाप्तावादशदस्ताद्दृष्टार्थावाविंशतिर्द्विर्दशतंः
शतंदशदशतंःसहस्रंसहस्वदयुतंनियुतंप्रयुतंतत्तदभ्यस्तंमंबुदोमेघोभवत्यरणमंबुतद्दोंबुदोऽबुमद्भातीतिवांबुमद्भवती
तिवांसयथामहान्बहुर्भवतिवर्षस्तदिवाबुदंखलेनपर्षान्प्रतिहन्मिभूरिं । खलइवपर्षान्प्रतिहन्मिभूरिंखलइतिसंग्रामना ॥ १४ ॥

मंखलतेर्वास्खलतेर्वीयमपीतरःखलएतस्मादेवंसमास्कन्नोभवति। किंमांनिंदंतिशत्रवोऽनिंद्राः। यइंद्रंनविविदुरिंद्रोह्य हमस्म्यनिंद्राइतरइतिवांव्याप्तिकर्माणउत्तरेधातवोदशंतत्रद्वेनामनी आक्षाणआश्नुवानंआपानआभ्नुवानोवधकर्माण उत्तरेधातवस्त्रयस्त्रिंशत्तत्रवियातइत्येतद्वियातयतइतिवांवियातयेतिवा। आखण्डलप्रहूयसे। आखंडयितःखंडंखंडयते स्तळिदित्यंतिकवधयोःसंसृष्टकर्मताडयतीतिसतः ॥ १० ॥ त्वयावयंसुवृधाब्रह्मणस्पतेस्पार्हावसुमनुष्यादंदीमहि। या नोदूरेतळितोयाअरातयोऽभिसंतिजंभयाताअनप्रसः। त्वयावयंसुवर्धयित्राब्रह्मणस्पतेस्पृहणीयानिवसूनिमनुष्येभ्य आददीमहियाश्चनोदूरेतळितोयाश्चांतिकेऽरातयोऽदानकर्माणोवादानप्रज्ञावांजंभयताअनप्रसोऽप्नइतिरूपनामाप्नो तीतिसतोविद्युत्तळिद्भवतीतिशाकपूर्णिःसाह्यवताडयतिदूराच्चदृश्यतेऽपित्विदमंतिकनामैवाभिप्रेतंस्यात्। दूरेचित्संत ळिदिवातिरोचसे। दूरेपिसन्नंतिकइवसंदृश्यसइतिवज्रनामान्युत्तराण्यष्टादशंवज्रःकस्माद्वर्जयतीतिसतस्तत्रकुत्सइ त्येतत्कृंततेर्ऋषिःकुत्सोभवतिकर्तास्तोमानामित्यौपमन्यवोऽत्राप्यस्यवधकर्मैवभवतितत्सखइंद्रःशुष्णंजघानेत्यैश्वर्यक र्माणउत्तरेधातवश्चत्वारईश्वरनामान्युत्तराणिचत्वारितत्रेनइत्येतत्सनितऐश्वर्येणेतिवासनितमनेनैश्वर्यमितिवा ॥११॥ यत्रासुपर्णाअमृतस्यभागमनिमेषंविदथाभिस्वरंति। इनोविश्वस्यभुवनस्यगोपाःसमाधीरःपाकमत्राविवेश। यत्रसुपर्णाः सुपतनाआदित्यरश्मयोऽमृतस्यभागमुदकस्यानिमिषंतोवेदनेनाभिस्वरंतीतिवाभिप्रयंतीतिवेश्वरःसर्वेषांभूतानांगोपा

यितादित्यःसमाधीरःपाकमत्राविवेशेतिंधीरोधीमान्पाकःपक्तव्योभवतिंविपक्कप्रज्ञआदित्यइत्युपनिषद्वर्णोभवतीत्यधि
दैवतमथाध्यात्मंयत्रसुपर्णाःसुपतनानींद्रियाण्यमृतस्यभागंज्ञानस्यानिमिषंतोवेदनेनाभिस्वरंतीतिवाभिप्रयंतीतिवे
श्वरःसर्वेषामिंद्रियाणांगोपायितात्मासमाधीरःपाकमत्राविवेशेतिंधीरोधीमान्पाकःपक्तव्योभवतिंविपक्कप्रज्ञआत्मेत्या
त्मगतिमाचष्टे ॥ १२ ॥ बहुनामान्युत्तराणिद्वादशंबहुकस्मात्प्रभवतीतिसतोह्रस्वनामान्युत्तराण्येकादशंह्रस्वोह्रसतेर्म
हन्नामान्युत्तराणिपंचविंशतिर्महान्कस्मान्मानेनान्यान्जहातीतिशाकपूर्णिर्महनीयोभवतीतिवातत्रववक्षिथविवक्षस
इत्येतेवक्तेर्वावहतेर्वासाभ्यासाद्गृहनामान्युत्तराणिद्वाविंशतिर्गृहाःकस्माद्गृह्णंतीतिंसतांपरिचरणकर्माणउत्तरेधातवोद
शंसुखनामान्युत्तराणिविंशतिःसुखंकस्मात्सुहितंखेभ्यःखंपुनःखनतेरूपनामान्युत्तराणिषोळशंरूपंरोचतेःप्रशस्यनामा
न्युत्तराणिदशंप्रज्ञानामान्युत्तराण्येकादशंसत्यनामान्युत्तराणिषट्सत्यंकस्मात्सत्सुतायतेसत्प्रभवंभवतीतिवाष्टाउत्तरा
णिपदानिपश्यतिकर्माणउत्तरेधातवश्चायतिप्रभृतीनिचनामान्यामिश्राणिनवोत्तराणिपदानिसर्वपदसमाम्नानायाथा
तउपमायदतत्तत्सदृशमितिगार्ग्यस्तदासांकर्मज्यायसावागुणेनप्रख्याततमेनवाकनीयांसंवाप्रख्यातंवोपमिमीतेऽथापि
कनीयसाज्यायांसं ॥ १३ ॥ तनूत्यजेवतस्करावनर्गूरशनाभिर्दशभिरभ्यधीतां । तनूत्यक्तनूत्यक्तावनर्गूवनगामिनाव
ग्निमंथनौबाहूतस्कराभ्यामुपमिमीतेतस्करस्तत्करोभवतियत्पापकमितिनैरुक्तास्तनोतेर्वास्यात्संततकर्माभवत्यहोरात्र

कर्मावा । रशनाभिर्दशभिरभ्यधीतां । अभ्यधीतामित्यभ्यधातांज्यायांस्तत्रगुणोऽभिप्रेतः ॥ १४ ॥ कुहस्विद्दो
षाकुहवस्तोरश्विनाकुहाभिपित्वंकरतःकुहोषतुः । कोवांशयुत्राविधवेवदेवरंमर्यनयोषांकृणुतेसधस्थआ । क्वस्विद्रात्रौ
भवथःक्वदिवाक्वाभिप्राप्तिंकुरुथःक्वसथःकोवांशयनेविधवेवदेवरंदेवरःकस्माद्द्वितीयोवरउच्यतेविधवाविधातृकाभ
वर्तिविधवनाद्वाविधावनाद्वेतिचर्मशिराअपिवाधवइतिमनुष्यनामतद्वियोगाद्विधवादेवरोदिव्यतिकर्मामर्योमनुष्यो
मरणधर्मायोषायौतेराकुरुतेसहस्थानेऽथनिपाताःपुरस्तादेवव्याख्यातायथेतिकर्मोपमा । यथावातोयथावनंयथासमु
द्रएजंति । भ्राजंतोअग्नयोयथा । आत्मायक्ष्मस्यनश्यतिपुराजीवगृभोयथा । आत्माऽततेर्वाप्तेर्वापिवाप्तइवस्याद्या
वद्व्याप्तिभूतइति । अग्निर्नयेभ्राजसारुक्मवक्षसः । अग्निरिवयेमरुतोभ्राजमानारोचिष्णूरस्काभ्राजस्वंतोरुक्मव
क्षसः ॥ १५ ॥ चतुरश्चिद्ददमानाद्विभीयादानिधातोः । नदुरुक्तायस्पृहयेत् । चतुरोऽक्षान्धारयतइतितद्यथाकि
तवाद्विभीयादेवमेवदुरुक्ताद्विभीयान्नदुरुक्तायस्पृहयेत्कदाचिदाइत्याकारउपसर्गःपुरस्तादेवव्याख्यातोऽथाप्युपमा
र्थेदृश्यते । जारआभगं । जारइवभगमादित्योऽत्रजारउच्यतेरात्रेर्जरयितासएवभासांतथापिनिगमोभवति ।
स्वसुर्जारःशृणोतुनइंत्युषसमस्यस्वसारमाहसाहचर्याद्रसहरणाद्वापित्वयंमनुष्यजारएवाभिप्रेतःस्यात्स्त्रीभगस्तथास्या
द्भजतेर्मेषइतिभूतोपमा । मेषोभूतो३ऽभियन्नयः । मेषोमिषतेस्तथापशुःपश्यतेरग्निरितिरूपोपमा । हिरण्यरूपःस

हिरण्यसंदृगपांनपात्सेदुहिरण्यवर्णः । हिरण्यवर्णस्येवास्यरूपंथाइतिच । तंप्रत्नथापूर्वथाविश्वथेमर्था । प्रत्नइवपूर्व
इवविश्वइवेमइवेत्ययमेततरोऽमुष्मादसावस्ततरोऽस्मादमुथायथासावितिव्याख्यातंवदितिसिद्धोपमा । ब्राह्मणवद्वृ
षलवत् । ब्राह्मणाइववृषलाइवेतिवृषलोवृषशीलोभवतिवृषाशीलोवा ॥ १६ ॥ प्रियमेधवदत्रिवज्जातवेदोविरूपवत् ।
अंगिरस्वन्महिव्रतप्रस्कण्वस्यश्रुधीहवं । प्रियमेधःप्रियाअस्यमेधायथैतेषामृषीणामेवंप्रस्कण्वस्यशृणुह्वानंप्रस्कण्वःक
ण्वस्यपुत्रःकण्वप्रभवोयथाप्राग्रमर्चिषिभृगुःसंबभूवभृगुर्भृज्यमानोनदेहेऽगारेष्वंगिराअंगाराअंकनाअंचनाअत्रैवतृती
यमृच्छतेत्यूचुस्तस्मादत्रिर्नत्रयइतिविखननाद्वैखानसोभरणाद्भारद्वाजोविरूपोनानारूपोमहिव्रतोमहाव्रतइति ॥ १७॥
अथलुप्तोपमान्यर्थोपमानीत्याचक्षतेसिंहोव्याघ्रइतिपूजायांश्वाकाकइतिकुत्सायांकाकइतिशब्दानुकृतिस्तदिदंशकुनि
षुवहुलंनशब्दानुकृतिर्विद्यतइत्यौपमन्यवःकाकोऽपकालयितव्योभवतितित्तिरिस्तरणात्तिलमात्रचित्रइतिवाकपिंज
लःकपिरिवजीर्णःकपिरिवजवतईषत्पिंगलोवाकमनीयंशब्दंपिंजयतीतिवाश्वाशुयायीशवतेर्वास्याद्गतिकर्मणःश्वसिते
र्वासिंहःसहनाद्धिंसेर्वास्याद्विपरीतस्यसंपूर्वस्यवाहंतेःसंहायहंतीतिवाव्याघ्रोव्याघ्राणाद्व्यादायहंतीतिवा ॥ १८ ॥ अ ॥ १६ ॥
र्चतिकर्माणउत्तरेधातवश्चतुश्चत्वारिंशन्मेधाविनामान्युत्तराणिचतुर्विंशतिर्मेधावीकस्मान्मेधयातद्वान्भवतिमेधामतौ
धीयतेस्तोतृनामान्युत्तराणित्रयोदशस्तोतास्तवनाद्यज्ञनामान्युत्तराणिपंचदशयज्ञःकस्मात्प्रख्यातंयजतिकर्मेतिनैरु

कांयाच्ञोभवतीतिवांयजुरुन्नोभवतीतिवांबहुकृष्णाजिनइत्यौपमन्यवोंयजूंष्येनंनयंतीतिर्वत्विङ्गमान्युत्तराण्यष्टा
वृत्विक्कस्मांदीरणऋग्यष्टाभवतीतिशाकपूर्णिर्ऋतुयाजीभवतीतिवांयाच्ञाकर्माणउत्तरेधातवंःसप्तदशदानकर्माणउत्त
रेधातवोंदशाध्येषणाकर्माणंउत्तरेधातवश्चत्वारंःस्वपितिसस्तीतिद्वौस्वपितिकर्माणौकूपनामान्युत्तराणिंचतुर्दशकूपः
कस्मांत्कुपानंभवतिकुप्यतेवांस्तेननामान्युत्तराणिंचतुर्दशैवस्तेनःकस्मांत्संस्त्यानमस्मिन्पापकमितिनैरुक्तांनिर्णीतांत
र्हितनामधेयान्युत्तराणिंषण्निर्णीतंकस्मांन्निर्णिक्तंभवतिंदूरनामान्युत्तराणिंपंचदूरंकस्मांद्द्रुतंभवतिदुरयंवांपुराणना
मान्युत्तराणिंषट्पुराणंकस्मात्पुरानवंभवतिंनवनामान्युत्तराणिंषळेवनवंकस्मांदानीतंभवति ॥ १९ ॥ द्विशउत्तराणि
नामानिंप्रपित्वेऽभीकइत्यासन्नस्यंप्रपित्वेप्राप्तेऽभीकेऽभ्यक्ते । आपित्वेनंःप्रपित्वेतूयमार्गहि । अभीकेचिदुलोककृ
दित्यपिनिगमौभवतोंदभ्रमर्भकमित्यल्पस्यंदभ्रंदभ्नोतेःसुदंभंभवंत्यर्भकमवहृतंभवति । उपोंपमेपरांमृशमामेंदभ्रा
णिमन्यथाः । नमोमहद्भ्योनमोअर्भकेभ्यइत्यपिनिगमौभवतंस्तिरःसतइतिप्राप्तस्यंतिरस्तीर्णंभवतिंसतःसंसृतंभवति ।
तिरश्चिदर्य्ययापरिंवर्तिर्यांतमदाभ्या । पात्रेवभिंदन्त्सतएतिरक्षसइत्यपिनिगमौभवतंस्त्वोनेमइत्यर्धस्यंत्वोऽपततोने
मोऽपनीतोंऽर्धंहरतेर्विंपरीताद्धारयतेर्वांस्यांदुद्धृतंभवंत्यृध्नोतेर्वांस्यादृद्धतमोविभागः । पीयंतित्वोअनुंत्वोगृणाति ।
नेमेदेवानेमेऽसुराइत्यपिनिगमौभवतंऋक्षाःस्तृभिरितिनक्षत्राणांनक्षत्राणिनक्षतेर्गतिकर्मणोंनेमानिक्षत्राणीतिचब्राह्म

र्णमृक्षाउदीर्णानीवख्यायंतैस्तृभिस्तीर्णानीवख्यायंते । अमीयऋक्षानिहिंतासउच्चा । पश्यंतोद्यामिवस्तृभिरित्यपि
निगमौभवतौवम्रीभिरुपजिह्विकाइतिसीमिकानांवम्योवमनात्सीमिकास्यमनादुपजिह्विकाउपजिघ्र्यः । वम्रीभिः पुत्र
मग्रुवोअदानं । यदत्त्युपजिह्विकायद्वम्रोअतिसर्पतीत्यपिनिगमौभवतऊर्दरंकृदरमित्यावपनस्योर्दरमुदीर्णंभवत्यूर्जेदी
र्णंवा । तमूर्दरंनपृणतायवेनेत्यपिनिगमोभवतितमूर्दरमिवपूरयतियवेनंकृदरंकृतदरंभवति । समिद्धोअंजन्कृदरंम
तीनामित्यपिनिगमोभवति ॥ २० ॥ रंभः पिनाकमितिदंडस्य । रंभआरभंतएनं । आत्वारंभंनजिव्रयोररम्भेत्यपि
निगमोभवत्यारभामहेत्वाजीर्णाइवदंडंपिनाकंप्रतिपिनष्टेनेनंकृत्तिवासाः पिनाकहस्तोऽवततधन्वेत्यपिनिगमोभवति
मेनाग्नाइतिस्त्रीणांस्त्रियस्त्यायतेरपत्रपणकर्मणोमेनामानयंत्येनाग्नागच्छंत्येनाः । अमेनांश्चिज्जनिवतश्चकर्थ । ग्नास्त्वा
कृंतन्नपसोऽतन्वतेनेत्यपिनिगमौभवतःशेपोवैतसइतिपुंस्प्रजननस्यशेपःशपतेःस्पृशतिकर्मणोवैतसोवितस्तंभवति । य
स्यामुशंतःप्रहराममुशेपं । त्रिःस्ममाह्नःश्नथयोवैतसेनेत्यपिनिगमौभवतोऽयैनेत्युपदेशस्य । अयातेअग्नेसमिधाविधेमेति
स्त्रियाः । एनावोअग्निमितिनपुंसकस्य । एनापत्यातन्वंसंसृजस्वेतिपुंसः । सिषक्तुसचतइतिसेवमानस्य । सनःसि || १७ ||
षक्तुयस्तुरः । सनःसेवतांयस्तुरः । सचस्वानःस्वस्तयै । सेवस्वनःस्वस्तयै । स्वस्तीत्यविनाशिनामास्तिरभिपूजितः
स्वस्तीतिभ्यसतैरेजतइतिभयवेपनयोः । यस्यशुष्माद्रोदसीअभ्यसेतां । रेजतेअग्नेपृथिवीमखेभ्यइत्यपिनिगमौभवतो

द्यावापृथिवीनामधेयान्युत्तराणिचतुर्विंशतिस्तयोरेषाभवति ॥ २१ ॥ कतरापूर्वाकतरापरायोःकथाजातेकवयःको
विवेद । विश्वंत्मनाबिभृतोयद्धनामविवर्तेतेअहनीचक्रियेव । कतरापूर्वाकतरापरैनयोःकथंजातेकवयःकएनेविजाना
तिसर्वमात्मनाबिभृतोयद्धैनयोःकर्मविवर्तेतेचैनयोरहनीअहोरात्रेचक्रयुक्तेइवेतिद्यावापृथिव्योर्महिमानमाचष्टआच
ष्टे ॥ २२ ॥ (कर्मनामानिपरिषद्यंनहिग्रभायशासद्धह्विरभ्रातेवनजामयेमनुष्यनामानितदद्यंदशावनिभ्योऽभीदं
त्वयावयंयत्रासुपर्णाबहुनामानितनूत्यजेवंकुहस्विच्चतुरश्चित्प्रियमेधवदथलुप्तोपमान्यर्चतिद्विशोरंभःकतरापूर्वाद्वाविं
शतिः ॥) इतिनिरुक्तेपूर्वषट्केतृतीयोऽध्यायः ॥ ३ ॥ ॥ छ ॥ ॥ छ ॥

ॐ ॥ एकार्थमनेकशब्दमित्येतदुक्तमथयान्यनेकार्थान्येकशब्दानितान्यतोऽनुक्रमिष्यामोऽनवगतसंस्कारांश्चनि
गमांस्तदैकपदिकमित्याचक्षतेजहाजघानेत्यर्थः ॥ १ ॥ कोनुमर्याअमिथितःसखासखायमब्रवीत् । जहाकोअस्मदी
षते । मर्याइतिमनुष्यनाममर्यादाभिधानंवास्यान्मर्यादामर्यैरादीयतेमर्यादामर्यादिनोर्विभागोमेथतिराक्रोशकर्मा
पापकंजघानकमहंजातुकोऽस्मद्भीतःपलायतेनिधापाश्याभवतियन्निधीयतेपाश्यापाशसमूहःपाशःपाशयतेर्विपाश
नात् ॥ २ ॥ वयःसुपर्णाउपसेदुरिंद्रंप्रियमेधाऋषयोनाधमानाः । अपध्वांतमूर्णुहिपूर्धिचक्षुर्मुमुग्ध्य१स्मान्निधये
वबद्धान् । वयोवेर्बहुवचनंसुपर्णाःसुपतनाआदित्यरश्मयउपसेदुरिंद्रंयाचमानाअपोर्णुह्याध्वस्तंचक्षुश्चक्षुःख्यातेर्वाच

ष्टेवींपूर्धिपूरयदेहीतिवामुंचास्मान्पाशैरिवबद्धान्पार्श्वतःश्रोणितःशितामतःपार्श्वंपर्शुमयमंगंभवतिपर्शुःस्पृशतेःसंस्प्र
ष्टापृष्ठदेशंपृष्ठंस्पृशतेःसंस्पृष्टमंगैरंगमंगनादंचनाद्वाश्रोणिःश्रोणतेर्गतिचलाकर्मणःश्रोणिश्चलतीवगच्छतोदोःशिताम
भवतिदोर्द्रवतेर्योनिःशितामेतिशाकपूणिर्विषितोभवतिश्यामतोयकृत्तइतितैटीकिःश्यामंश्यायतेर्यकृद्यथाकथाचकृ
त्यतेशितिमांसतोमेदस्तइतिगालवःशितिःश्यतेर्मांसंमाननंवामानसंवामनोऽस्मिन्त्सीदतीतिवामेदोमेद्यतेः ॥ ३ ॥
यदिंद्रचित्रमेहनास्तित्वादातमद्रिवः । राधस्तन्नोविदद्वसउभयाहस्त्याभर । यदिंद्रचित्रंचायनीयंमहनीयंधनम
स्तियन्मइहनास्तीतिवात्रीणिमध्यमानिपदानित्वयानस्तद्दातव्यमद्रिवन्नद्रिरादृणात्येनेनापिवात्तेःस्यात्तेसोमादइति
हविज्ञायतेराधइतिधननामराध्नुवंत्येनेनतन्नस्त्वंवित्तधनोभाभ्यांहस्ताभ्यामाहरोभौसमुब्धौभवतोदमूनादममनावा
दानमनावादांतमनावापिवादमइतिगृहनामतन्मनाःस्यान्मनोमनोतेः ॥ ४ ॥ जुष्टोदमूनाअतिथिर्दुरोणइमंनो
यज्ञमुपयाहिविद्वान् । विश्वाअग्नेअभियुजोविहत्याशत्रूयतामाभराभोजनानि । अतिथिरभ्यतितोगृहान्भवत्यभ्ये
तितिथिषुपरकुलानीतिवापरगृहाणीतिवादुरोणइतिगृहनामदुरवाभवंतिदुस्तर्पाइमंनोयज्ञमुपयाहिविद्वान्त्सर्वाअग्ने
अभियुजोविहत्यशत्रूयतामाहरभोजनानिनिहत्यान्येषांबलानिशत्रूणांभवनादाहरभोजनानीतिवाधनानीतिवामूषो
मूषिकाइत्यर्थोमूषिकाःपुनर्मुष्णातेर्मूषोऽप्येतस्मादेव ॥ ५ ॥ संमातपंत्यभितःसपत्नीरिवपर्शवः । मूषोनशि

श्नाव्यंदंतिमाध्यंःस्तोतारंतेशतक्रतोवित्तंमेंअस्यरोंदसी । संतपंतिमामभितंःसपत्न्यइवेर्माःपर्शवःकूपपर्शवोंमूषिका
इवास्नातानिंसूत्राणिव्यदंतिंस्वांगाभिधानंवास्यांच्छिश्नानिव्यदंतीतिवासन्तपन्तिमाध्यःकामाःस्तोतारंतेशतक्रतोवि
त्तंमेंअस्यरोंदसी । जानीतंमेऽस्यद्यावापृथिव्याविर्तित्रितंकूपेऽवहितमेतत्सूक्तंप्रतिबभौतत्रब्रह्मेतिंहासमिश्रमृङ्मि
श्रंगाथामिश्रंभवतिंत्रितस्तीर्णतमोमेधयाबभूवापिवासंख्यानामैवाभिप्रेतंस्यादेकतोद्वितस्त्रितइतित्रयोबभूवुः ॥ ६ ॥
इषिरेणंतेमनंसासुतस्यंभक्षीमहिपित्र्यंस्येवरायः । सोमंराजन्प्रणआयूँषितारीरहानीवसूर्योवासराणि । ईषणेनवैषणे
नवार्षणेनवातेमनसासुतस्यभक्षीमहिंपित्र्यस्येवधनस्यंप्रवर्धयचनआयूँषिसोमराजन् । अहानीवसूर्योवासराणिं । वा
सराणिवेसराणिंविवासनानिगमनानीतिवाकुरुतनेत्यनर्थकाउपजनाभवन्तिंकर्तनहंतनयातनेतिंजठरमुदरंभवतिंज
ग्धमस्मिन्ध्रियतेधीयतेवा ॥ ७ ॥ मरुत्वाँइंद्रवृषभोरणायपिबासोमंमनुष्वधंमदाय । आसिंचस्वजठरेमध्वंऊ
र्मिंत्वंराजासिप्रदिवंःसुतानाँ । मरुत्वानिंद्रमरुद्भिस्तद्वान्वृषभोवर्षितापांरणायरमणीयायसंग्रामायपिबसोममनुष्व
धमन्वन्नंमदायंमदनीयायजैत्रायासिंचस्वजठरेमधुनऊर्मिंमधुसोममित्यौपमिकंमाद्यतेरिदमपीतरंन्मध्वेतस्मादेवंत्वं
राजासिपूर्वेष्वप्यहःसुसुतानां ॥ ८ ॥ तितउपरिपवनंभवतिंततवद्वातुन्नवद्वातिलमात्रतुन्नमितिवा ॥ ९ ॥ सक्तुं
मिवतितंउनापुनंतोयत्रधीरामनंसावाचमक्रंत । अत्रासखायःसख्यानिंजानतेभद्रैषांलक्ष्मीर्निहिताधिवाचि । सक्तु

मिवपरिपवनेनपुनंतःसक्तुःसचतेर्दुर्धावोभवतिकसतेर्वास्याद्विपरीतस्यविकसितोभवतियत्रधीरामनसावाचमकृपतप्र
ज्ञानंधीराःप्रज्ञानवंतोध्यानवन्तस्तत्रसखायःसख्यानिसंजानतेभद्रैषांलक्ष्मीर्निहिताधिवाचीतिभद्रंभगेनव्याख्यातं
भजनीयंभूतानामभिद्रवणीयंभवद्रमयतीतिवाभाजनवद्वालक्ष्मीर्लाभाद्वालक्षणाद्वालप्स्यनाद्वालाञ्छनाद्वालषतेर्वा
स्यात्प्रेप्साकर्मणोलग्यतेर्वास्यादाश्लेषकर्मणोलज्जतेर्वास्यादश्लाघाकर्मणःशिप्रेइत्युपरिष्टाद्व्याख्यास्यामः ॥ १० ॥ त
त्सूर्यस्यदेवत्वंतन्महित्वंमध्याकर्तोर्विततंसंजभार । यदेदयुक्तहरितःसधस्थादाद्रात्रीवासस्तनुतेसिमस्मै । तत्सूर्यस्य
देवत्वंतन्महित्वंमध्येयत्कर्मणांक्रियमाणानांविततंसंह्रियतेयदासावयुंक्तहरणानादित्यरश्मीन्हरितोऽश्वानितिवाथरा
त्रीवासस्तनुतेसिमस्मैवेसरमहरवयुवतीसर्वस्मादपिवोपमार्थेस्याद्रात्रीववासस्तनुतइतितथापिनिगमोभवति । पुनः
समव्यद्विततंवयंती । समनात्सीत् ॥ ११ ॥ इंद्रेणसंहिदृक्षसेसंजग्मानोअबिभ्युषा । मंदूसमानवर्चसा । इं
द्रेणहिसंदृश्यसेसंगच्छमानोऽबिभ्युषागणेनमंदूमदिष्णूयुवांस्थोऽपिवामंदुनातेनेतिस्यात्समानवर्चसेत्येतेनव्याख्यातं
॥ १२ ॥ ईर्मान्तासःसिलिकमध्यमासःसंशूरणासोदिव्यासोअत्याः । हंसाइवश्रेणिशोयतंतेयदाक्षिषुर्दिव्यमज्मम
श्वाः । ईर्मान्ताःसमीरितांताःसुसमीरितांताःपृथ्वंतावासिलिकमध्यमाःसंसृतमध्यमाःशीर्षमध्यमावापिवाशिरआदि
त्योभवतियदनुशेतेसर्वाणिभूतानिमध्येचैषांतिष्ठतीदमपीतरच्छिरएतस्मादेवंसमाश्रितान्येतादिंद्रियाणिभवंति ॥ सं

शूरंणासोदि्व्यासोअत्याः । शूरःशवतेर्गतिकर्मणोदि्व्यादिविजाअत्याअतनाः । हंसाइवश्रेणिशोयतंते । हंसाहंते
र्घ्नत्यध्वानंश्रेणिशइतिश्रेणिःश्रयतेःसमाश्रिताभवन्तियदाक्षिषुर्यदार्पन्दिव्यमज्ममजनिमाजिमश्वांअस्त्यादित्यस्तुति
रश्वस्यादित्यादश्वोनिस्तष्टइति । सूरादश्वंवसवोनिरतष्टेत्यपिनिगमोभवति ॥ १३ ॥ कायमानोवनात्वंयन्मातृरजं
गन्नपः । नतत्तेअग्नेप्रमृषेनिवर्तनंयद्दूरेसन्निहाभवः । कायमानश्चायमानःकामयमानइतिवांवनानित्वंयन्मातृरपोऽ
गमउपशाम्यंन्नतत्तेअग्नेप्रमृष्यतेनिवर्तनंदूरेयत्सन्निहभवसिजायमानः । लोधंनयन्तिपशुमन्यमानाः । लुब्धमृषिंन
यन्तिपशुंमन्यमानाः । शीरंपावकशोचिषं । पावकदीप्तिं । अनुशायिनमितिवाशिनमितिवा ॥ १४ ॥ कनीनकेव
विद्रधेनवेद्रुपदेऽअर्भके । बभ्रूयामेषुशोभेते । कनीनकेकन्यकेकन्याकमनीयाभवतिक्वेयंनेतव्येतिवांकमनेनानीयतइ
तिवांकनतेर्वास्यात्कान्तिकर्मणःकन्ययोरधिष्ठानप्रवचनानिसप्तम्याएकवचनानीतिशाकपूणिर्विद्धयोर्दारुपाद्वोर्दारु
दृणातेर्वाद्रूणातेर्वातस्मादेवद्रुनवेनवजातेअर्भकेअवृद्धेतेयथातदधिष्ठानेषुशोभेतेएवंबभ्रूयामेषुशोभेतेबभ्र्वोरश्वयोः
संस्तवइदंचमेऽदादिदंचमेऽदादित्यृषिःप्रसंख्यायाह । सुवास्त्वाअधितुग्वनि । सुवास्तुर्नदीतुग्वतीर्थंभवतितूर्णमेतदा
यन्ति । कुविन्नंसंतेमरुतःपुनर्नः । पुनर्नोनमंतेमरुतोनसंतइत्युपरिष्टाद्व्याख्यास्यामः । येतेमदाआहनसोविहायस
स्तेभिरिंद्रंचोदयदातवेमघं । येतेमदाआहननवंतोवचनवंतस्तैरिंद्रंचोदयदानायमघं ॥ १५ ॥ उपोअदर्शिशुंध्युवोन

वक्षोंनोधाइवाविर्कृतप्रियाणि । अह्नसन्नसंसतोबोधयंतीशश्वत्तमागात्पुनरेयुषीणां । उपादर्शिंशुन्ध्युर्वःशुन्ध्युरा
दित्योभवतिशोधनात्तस्यैववक्षोभासोध्यूढमिदमपीतरद्वक्षएतस्मादेवाध्यूढंकायेशकुनिरपिशुंध्युरुच्यतेशोधनादेवोद
कचरोभवत्यापोऽपिशुंध्यवउच्यंतेशोधनादेवनोधाऋषिर्भवतिनवनंदधातिसयथास्तुत्याकामानाविष्कुरुतएवमुषारू
पाण्याविष्कुरुतेऽह्नसदह्नान्नंभवत्यह्नसादिनीतिवान्नसानिनीतिवा । ससतोबोधयंतीशश्वत्तमागात्पुनरेयुषीणां ।
स्वपतोबोधयंतीशाश्वतिकतमागात्पुनरागामिनीनां । तेवाशीमंतइष्मिणः । ईषणिनइतिवैषणिनइतिवार्षणिनइति
वावाशीतिवाङ्नामवाश्यतइतिसत्याः । शंसावाध्वर्योप्रतिमेगृणीहींद्रायवाहःकृणवावजुष्टं । अभिवहनस्तुतिमधि
षवणप्रवादांस्तुतिमन्यंतएंद्रीत्वेवशस्यतेपरितक्म्येत्युपरिष्टाद्व्याख्यास्यामः ॥ १६ ॥ सुवितेसुइतेसूतेसुगतेप्रजाया
मितिवा । सुवितेमाधाइत्यपिनिगमोभवतिदयतिरनेककर्मा । नवेनपूर्वंदयमानाःस्यामेत्युपदयाकर्मा । यएकइद्वि
दयतेवस्वितिदानकर्मावाविभागकर्मावा । दुर्वर्तुर्भीमोदयतेवनानीतिदहतिकर्मादुर्वर्तुर्दुर्वारः । विदद्वसुर्दयमानो
विशत्रूनितिहिंसाकर्मा । इमेसुताइंदवःप्रातरित्वनासजोषसापिबतमश्विनातान् । अयंहिवामूतयेवंदनायमांवायसो
दोषादयमानोअबूबुधत् । दयमानइति । नूचिदितिनिपातःपुराणनवयोर्नूचेतिच । अद्याचिन्नूचित्तदपोनदीनां ।
अद्यचपुराचतदेवकर्मनदीनां । नूचपुराचसदनंरयीणां । अद्यचपुराचसदनंरयीणांरयिरितिधननामरातेर्दानकर्मणः

॥ १७ ॥ विद्यामतस्यंतेवयमकूपारस्यदावनें । विद्यामतस्यतेवयंमकुपरणस्यदानस्यांदित्योऽप्यकूपारउच्यतेंऽकूपा
रोभवतिदूरपारंःसमुद्रोऽप्यकूपारउच्यतेंऽकूपारोभवतिमहापारंःकच्छपोऽप्यकूपारउच्यतेंऽकूपारोनकूपमृच्छतीतिं
कच्छपःकच्छंपातिंकच्छेनपातीतिवांकच्छेनपिबतीतिवांकच्छःखच्छःखच्छदोंऽयमपीतरोनदीकच्छंएतस्मादेवकमुद
कंतेनछाद्यते । शिर्शीतेशृंगेरक्षंसेविनिक्षें । निश्यतिशृंगेरक्षसोविनिक्षणनायंरक्षोरक्षितव्यमस्मांद्रहसिक्षणोतीतिवा
रात्रौनक्षतइतिवा । अग्निःसुतुकंःसुतुकेंभिरश्वैः । सुतुकनःसुतुकनैरितिवांसुप्रजाःसुप्रजोभिरितिवा । सुप्रायुणाअ
स्मिन्यज्ञेविश्रंयंतां । सुप्रगमनाः ॥ १८ ॥ देवानोयथासदमिद्वृधेअसन्नप्रांयुवोरक्षितारोंदिवेदिंवे । देवानोयथास
दावर्धनायस्युंरप्रायुवोऽप्रमाद्यंतोंरक्षितारश्चाहन्यहनिंच्यवनऋषिर्भवतिंच्यावयितास्तोमानांच्यवानमित्यप्यस्यनिग
माभवंति । युवंच्यवांनंसनयंयथारथंपुनर्युवांनंचरथांयतक्षथुः । युवांच्यवनंसनयंपुराणंयथारथंपुनर्युवानंचरणाय
ततक्षथुर्युवाप्रयौतिकर्माणितक्षतिःकरोतिकर्मारजोरजतेर्ज्योतीरजउच्यतंउदकंरजउच्यतेंलोकारजांस्युच्यंतेंऽसृगह
नीरजसीउच्येते । रजांसिचित्राविचरंतितन्यवइत्यपिनिगमोभवतिंहरोहरतेर्ज्योतिर्हरउच्यतंउदकंहरउच्यतेंलोकाह
रांस्युच्यंतेंऽसृगहनीहरसीउच्येते । प्रत्यग्नेहरसाहरःशृणीहीत्यपिनिगमोभवति । जुहुरेविचितयंतः । जुह्विरेविचेत
यमानाव्यंतइत्येषोऽनेककर्मापदंदेवस्यनमसाव्यंतइतिपश्यतिकर्मांवीहिशूरपुरोळाशमितिखादतिकर्मा । वीतंपातंप

शि. वे. ७

यंसउस्त्रियायाः । अश्नीतंपिबतंपयसउस्त्रियायाउस्त्रियेतिगोनामोस्राविणोऽस्यांभोगाउस्त्रेतिच । त्वामिंद्रमतिभिःसुते
सुनीथासोवसूयवः । गोभिःक्राणाअनूषतगोभिःकुर्वाणाअस्तोषत । आतूषिंचहरिमींद्रोरुपस्थेवाशीभिस्तक्षताश्मन्म
यीभिः । आसिंचहरिंद्रोरुपस्थेंद्रुममयस्यहरिःसोमोहरितवर्णोऽयमपीतरोहरिरेतस्मादेव । वाशीभिस्तक्षताश्मन्मयी
भिः । वाशीभिरश्ममयीभिरितिवावाग्भिरितिवा । सशर्धदर्योविषुणस्यजंतोर्माशिश्नदेवाअपिगुर्ऋतंनः । सउत्सह
तांयोविषुणस्यजंतोर्विषमस्यमाशिश्नदेवाअब्रह्मचर्याःशिश्नंश्नथतेः । अपिगुर्ऋतंनः । सत्यंवायज्ञंवा ॥ १९ ॥ आ
घातागच्छानुत्तरायुगानियत्रजामयःकृणवन्नजामि । उपबर्बृहिवृषभायबाहुमन्यमिच्छस्वसुभगेपतिंमत् । आगमि
ष्यन्तितान्युत्तराणियुगानियत्रजामयःकृणवंत्यजामिकर्माणिजाम्यतिरेकनामबालिशस्यवासमानजातीयस्यवोपजन
उपधेहिवृषभायबाहुमन्यमिच्छस्वसुभगेपतिंमदितिव्याख्यातं ॥ २० ॥ द्यौर्मेपिताजनितानाभिरत्रबंधुर्मेमातापृ
थिवीमहीयं । उत्तानयोश्चम्वो३र्योनिरंतरत्रापितादुहितुर्गर्भमाधात् । द्यौर्मेपितापातावापालयितावाजनयिताना
भिरत्रबंधुर्मेमातापृथिवीमहतीयंबंधुःसंबंधनान्नाभिःसन्नहनान्नाभ्यासन्नद्धागर्भाजायन्तइत्याहुरेतस्मादेवज्ञातीन्त्स ॥ २१ ॥
नाभयइत्याचक्षतेसबंधवइतिचज्ञातिःसंज्ञानात् । उत्तानयोश्चम्वो३र्योनिरंतः । उत्तानउत्ततानऊर्ध्वतानोवातत्र
पितादुहितुर्गर्भंदधातिपर्जन्यःपृथिव्याःशंयुःसुखयुः । अथानःशंयोररपोदधात । रपोरिप्रमितिपापनामनीभवतःश्च

मनंचरोगाणांयावनंचभयानांमथापिशंयुर्बार्हस्पत्यउच्यते । तच्छंयोरावृणीमहेगातुंयज्ञायगातुंयज्ञपतयइत्यपिनिग
मोभवतिगमनंयज्ञायगमनंयज्ञपतये ॥ २१ ॥ अदितिरदीनादेवमाता ॥ २२ ॥ अदितिर्द्यौरदितिरंतरिक्षमदिति
र्मातासपितासपुत्रः । विश्वेदेवाअदितिःपंचजनाअदितिर्जातमदितिर्जनित्वं । इत्यदितेर्विभूतिमाचष्टएनान्यदीना
नीतिवा । यमेरिरेभृगवः । एरिरइतीर्तिरुपसृष्टोऽभ्यस्तः ॥ २३ ॥ उतस्मैनंवस्त्रमथिंनतायुमनुक्रोशंतिक्षितयोभरे
षु । नीचायमानंजसुरिंनश्येनंश्रवश्चाच्छांपशुमच्चयूथं । अपिस्मैनंवस्त्रमथिमिववस्त्रमाथिनंवस्त्रंवस्तेस्तायुरितिस्तेनना
मसंस्त्यानमस्मिन्पापकमितिनैरुक्तास्तस्यतेर्वास्यादनुक्रोशन्तिक्षितयःसंग्रामेषुभरइतिसंग्रामनामभरतेर्वाहरतेर्वानी
चायमानंनीचैरयमानंनीचैर्निचितंभवत्युच्चैरुच्चितंभवतिजस्तमिवश्येनंश्येनःसंशनीयंगच्छति । श्रवश्चाच्छांपशुमच्च
यूथं । श्रवश्चापिपशुमच्चयूथंप्रशंसांचयूथंचधनंचयूथंचेतिवायूथंयौतेःसमायुतंभवति । इन्धानएनंजरतेस्वाधीः ।
गृणाति । मन्दीमन्दतेःस्तुतिकर्मणः । प्रमंदिनेपितुमदर्चतावचः । प्रार्चतमंदिनेपितुमद्वचोगौर्व्याख्यातः ॥ २४ ॥
अत्राहगोरमन्वतनामत्वष्टुरपीच्यं । इत्थाचंद्रमसोगृहे । अत्रहगोःसममंसतादित्यरश्मयःस्वंनामापीच्यमपगतमपचि
तमपिहितमंतर्हितंवामुत्रचंद्रमसोगृहेगातुर्व्याख्यातोगातुंकृणवन्नुषसोजनायेत्यपिनिगमोभवतिदंसयःकर्माणिदंसयं
त्येनानि । कुत्सायमन्मन्नह्यश्चदंसयइत्यपिनिगमोभवति ॥ सतूतावनैनंमश्नोत्यंहतिः । सतुतावनैनमंहतिरश्नोत्यं

हतिश्चाहश्चाहुश्चहंतौनिरूढोपधाद्विपरीतात् । बृहस्पतेचयंसइत्पियारुं । बृहस्पतेयच्चातयसिदेवपीयुंपीयतिर्हिंसाकर्मा
वियुतेद्यावापृथिव्यौवियवनात् । समान्यावियुतेदूरेअंते । समानंसंमानमात्रंभवतिमात्रामानाद्दूरंव्याख्यातमंतोऽ
ततेर्ऋधगितिपृथग्भावस्यप्रवचनंभवत्यथाप्यृध्नोत्यर्थेदृश्यते । ऋधंगयाऋधंगुताशमिष्ठाः । ऋध्नुवन्नयाक्षीर्ऋध्नुवन्नश
मिष्ठाइतिचास्याइतिचास्येतिचोदात्तंप्रथमादेशेऽनुदात्तमन्वादेशेतीव्रार्थतरमुदात्तमल्पीयोऽर्थतरमनुदात्तं । अस्या
ऊषुणउपसातयेभुवोऽहेळमानोररिवाँऽअजाश्वश्रवस्यतामजाश्व । अस्यैनःसातयउपभवाहेळमानोऽक्रुध्यन्नरिवान्नाति
रभ्यस्तोऽजाश्वेतिपूषणमाहाजाश्वाजाअजनाअथानुदात्तं । दीर्घायुरस्यायःपतिर्जीवातिशरदःशतं । दीर्घायुरस्यायः
पतिर्जीवतुसशरदःशतंशरच्छृताअस्यामोषधयोभवंतिशीर्णाआपइतिवास्येत्यस्याइत्येतेनव्याख्यातं ॥ २५ ॥ अस्यवा
मस्यपलितस्यहोतुस्तस्यभ्राताम्ध्यमोअस्त्यश्नः । तृतीयोभ्राताघृतपृष्ठोअस्यात्रापश्यंविश्पतिंसप्तपुत्रं । अस्यवामस्यव
ननीयस्यपलितस्यपालयितुर्होतुर्ह्वातव्यस्यतस्यभ्रातामध्यमोऽस्त्यशनोभ्राताभरतेर्हरतिकर्मणोहरतेभागंभर्तव्यो
भवतीतिवातृतीयोभ्राताघृतपृष्ठोऽस्यायमग्निस्तत्रापश्यंसर्वस्यपातारंवापालयितारंवाविश्पतिंसप्तपुत्रंसप्तमपुत्रंसर्पण
पुत्रमितिवासप्तसृप्तासंख्यासप्तादित्यरश्मयइतिवदंति ॥ २६ ॥ सप्तयुंजंतिरथमेकचक्रमेकोअश्वोवहतिसप्तनामा ।
त्रिनाभिचक्रमजरमनर्वंयत्रेमाविश्वाभुवनाधितस्थुः । सप्तयुंजंतिरथमेकचक्रमेकचारिणंचक्रंचकतेर्वाचरतेर्वाक्रामते

वैंकोऽश्वोवहतिंसप्तनामादित्यः सप्तास्मैरश्मयोरसानभिसंनामयंतिंसप्तैनमृषयःस्तुवंतीतिवेंदमपीतरन्नामैंतस्मादेवा
भिसंनामात्संवत्सरंप्रधानउत्तरोऽर्धचैंत्त्रिनाभिचक्रंत्यृतुःसंवत्सरोंग्रीष्मोवर्षाहेमंतइतिंसंवत्सरःसंवसंतेऽस्मिन्भूतानिं
ग्रीष्मोग्रस्यंतेऽस्मिन्नसांवर्षांवर्षत्यासुपर्जन्योंहेमंतोहिमवान्हिमंपुनर्हंतेर्वाहिनोतेर्वाजरमजरणधर्माणंमनर्वमप्रत्यृतम
न्यस्मिन्यत्रेमानिसर्वाणिभूतान्यभिसंतिष्ठंतेंतंसंवत्सरंसर्वमात्राभिःस्तौति । पंचारेचक्रेपरिवर्तमानइतिपंचर्तुतयापंच
र्तवंःसंवत्सरस्येतिचब्राह्मणंहेमंतशिशिरयोःसमासेनंषळरआहुरर्पितमितिंषळृतुतयाराःप्रत्यृतानाभौंषट्पुनःसहतेः ।
द्वादंशारंनहितज्जरांय । द्वादशप्रधयश्चक्रमेकमितिमासानांमासामानात्प्रधिःप्रहितोभवति । तस्मिन्त्साकंत्रिशतान
शङ्कवोंऽर्पिताःषष्टिर्नचंलाचलासः । षष्टिश्चहवैत्रीणिचशतानिंसंवत्सरस्याहोरात्राइतिचंब्राह्मणंसमासेन । सप्तशता
निंविंशतिश्चंतस्थुः । सप्तचवैशतानिविंशतिश्चंसंवत्सरस्याहोरात्राइतिचब्राह्मणंविभागेनविभागेन ॥ २७ ॥ (एकार्थं
कोनुवयःसुपर्णायदिंद्रजुष्टोदमूनाःसंमातपंतीषिरेणंमरुत्वाँतितउसक्तुमिवंतत्सूर्यस्येंद्रेणसमीर्मातासःकायमानःकनी
नकेवोपोअदर्शिसुवितेविद्यामदेवानंआघाद्यौर्मेऽदितिरदितिंरुतस्मात्राहास्यवामस्यंसप्तयुंजंतिसप्तविंशतिः) ॥ इति
निरुक्तेपूर्वषट्केचतुर्थोऽध्यायःसमाप्तः ॥ ४ ॥ ॥ छ ॥ ॥ छ ॥

ॐ ॥ सस्निमविंदुच्चरंणेनुदीनाँ । संस्नातंमेघं । वाहिंष्ठोवांहवानांस्तोमोंदूतोहुवंनरा । वोळ्हतमोह्वानानाँस्तोमोदूतो
हुवंनरौनरामनुष्यानृत्यंतिकर्मसुंदूतोजवतेर्वांद्रवतेर्वांवारयतेर्वा । दूतोदेवानामसिमर्त्यानांमित्यपिनिगमोभवतिंवाव
शानोवष्टेर्वावाश्यतेर्वा । सप्तस्वसॄररुषीर्वावशानइत्यपिनिगमोभवतिंवार्यवृणोतेरथापिवरतमं । तद्वार्यंवृणीमहेवरिं
ष्ठंगोपयत्यँ । तद्वार्यंवृणीमहैवर्षिंष्ठंगोपायितव्यँगोपायितारोयूयंस्थयुष्मभ्यमितिवाँधइत्यन्ननामाध्यानीयंभवति ।
आमंत्रेभिःसिंचतामद्यमंधः । आसिंचतामत्रैर्मदनीयमंधोऽमत्रंपात्रममाअस्मिन्नदंत्यमापुनरनिर्मितंभवतिंपात्रंपानां
त्तमोऽप्यंधउच्यतेंनास्मिन्ध्यानंभवतिंनदर्शनमंधंतमइत्यभिभाषंतेंऽयमपीतरोंऽधएतस्मादेव । पश्यदक्षण्वान्नविचेत
दंधइत्यपिनिगमोभवति ॥ १ ॥ असश्चंतीभूरिंधारेपर्यस्वती । असज्यमानेइतिवांव्युदस्यंत्याविति वांबहुधारेउदक
वत्यौवनुष्यतिर्हंतिकर्मांनवगतसंस्कारोभवति । वनुयामवनुष्यतइत्यपिनिगमोभवति । दीर्घप्रंयज्युमतियोवंनुष्यातिंव
यंजयेमपृतंनासुदूढ्यंः । दीर्घप्रततयज्ञमभिजिगांसांतियोवयंतंजयेमपृतनासुदूढ्यँदुर्धियंपापधियँपापःपातापेयानाँपा
पत्यमानोऽवाङेवपततीतिवांपापत्यतेर्वास्यांत्तरुष्यतिरप्येवंकर्मा । इंद्रेणयुजातरुषेमवृत्रमित्यपिनिगमोभवतिंभंदना
भंदतेःस्तुतिकर्मणः । पुरुप्रियोभंदतेधामभिःकविरित्यपिनिगमोभवति । सभंदनाउदियर्तिंप्रजावतीरितिच । अन्ये
नुमदांहनोयाहितूयँ । अन्येनमदहनोगच्छक्षिप्रंमाहंसीवभाषमाणेंत्यसभ्यभाषणांदाहनाइवभवंत्येतस्मादाहनःस्यांद्द

षिर्नंदोभवतिंनदतेःस्तुतिकर्मणः । नदस्यंमारुधतःकामआगंन् । नदनस्यमारुधतःकामआगमंत्संरुद्धप्रजननस्यंब्रह्म
चारिणइत्यृंषिपुत्र्याविलपितंवेदयंते ॥ २ ॥ नयस्यद्यावांपृथिवीनधन्वनांतरिंक्षंनाद्रंयःसोमोंअक्षाः । अश्नोतेरित्ये
के । अनूपेगोमान्गोभिंरक्षाःसोमोंदुग्धाभिंरक्षाः । लोपाशःसिंहंप्रत्यंचंमत्साः । क्षियतिनिगमःपूर्वःक्षरतिनिगमउत्त
रइत्येकेंऽनूपेगोमान्गोभिर्यदाक्षिर्यत्यथसोमोदुग्धाभ्यःक्षरतिंसर्वेक्षियतिनिगमाइतिशाकपूर्णिःश्वात्रमितिक्षिप्रनामा
शुअतनंभवति । सपंतत्रीत्वरंस्थाजगद्यच्छ्वात्रमग्निरंकृणोज्जातवेंदाः । सपतत्रिचेत्वरंस्थावरंजंगमंचयंत्तत्क्षिप्रमग्निर
करोज्जातवेदाऊतिरवनात् । आत्वारथंयथोतयइत्यपिनिगमोभवतिंहासमानेइत्युपरिष्टाद्व्याख्यास्यामः । वम्रकःपड्भिरु
पंसर्पदिंद्रं । पानैरितिवास्पाशनैरितिवांस्पर्शनैरितिवा । ससंनपक्कमंविदच्छुचंतं । स्वपनमेतन्माध्यमिकंज्योतिर
नित्यदर्शनंतदिवाविदज्जाज्वल्यमानं । द्विताचसत्तांस्वधयांचशंभुः । द्वैधंसत्तामध्यमेचस्थानउत्तमेचंशंभुःसुखभूः ।
मृगंनव्रामृगयंते । मृगमिवव्रात्याःप्रैषाः ॥ ३ ॥ वराहोमेघोभवतिवराहारः । विध्यद्वराहंतिरोअद्रिमस्तेत्यपिनिगमो
भवंत्ययमपीतरोवराहएतस्मादेवंवरमाहारमाहार्षीरितिचंब्राह्मणंवृहतिमूलानिंवरंवरंमूलंवृहतीतिवा । वराहमिंद्र
एमुषमित्यपिनिगमोभवंत्यंगिरसोऽपिवराहाउच्यंते । ब्रह्मंणस्पतिर्वृषंभिर्वराहैः । अथाप्येतेमाध्यमकादेवगणावराह
वउच्यंते । पश्यन्हिरंण्यचक्रानयोंदंष्ट्रान्विधावंतोवराहून् । स्वसराण्यहानिभवंतिंस्वयंसारीण्यपिवांस्वरादित्योभव

तिंसएनानिसारयति । उस्राइवस्वसराणीत्यपिनिगमोभवतिंशर्याअंगुलयोभवंतिंशर्याइषवःशरमय्यंःशरःशृणातेंः । श
र्याभिर्नभरमाणोगभस्त्योरित्यपिनिगमोभवंत्यर्कोदेवोभवतिंयदेनमर्चंत्यर्कोमंत्रोभवतिंयदनेनार्चंत्यर्कमन्नंभवंत्यर्चति
भूतान्यर्कोवृक्षोभवतिंसवृतःकटुकिम्ना ॥ ४ ॥ गायंतित्वागायत्रिणोऽचैंत्यर्कमर्किणंः । ब्रह्माणंस्त्वाशतक्रतउद्वंश
मिंवयेमिरे । गायंतित्वागायत्रिणंःप्रार्चंतितेऽर्कमर्किणोंब्राह्मणास्त्वाशतक्रतंउद्येमिरेवंशमिवंवंशोवनशयोभवतिंवन
नाच्छ्रयतइतिर्वापवीरथनेमिर्भवतिंयद्विपुनातिभूमिं । उतपव्यारथांनामद्रिंभिंदंत्योजंसा । तंमरुतःक्षुरपविनाव्ययु
रित्यपिनिगमौभवतोंवक्षोव्याख्यातंधन्वांतरिक्षंधन्वंत्यस्मादापंस्तिरोधन्वातिरोचतइत्यपिनिगमोभवतिंसिनमन्नंभव
तिंसिनातिभूतानि । येनस्मासिनंभरथःसखिभ्यइत्यपिनिगमोभवतींत्थामुथेत्येतेनव्याख्यातंसचासहेत्यर्थः । वसुं
भिःसचाभुवां । वसुभिःसहभुवौंचिदितिनिपातोऽनुदात्तंःपुरस्तादेवव्याख्यातोंऽथापिपशुनामेहभवंत्युदात्तश्चिदसिं
मनासिचितास्त्वयिभोगांश्चेतयसइतिवा आइत्याकारउपसर्गःपुरस्तादेवव्याख्यातोंऽथाप्यध्यर्थेदृश्यते । अभ्रआँ
अपः । अभ्रे आ अपः । अपोऽभ्रेऽधीतिद्युम्नंद्योततेर्यशोवान्नंवा । अस्मेद्युम्नमधिरत्नंचधेहि । अस्मासुद्युम्नंचरत्नंचधे
हि ॥ ५ ॥ पवित्रंपुनातेंर्मंत्रःपवित्रमुच्यते । येनदेवाःपवित्रेणात्मानंपुनतेसदेत्यपिनिगमोभवतिंरश्मयःपवित्रमुच्यं
ते । गभस्तिपूतोनृभिरद्रिभिःसुतइत्यपिनिगमोभवंत्यापःपवित्रमुच्यंते । शतपवित्राःस्वधयामदंतीर्बहूदकाः । अग्निः ॥ २४ ॥

पवित्रमुच्यतेवायुःपवित्रमुच्यतेसोमःपवित्रमुच्यतेसूर्यःपवित्रमुच्यतेइंद्रःपवित्रमुच्यते । अग्निःपवित्रंसमापुनातुवा
युःसोमःसूर्यइंद्रःपवित्रंतेमापुनंत्वित्यपिनिगमोभवतितोदस्तुद्यतेः ॥ ६ ॥ पुरुत्वादाश्वान्वोचेऽरिरंग्नेतवंस्विदा ।
तोदस्येवशरणआमहस्यं । बहुदाश्वांस्त्वामेवाभिह्वयाम्यरिरमित्रऋच्छतेरीश्वरोऽप्यरिरेतस्मादेवंयदन्यदेवत्यांअग्ना
वाहुतयोहूयंतइत्येतद्दृष्ट्वैवमवक्ष्यत् । तोदस्येवशरणआमहस्यं । तुदस्येवशरणेऽधिमहतःस्वंचाःसुअंचनः । आजुह्वा
नोघृतपृष्ठःस्वंचाइत्यपिनिगमोभवतिशिपिविष्टोविष्णुरितिविष्णोर्द्वेनामनीभवतःकुत्सितार्थीयंपूर्वंभवतीत्यौपमन्यवः
॥ ७ ॥ किमित्तेविष्णोपरिचक्ष्यंभूत्प्रयद्ववक्षेशिपिविष्टोअस्मि । मावर्पोअस्मदपगूहएतद्यदन्यरूपःसमिथेबभूथ ।
किंतेविष्णोऽप्रख्यातमेतद्भवत्यप्रख्यापनीयंयन्नःप्रब्रूषेशेपइवनिर्वेष्टितोऽस्मीत्यप्रतिपन्नरश्मिरपिवाप्रशंसानामैवाभिप्रे
तंस्यात्किंतेविष्णोप्रख्यातमेतद्भवतिप्रख्यापनीयंयदुतप्रब्रूषेशिपिविष्टोऽस्मीतिप्रतिपन्नरश्मिःशिपयोऽत्ररश्मयउच्यंते
तैराविष्टोभवति । मावर्पोअस्मदपगूहएतत् । वर्पइतिरूपनामवृणोतीतिसतोयदन्यरूपःसमिथेसंग्रामेभवसिसंयतर
श्मिस्तस्योत्तराभूयसेनिर्वचनाय ॥ ८ ॥ प्रतत्तेअद्यशिपिविष्टनामार्यःशंसामिवयुनानिविद्वान् । तंत्वागृणामितवसम
तंव्यान्क्षयंतमस्यरजसःपराके । तत्तेऽद्यशिपिविष्टनामार्यःप्रशंसाम्यर्योऽहमस्मीश्वरःस्तोमानांमर्यस्त्वमसीतिवातंत्वा
स्तौमितवसमतव्यांस्तवसइतिमहतोनामधेयंमुदितोभवतिनिवसंतमस्यरजसःपराकेपराक्रांते। आघृणिरागतहृणिः। आ

घृणेसंसंचावहै। आगतहृणेसंसेवावहैपृथुज्रयाःपृथुजवः। पृथुज्रयांअमिनादायुर्दस्योः । प्रामापयदायुर्दस्योः ॥ ९॥
अग्निंनरोदीधितिभिररण्योर्हस्तच्युतीजनयंतप्रशस्तं। दूरेदृशंगृहपतिमथर्युं। दीधितयोंऽगुलयोभवंतिधीयंतेकर्मस्वर
णीप्रत्यृतएनेअग्निःसमरणाज्जायतइतिवाहस्तच्युतीहस्तप्रच्युत्याजनयंतप्रशस्तंदूरेदर्शनंगृहपतिमतनवंतं ॥ १० ॥
एकयाप्रतिधापिबत्साकंसरांसित्रिंशतं। इंद्रःसोमस्यकाणुका। एकेनप्रतिधानेनापिबत्साकंसहेत्यर्थइंद्रःसोमस्यकाणु
कांकांतकानीतिवाक्रांतकानीतिवाकृतकानीतिवेंद्रःसोमस्यकांतइतिवाकणेघातइतिवाकणेहतःकांतिहतस्तत्रैतद्याज्ञि
कावेदयंतेत्रिंशदुक्थपात्राणिमाध्यंदिनेसवनएकदेवतानितान्येतस्मिन्कालएकेनप्रतिधानेनपिबंतितान्यत्रसरांस्यु
च्यंतेत्रिंशदपरपक्षस्याहोरात्रास्त्रिंशत्पूर्वपक्षस्येतिनैरुक्तास्तद्याएताश्चांद्रमस्यआगामिन्यआपोभवंतिरश्मयस्ताअपरप
क्षेपिबंतितथापिनिगमोभवतियमक्षितमक्षितयःपिबंतीतितंपूर्वपक्षआप्याययंतितथापिनिगमोभवतियथादेवाअंशु
माप्याययंतीत्यध्रिगुर्मंत्रोभवतिगव्यधिकृतत्वादपिवाप्रशासनमेवाभिप्रेतंस्यात्तच्छब्दवत्त्वादध्रिगोशमीध्वंसुशमिश
मीध्वंशमीध्वमध्रिगावित्यग्निरप्यध्रिगुरुच्यते। तुभ्यंश्चोतंत्यध्रिगोशचीवोऽधृतगमनकर्मवन्निंद्रोप्यध्रिगुरुच्यते। ॥ २५ ॥
अध्रिगवओहमिंद्रायेत्यपिनिगमोभवत्यांगूषःस्तोमआघोषः। एनांगूषेणवयमिंद्रवंतः। अनेनस्तोमेनवयमिंद्रवंतः
॥ ११ ॥ आपांतमन्युस्तृपलप्रभर्माधुनिःशिमीवाञ्छरुमांऋजीषी। सोमोविश्वान्यतसावनानिनार्वागिंद्रंप्रतिमाना

निदेभुः । आपातितमन्युस्तृप्रप्रहारीक्षिप्रप्रहारींसृप्रप्रहारीसोमोवेंद्रोवांधुनिर्धूनोतेःशिमीतिकर्मनामंशमयतेर्वांशक्नोते
वेंर्जींषीसोमोयत्सोमस्यंपूयमानस्यातिरिच्यतेंतदृजीषमपार्जितंभवतिंतेनर्जींषीसोमोंथाप्यैंद्रोनिगमोभवंत्यृजीषीवज्री
तिंहर्योरस्यसभागोधानाश्चेतिंधानाभ्राष्ट्रेहिताभवंतिंफलेहिताभवंतीतिवांबध्धांतेहरीधानांउपऋजीषंजिघ्रतामित्य
पिनिगमोभवंत्यादिनाभ्यासेनोपहितेंनोपधामादत्तेंबभस्तिरत्तिकर्मांसोमःसर्वाण्यतसानिवनानिंनार्वागिंद्रंप्रतिमाना
निदभ्नुवंतिंयैरेनंप्रतिमिमतेंनैनंतानिदभ्नुवंत्यंर्वागेवैनमप्राप्यविनश्यंतीतींद्रप्रधानेत्येकेंनैघंटुकंसोमकर्मौभयप्रधानेत्य
परंश्मशाशुअश्नुतइतिवांश्माश्नुतइतिवा । अवंश्मुशारुंधुद्वाः । अवारुधच्छ्मशावारिति ॥ १२ ॥ उर्वश्यप्सराउर्व
भ्यश्नुतंऊरुभ्यामश्नुतंउरुर्वावशोऽस्यांअप्सराअप्सारिण्यपिवांप्सइतिरूपनामांप्सातेरप्सानीयंभवत्यांदर्शनीयंव्याप
नीयंवांस्पष्टंदर्शनायेतिशाकपूणिर्यदप्सइत्यभक्षस्याप्सोनामेतिंव्यापिनस्तद्राभवतिरूपवतींतदनयात्तमितिवांतदस्यै
दत्तमितिवांतस्यादर्शनान्मित्रावरुणयोरेतश्चस्कंदंतदभिवादिन्येषर्ग्भवति ॥ १३ ॥ उतासिंमैत्रावरुणोवंसिष्ठोर्वश्यां
ब्रह्मन्मनुसोऽधिंजातः । द्रप्संस्कुन्नंब्रह्मंणादैव्येंनुविश्वेंदेवाःपुष्करेत्वाददंत । अप्यसिमैत्रावरुणोवसिष्ठोर्वश्याब्रह्म
न्मनसोऽधिजातोंद्रप्संस्कन्नंब्रह्मणादैव्येनंद्रप्सःसंभृतप्सानीयोभवतिंसर्वेदेवाःपुष्करेत्वाधारयंतंपुष्करमंतरिक्षंपो
षतिभूतान्युदकंपुष्करंपूजाकरंपूजयितव्यंवेदमपीतरत्पुष्करमेतस्मादेवंपुष्करंवपुष्करंवांपुष्पंपुष्पतेर्वयुनंवेतेःकांतिर्वा

प्रज्ञावा ॥ १४ ॥ सइत्तमोऽवयुनंततन्वत्सूर्येणवयुनंवच्चकार । सतमोऽप्रज्ञानंततन्वत्सतंसूर्येणप्रज्ञानवच्चकारंवाज
पस्त्यंवाजपतनं । सनेमवाजपस्त्यमित्यपिनिगमोभवतिवाजगन्ध्यंगध्यत्युत्तरपदं । अश्यामवाजगंध्यमित्यपिनिग
मोभवतिगध्यंगृह्णातेः । ऋज्रावाजंनगध्यंयुयूषन्नित्यपिनिगमोभवतिगध्यतिर्मिश्रीभावकर्मा । आगधितापरिगधि
तेत्यपिनिगमोभवतिकौरयाणःकृतयानः । पाकस्थामाकौरयाणइत्यपिनिगमोभवतितौरयाणस्तूर्णयानः । सतौ
रयाणउपयाहियज्ञं । मरुद्भिरिंद्रसखिभिःसजोषाइत्यपिनिगमोभवत्यह्रयाणोह्रीतयानः । अनुष्टुयाकृणुह्यह्रयाणेत्य
पिनिगमोभवतिहरयाणोहरमाणयानः । रजतंहरयाणइत्यपिनिगमोभवति । यआरितःकर्मणिकर्मणिस्थिरः ।
प्रत्यृतःस्तोमान्त्रंदीत्रंदतेर्मृदूभावकर्मणः ॥ १५ ॥ नियद्वृणक्षिश्वसनस्यमूर्धनिशुष्णस्यचिद्व्रंदिनोरोरुवद्वनां । निवृ
णक्षियच्छ्वसनस्यमूर्धानिंशब्दकारिणःशुष्णस्यादित्यस्यचंशोषयितूरोरूयमाणोवनानीतिवावधेनेतिवा । अत्रदंतवीळि
तेत्यपिनिगमोभवतिवीळयतिश्चव्रीडयतिश्चसंस्तंभकर्माणौपूर्वेणसंप्रयुज्येतेनिष्षपीस्त्रीकामोभवतिविनिर्गतपसाःपसः
सपतेःस्पृशतिकर्मणः । मानोमघेवनिष्षपीपरादाः । सयथाधनानिविनाशयतिमानस्त्वंतथापरादास्तूर्णाशमुदकंभ ॥ २६ ॥
वतितूर्णमश्नुते । तूर्णाशंनगिरेरधीत्यपिनिगमोभवतिक्षुंपमहिच्छत्रकंभवतियत्क्षुभ्यते ॥ १६ ॥ कुदामर्तमराधसंप
दाक्षुंपमिवस्फुरत् । कुदानःशुश्रवद्गिरइंद्रोअंग । कदामर्तमनाराधसंतंपादेनक्षुंपमिवावस्फुरिष्यतिकदानःश्रोष्य

तिचगिरंइंद्रोअंगांतेतिक्षिप्रनामांचितमेवांकितंभवतिनिचुंपुणःसोमोनिचांतपृणोनिचमनेनप्रीणाति ॥ १७ ॥ पत्नी
वंतःसुताइमउशंतोयंतिवीतये । अपांजग्मिर्निचुंपुणः । पत्नीवंतःसुताइमेऽद्भिःसोमाःकामयमानायंतिवीतयेपाना
यांपांगंतानिचुंपुणःसमुद्रोऽपिनिचुंपुणउच्यतेनिचमनेनपूर्यतेऽवभृथोऽपिनिचुंपुणउच्यतेनीचैरस्मिन्क्वणंतिनीचैर्दध
तीतिवा । अवभृथनिचुंपुणइत्यपिनिगमोभवतिनिचुंपुणनिचुंकुणेतिचपदिगंतुर्भवतियत्सद्यते ॥ १८ ॥ सुगुरसत्सुहि
रण्यःस्वश्वोबृहदस्मैवयइंद्रोदधाति । यस्त्वायंतंवसुनाप्रातरित्वोमुक्षीजयेवपदिमुत्सिनाति । सुगुर्भवतिसुहिरण्यः
स्वश्वोमहच्चास्मैवयइंद्रोदधातियस्त्वायंतमन्नेनप्रातरागामिन्नतिथे । मुक्षीजयेवपदिमुत्सिनाति । कुमारोमुक्षीजामो
चनाच्चसयनाच्चततनाच्चपादुःपद्यतेः । आविःस्वःकृणुतेगूहतेबुसंसपादुरस्यनिर्णिजोनमुच्यते । आविःकुरुतेभास
मादित्योगूहतेबुसंबुसमित्युदकनामब्रवीतेःशब्दकर्मणोभ्रंशतेर्वायद्वर्षन्पातयत्युदकंरश्मिभिस्तत्प्रत्यादत्ते ॥ १९ ॥
वृकश्चंद्रमाभवतिविवृतज्योतिष्कोवाविकृतज्योतिष्कोवाविक्रांतज्योतिष्कोवा ॥ २० ॥ अरुणोमासकृद्वृकःपथायंतं
ददर्शहि । उज्जिहीतेनिचाय्यातष्टेवपृष्ट्यामयीवित्तंमेअस्यरोदसी । अरुणआरोचनोमासकृन्मासानांचार्धमासानां
चकर्ताभवतिचंद्रमावृकःपथायंतंददर्शनक्षत्रगणमभिजिहीतेनिचाय्ययेनयेनयोक्ष्यमाणोभवतिचंद्रमास्तक्ष्णुवन्निवपृ
ष्टरोगीजानीतंमेऽस्यद्यावापृथिव्यावित्यादित्योऽपिवृकउच्यतेयदावृंक्ते । अजोहवीदश्विनावर्तिकावामास्नोयत्सीम

मुंचतंवृकंस्य । आह्वयदुषाअश्विनावादित्येनाभिग्रस्तांतामश्विनौप्रमुमुचतुरित्याख्यानंश्वापिवृकउच्यतेविकर्तनात् ।
वृकंश्चिदस्यवारणउरामथिः । उरणमथिः । उरणऊर्णावान्भवत्यूर्णापुनर्वृणोतेरूर्णोतेर्वावृद्धवाशिन्यपिवृक्युच्यते
शतंमेषान्वृक्येचक्षदानंमृज्राश्वंतंपितांधंचकारेत्यपिनिगमोभवतिजोषवाकमित्यविज्ञातनामधेयंजोषयितव्यंभवति
॥ २१ ॥ यइंद्राग्नीसुतेषुवांस्तवत्तेष्वृंतावृधा । जोषवाकंवदंतःपज्रहोषिणानदेवाभसथश्चन । यइंद्राग्नीसुतेषुवांसोमे
षुस्तौतितस्याश्नीथोऽथयोऽयंजोषवाकंवदतिविजंजपःप्रार्जितहोषिणौनदेवौतस्याश्नीथःकृत्तिःकृंततेर्यशोवान्नंवा । म
हीवकृत्तिःशरणातंइंद्र । सुमहत्तइन्द्रशरणमंतरिक्षेकृत्तिरिवेतीयमपीतराकृत्तिरेतस्मादेवंसूत्रमय्युपमार्थेवा । कृत्तिं
वसानआचरंपिनाकंविभ्रदागहीत्यपिनिगमोभवतिश्वघ्नीकितवोभवतिस्वंहंतिस्वंपुनराश्रितंभवति । कृतंनश्वघ्नीवि
चिनोतिदेवने । कृतमिवश्वघ्नीविचिनोतिदेवनेकितवःकिंतवास्तीतिशब्दानुकृतिःकृतवान्वाशीर्नामकःसममितिपरि
ग्रहार्थीयंसर्वनामानुदात्तं ॥ २२ ॥ मानःसमस्यदूढ्यः१परिद्वेषसोअंहतिः । ऊर्मिर्ननावमावधीत् । मानःसर्वस्यदुर्धि
यःपापधियःसर्वतोद्वेषसोंऽहतिरूर्मिरिवनावमावधीदूर्मिरूर्णोतेर्नौःप्रणोत्तव्याभवतिनमतेर्वातत्कथमनुदात्तप्रकृति ॥ २७ ॥
नामस्यांदृष्टव्ययंतुभवत्युतोसमस्मिन्नाशिशीहिनोवसोइतिसप्तम्यांशिशीतिर्दानकर्मा । उरुष्याणोअघायतःसमस्मा
दितिपंचम्यांमुरुष्यतीरक्षाकर्माथापिप्रथमाबहुवचने नभंतामन्यकेसमे ॥ २३ ॥ हुविषांजारोअपांपिपर्तिपपुरिर्नरा ।

पिताकुटस्यचर्षणिः । हविषापांजरयितापिपर्तिपपुरिरितिपृणातिनिगमौवाप्रीणातिनिगमौवापिताकृतस्यकर्मणश्चायितादित्यःशंबइतिवज्रनामशमयतेर्वाशातयतेर्वा । उग्रोयःशंबःपुरुहूततेनेत्यपिनिगमोभवतिकेपयःकपूयाभवंतिकपूयमितिपुनातिकर्मकुत्सितंदुष्पूयंभवति ॥ २४ ॥ पृथक्प्रायन्प्रथमादेवहूतयोऽकृण्वतश्रवस्यानिदुष्टरा । नयेशेकुर्यज्ञियांनावमारुहमीमैवतेन्यविशंतकेपयः । पृथक्प्रायन्पृथक्प्रथतेःप्रथमादेवहूतयोयेदेवानाह्वयंताकुर्वतःश्रवणीयानियशांसिदुरनुकराण्यन्यैर्येऽशक्नुवन्यज्ञियांनावमारोढुमथयेनाशक्नुवन्यज्ञियांनावमारोढुमीमैवतेन्यविशंतेहैवतेन्यविशंतंऋणेहैवतेन्यविशंतास्मिन्नेवलोकइतिवेर्मइतिबाहुनामसमीरिततरोभवति । एताविश्वासवनातूतुमाकृषेस्वयंसूनोसहसोयानिदधिषे । एतानिसर्वाणिस्थानानितूर्णमुपाकुरुषेस्वयंबलस्यपुत्रयानिधत्स्वासत्रमंहसस्त्राणंधनुर्वाकवचंवाकवचंकुअंचितंभवतिकांचितंभवतिकायेऽचितंभवतीतिवा ॥ २५ ॥ प्रीणीताश्वान्हितंजयाथस्वस्तिवाहंरथमित्कृणुध्वं । द्रोणाहावमवतमश्मचक्रमंसत्रकोशंसिंचतानृपाणं । प्रीणीताश्वान्त्सुहितंजयथजयनंवोहितमस्तुस्वस्तिवाहनंरथंकुरुध्वंद्रोणाहावंद्रोणंद्रुममयंभवत्याहावआह्वानादावहआवहनादवतोऽवातितोमहान्भवत्यश्मचक्रमशनचक्रमसनचक्रमितिवांसत्रकोशमंसत्राणिवंःकोशस्थामीयानिसंतुकोशःकुष्णातेर्विकुषितोभवत्ययमपीतरःकोशएतस्मादेवसंचयआचितमात्रोमहान्भवतिसिंचतनृपाणंनरपाणंकूपकर्मणासंग्राममुपमिमीतेकाकुदंताल्वित्याचक्षतेजिह्वाकोकुवासा

स्मिन्धीयतेंजिह्वाकोकुवाकोकूयमानांवर्णान्नुदतीतिवांकोकूयतेर्वास्याच्छब्दकर्मणोंजिह्वाजोहुवांतालुतरतेस्तीर्णतमंमं
गंलततेर्वास्याद्विपरीतांद्यथातलल्लतेत्यविपर्ययः ॥ २६ ॥ सुदेवोअंसिवरुणयस्यंतेसप्तसिन्धवः । अनुक्षरंतिकाकुदं
॥ २८ ॥ सूर्म्यंसुषिरामिंव । सुदेवस्त्वंकल्याणदेवंःकमनीयदेवोवाभवसिवरुणंयस्यतेसप्तसिंधवंःसिंधुःस्रवणांद्यस्यतेसप्तस्रोतां
सिंतानितेकाकुदमनुक्षरंतिंसूर्मिंकल्याणोर्मिंस्रोतःसुषिरमनुयथावीरिटंतैटीकिरंतरिक्षंमेवमाहपूर्वंवयतेंरुत्तरमिरतेंर्व
यांसीरंत्यस्मिन्भांसिवांतदेतस्यामृच्युदाहरंत्यपिनिगमोभवति ॥ २७ ॥ प्रवांवृजेसुप्रयावर्हिंरेषामाविश्पतींवबीरिं
टइयाते । विशामक्तोरुषसंःपूर्वहूतौवायुःपूषास्वस्तयेंनियुत्वांन् । प्रवृज्यतेंसुप्रायणंवर्हिंरेषामेयातेंसर्वस्यपातारौवा
पालयितारौवांबीरिटमंतरिक्षंभियोवाभासोवांततिरपिवोपमार्थेस्यांत्सर्वपतीइवराजानौंबीरिटेगणेमनुष्याणांरात्र्या
विवासेपूर्वस्यामभिहूतौंवायुश्चनियुत्वान्पूषाचंस्वस्त्ययनायंनियुत्वान्नियुतोऽस्याश्वांनियुतोनियमनाद्वानियोजनाद्वां
ऽच्छाभेराप्तुमितिशाकपूर्णिःपरींसीमितिव्याख्यातांएनमेनामस्यांअस्येत्येतेनव्याख्यातंसृणिरंकुशोभवतिंसरणादंकु ॥ २९ ॥
शोंऽचतेंराकुचितोभवतीतिवांनेदीयइत्सृण्यःपक्कमेयादित्यपिनिगमोभवंत्यंतिकतममंकुशादायांतपक्कमौषधमागच्छ
त्वित्यागच्छत्विति ॥ २८ ॥ (सस्निमसश्चंतीनयस्यवराहोंगायंतित्वापवित्रंपुरुत्वाकिमित्तेप्रतत्तेंऽग्निंनरएकया

पांतमन्युंरुर्वश्यप्सराउतासिसइन्नियत्कदामर्तपत्नीवंतःसुगुरसद्धृकश्चंद्रमांअरुणोमायइंद्राग्नीमानःसमस्यहविषाजारः पृथक्प्रायन्प्रीणीताश्वान्सुदेवःप्रवावृजेऽष्टाविंशतिः) ॥ इतिनिरुक्तेपूर्वषट्केपंचमोऽध्यायः ॥ ५ ॥ ॥ छ ॥

ॐ ॥ त्वमग्नेद्युभिस्त्वमाशुशुक्षणिस्त्वमद्भ्यस्त्वमश्मनस्परि । त्वंवनेभ्यस्त्वमोषधीभ्यस्त्वंनृणानृंपतेजायसेशुचिः । त्वमग्नेद्युभिरहोभिस्त्वमाशुशुक्षणिराशुइतिचशुइतिचक्षिप्रनामनीभवतःक्षणिरुत्तरःक्षणोतेराशुशुचाक्षणोतीतिवांस नोतीतिवांशुक्शोचतेःपंचम्यर्थेवाप्रथमांतथाहिवाक्यसंयोगंआइत्याकारउपसर्गःपुरस्ताच्चिकीर्षितजउत्तरंआशुशो चयिषुरितिंशुचिःशोचतेर्ज्वलतिकर्मणोऽयमपीतरःशुचिरेतस्मादेवंनिष्षिक्तमस्मात्पापकमितिनैरुक्ताः । इंद्रआशा भ्यस्परिसर्वाभ्योअभयंकरत् । आशादिशोभवंत्यासदनांदाशाउपदिशोभवंत्यभ्यशनात्काशिर्मुष्टिःप्रकाशनान्मुष्टि र्मोचनाद्वामोषणाद्वामोहनाद्वा । इमेचिदिंद्ररोदसीअपारेयत्संगृभ्णामघवन्काशिरित्ते । इमेचिदिंद्ररोदसीरोधसी द्यावापृथिव्यौविरोधनाद्रोधःकूलंनिरुणद्धिस्रोतःकूलंरुजतोविपरीताल्लोष्ठोऽविपर्ययेणापारेदूरपारेयत्संगृभ्णासिमघ वन्काशिस्तेमहान् । अहस्तमिंद्रसंपिणक्कुणारुं । अहस्तमिंद्रकृत्वासंपिंढिपरिक्वणनंमेघं ॥ १ ॥ अलातृणोवलइंद्रव्र जोगोःपुराहंतोर्भयमानोव्यार । सुगान्पथोअकृणोन्निरजेगाःप्रावन्वाणीःपुरुहूतंधमंतीः । अलातृणोऽलमातर्दनो मेघोवलोवृणोतेर्व्रजोव्रजत्यंतरिक्षेगोरेतस्यामाध्यमिकायावाचःपुराहननाद्भयमानोव्यार । सुगान्पथोअकृणोन्निरजे

गाः । सुगमनान्पथोऽकरोन्निर्गमनायगवां । प्रावन्वाणीःपुरुहूतंधमंतीः । आपोवावहनाद्वाचोवावदनाद्बहुभिराहूत
मुदकंभवतिधमतिर्गतिकर्मा ॥ २ ॥ उद्बृहरक्षःसहमूलमिंद्रवृश्चामध्यंप्रत्यग्रंशृणीहि । आकीवंतःसलल्लूकंचकर्थब्रह्मद्वि
षेतपुषिंहेतिमस्य । उद्धररक्षःसहमूलमिंद्रमूलंमोचनाद्वामोषणाद्वामोहनाद्वावृश्चमध्यंप्रतिशृणीह्यग्रंमग्रमागतंभवत्या
कियतोदेशात्सलल्लूकंसल्लुब्धंभवतिपापकमितिनैरुक्ताःसररूकंवास्यात्सर्तेरभ्यस्तात्तपुषिस्तपतेर्हेतिर्हंतेः । त्यंचिदित्था
कत्पयंशयानं । सुखपयसंसुखमस्यपयः । विस्रुहआपोभवंतिविस्रवणात् । वयाइवरुरुहुःसप्तविस्रुहइत्यपिनिगमो
भवतिवीरुधओषधयोभवंतिविरोहणात् । वीरुधःपारयिष्णवइत्यपिनिगमोभवतिनक्षद्दाभमश्नुवानदाभंसभ्यश्नने
नदभ्नोतीति । नक्षद्दाभंततुरिंपर्वतेष्ठामित्यपिनिगमोभवत्यस्कृधोयुरकृध्वायुःकृध्वितिह्रस्वनामनिकृत्तंभवति । यो
अस्कृधोयुरजरःस्वर्वानित्यपिनिगमोभवतिनिशृंभानिश्रथ्यहारिणः ॥ ३ ॥ आजासःपूषणंरथेनिशृंभास्तेजनश्रियं ।
देवंवहंतुबिभ्रतः । आवहंत्वजाःपूषणंरथेनिःश्रथ्याहारिणस्तेजनश्रियंजातश्रियंबृबदुक्थोमहदुक्थोवक्तव्यमस्माउक्थ
मितिबृबदुक्थोवा । बृबदुक्थंहवामहइत्यपिनिगमोभवत्यृदूदरःसोमोमृदूदरोमृदुरुदरेष्वितिवा । ऋदूदरेणसख्या
सचेयेत्यपिनिगमोभवत्यृदूपेइत्युपरिष्टाद्व्याख्यास्यामःपुलुकामःपुरुकामः । पुलुकामोहिमर्त्यइत्यपिनिगमोभवत्यसि
न्वतीअसंखादंत्यौ । असिन्वतीबप्सतीभूर्यत्तइत्यपिनिगमोभवतिकपनाःकंपनाःक्रिमयोभवंति । मोषथावृक्षंकपने

ववेधसइत्यपिनिगमोभवतिंभाऋजीकःप्रसिद्धभाः । धूमकेतुःसमिधाभाऋजीकंइत्यपिनिगमोभवतिरुजानानद्योभवं
तिंरुंजंतिकूलानि । संरुजानाःपिपिषइंद्रशत्रुरित्यपिनिगमोभवतिजूर्णिर्जवतेर्वाद्रवतेर्वादूनोतेर्वा । क्षिप्ताजूर्णिर्नव
क्षतीत्यपिनिगमोभवति । परिंघ्रंसमोमनांवांवयोऽगात् । पर्यगाद्वांघ्रंसंमहरवनायान्नं ॥ ४ ॥ उपलप्रक्षिण्युपले
षुप्रक्षिणांत्युपलप्रक्षेपिणीवेंद्रऋषीन्पप्रच्छंदुर्भिक्षेकेनजीवतीतिंतेषामेकःप्रत्युवाचंशकटःशाकिनीगावोंजालमस्यंदनंव
नंमुदधिःपर्वतोराजांदुर्भिक्षेनववृत्तयइतिंसानिगदव्याख्याता ॥ ५ ॥ कारुरहंततोभिषगुपलप्रक्षिणीनना । नानां
धियोवसूयवोऽनुगाइवतस्थिमेंद्रायेंदोपरिस्रव । कारुरहमस्मिकर्तास्तोमानांततोभिषक्तइतिसंताननामंपितुर्वापु
त्रस्यवोंपलप्रक्षिणीसक्तुकारिकांननानमतेर्मातावादुहितावांनानाधियोनानाकर्माणोवसूयवोवसुकामाअन्वास्थिता
स्मोगावइवलोकंमिंद्रायेंदोपरिस्रवेत्यध्येषणा । आसीनऊर्ध्वामुपसिक्षिणांत्युपस्थेप्रकलविद्वणिग्भवतिकलाश्चवे
दप्रकलाश्च । दुर्मित्रासःप्रकलविन्मिमानाइत्यपिनिगमोभवत्यभ्यर्धयज्वाभ्यर्धयन्यजति । सिषक्तिपूषाअभ्यर्धयज्वे
त्यपिनिगमोभवतीक्षईशिषे । ईक्षेहिवस्वउभयस्यराजन्नित्यपिनिगमोभवतिक्षोणस्यक्षयणस्य । महःक्षोणस्याश्वि
नाकण्वायेत्यपिनिगमोभवति ॥ ६ ॥ अस्मेतेवन्धुः । वयमित्यर्थः । अस्मेयांतंनासत्यासजोषाः । अस्मानित्यर्थः ।
अस्मेसंमानेभिर्वृषभपौंस्येभिः । अस्माभिरित्यर्थः । अस्मेप्रयंधिमघवन्नृजीषिन् । अस्मभ्यमित्यर्थः । अस्मेआराच्चि

द्वेषःसनुतर्युयोतु । अस्मदित्यर्थः । ऊर्वइवपप्रथेकामोअस्मे । अस्माकमित्यर्थः । अस्मेधत्तवसवोवसूनि । अस्मास्वि त्यर्थः । पाथोऽतरिक्षंपथाव्याख्यातं । श्येनोनदीयन्नन्वेतिपाथइत्यपिनिगमोभवत्युदकमपिपाथउच्यतेपानात् । आचष्टआसांपाथोनदीनामित्यपिनिगमोभवत्यन्नमपिपाथउच्यतेपानादेव । देवानांपाथउपवक्षिविद्वानित्यपिनिग मोभवतिसवीमनिप्रसवे । देवस्यवयंसवितुःसवीमनीत्यपिनिगमोभवतिसप्रथाःसर्वतःपृथुः । त्वमग्नेसप्रथाअसीत्य पिनिगमोभवतिविदथानिवेदनानि । विदथानिप्रचोदयन्नित्यपिनिगमोभवति ॥ ७ ॥ श्रायंतइवसूर्यंविश्वेदिंद्रस्यभ क्षत । वसूनिजातेजनमानओजसाप्रतिभागंनदीधिम । समाश्रिताःसूर्यमुपतिष्ठंतेऽपिवोपमार्थेस्यात्सूर्यमिवेंद्रमुपति ष्ठंतइतिसर्वाणींद्रस्यधनानिविभक्ष्यमाणाःसयथाधनानिविभजतिजातेचजनिष्यमाणेचतंवयंभागमनुध्यायामौजसा बलेनौजओजतेर्वोब्जतेर्वाशीराःश्रयणाद्वाश्रपणाद्वाथेयमितराशीराशास्तेः । इंद्रायगावआशिरमित्यपिनिगमोभवति सामेसत्याशीर्देवेष्वितिच । यदातेमर्तोअनुभोगमानळादिद्ग्रसिष्ठओषधीरजीगः । यदातेमर्तोभोगमन्वापदथग्रसि तृतमओषधीरगारीर्जिगर्तिर्गिरतिकर्मावागृणातिकर्मावागृह्णातिकर्मावा । मूराअमूरनवयंचिकित्वोमहित्वमग्नेत्वम गवित्से । मूढावयंस्मोऽमूढस्त्वमसिनवयंविद्मोमहत्त्वमग्नेत्वंतुवेत्थशशमानःशंसमानः । योवांयज्ञैःशशमानोहदा शतीत्यपिनिगमोभवति । देवोदेवाच्याकृपा । देवोदेवान्प्रत्यक्तयाकृपाकृक्कृपतेर्वाकल्पतेर्वा ॥ ८ ॥ अश्वंवहिर्भूरि

दावत्तरावांविजामातुरुतवाघास्यालात् । अथासोमस्यप्रयंतीयुवभ्यामिंद्राग्नीस्तोमंजनयामिनव्यं । अश्रौषंहिबहुदा
तृतरौवांविजामातुरसुसमाप्तांज्जामातुर्विंजामातेतिशश्वद्दाक्षिणाजाः क्रीतापतिमाचक्षतेऽसुसमाप्तइववरोऽभिप्रेतो
जामाताजाअपत्यंतन्निर्मातोतवाघास्यालादपिचस्यालात्स्यालआसन्नःसंयोगेनेतिनैदानाःस्याल्लाजानावपतीतिवाला
जालाजतेःस्यंशूर्पस्यतेःशूर्पमशनपवनंशृणातेर्वाऽथसोमस्यप्रदानेनंयुवाभ्यामिंद्राग्नीस्तोमंजनयामिनव्यं । नवतरमोमा
सइत्युपरिष्टाद्व्याख्यास्यामः ॥ ९ ॥ सोमानंस्वरणंकृणुहिब्रह्मणस्पते । कक्षीवंतंयऔशिजः । सोमानंसोतारंप्रका
शनवन्तंकुरुब्रह्मणस्पतेकक्षीवंतमिवयऔशिजःकक्षीवान्कक्ष्यावानौशिजउशिजःपुत्रउशिग्वष्टेःकान्तिकर्मणोऽपित्व
यंमनुष्यकक्षएवाभिप्रेतःस्यात्तंसोमानंसोतारंमाप्रकाशनवन्तंकुरुब्रह्मणस्पते ॥ १० ॥ इन्द्रासोमासमघशंसमभ्यं
घंतपुर्ययस्तुचरुरग्निवाँइव । ब्रह्मद्विषेक्रव्यादेघोरचक्षसेद्वेषोधत्तमनवायंकिमीदिने । इन्द्रासोमावघस्यशंसितारमघं
हन्तेर्निर्हसितोपसर्गआहन्तीतितपुस्तपतेश्चरुर्मृच्चयोभवतिचरतेर्वासमुच्चरन्त्यस्मादापोब्रह्मद्विषेब्राह्मणद्वेष्ट्रेक्रव्यादेक्र
व्यमदतेघोरचक्षसेघोरख्यानायक्रव्यंविकृत्ताज्जायतइतिनैरुक्ताद्वेषोधत्तमनवायमनवयवंयदन्येनव्यवेयुरद्वेषसइति
वाकिमीदिनेकिमिदानीमितिचरतेकिमिदंकिमिदमितिवापिशुनायचरतेपिशुनःपिंशतेर्विपिंशतीति ॥ ११ ॥ कृणु
ष्वपाजःप्रसितिंनपृथ्वींयाहिराजेवामवाँइभेन । तृष्वीमनुप्रसितिंद्रूणानोऽस्तासिविध्यरक्षसस्तपिष्ठैः । कुरुष्वपाजः

पाजःपालनात्प्रसितिमिवपृथ्वींप्रसितिःप्रसयनात्तंतुर्वाजालंवायाहिराजेवामात्यवानभ्यमनवान्त्स्ववान्वेराभृतागणे
नंगतभयेनहस्तिनेतिवातृष्व्यानुप्रसित्याद्रूणानंस्तृष्वीतिक्षिप्रनामंतरतेर्वात्वरतेर्वासितासिविध्यरक्षसस्तपिष्ठैस्तप्ततमै
स्तृप्ततमैःप्रपिष्टतमैरितिवा । यस्तेगर्भममीवादुर्णामायोनिमाशये । अमीवाभ्यमनेनव्याख्यातोदुर्णामाक्रिमिर्भव
तिपापनामाक्रिमिःक्रव्येमेद्यतिक्रमतेर्वास्यात्संरणकर्मणःक्रामतेर्वा । अतिक्रामन्तोदुरितानिविश्वा । अतिक्रममा
णादुर्गतिगमनानिसर्वाण्यप्वायदेनयाविद्धोऽपवीयतेव्याधिर्वाभयंवा । अप्वेपरेहीत्यपिनिगमोभवत्यमतिरमामयी
मतिरात्ममयी । ऊर्ध्वायस्यामतिर्भाअदिद्युतत्सवीमनीत्यपिनिगमोभवतिश्रुष्टीतिक्षिप्रनामाशुअष्टीति ॥ १२ ॥ ताँ
अध्वरउशतोयक्ष्यग्नेश्रुष्टीभगंनासत्यापुरंधिं । तानध्वरेयज्ञउशतःकामयमानान्यजाग्नेश्रुष्टीभगंनासत्यौचाश्विनौस
त्यावेवनासत्यावित्यौर्णवाभःसत्यस्यप्रणेताराविताग्रायणोनासिकाप्रभवौबभूवतुरितिवापुरन्धिर्बहुधीस्तत्कःपुरन्धि
र्भगःपुरस्तात्तस्यान्वादेशइत्येकमिन्द्रइत्यपरंसबहुकर्मतमःपुरांचदारयितृतमोवरुणइत्यपरंतंप्रज्ञयास्तौति । इमामूनु
कवितमस्यमायामित्यपिनिगमोभवतिरुशदितिवर्णनामरोचतेर्ज्वलतिकर्मणः। समिद्धस्यरुशददर्शिपाजइत्यपिनिगमो
भवति ॥ १३ ॥ अस्तिहिवःसजात्यंरिशादसोदेवासोऽअस्त्याप्यं । अस्तिहिवःसमानजातितारेशयदारिणोदेवा
अस्त्याप्यमाप्यमाप्नोतेःसुदत्रःकल्याणदानः । त्वष्टासुदत्रोविदधातुरायइत्यपिनिगमोभवतिसुविदत्रःकल्याणवि ॥ ३१ ॥

घः । आग्नेयाहिसुविदत्रेभिरर्वाङित्यपिनिगमोभवत्यानुषगितिनामानुपूर्वस्यानुषक्तंभवति । स्तृणन्तिबर्हिरानुषगित्यपिनिगमोभवतितुर्वणिस्तूर्णवनिः । सतुर्वणिर्महाँअरेणुपौंस्यइत्यपिनिगमोभवतिगिर्वणादेवोभवतिगीर्भिरेनंवनयन्ति । जुष्टंगिर्वणसेबृहदित्यपिनिगमोभवति ॥ १४ ॥ असूर्तेसूर्तेरजसिनिषत्तेयेभूतानिसमकृण्वन्निमानि । असुसमीरिताःसुसमीरितेवातसमीरितामाध्यमकादेवगणायेरसेनपृथिवींतर्पयंतोभूतानिचकुर्वन्तितआयजंतेत्यतिक्रांतंप्रतिवचनं । अम्यक्सातइन्द्रऋष्टिः । अमाक्तेतिवाभ्यक्तेतिवा । यादृश्मिन्धायितमपस्ययाविदत् । उस्रःपितेवंजारयायियज्ञैः । उस्रइवगोपिताजायियज्ञैः ॥ १५ ॥ प्रवोयादृशेऽधायितमपस्ययाविदत् । प्रास्थुर्वोजोषयमाणाअभवतसर्वेऽग्रगमनेनेतिवाग्रगरणेनेऽच्छांजुजुषाणासोअस्थुरभूत विश्वेअग्रियोतवाजाः । अद्धीदिंद्रप्रस्थितेमाहवींषिचनोदधिष्वपचतोततिवाग्रसंपादिनइतिवापिवाग्रमित्येतदनर्थकमुपवंधमाददीत । अद्धीन्द्रप्रस्थितानीमानिहवींषिचनोदधिष्वचनइत्यन्ननामपचतिर्नामीभूतस्तंमेदस्तःप्रतिपचताग्रभीष्टामिसोमं । पुरोळाअग्नेपचतइत्यपिनिगमोभवत्यपिवामेदसश्चपशोश्चसात्वंद्विवचनंस्याद्यत्रह्येकवचनार्थःप्रसिद्धंतद्भवति । ऋतस्यहिशुरुधःसन्तिपूर्वीरित्यपिनिगमोभवत्यमिनोऽमितमात्रोमहान्भवतियथाशुरुधआपोभवन्तिशुचंसंरुंधंति । अमिनःसहोभिरित्यपिनिगमोभवतिजज्झतीरापोभवंतिशब्दकारिण्यः । मरुतोजज्झतीरिवत्यभ्यमितोवा ।

वेत्यपिनिगमोभवंत्यप्रतिष्कुतोऽप्रतिष्कृतोंऽप्रतिस्खलितोवा । अस्मभ्यमप्रतिष्कुतइत्यपिनिगमोभवतिंशाशदानः
शाशाद्यमानः । प्रस्वांमतिमतिरच्छाशदानइत्यपिनिगमोभवति ॥ १६ ॥ सृप्रःसर्पणादिदमपीतरंत्सृप्रमेतस्मादेवंस
र्पिर्वातैलंवा । सृप्रकरस्नमूतयइत्यपिनिगमोभवतिंकरस्नौबाहूकर्मणांप्रस्नातारौंसुशिप्रमेतेनव्याख्यातं । वाजेसुशि
प्रगोमतीत्यपिनिगमोभवतिंशिप्रेहनूनासिकेर्वाहनुर्हंतेर्नासिकानसतेः । विष्यस्वशिप्रेविसृजस्वधेनेइत्यपिनिगमोभ
वतिंधेनादधातेरंसुरमणात् । सचित्रेणचिकितेरंसुभासेत्यपिनिगमोभवतिंद्विबर्हाद्वयोःस्थानयोंःपरिवृढोमध्यमेचस्था
नउत्तमेच । उतद्विबर्हाअमिनःसहोभिरित्यपिनिगमोभवंत्यक्रआक्रमणात् । अक्रोनवभ्रिःसामथेमहीनामित्यपिनिग
मोभवंत्युराणउरुकुर्वाणः । दूतईयसेप्रदिवउराणइत्यपिनिगमोभवतिस्तियाआपोभवन्तिस्त्यायनात् । वृषासिंधू
नांवृषभःस्तियानामित्यपिनिगमोभवतिंस्तिपाःस्तियापालनंउपस्थितान्पालयतीतिवा । सनःस्तिपाउतभवातनूपाइ
त्यपिनिगमोभवतिंजबारुजवमानरोहिंजरमाणरोहिगरमाणरोहीतिवा । अग्रेरुपआरुपितंजबार्वित्यपिनिगमोभवतिं
जरूथंगरूथंगृणातेः । जरूथंहन्यक्षिरायेपुरंधिमित्यपिनिगमोभवतिंकुलिशइतिवज्रनामंकूलशातनोभवति । स्कंधां
सीवकुलिशेनाविवृक्णाहिंःशयतउपपृक्पृथिव्याः । स्कंधोवृक्षस्यसमास्कन्नोभवंत्ययमपीतरस्कन्धएतस्मादेवांस्कन्नं
कायेंऽहिःशयतउपपर्चनःपृथिव्यांस्तुंजस्तुंजतेर्दानकर्मणः ॥ १७ ॥ तुंजेतुंजेयउत्तरेस्तोमाइंद्रस्यवज्रिणः । नविंन्धे

अस्यसुष्टुतिं । दानेदानेयउत्तरैस्तोमाइंद्रस्यवज्रिणोनास्यतैविंदाभिसमाप्तिंस्तुतैर्बर्हणापरिबर्हणा । बृहच्छ्र्वाअसुरोब
र्हणाकृतइत्यपिनिगमोभवति ॥ १८ ॥ योअस्मैघ्रंसउतवायऊधनिसोमंसुनोतिभवतिद्युमाँअह । अपापशक्रस्ततनुष्टिमूह
तितनूशुभ्रंमघवायःकवासखः । घ्रंसइत्यहर्नामग्रस्यंतेऽस्मिन्रसागोरूधउद्धततरंभवत्युपोन्नद्धमितिवास्नेहानुप्रदान
सामान्याद्रात्रिरप्यूधउच्यतेसयोऽस्माअहन्यपिवारात्रौसोमंसुनोतिभवत्यहद्योतनवानपोहत्यपोहतिशक्रस्तितनिषुंध
र्मसंतानादपेतमलंकरिष्णुमयज्वानंतनूशुभ्रंतनूशोभयितारंमघवायःकवासखोयस्यकपूयाःसखायः । न्यांविध्यदिली
विशस्यदृह्वाविशृंगिणमभिनच्छुष्णमिंद्रः । निरविध्यदिलाबिलशयस्यदृह्वानिंव्यभिनच्छृंगिणंशुष्णमिंद्रः ॥ १९ ॥
अस्माइदुप्रभंरातूतुंजानोवृत्रायवज्रमीशानःकियेधाः । गोर्नपर्वविरदातिरश्चेष्यन्नर्णांस्यपांचरध्यै । अस्मैप्रहरतूर्णंत्व
रमाणोवृत्रायवज्रमीशानःकियेधाःकियद्धाइतिवाक्रममाणधाइतिवागोरिवपर्वाणिविरदमेघस्येष्यन्नर्णांस्यपांचरणाय
भृमिरभ्राम्यतेः । भृमिरस्यृषिकृन्मर्त्यानामित्यपिनिगमोभवतिविष्पितोविप्राप्तः । पारंनोअस्यविष्पितस्यपर्षन्नित्य
पिनिगमोभवति ॥ २० ॥ तन्नस्तुरीपमद्भुतंपुरुवारंपुरुत्मना । त्वष्टापोषायविष्यतुरायेनाभानोअस्मयुः । तन्नस्तू
र्णापिमहत्संभृतमात्मनात्वष्टाधनस्यपोषायविष्यत्वित्यस्मयुरस्मान्कामयमानोरास्पिनोरास्पीरपतेर्वारसतेर्वा । रा
स्पिनस्यायोरित्यपिनिगमोभवत्यृंजतिःप्रसाधनकर्मा । आवऋंजसऊर्जांव्युष्टिष्वित्यपिनिगमोभवत्यृजुरित्यप्यस्यभ

शि. वे. ९

 वति । ऋजुनीतीनोवरुणइत्यपिनिगमोभवतिंप्रतद्वसूप्राप्तवसू । हरीइंद्रप्रतद्वसूअभिस्वरेत्यपिनिगमोभवति ॥ २१ ॥
॥ ३२ ॥ हिनोतांनोअध्वरंदेंवयज्याहिनोतब्रह्मंसनयेधनांनां । ऋतस्ययोगेविष्यंध्वमूधंःश्रुष्टीवरींर्भूतनास्मभ्यंमापः । प्रहिणुत
नोऽध्वरंदेवयज्यायैंप्रहिणुतब्रह्मधनस्यसननायंऋतस्ययोगेयज्ञस्ययोगेंयाज्ञेशकटइतिवांशकटंशकृदितंभवतिंशनकैस्त
कतीतिवांशब्देनतकतीतिवा । श्रुष्टीवरींर्भूतनास्मभ्यंमापः । सुखवत्योभवतास्मभ्यमापः । चोष्कूयमांणइंद्रभूरिंवामं ।
ददादिंद्रबहुवननीयं । एधमानद्विळुभयंस्यराजांचोष्कूयतेविशइंद्रोंमनुष्यांन् । व्युदस्यत्येधमानानहर्द्वेष्ट्यसुन्वतःसुन्व
तोऽभ्यादधांत्युभयस्यराजांदिव्यस्यचपार्थिवस्यचंचोष्कूयमाणइतिचोष्कूयतेंश्चर्करीतवृत्तंसुमत्स्वयमित्यर्थः । उप
प्रागांत्सुमन्मेंऽधायिमन्मं । उपप्रैतुमांस्वयंयन्मेमनोऽध्यायियज्ञेनेंत्याश्वमेधिकोमंत्रोंदिविष्टिषुदिवएषणेषु । स्थूरंरा
धंःशताश्वंकुरुंगस्यदिविंष्टिषु । स्थूरःसमाश्रितमात्रोमहान्भवंत्यणुरनुस्थवीयांसंमुपसर्गोंलुप्तनामकरणोंयथासंप्रतिकु
रुंगोराजाबभूवंकुरुगमनाद्वांकुलगमनाद्वांकुरुःकृंततेंःक्रूरमित्यप्यस्यभवतिंकुलंकुष्णातेर्विकुषितंभवतिंदूतोव्याख्या
तोंजिन्वतिःप्रीतिकर्मा । भूमिंपर्जन्याजिन्वन्तिदिवंजिन्वन्त्यग्नयइत्यपिनिगमोभवति ॥२२॥ अमत्रोऽमात्रोमहान्भ ॥ ३३ ॥
वंत्यभ्यमितोवा । महाँअमत्रोवृजनेविरप्शीत्यपिनिगमोभवति । स्तवैवज्यृचींषमः । स्तूयतेवज्यृचासमोंऽनर्शरातिमन
श्लीलदानंमश्लीलंपापकमश्रिमद्विषमं । अनर्शरातिंवसुदामुपस्तुहीत्यपिनिगमोभवंत्यनर्वाप्रत्यृतोऽन्यस्मिन् । अनर्वा

णंवृषभंमन्द्रजिह्वंबृहस्पतिंवर्धयानव्यमर्कैः । अनर्वमप्रत्यृतमन्यास्मिन्वृषभंमन्द्रजिह्वंमन्दनजिह्वंमोदनजिह्वमितिवा
बृहस्पतिंवर्धयनव्यमर्कैरर्चनीयैःस्तोमैरसामिसामिप्रतिषिद्धंसामिस्यतेः। असाम्योजोबिभृथासुदानवः। असुसमाप्तंबलं
बिभृथकल्याणदानाः ॥२३॥ मात्वासोमस्यगल्दयासदायाचन्नहंगिरा। भूर्णिंमृगंनसवनेषुचुक्रुधंकईशानंनयाचिषत्।
माचुक्रुधंत्वासोमस्यगालनेनंसदायाचन्नहंगिरागीत्यास्तुत्याभूर्णिमिवमृगंनसवनेषुचुक्रुधंकईशानंनयाचिष्यतइतिंग
ल्दाधमनयोभवंतिगलनमासुधीयते । आत्वाविशन्त्विन्दवआगल्दाधमनीनां । नानाविभक्तीत्येतेभवतंआगलनाधम
नीनामित्यत्रार्थः ॥२४॥ नपापासोमनामहेनारायासोनजल्हवः । नपापामन्यामहेनाधनानज्वलनेनहीनाअस्त्यस्मासु
ब्रह्मचर्यमध्ययनंतपोदानकर्मेत्यृषिरवोचद्बकुरोभास्करोभयंकरोभासमानोद्रवतीतिवा ॥ २५ ॥ यवंवृकेणाश्विनावपं
तेषंदुहंतामनुषायदस्रा । अभिदस्युंबकुरेणाधमन्तोरुज्योतिश्चक्रथुरार्याय । यवमिववृकेणाश्विनौनिवपंतौवृकोलांगलं
भवतिविकर्तनाल्लांगलंलगतेर्लांगूलवद्वालांगूलंलगतेर्लंगतेर्लंबतेर्वान्नंदुहंतौमनुष्यायदर्शनीयावभिधमंतौदस्युंबकुरेणं
ज्योतिषावोदकेनंवार्यईश्वरःपुत्रोबेकनाटाःखलुकुसीदिनोभवंतिद्विगुणकारिणोवाद्विगुणदायिनोवाद्विगुणंकामयंत
इतिवा । इंद्रोविश्वान्बेकनाटाँअहर्दृशउतक्रत्वापणीँरभि । इंद्रोयःसर्वान्बेकनाटानहर्दृशःसूर्यदृशोयइमान्यहानिपश्यं
तिनपराणीतिवाभिभवतिकर्मणापणींश्चवणिजः ॥ २६ ॥ जीवान्नोअभिधेतनादित्यासःपुराहथात् । कद्धस्थहवन


श्रुतः । जीवतोनोऽभिधावतादित्यांःपुराहननात्क्नुस्थह्वानश्रुतइतिंमत्स्यानांजालमापन्नानांमेतदार्षवेदयन्तेंमत्स्याम
धाउदकेस्यंदंतेंमाद्यन्तेऽन्योन्यंभक्षणायेतिवांजालंजलचरंभवतिंजलेभवंवाजलेशयंवांहुरोंऽहस्वानंहूरणमित्यप्यस्य
भवति । कृण्वन्नंहूरणादुर्विंत्यपिनिगमोभवति । सप्तमर्यादांःकवयंस्ततक्षुस्तासामेकामिदभ्यंहुरोगांत् । सप्तैवमर्यादाः
कवयश्चक्रुंस्तासामेकामप्यधिगच्छन्नंहस्वान्भवतिंस्तेयमतल्पारोहणंब्रह्महत्यांभ्रूणहत्यांसुरापानंदुष्कृतस्यकर्मणःपुनः
पुनःसेवांपातकेनृतोद्यमितिंबतइतिनिपातःखेदानुकंपयोः ॥ २७ ॥ बतोबंतासियमनैवतेमनोहृदंयंचाविदाम । अन्या
किलत्वांकक्ष्यैवयुक्तंपरिंष्वजातेलिबुंजेववृक्षं । बतोबलादतीतोभवतिंदुर्बलोबतासिंयमनैवतेमनोंहृदयंचविजानीमो
ऽन्याकिलत्वांपरिष्वंक्ष्यतेंकक्ष्येवयुक्तंलिबुजेववृक्षंलिबुजाव्रततिर्भवतिंलीयतेविभजंती।तिंव्रततिर्वरणाच्चंसयनाच्चतत
नाच्चंवाताप्यमुदकंभवतिंवातएतदाप्याययति । पुनानोवाताप्यंविश्वश्चंद्रमित्यपिनिगमोभवति । वनेनवायोन्यंधा
यिचाकन् । वनइववायोवेःपुत्रश्चायन्निंतिवांकामयमानइतिवांवेतिचयइतिचंचकारशाकल्यउदात्तंत्वेवमाख्यातम ॥ ३४ ॥
भविष्यंदसुसमाप्तश्चार्थोंरथर्यतीतिंसिद्धस्तत्प्रेप्सूंरथंकामयतइतिवा । एषदेवोरथर्यतीत्यपिनिगमोभवति ॥ २८ ॥
मतीनांचसाधनंविप्राणांचाधवमित्यपिनिगमोभवंत्यन
धेनुंनइषंपिन्वतमसंक्रां । असंक्रमणीं । आधवआधवनात् । मतीनांचसाधनंविप्राणांचाधवमित्यपिनिगमोभवंत्यन
वब्रवोऽनवक्षिप्तवचनः । विजेषकृदिंद्रइवानवब्रवइत्यपिनिगमोभवति ॥ २९ ॥ अरांयिकाणेविकंटेगिरिंगच्छसदा

न्वे । शि॒रिंबिंठस्य॒सत्वंभि॒स्तोभिंष्ठ्वाचातयामसि । अदायिनिकाणेविकटेकाणोऽविक्रांतदर्शनइत्यौपमन्यवंःकणतेर्वा स्यादणूभावकर्मणंःकणतिःशब्दाणूभावेभाष्यतेंऽनुकणतीतिमात्राणूभावांत्काणोदर्शनाणूभावांत्काणोविकटोविक्रां तगतिरित्यौपमन्यवंःकुटतेर्वास्याद्विपरीतस्यंविकुटितोभवतिंगिरिंगच्छसदानोनुवेशब्दकारिके । शि॒रिंबिंठस्य॒सत्वं भिः । शिरिंबिठोमेघःशीर्यतेंबिठेबिठमंतरिक्षंबिठंवीरिटेनव्याख्यातंतस्यसत्त्वैरुदकैरितिस्यांत्तैष्ठ्वाचातयामोऽपिवां शिरिंबिठोभारद्वाजंःकालकर्णोपेतोंऽलक्ष्मीर्निर्नाशयांचकारंतस्यसत्त्वैःकर्मभिरितिस्यांत्तैष्ठ्वाचातयामंश्चातयतिर्नाशनें पराशरःपराशीर्णस्यंवसिष्ठस्यस्थविरस्यजज्ञे । पराशरःशतयातुर्वसिष्ठइत्यपिनिगमोभवतींद्रोऽपिपराशरउच्यतेंप राशातयितायातूनां । इंद्रोयातूनामभवत्पराशरइत्यपिनिगमोभवतिंक्रिविर्दतीविकर्तनदंती । यत्रावोदिद्युद्रदति क्रिविर्दतीत्यपिनिगमोभवतिंकरूळतीकृत्तदती । अपिवादेवंकंचित्कृत्तदंतंदृष्ट्वैवमवक्ष्यत् ॥ २० ॥ वा॒मंवांमंतआदुरे दे॒वोदंदात्वर्य॒मा । वा॒मंपू॒षावा॒मंभगोवा॒मंदे॒वःकरूळती । वामंवननीयंभवत्यादुरिरादरणांत्तत्कःकरूळतीभगःपुर स्तांत्तस्यान्वादेशइत्येकंपूषेत्यपरंसोऽदन्तकोऽदंतकःपूषेतिचब्राह्मणं । द॒नो॒विशंइंद्रमृ॒ध्रवांचः । दानमनसोनोमनु ष्यांनिंद्रमृदुवाचःकुरु । अ॒वीरांमिव॒माम॒यंश॒रारुं॒रभिमंन्यते । अबलामिवमामयंबालोऽभिमन्यतेंसंशिशरिषुरिदंयु रिदंकामयमानोंऽथापितद्वदर्थेभाष्यतेंवसूयुरिन्द्रोवसुमानित्यत्रार्थः । अश्वयुर्गव्यूरथयुर्वसूयुरिंद्रइत्यपिनिगमोभव

ति ॥ ३१ ॥ किंतेकृण्वंतिकीकटेषुगावोनाशिरंदुह्रेनतंपंतिघर्मं । आनोभरप्रमगंदस्यवेदोनैचाशाखंमघवन्रंधयानः ।
किंतेकुर्वन्तिकीकटेषुगावःकीकटानामदेशोऽनार्यनिवासःकीकटाःकिंकृताःकिंक्रियाभिरितिप्रेप्सावानैवचाशिरंदुह्रेन
तपंतिघर्मंहर्म्यमाहरनंःप्रमगंदस्यधनानिमगंदःकुसीदीमांगदोमामागमिष्यतीतिचददातितदपत्यंप्रमगंदोऽत्यंतकुसी
दिकुलीनःप्रमदकोवायोऽयमेवास्तिलोकोनपरइतिप्रेप्सुःपंडकोवापंडकःपंडगःप्रार्दकोवाप्रार्दयत्यांडावांडावाणीइवव्री
डयतितत्स्थंनैचाशाखंनीचाशाखोनीचैःशाखःशाखाःशक्नोतेराणिररणात्तन्नोमघवन्रंधयेतिरध्यतिर्वशगमनेबुंदयिषुर्भ
वतिबुंदोवाभिंदोवाभयदोवाभासमानोद्रवतीतिवा ॥ ३२ ॥ तुविक्षंतेसुकृतंसूमयंधनुःसाधुर्बुंदोहिरण्ययः । उभाते
बाहूरण्यासुसंस्कृतऋदूपेचिद्दृदूवृधा । तुविक्षंबहुविक्षेपंमहाविक्षेपंवातेसुकृतंसूमयंसुसुखंधनुःसाधयितातेबुंदोहिरण्म
यंउभौतेबाहूरण्यौरमणीयौसंग्राम्यौवर्दूपेअर्दनपातिनौगमनपातिनौशब्दपातिनौदूरपातिनौवामर्मण्यर्दनवेधिनौगम
नवेधिनौशब्दवेधिनौदूरवेधिनौवा ॥ ३३ ॥ निराविध्यद्गिरिभ्यआधारयत्पक्वमोदनं । इंद्रोबुंदंस्वाततं । निरविध्य
द्गिरिभ्यआधारयत्पक्वमोदनमुदकदानंमेघं । इंद्रोबुंदंस्वाततं । वृंदंबुंदेनव्याख्यातंवृंदारकश्च ॥३४॥ अयंयोहोताकि
रुसयमस्यकमप्यूहेयत्संमंजन्तिदेवाः । अहरहर्जायतेमासिमास्यथादेवादधिरेहव्यवाहं । अयंयोहोताकर्तासयम
स्यकमप्यूहेऽन्नमभिवहतियत्समश्नुवंतिदेवाअहरहर्जायतेमासेमासेऽर्धमासेऽर्धमासेवाथदेवानिदधिरेहव्यवाहमुल्बमू

॥ ३५ ॥

र्णोतेर्वृणोतेर्वा । महत्तदुल्बंस्थविरंतदासीदित्यपिनिगमोभवंत्यृबीसमपगतभासंमपहृतभासंमंतार्हितभासंगतभासंवा
॥ ३५ ॥ हिमेनाग्निंघ्रंसमंवारयेथांपितुमतीमूर्जंमस्माऽअधत्तं । ऋबीसेअत्रिमश्विनावंनीतमुन्निन्यथुःसर्वंगणंस्वस्ति ।
हिमेनोदकेनंग्रीष्मांतेग्निंघ्रंसंमहरवारयेथांमन्नवतींचास्माऊर्जंमधत्तंमग्नयेयोऽयमृबीसेंपृथिव्यामग्निरंतरौषधिवनस्प
तिष्वप्सुंतमुन्निन्यथुःसर्वगणंसर्वनामानंगणोगणनाद्गुणश्चंयद्धृष्टओषधयउद्यन्तिप्राणिनश्चपृथिव्यांतदश्विनोरूपंतेनै
नौस्तौतिस्तौति ॥ ३६ ॥ (त्वमग्नेऽलातृणउद्धृहाजासंउपलप्रक्षिणीकारुरहमस्मेतैश्चायंतइवाश्चवंहिंसोमानंस्वरणंमिं
द्रासोमाकृणुष्वपाजंस्ताँअध्वरेऽस्तिहिवोऽसूर्तेसूर्तेप्रवोच्छास्पृप्रस्तुंजैंतुंजेयोअस्माअस्माइत्तन्नस्तुरीपंहिनोतानोऽमत्रो
मात्वांनपापासोयवंवृकेणंजीवान्नोबतोबतासिंधेनुंनोऽरायिकाणेंवामंवामंकिंतेतुविक्षंतेंनिराविध्यदयंयौहिमेनाग्निंषट्
त्रिंशत्) ॥ इतिनिरुक्तेपूर्वषट्केषष्ठोऽध्यायः ॥ ६ ॥ ॥ इतिनिरुक्तपूर्वषट्कःसमाप्तः ॥ ॥ ॥



॥ इति निरुक्तपूर्वषट्कः समाप्तः ॥

॥ अथ निरुक्तोत्तरषट्कप्रारम्भः ॥

ॐ ॥ अथातोदैवतंतद्यानिनामानिप्राधान्यस्तुतीनांदेवतानांतद्दैवतमित्याचक्षतेसैषादेवतोपपरीक्षायत्काम ऋषि
र्यस्यांदेवतायामार्थपत्यमिच्छन्स्तुतिंप्रयुंक्तेतद्दैवतःसमंत्रोभवतिंतास्त्रिविधाऋचःपरोक्षकृताःप्रत्यक्षकृताआध्यात्मि
क्यश्चतत्रपरोक्षकृताःसर्वाभिर्नामविभक्तिभिर्युज्यंतेप्रथमपुरुषैश्चाख्यातस्य ॥ १ ॥ इंद्रोदिवइंद्रईशेपृथिव्याइंद्रमिद्गा
थिनोबृहदिंद्रेणैतेतृत्सवोवेविषाणाइंद्रायसामगायतनेंद्रादृतेपवतेधामकिंचनेंद्रस्यनुवीर्याणिप्रवोचमिंद्रेकामाअयंसतें
त्यथप्रत्यक्षकृतामध्यमपुरुषयोगास्त्वमितिचैतेनसर्वनाम्नात्वमिंद्रबलादधिविनइंद्रमृधोजहीत्यथापिप्रत्यक्षकृताःस्तो
तारोभवन्तिपरोक्षकृतानिस्तोतव्यानिमाचिदन्यद्विशंसतकण्वाअभिप्रगायतोपप्रेतकुशिकाश्चेतयध्वमित्यथाध्यात्मि
क्यउत्तमपुरुषयोगाअहमितिचैतेनसर्वनाम्नायथैतादिंद्रोवैकुंठोलबसूक्तंवागांभृणीयमिति ॥ २ ॥ परोक्षकृताःप्रत्यक्ष
कृताश्चमंत्राभूयिष्ठाअल्पशआध्यात्मिकाअथापिस्तुतिरेवभवतिनाशीर्वादइंद्रस्यनुवीर्याणिप्रवोचमितियथैतस्मिन्सू
क्तेऽथाप्याशीरेवनस्तुतिःसुचक्षाअहमक्षीभ्यांभूयासंसुवर्चामुखेनसुश्रुत्कर्णाभ्यांभूयासमितितदेतद्बहुलमाध्वर्यवेयाज्ञे
षुचमंत्रेष्वथापिशपथाभिशापौ । अद्यामुरीययदियातुधानोअस्मि । अधासवीरैर्दशभिर्वियूयाइत्यथापिकस्यचिद्भाव
स्याचिख्यासा । नमृत्युरासीदमृतंनतर्हि । तमआसीत्तमसागूढमग्रे । अथापिपरिदेवनाकस्माच्चिद्भावात् । सुदेवो
अद्यप्रपतेदनावृत् । नविजानामियदिवेदमस्मीत्यथापिनिंदाप्रशंसे । केवलाघोभवतिकेवलादी । भोजस्येदंपुष्करि

णीववेश्मैंत्येवमक्षसूक्तेंद्यूतानिंदाचकृषिप्रशंसाचैवमुच्चावचैरभिप्रायैर्ऋषीणांमंत्रदृष्टयोभवंति ॥ ३ ॥ तद्येऽनादिष्टदे
वतामंत्रास्तेषुदेवतोपपरीक्षायद्देवतःसयज्ञोवायज्ञांगंवातद्देवताभवंत्यथान्यत्रयज्ञात्प्राजापत्याइतियाज्ञिकानाराशंसा
इतिनैरुक्ताअपिवासाकामदेवतास्यात्प्रायोदेवतावास्तिह्याचारोबहुलंलोकेदेवदेवत्यमतिथिदेवत्यंपितृदेवत्यंयाज्ञदैव
तोमंत्रइत्यपिह्यदेवतादेवतावत्स्तूयंतेयथाश्वप्रभृतीन्योषधिपर्यंतान्यथाप्यष्टौद्वंद्वानिंसनमन्येतागंतूनिवार्थादेवता
नांप्रत्यक्षदृश्यमेतद्भवतिमाहाभाग्याद्देवतायाएकआत्माबहुधास्तूयतएकस्यात्मनोऽन्येदेवाःप्रत्यंगानिभवंत्यपिचस
त्वानांप्रकृतिभूमभिर्ऋषयःस्तुवंतीत्याहुःप्रकृतिसार्वनाम्न्याच्चेतरेतरजन्मानोभवंतीतरेतरप्रकृतयःकर्मजन्मानआत्मज
न्मानआत्मैवैषांरथोभवत्यात्माश्वाआत्मायुधमात्मेषवआत्मासर्वंदेवस्यदेवस्य ॥ ४ ॥ तिस्रएवदेवताइतिनैरुक्ताअ
ग्निःपृथिवीस्थानोवायुर्वेंद्रोवांतरिक्षस्थानःसूर्योद्युस्थानस्तासांमाहाभाग्यादेकैकस्याअपिबहूनिनामधेयानिभवंत्यपिवा
कर्मपृथक्त्वाद्यथाहोताध्वर्युर्ब्रह्मोद्गातेत्यप्येकस्यसतोऽपिवापृथगेवस्युःपृथग्घिस्तुतयोभवंतितथाभिधानानियथोएत
त्कर्मपृथक्त्वादितिबहवोऽपिविभज्यकर्माणिकुर्युस्तत्रसस्थानैकत्वंसंभोगैकत्वंचोपेक्षितव्यंयथापृथिव्यांमनुष्याःपश
वोदेवाइतिस्थानैकत्वंसंभोगैकत्वंचदृश्यतेयथापृथिव्याःपर्जन्येनचवाय्वादित्याभ्यांचसंभोगोऽग्निनाचेतरस्यलोकस्य
तत्रैतन्नरराष्ट्रमिव ॥ ५ ॥ अथाकारचिंतनंदेवतानांपुरुषविधाःस्युरित्येकंचेतनावद्धद्धिस्तुतयोभवंतितथाभिधाना

न्यथापिपौरुषविधिकैरंगैःसंस्तूयंते । ऋष्वातइंद्रस्थविरस्यबाहूयत्सँगृभ्णामघवन्काशिरित्ते । अथापिपौरुषविधिकै
र्द्रव्यसंयोगैः । आद्वाभ्यांहरिभ्यामिंद्रयाहि । कल्याणीर्जायासुरणंगृहेते । अथापिपौरुषविधिकैःकर्मभिः । अद्धींद्र
पिबचप्रस्थितस्याश्रुत्कर्णश्रुधीहवं । अपुरुषविधाःस्युरित्यपरमपितुयद्दृश्यते ॥ ६ ॥ अपुरुषविधंतद्यथाग्निर्वायुरादि
त्यःपृथिवीचंद्रमाइतियथोएतच्चेतनावद्वद्धिस्तुतयोभवंतीत्यचेतनान्यप्येवंस्तूयंतेयथाक्षप्रभृतीन्योषधिपर्यंतानियथो
एतत्पौरुषविधिकैरंगैःसंस्तूयंतइत्यचेतनेष्वप्येतद्भवत्यभिक्रंदंतिहरितेभिरासभिरितिग्रावस्तुतिर्यथोएतत्पौरुषविधि
कैर्द्रव्यसंयोगैरित्येतदपितादृशमेवंसुखंरथंयुयुजेसिंधुरश्विनमितिनदीस्तुतिर्यथोएतत्पौरुषविधिकैःकर्मभिरित्येतद
पितादृशमेवंहोतुश्चित्पूर्वेहविरद्यमाशतेतिग्रावस्तुतिरेवापिवोभयविधाःस्युरपिवापुरुषविधानामेवसतांकर्मात्मानएते
स्युर्यथायज्ञोयजमानस्यैषचाख्यानसमयः ॥ ७ ॥ तिस्रएवदेवताइत्युक्तंपुरस्तात्तासांभक्तिसाहचर्यंव्याख्यास्यामोऽ
थैतान्यग्निभक्तीन्ययंलोकःप्रातःसवनंवसंतोगायत्रीत्रिवृत्स्तोमोरथंतरंसामयेचदेवगणाःसमाम्नाताःप्रथमेस्थानेऽग्ना
यीपृथिवीळेतिस्त्रियोऽथास्यकर्मवहनंचहविषामावाहनंचदेवतानांयच्चकिंचिद्दार्ष्टिविषयिकमग्निकमैवतद्थास्यसंस्तवि
कादेवाइंद्रःसोमोवरुणःपर्जन्यऋतवआग्नावैष्णवंहविर्नत्वृक्संस्तविकीदशतयीषुविद्यतेऽथाप्याग्नापौष्णंहविर्नतुसंस्तवं
स्तत्रैतांविभक्तिस्तुतिमृचमुदाहरंति ॥ ८ ॥ पूषात्वेतश्च्यावयतुप्रविद्वाननष्टपशुर्भुवनस्यगोपाः । सत्वैतेभ्यःपरिददद

त्पि॒तृभ्यो॒ऽग्निर्दे॒वेभ्यः॑सुविद॒त्रियेभ्यः । पूषात्वेतःप्रच्यावयतुविद्वाननष्टपशुर्भुवनस्यगोपाइत्येषहिसर्वेषांभूतानांगोपा
यितादित्यःसत्वैतेभ्यःपरिददत्पितृभ्यइतिसांशयिकस्तृतीयःपादःपूषापुरस्तात्तस्यान्वादेशइत्येकमग्निरुपरिष्टात्तस्यप्र
कीर्तनेत्यपरं । अ॒ग्निर्दे॒वेभ्यः॑सुविद॒त्रियेभ्यः । सुविदत्रंधनंभवतिविंदतेर्वैकोपसर्गाद्ददातेर्वास्याद्व्युपसर्गात् ॥ ९ ॥
अथैतानींद्रभक्तीन्यंतरिक्षलोकोमाध्यंदिनंसवनंग्रीष्मस्त्रिष्टुप्पंचदशस्तोमोबृहत्सामयेचदेवगणाःसमाम्नातामध्यमेस्था
नेयाश्चस्त्रियोऽथास्यकर्मरसानुप्रदानंवृत्रवधोयाचकाचबलकृतिरिंद्रकर्मैवतदथास्यसंस्तविकादेवाअग्निःसोमोवरुणः
पूषाबृहस्पतिर्ब्रह्मणस्पतिःपर्वतःकुत्सोविष्णुर्वायुरथापिमित्रोवरुणेनसंस्तूयतेपूष्णारुद्रेणचसोमोऽग्निनाचपूषावातेन
चपर्जन्यः ॥ १० ॥ अथैतान्यादित्यभक्तीन्यसौलोकस्तृतीयसवनंवर्षाजगतीसप्तदशस्तोमोवैरूपंसामयेचदेवगणाः
समाम्नाताउत्तमेस्थानेयाश्चस्त्रियोऽथास्यकर्मरसादानंरश्मिभिश्चरसधारणंयच्चकिंचित्प्रवल्हितमादित्यकर्मैवतच्चंद्र
मसावायुनासंवत्सरेणेतिसंस्तवएतेष्वेवस्थानव्यूहेष्वृतुच्छंदःस्तोमपृष्ठस्यभक्तिशेषमनुकल्पयीतशरदनुष्टुबेकविंशस्तो
मोवैराजंसामेतिपृथिव्यायतनानिहेमंतःपंक्तिस्त्रिणवस्तोमःशाक्वरंसामेत्यंतरिक्षायतनानिशिशिरोऽतिच्छंदास्त्रयस्त्रिं
शस्तोमोरैवतंसामेतिद्युभक्तीनि ॥ ११ ॥ मंत्रामननाच्छंदांसिछादनात्स्तोमःस्तवनाद्यजुर्यजतेःसामसंमितमृचास्यतेर्व
र्चासमंमेनइतिनैदानागायत्रीगायतेःस्तुतिकर्मणस्त्रिगमनावाविपरीतागायतोमुखादुदपतदितिचब्राह्मणमुष्णिगुत्स्ना

ताभवतिंस्निह्यतेर्वास्यात्कांतिकर्मणंउष्णीषिणीवेत्यौपमिकंमुष्णीषंस्नायतेंःककुप्ककुभिनीभवतिंककुप्चकुब्जश्चकुजते
र्वोब्जतेर्वानुष्टुबनुष्टोभनाद्गायत्रीमेवत्रिपदांसतींचतुर्थेनपादेनानुष्टोभतीतिचब्राह्मणंबृहतीपरिबर्हणात्पंक्तिःपंचपदा
त्रिष्टुप्स्तोभत्युत्तरपदाकातुत्रितास्यात्तीर्णतमंछंदस्त्रिवृद्वज्रस्तस्यस्तोभनीतिर्वायत्त्रिरस्तोभत्तत्त्रिष्टुभस्त्रिष्टुप्त्वमितिविज्ञा
यते ॥ १२ ॥ जगतीगततमंछन्दोंजलचरगतिर्वाजल्गल्यमानोऽसृजदितिचब्राह्मणंविराड्विराजनाद्वाविराधनाद्वा
विप्रापणाद्वाविराजनात्संपूर्णाक्षराविराधनादूनाक्षराविप्रापणादधिकाक्षरापिपीलिकमध्येत्यौपमिकंपिपीलिकापेलते
र्गतिकर्मणंइतीमादेवताअनुक्रांताःसूक्तभाजोहविर्भाजंऋग्भाजश्चभूयिष्ठाःकाश्चिन्निपातभाजोऽथोताभिधानैःसंयुज्य
हविश्चोदयतींद्रायवृत्रघ्नइंद्रायवृत्रतुरइंद्रायांहोमुचइतितान्यप्येकेसमामनंतिभूयांसितुसमाम्नानाद्यत्तुसंविज्ञानभूतं
स्यात्प्राधान्यस्तुतितत्समामनेऽथोतकर्मभिर्ऋषिर्देवताःस्तौतिवृत्रहापुरंदरइतितान्यप्येकेसमामनंतिभूयांसितुसमा
म्नानाद्व्यंजनमात्रंतुतत्तस्याभिधानस्यभवतियथाब्राह्मणायबुभुक्षितायौदनंदेहिस्नातायानुलेपनंपिपासतेपानीयमिति
॥ १३ ॥ अथातोऽनुक्रमिष्यामोऽग्निःपृथिवीस्थानस्तंप्रथमंव्याख्यास्यामोऽग्निःकस्मादग्रणीर्भवत्यग्रंयज्ञेषुप्रणीय
तेंऽगंनयतिसंनममानोंऽक्नोपनोभवतीतिस्थौलाष्ठीविर्नक्नोपयतिनस्नेहयतित्रिभ्यआख्यातेभ्योजायतइतिशाकपूणि
रितादक्ताद्दग्धाद्वानीतात्सखल्वेतेरकारमादत्तेगकारमनक्तेर्वादहतेर्वानीःपरस्तस्यैषाभवति ॥ १४ ॥ अ॒ग्निमी॑ळे पु॒रो

हितंयज्ञस्यदेवमृत्विजं । होतारंरत्नधातमं । अग्निमीळेऽग्निंयाचामीळिरध्येषणाकर्मापूजाकर्मावापुरोहितोव्याख्यातो
यज्ञश्चदेवोदानाद्वादीपनाद्वाद्योतनाद्वाद्युस्थानोभवतीतिवायोदेवःसादेवताहोतारंह्वातारंजुहोतेर्होतेत्यौर्णवाभोरत्न
॥ ४ ॥ धातमंरमणीयानांधनानांदातृतमंतस्यैषापराभवति ॥ १५ ॥ अग्निःपूर्वेभिर्ऋषिभिरीड्योनूतनैरुत । सदेवाँऽएहव
क्षति । अग्निर्यःपूर्वैर्ऋषिभिरीळितव्योवेदितव्योऽस्माभिश्चनवतरैःसदेवानिहावहत्विति सनमन्येतायमेवाग्निरित्यप्ये
तेउत्तरेज्योतिषीअग्नीउच्येतेततोनुमध्यमः ॥ १६ ॥ अभिप्रवंतसमनेवयोषाःकल्याण्यः१स्मयमानासोअग्निं । घृतस्य
धाराःसमिधोनसंतताजुषाणोहर्यतिजातवेदाः । अभिनवंतसमनसइवयोषाःसमनंसमननाद्वासंमाननाद्वाकल्याण्यः
स्मयमानासोअग्निमित्यौपमिकंघृतस्यधाराउदकस्यधाराःसमिधोनसंतंनसतिराप्नोतिकर्मावानमतिकर्मावा । ताजुषा
णोहर्यतिजातवेदाः । हर्यतिःप्रेप्साकर्माविहर्यतीतिसमुद्रादूर्मिर्मधुमाँऽउदारदित्यादित्यमुक्तंमन्यंतेसमुद्राद्ध्येषोद्भ्य
देतीतिचब्राह्मणमथापिब्राह्मणंभवत्यग्निःसर्वादेवताइतितस्योत्तराभूयसेनिर्वचनाय ॥ १७ ॥ इंद्रंमित्रंवरुणमग्निमाहु
रथोदिव्यःससुपर्णोगरुत्मान् । एकंसद्विप्राबहुधावदंत्यग्निंयमंमातरिश्वानमाहुः । इममेवाग्निंमहांतमात्मानमेकमात्मा ॥ ४ ॥
नंबहुधामेधाविनोवदंतींद्रंमित्रंवरुणमग्निंदिव्यंचगरुत्मंतंदिव्योदिविजोगरुत्मान्गरणवान्गुर्वात्मामहात्मेतिवायस्तु
सूक्तंभजतेयस्मैहविर्निरुप्यतेऽयमेवसोग्निर्निपातमेवैतेउत्तरेज्योतिषीएतेननामधेयेनभजेते ॥ १८ ॥ जातवेदाःकस्मा

ज्ञातानिवेदजातानिवैनंविदुर्जातेजातेविद्यतइतिवाजातवित्तोवाजातधनोजातविद्योवाजातप्रज्ञानोयत्तज्जातःपशून
विंदतेतितज्जातवेदसोजातवेदस्त्वमितिब्राह्मणंतस्मात्सर्वान्नृतून्पशवोऽग्निमभिसर्पंतीतिचतस्यैषाभवति ॥ १९ ॥
प्रनूनंजातवेदसमश्वंहिनोतवाजिनं । इदंनोबर्हिरासदे । प्रहिणुतजातवेदसंकर्मभिःसमश्नुवानमपिवोपमार्थेस्यादश्व
मिवजातवेदसमितीदंनोबर्हिरासीदत्विति तदेतदेकमेवंजातवेदसंगायत्रंतृचंदशतयीषुविद्यतेयत्तुकिंचिदाग्नेयंतज्जात
वेदसानांस्थानेयुज्यतेसनमन्येतायमेवाग्निरित्यप्येतेउत्तरेज्योतिषीजातवेदसीउच्येतेततोनुमध्यमः । अभिप्रवंतस
मनेवयोषाइतितत्पुरस्ताद्व्याख्यातमथासावादित्यंउदुत्यंजातवेदसमितितदुपरिष्टाद्व्याख्यास्यामोयस्तुसूक्तंभजतेयस्मै
हविर्निरुप्यतेऽयमेवसोऽग्निर्जातवेदानिपातमेवैतेउत्तरेज्योतिषीएतेननामधेयेनभजेते ॥ २० ॥ वैश्वानरःकस्मा
द्विश्वान्नरान्नयतिविश्वएनंनरानयंतीतिवापिवाविश्वानरएवस्यात्प्रत्यृतःसर्वाणिभूतानितस्यवैश्वानरस्तस्यैषाभवति
॥ २१ ॥ वैश्वानरस्यसुमतौस्यामराजाहिकंभुवनानामभिश्रीः । इतोजातोविश्वमिदंविचष्टेवैश्वानरोयततेसूर्येण ।
इतोजातःसर्वमिदमभिविपश्यतिवैश्वानरःसंयततेसूर्येणराजायःसर्वेषांभूतानामभिश्रयणीयस्तस्यवयंवैश्वानरस्यक
ल्याण्यांमतौस्यामेतितत्कोवैश्वानरोमध्यमइत्याचार्यावर्षकर्मणाह्येनंस्तौति ॥ २२ ॥ प्रनूमहित्वंवृषभस्यवोचंयंपूरवो
वृत्रहणंसचंते । वैश्वानरोदस्युमग्निर्जघन्वाँऽअधूनोत्काष्ठाअवशम्बरंभेत् । प्रब्रवीमितन्महत्त्वंमाहाभाग्यंवृषभस्य

वर्षितुरपांयंपूरवःपूरयितव्यामनुष्यांवृत्रहणंमेघहनंसचंतेसेवंतेवर्षकामांदस्युर्दस्यतेःक्षयार्थादुपदस्यंत्यस्मिन्रसांउप
दासयतिकर्माणितमग्निर्वैश्वानरोघ्नन्नवाधूनोंदपःकाष्ठाअभिनच्छम्बरंमेघमथासावादित्यंइतिपूर्वेयाज्ञिकांएषांलोका
नांरोहेणंसवनानांरोहआम्नातोंरोहात्प्रत्यवरोहश्चिकीर्षितंस्तामनुकृतिंहोतांग्निमारुतेशस्त्रेवैश्वानरीयेणसूक्तेनप्रतिपद्य
तेंसोऽपिनस्तोत्रियमाद्रियेंताग्नेयोहिभवतिततआगच्छतिमध्यस्थानादेवतांरुद्रंचमरुतश्चंततोऽग्निमिहस्थानंमत्रैवस्तो
त्रियंशंसत्यथापिवैश्वानरीयोद्वादशकपालोभवत्येतस्यहिद्वादशविधंकर्माथापिब्राह्मणंभवत्यसौवाआदित्योंऽग्निर्वैश्वा
नरइत्यथापिनिवित्सौर्यवैश्वानरीभवत्यायोद्यांभात्यापृथिवीमित्येषहिद्यावापृथिव्यावाभासयंत्यथापिछान्दोमिकंसू
क्तंसौर्यवैश्वानरंभवतिदिविपृष्टोअरोचतेंत्येषहिदिविपृष्टोअरोचतेत्यंथापिहविष्पांतीयंसूक्तंसौर्यवैश्वानरंभवत्ययमेवा
ग्निर्वैश्वानरइतिशाकपूणिर्विश्वानरावित्यप्येतेउत्तरेज्योतिषीवैश्वानरोऽयंयत्ताभ्यांजायतेंकथंन्वयमेताभ्यांजायतइ
तियत्रवैद्युतःशरणमभिहंतियावदनुपात्तोभवतिमध्यमधर्मैवतावद्भवत्युंदकेंधनःशरीरोपशमनंउपादीयमानंएवायंसं
पद्यतंउदकोपशमनःशरीरदीप्तिरथादित्यादुदीचिप्रथमसमावृत्तआदित्येकंसंवामाणिंवापरिमृज्यंप्रतिस्वरेयत्रशुष्कगो ॥ ५ ॥
मयंमसंस्पर्शयन्धारयतिंतत्प्रदीप्यतेंसोऽयमेवसंपद्यतेथाप्याहवैश्वानरोयततेसूर्येणेतिनचपुनरात्मनात्मानंसंयततेंन्ये
नैवान्यःसंयततंइतइममादधांत्यमुतोऽमुष्यरश्मयःप्रादुर्भवंतीतोऽस्यार्चिषस्तयोर्भासोःसंसंगंदृष्ट्वैवमवक्ष्यदंथयान्ये

तान्यौत्तमिकानिसूक्तानिभागानिवासावित्राणिवासौर्याणिवापौष्णानिवावैष्णवानिवावैश्वदेव्यानिवातेषुवैश्वानरी याःप्रवादाअभविष्यन्नादित्यकर्मणाचैनमस्तोष्यन्नित्युदेषीत्यस्तमेषीतिविपर्येषीत्याग्नेयेष्वेवहिसूक्तेषुवैश्वानरीयाःप्रवा दाभवन्त्यग्निकर्मणाचैनंस्तौतीतिवहसीतिपचसीतिदहसीतियथोएतद्वर्षकर्मणाह्येनंस्तौतीत्यस्मिन्नप्येतदुपपद्यते । समानमेतदुदकमुच्चैत्यवचाहभिः । भूमिंपर्जन्याजिन्वंतिदिवंजिन्वंत्यग्नयः । इतिसानिगदव्याख्याता ॥ २३ ॥

कृष्णंनियानंहरयःसुपर्णाअपोवसानादिवमुत्पतंति । तआववृत्रन्त्सदनादृतस्यादिद्घृतेनपृथिवीव्युद्यते । कृष्णंनिरयणंरात्रिरादित्यस्यहरयःसुपर्णाहरणाआदित्यरश्मयस्तेयदामुतोऽर्वाचःपर्यावर्ततेसहस्थानादुदकस्यादित्यादथघृतेनोदकेनपृथिवीव्युद्यतेघृतमित्युदकनामजिघर्तेःसिंचतिकर्मणोऽथापिब्राह्मणंभवत्यग्निर्वाइतोवृष्टिंसमीरयतिधामच्छदिवखलुवैभूत्वावर्षतिमरुतःसृष्टांवृष्टिंनयंतियदाखलुवाअसावादित्योन्यङ्रश्मिभिःपर्यावर्ततेऽथवर्षतीतियथोएतद्रोहात्प्रत्यवरोहश्चिकीर्षितइत्याम्नायवचनादेतद्भवतियथोएतद्वैश्वानरीयोद्वादशकपालोभवतीत्यनिर्वचनंकपालानिभवंत्यस्तिहिसौर्यएककपालःपंचकपालश्चयथोएतद्ब्राह्मणंभवतीतिबहुभक्तिवादीनिहिब्राह्मणानिभवंतिपृथिवीवैश्वानरःसंवत्सरोवैश्वानरोब्राह्मणोवैश्वानरइतियथोएतन्निवित्सौर्यवैश्वानरीभवतीत्यस्यैवसाभवतियोविड्भ्योमानुषीभ्योदीदेदित्येषहिविड्भ्योमानुषीभ्योदीप्यतेयथोएतच्छांदोमिकंसूक्तंसौर्यवैश्वानरंभवतीत्यस्यैवतद्भवतिजमदग्निभिराहुतइति

जमदग्नयःप्रजमिताग्नयोवाप्रज्वलिताग्नयोवातैरभिहुतोभवतियथोएतद्धविष्पांतीयंसूक्तंसौर्यवैश्वानरंभवतीत्यस्यैवत
द्भवति ॥ २४ ॥ हविष्पांतमजरंस्वर्विदिदिविस्पृश्याहुतंजुष्टमग्नौ । तस्यभर्मणेभुवनायदेवाधर्मणेकंस्वधयापप्रथंत ।
हविर्यत्पानीयमजरंसूर्यविदिदिविस्पृश्यभिहुतंजुष्टमग्नौतस्यभरणायचभावनायचधारणायचैतेभ्यःसर्वेभ्यःकर्मभ्यो
देवाइममग्निमन्नेनापप्रथंताथाप्याह ॥ २५ ॥ अपामुपस्थेमहिषाअगृभ्णतविशोराजानमुपतस्थुर्ऋग्मियं । आदूतोअ
ग्निमभरद्विवस्वतोवैश्वानरंमातरिश्वापरावतः । अपामुपस्थउपस्थानेमहत्यन्तरिक्षलोकआसीनामहांतइतिवागृह्णत
माध्यमिकादेवगणाविशइवराजानमुपतस्थुर्ऋग्मियंमृग्मंतमितिवार्चनीयमितिवापूजनीयमितिवाहरद्यंदूतोदेवानां
विवस्वतआदित्याद्विवस्वान्विवासनवान्प्रेरितवतःपरागताद्वापिवास्याग्नेर्वैश्वानरस्यमातरिश्वानमाहर्तारमाहमातरि
श्वावायुर्मातर्यन्तरिक्षेश्वसितिमातर्याश्वनितीतिवाथैनमेताभ्यांसर्वाणिस्थानान्यभ्यापादंस्तौति ॥ २६ ॥ मूर्धाभुवो
भवतिनक्तमग्निस्ततःसूर्योजायतेप्रातरुद्यन् । मायामतुयज्ञियानामेतामपोयत्तूर्णिश्चरतिप्रजानन् । मूर्धामूर्तमस्मि
न्धीयतेमूर्धायःसर्वेषांभूतानांभवतिनक्तमग्निस्ततःसूर्योजायतेप्रातरुद्यंन्त्सएवप्रज्ञांत्वेतांमन्यंतेयज्ञियानांदेवानांयज्ञ
संपादिनामपोयत्कर्मचरतिप्रजानंन्त्सर्वाणिस्थानान्यनुसंचरतित्वरमाणस्तस्योत्तराभूयसेनिर्वचनाय ॥ २७ ॥ स्तोमे
नहिदिविदेवासोअग्निमजीजनन्च्छक्तिभीरोदसिप्रां । तमूअकृण्वन्त्रेधाभुवेकंसओषधीःपचतिविश्वरूपाः । स्तोमे

नयंहिदिविदेवासोअग्निमजनयन्छक्तिभिःकर्मभिर्द्यावापृथिव्योरापूरणंतमकुर्वंस्त्रेधाभावायपृथिव्यामंतरिक्षेदिवीति
शाकपूणिर्यदस्यदिवितृतीयंतदसावादित्यइतिहिब्राह्मणंतदग्नीकृत्यस्तौत्यथैनमेतयादित्यीकृत्यस्तौति ॥ २८ ॥ यदे
दैनमदधुर्यज्ञियासोदिविदेवाःसूर्यमादितेयं । यदाचरिष्णूमिथुनावभूतामादित्प्रापश्यन्भुवनानिविश्वा । यदैनम
दधुर्यज्ञियाःसर्वेदिविदेवाःसूर्यमादितेयमदितेःपुत्रंयदाचरिष्णूमिथुनौप्रादुरभूतांसर्वदासहचारिणावुषाश्चादित्यश्च
मिथुनौकस्मान्मिनोतिःश्रयतिकर्माथुइतिनामकरणस्थकारोवानयतिःपरोवनिर्वासमाश्रितावन्योन्यंनयतोवनुतोवा
मनुष्यमिथुनावप्येतस्मादेवमेथंतावन्योन्यंवनुतइतिवाथैनमेतयाग्नीकृत्यस्तौति ॥ १९ ॥ यत्राविदेतेअवरःपरश्चयज्ञ
न्योःकतरोनौविवेद । आशेकुरित्सधमादंसखायोनक्षंतयज्ञंकइदंविवोचत् । यत्रविवदेतेदैव्यौहोतारावयंचाग्निरसौ
चमध्यमःकतरोनौयज्ञेभूयोवेदेत्याशक्नुवंतिसत्सहमदनंसमानाख्यानाऋत्विजस्तेषांयज्ञंसमश्नुवानानांकोनइदंविवक्ष्य
तीतितस्योत्तराभूयसेनिर्वचनाय ॥ ३० ॥ यावन्मात्रमुषसोनप्रतीकंसुपर्ण्यो३वसतेमातरिश्वः । तावद्दधात्युपयज्ञ
मायन्ब्राह्मणोहोतुरवरोनिषीदन् । यावन्मात्रमुषसःप्रत्यक्तंभवतिप्रदिदर्शनमितिवास्त्युपमानस्यसंप्रत्यर्थेप्रयोगइहेव
निधेहीतियथासुपर्ण्यःसुपतनाएतारात्रयोवसतेमातरिश्वन्ज्योतिर्वर्णस्यतावदुपदधातियज्ञमागच्छन्ब्राह्मणोहोतास्या
ग्नेर्होतुरवरोनिषीदन्होतृजपस्त्वनग्निर्वैश्वानरीयोभवतिदेवसवितरेतंत्वावृणतेऽग्निंहोत्रायसहपित्रावैश्वानरेणेतीममे

वाग्निंसवितारमाहसर्वस्यप्रसवितारंमध्यमंवोत्तमंवापितरंयस्तुसूक्तंभजतेयस्मैहविर्निरुप्यतेऽयमेवसोऽग्निर्वैश्वानरोनि
पातमेवैतेउत्तरेज्योतिषीएतेननामधेयेनभजेतेभजेते ॥ ३१ ॥ (अथातोदैवतमिंद्रोदिवःपरोक्षकृतास्तधनंनिघोऽथा
कारचिंतनमपुरुषविधंतत्तिस्रएवदेवताइत्युक्तंपूषात्वाथैतानींद्रभक्तीन्यथैतान्यादित्यभक्तीनिमंत्रामननाज्जगतीगतन
मथातोनुक्रमिष्यामोऽग्निमीळेऽग्निःपूर्वेभिरभिप्रवंतेंद्रंमित्रंजातवेदाःकस्मात्प्रनूनंजातवेदसंवैश्वानरःकस्माद्वैश्वान
रस्यप्रनूमहित्वंकृष्णंनियानंहविष्पांतमपामुपस्थेमूर्धाभुवस्तोमेनहियदेदेनंयत्रावदेतेयावन्मात्रमेकत्रिंशत्) ॥ इतिनि
रुक्तउत्तरषट्केप्रथमोऽध्यायः ॥ १ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

ॐ ॥ द्रविणोदाःकस्माद्धनंद्रविणमुच्यतेयदेनदभिद्रवंतिबलंवाद्रविणंयदेनेनाभिद्रवंतितस्यदाताद्रविणोदास्त
स्यैषाभवति ॥ १ ॥ द्रविणोदाद्रविणसोग्रावहस्तासोऽअध्वरे । यज्ञेषुदेवमीळते । द्रविणोदायस्त्वंद्रविणसइतिद्रवि
णसादिनइतिवाद्रविणसानिनइतिवाद्रविणसस्तस्मात्पिबत्विति वा । यज्ञेषुदेवमीळते । याचंतिस्तुवंतिवर्धयंतिपूजयं
तीतिवातत्कोद्रविणोदाइंद्रइतिक्रौष्टुकिःसबलधनयोर्दातृतमस्तस्यचसर्वाबलकृतिरोजसोजातमुतमन्यएनमितिचाहा ॥ ७ ॥
थाप्यग्निंद्राविणोदसमाहैषपुनरेतस्माज्जायते। योअश्मनोरंतराग्निंजजानेत्यपिनिगमोभवत्यथाप्यृतुयाजेषुद्राविणोदसाः
प्रवादाभवंतितेषांपुनःपात्रस्येंद्रपानमितिभवत्यथाप्येनंसोमपानेनस्तौत्यथाप्याहद्रविणोदाःपिबतुद्राविणोदसइत्यय

मेवाग्निर्द्रविणोदाइतिशाकपूणिराग्नेयेष्वेवहिसूक्तेषुद्राविणोदसाःप्रवादाभवंति । देवाअग्निंधारयन्द्रविणोदामित्यपि
निगमोभवतियथोएतत्सबलधनयोर्दातृतमइतिसर्वासुदेवतास्वैश्वर्यंविद्यतेयथोएतदोजसोजातमुतमन्यएनमितिचा
हेत्ययमप्यग्निरोजसाबलेनमथ्यमानोजायतेतस्मादेनमाहसहसस्पुत्रंसहसःसूनुंसहसोयहुंयथोएतदग्निंद्राविणोदसमाहे
त्यृत्विजोऽत्रद्रविणोदसउच्यंतेहविषोदातारस्तेचैनंजनयंति । ऋषीणांपुत्रोअधिराजएषइत्यपिनिगमोभवतियथोएत
त्तेषांपुनःपात्रस्यैंद्रपानमितिभवतीतिभक्तिमात्रंतद्भवतियथावायव्यानीतिसर्वेषांसोमपात्राणांयथोएतत्सोमपानेनैनं
स्तौतीत्यस्मिन्नप्येतदुपपद्यते । सोमंपिबमंदसानोगणश्रिभिरित्यपिनिगमोभवतियथोएतद्द्रविणोदाःपिबतुद्राविणोद
सइत्यस्यैवतद्भवति ॥ २ ॥ मेद्यंतुतेवह्नयोयेभिरीयसेऽरिषण्यन्वीळयस्वावनस्पते । आयूयाधृष्णोअभिगूर्यात्वंने
ष्ट्रात्सोमंद्रविणोदः पिबऋतुभिः । मेद्यंतुतेवह्नयोवोढारोयैर्यास्यऋष्यन्दृढीभवायूयधृष्णोअभिगूर्यत्वंनेष्ट्रीयाद्धिष्ण्या
द्धिष्ण्योधिषण्योधिषणाभवोधिषणावाग्धिषेर्दधात्यर्थेधीसादिनीवाधीसानिनीतिवावनस्पतइत्येनमाहैषहिवनानांपा
तावापालयितावावनंवनोतेःपिबर्तुभिःकालैः ॥ ३ ॥ अथातआप्रियआप्रियःकस्मादाप्नोतेःप्रीणातेर्वाप्रीभिराप्रीणा
तीतिचब्राह्मणंतासामिध्मःप्रथमागामीभवतीध्मःसमिन्धनात्तस्यैषाभवति ॥ ४ ॥ समिद्धोअद्यमनुषोदुरोणेदेवोदे
वान्यजसिजातवेदः । आचवहमित्रमहश्चिकित्वान्त्वंदूतःकविरसिप्रचेताः । समिद्धोऽद्यमनुष्यस्यमनुष्यस्यगृहेदेवोदे

वाग्निंसवितारमाहसर्वस्यप्रसवितारंमध्यमंवोत्तमंवापितरंयस्तुसूक्तंभजतेयस्मैहविर्निरुप्यतेऽयमेवसोग्निर्वैश्वानरोनि
पातमेवैतेउत्तरेज्योतिषीएतेननामधेयेनभजेतेभजेते ॥ ३१ ॥ (अथातोदैवतमिंद्रोदिवंःपरोक्षकृतास्तद्येनतिस्रोऽथा
कारचिंतनमपुरुषविधंतत्तिस्रएवदेवताइत्युक्तंपूषात्वाथैतानींद्रभक्तीन्यथैतान्यादित्यभक्तीनिमंत्रामननाज्जगतीगतत
मथातोनुक्रमिष्यामोऽग्निमीळेऽग्निःपूर्वेभिरभिप्रवंतेंद्रंमित्रंजातवेदाःकस्मात्प्रनूनंजातवेदसंवैश्वानरःकस्माद्वैश्वान
रस्यप्रनूमहित्वंकृष्णंनियानंहविष्पांतमपामुपस्थेमूर्धाभुवस्तोमेनहियदेदेनंयत्रावदेतेयावन्मात्रमेकत्रिंशत्) ॥ इतिनि
रुक्तउत्तरषट्केप्रथमोऽध्यायः ॥ १ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

ॐ ॥ द्रविणोदाःकस्माद्धनंद्रविणमुच्यतेयदेनदभिद्रवंतिबलंवाद्रविणंयदेनेनाभिद्रवंतितस्यदाताद्रविणोदास्त
स्यैषाभवति ॥ १ ॥ द्रविणोदाद्रविणसोग्रावहस्तासोऽअध्वरे । यज्ञेषुदेवमीळते । द्रविणोदायस्त्वंद्रविणसइतिद्रवि
णसादिनइतिवाद्रविणसानिनइतिवाद्रविणसस्तस्मात्पिबत्वितिवा । यज्ञेषुदेवमीळते । याचंतिस्तुवंतिवर्धयंतिपूजयं
तीतिवातत्कोद्रविणोदाइंद्रइतिक्रौष्टुकिःसबलधनयोर्दातृतमस्तस्यचसर्वाबलकृतिरोजसोजातमुतमन्यएनमितिचाहा ॥ ७ ॥
थाप्यग्निंद्राविणोदसमाहैषपुनरेतस्माज्जायते। योअश्मनोरंतरग्निंजजानेत्यपिनिगमोभवत्यथाप्यृतुयाजेषुद्राविणोदसाः
प्रवादाभवंतितेषांपुनःपात्रस्येंद्रपानमितिभवत्यथाप्येनंसोमपानेनस्तौत्यथाप्याहद्रविणोदाःपिबतुद्राविणोदसइत्यय

मेवाग्निर्द्रविणोदाइतिशाकपूणिराग्नेयेष्वेवहिसूक्तेषुद्राविणोदसाःप्रवादाभवंति । देवाअग्निंधारयन्द्रविणोदामित्यपि
निगमोभवतींयथोएतत्सबलधनयोर्दातृतमइतिसर्वासुदेवतास्वैश्वर्यंविद्यतेयथोएतदोजसोजातमुतमन्यएनमितिचा
हैत्ययमप्यग्निरोजसाबलेनंमथ्यमानोजायतेतस्मादेनमाहसहसस्पुत्रंसहसःसूनुंसहसोयहुंयथोएतदग्निंद्राविणोदसमाहै
त्यृत्विजोऽत्रद्रविणोदसउच्यंतेहविषोदातारस्तेचैनंजनयंति । ऋषीणांपुत्रोअधिराजएषइत्यपिनिगमोभवतींयथोएत
त्तेषांपुनःपात्रस्यैंद्रपानमितिभवतीतिंभक्तिमात्रंतद्भवतींयथावायव्यानीतिंसर्वेषांसोमपात्राणांयथोएतत्सोमपानेनैनं
स्तौतीत्यस्मिन्नप्येतदुपपद्यते । सोमंपिबमंदसानोगणश्रिभिरित्यपिनिगमोभवर्तीयथोएतद्द्रविणोदाःपिबतुद्राविणोद
सइत्यस्यैवतद्भवति ॥ २ ॥ मेद्यंतुतेवह्नयोयेभिरीयसेऽरिषण्यन्वीळयस्वावनस्पते । आयूर्याधृष्णोअभिगूर्यात्वंने
ष्ट्रात्सोमंद्रविणोदःपिबंऋतुभिः । मेद्यंतुतेवह्नयोवोढारोयैर्यास्यऋष्यन्दृढीभवायूयधृष्णोअभिगूर्यत्वंनेष्ट्रीयाद्धिष्ण्या
द्धिष्ण्योधिषण्योधिषणाभवोंधिषणावाग्धिषेर्दधात्यर्थेधीसादिनीवाधीसानिनीतिवांवनस्पतइत्येनमाहैषहिवनानांपा
तावापालयितावांवनंवनोतेःपिबर्तुभिःकालैः ॥ ३ ॥ अथातआप्रियआप्रियःकस्मादाप्नोतेःप्रीणातेर्वाप्रीभिराप्रीणा
तीतिचब्राह्मणंतासामिध्मःप्रथमागामीभवतींध्मःसमिन्धनात्तस्यैषाभवति ॥ ४ ॥ समिद्धोअद्यमनुषोदुरोणेदेवोदे
वान्यंजसिजातवेदः । आचवहमित्रमहश्चिकित्वान्त्वंदूतःकविरसिप्रचेताः । समिद्धोऽद्यमनुष्यस्यमनुष्यस्यगृहेदेवोदे

वान्यजसिजातवेदंआचवहमित्रमहश्चिकित्वाँश्चेतनावांस्त्वंदूतःकविरसिप्रचेताःप्रवृद्धचेतायज्ञेध्मइतिकात्थक्योऽग्नि
रितिशाकपूणिस्तनूनपादाज्यंभवतिनपादित्यननंतरायाःप्रजायानामधेयंनिर्णततमाभवतिगौरत्रतनूरुच्येततास्यां
भोगास्तस्याःपयोजायतेपयसआज्यंजायतेऽग्निरितिशाकपूणिरापोऽत्रतन्वउच्यंतेततांतरिक्षेताभ्यओषधिवनस्पत
योजायंतेओषधिवनस्पतिभ्यएषजायतेतस्यैषाभवति ॥ ५ ॥ तनूनपात्पथऋतस्ययानान्मध्वासमंजन्त्स्वदयासुजि
ह्व । मन्मानिधीभिरुतयज्ञमृन्धन्देवत्राचकृणुह्यध्वरंनः । तनूनपात्पथऋतस्ययानान्यज्ञस्ययानान्मधुनासमंजन्त्स्वद
यकल्याणजिह्वमननानिचनोधीभिर्यज्ञंचसमर्धयंदेवान्नोयज्ञंगमयंनराशंसोयज्ञइतिकात्थक्योनराअस्मिन्नासीनाःशंसं
त्यग्निरितिशाकपूणिर्नरैःप्रशस्योभवतितस्यैषाभवति ॥ ६ ॥ नराशंसस्यमहिमानमेषामुपस्तोषामयजतस्ययज्ञैः । येसु
क्रतवःशुचयोधियंधाःस्वदंतिदेवाउभयानिहव्या । नराशंसस्यमहिमानमेषामुपस्तुमोयज्ञियस्ययज्ञैर्येसुकर्माणःशुच
योधियंधारयितारःस्वदयंतुदेवाउभयानिहवींषिसोमंचेतराणिचेतिवातांत्राणिचावापिकानिचेतिवेळईट्टेःस्तुतिकर्मण
इंधतेर्वातस्यैषाभवति ॥ ७ ॥ आजुह्वानईड्योवंद्यश्चायाह्यग्नेवसुभिःसजोषाः । त्वंदेवानामसियह्वहोतासएनान्यक्षी ॥ ८ ॥
षितोयजीयान् । आहूयमानईळितव्योवंदितव्यश्चायाह्यग्नेवसुभिःसहजोषणस्त्वंदेवानामसियह्वहोतायह्वइतिमहतो
नामधेयंयातश्चहूतश्चभवति । सएनान्यक्षीषितोयजीयान् । इषितःप्रेषितइतिवाधीष्टइतिवायजीयान्यष्टृतरोवर्हिः

परिबर्हणात्तस्यैषाभवति ॥ ८ ॥ प्राचीनंबर्हिःप्रदिशापृथिव्यावस्तोरस्यावृज्यतेअग्रेअह्नां । व्युप्रथतेवितरंवरीयोदेवे
भ्योअदितयेस्योनं । प्राचीनंबर्हिःप्रदिशापृथिव्यांवसनायास्याःप्रवृज्यतेऽग्रेऽह्नांबर्हिःपूर्वाह्णेतद्विप्रथतेवितरंवितीर्ण
तरमितिवाविस्तीर्णतरमितिवावरीयोवरतरमुरुतरंवादेवेभ्यश्चादितयेचस्योनंस्योनमितिसुखनामस्यतेरवस्यन्त्येतत्से
वितव्यंभवतीतिवाद्वारोजवतेर्वाद्रवतेर्वावारयतेर्वातासामेषाभवति ॥ ९ ॥ व्यचस्वतीरुर्विया विश्रयंतांपतिभ्योन
जनयःशुंभमानाः । देवीर्द्वारोबृहतीर्विश्वमिन्वादेवेभ्योभवतसुप्रायणाः । व्यंचनवत्यउरुत्वेनविश्रयंतांपतिभ्यइव
जायाऊरूमैथुनेधर्मेशुशोभिषमाणावरतममंगमूरूदेव्योद्वारोबृहत्योमहत्योविश्वमिन्वाविश्वमाभिरेतियज्ञेगृहद्वारइ
तिकात्थक्योऽग्निरितिशाकपूणिरुषासानक्तोषाश्चनक्ताचोषाव्याख्यातानक्तेतिरात्रिनामानक्तिभूतान्यवश्यायेनापि
वानक्ताव्यक्तवर्णातयोरेषाभवति ॥ १० ॥ आसुष्वयंतीयजतेउपाकेउषासानक्तासदतांनियोनौ । दिव्येयोषणेबृह
तीसुरुक्मेअधिश्रियंशुक्रपिशंदधाने । सेष्मीयमाणेइतिवासुष्वापयंत्याविति वासीदतामितिवान्यासीदतामितिवाय
ज्ञियेउपक्रांतेदिव्येयोषणेबृहत्यौमहत्यौसुरुक्मेसुरोचनेअधिदधानेशुक्रपेशसंश्रियंशुक्रंशोचतेर्ज्वलतिकर्मणःपेशइति
रूपनामपिंशतेर्विपिशितंभवतिदैव्याहोतारादैव्यौहोतारावयंचाग्निरसौचमध्यमस्तयोरेषाभवति ॥ ११ ॥ दैव्याहो
ताराप्रथमासुवाचामिमानायज्ञंमनुषोयजध्यै । प्रचोदयंताविदथेषुकारूप्राचीनंज्योतिःप्रदिशादिशंता । दैव्यौहोता

रौप्रथमौसुवाचौनिर्मिमानौयज्ञंमनुष्यस्यमनुष्यस्ययजनायप्रचोदयमानौयज्ञेषुकर्तारौपूर्वस्यांदिशियष्टव्यमितिप्रदिशं
तौतिस्रोदेवीस्तिस्रोदेव्यस्तासामेषाभवति ॥ १२ ॥ आनोयज्ञंभारतीतूयमेत्विळामनुष्वदिहचेतयंती । तिस्रोदेवी
र्बर्हिरेदंस्योनंसरस्वतीस्वपसःसदंतु । ऐतुनोयज्ञंभारतीक्षिप्रंभरतआदित्यस्तस्यभाइडाचमनुष्यवदिहचेतयमानाति
स्रोदेव्योबर्हिरिदंसुखंसरस्वतीचसुकर्माणआसीदंतुत्वष्टातूर्णमश्नुतइतिनैरुक्तास्त्विषेर्वास्याद्दीप्तिकर्मणस्त्वक्षतेर्वास्या
त्करोतिकर्मणस्तस्यैषाभवति ॥ १३ ॥ यइमेद्यावापृथिवीजनित्रीरूपैरपिंशद्भुवनानिविश्वा । तमद्यहोतरिषितोयजीया
न्देवंत्वष्टारमिहयक्षिविद्वान् । यइमेद्यावापृथिव्यौजनयित्र्यौरूपैरकरोद्भूतानिचसर्वाणितमद्यहोतरिषितोयजीयान्दे
वंत्वष्टारमिहयजविद्वान्माध्यमिकस्त्वष्टेत्याहुर्मध्यमेचस्थानेसमाम्नातोऽग्निरितिशाकपूणिस्तस्यैषापराभवति ॥ १४ ॥
आविष्ट्योवर्धतेचारुरासुजिह्मानामूर्ध्वःस्वयशाउपस्थे । उभेत्वष्टुर्बिभ्यतुर्जायमानात्प्रतीचीसिंहंप्रतिजोषयेते । आ
विरावेदनात्तत्योवर्धतेचारुरासुचारुचरतेजिंह्मजिहीतेरूर्ध्वउच्छ्रितोभवतिस्वयशाआत्मयशाउपस्थउपस्थानेउभेत्वष्टु
र्बिभ्यतुर्जायमानात्प्रतीचीसिंहंप्रतिजोषयेते । द्यावापृथिव्याविति वाहोरात्रेइतिवारणीइतिवाप्रत्यक्तेसिंहंसहनंप्रत्या
सेवेते ॥ १५ ॥ वनस्पतिर्व्याख्यातस्तस्यैषाभवति ॥ १६ ॥ उपावसृजत्मन्यासमञ्जन्देवानांपाथऋतुथाहवींषि ।
वनस्पतिःशमितादेवोअग्निःस्वदंतुहव्यंमधुनाघृतेन । उपावसृजात्मनात्मानंसमंजन्देवानामन्नमृतावृतौहवींषिकाले

कालेवनस्पतिःशमितादेवोअग्निरित्येतेत्रयंःस्वदयंतुहव्यंमधुनाचघृतेनचंतत्कोवनस्पतिर्यूपइतिकात्थक्यौऽग्निरिति शाकपूणिस्तस्यैषापराभवति ॥ १७ ॥ अंजंतित्वामध्वरेदेवयंतोवनस्पतेमधुनादैव्येन । यदूर्ध्वस्तिष्ठाद्रविणेहधत्ताद्य द्वाक्षयोमातुरस्याउपस्थे । अंजंतित्वामध्वरेदेवान्कामयमानावनस्पतेमधुनादैव्येनचघृतेनचंयदूर्ध्वःस्थास्यसिद्रविणा निचनोदास्यसियद्वातेकृतःक्षयोमातुरस्याउपस्थउपस्थानेऽग्निरितिशाकपूणिस्तस्यैषापराभवति ॥ १८ ॥ देवेभ्योव नस्पतेहवींषिहिरण्यपर्णप्रदिवस्तेअर्थं । प्रदक्षिणिद्रशनयानियूयंकृतस्यवक्षिपथिभीरजिष्ठैः । देवेभ्योवनस्पतेहवींषि हिरण्यपर्णकृतपर्णापिवोपमार्थेस्याद्धिरण्यवर्णपर्णोतिप्रदिवस्तेअर्थपुराणस्तेसोऽर्थोयंतेप्रब्रूमोयज्ञस्यवहपथिभीरजिष्ठैर्कृ जुतमैरजस्वलतमैस्तपिष्ठतमैरितिवातस्यैषापराभवति ॥ १९ ॥ वनस्पतेरशनयानियूयपिष्टतमयावयुनानिविद्वान् । वहदेवत्रादिधिषोहवींषिप्रचदातारममृतेषुवोचः । वनस्पतेरशनयानियूयसुरूपतमयावयुनानिविद्वान्प्रज्ञानानिप्र जानन्वहदेवान्यज्ञेदातुर्हवींषिप्रब्रूहिचदातारममृतेषुदेवेषुस्वाहाकृतयःस्वाहेत्येतत्सुआहेतिवास्वावागाहेतिवास्वंप्राहे तिवास्वाहुतंहविर्जुहोतीतिवातासामेषाभवति ॥ २० ॥ सद्योजातोव्यमिमीतयज्ञमग्निर्देवानामभवत्पुरोगाः । अस्य होतुःप्रदिश्यृतस्यवाचिस्वाहाकृतंहविरदंतुदेवाः । सद्योजायमानोनिरमिमीतयज्ञमग्निर्देवानामभवत्पुरोगाम्यस्यहो तुःप्रदिश्यृतस्यवाच्यास्येस्वाहाकृतंहविरदन्तुदेवायजंतीतीमाआप्रीदेवताअनुक्रांताअथकिंदेवताःप्रयाजानुयाजाआ

ग्नेयाइत्येके ॥ २१ ॥ प्रयाजान्मेंअनुयाजांश्चकेवंलानूर्जस्वन्तंहविषोंदत्तभागं । घृतंचापांपुरुषंचौषंधीनामग्नेश्चंदीर्घ
मायुंरस्तुदेवाः । तवंप्रयाजाअंनुयाजाश्चकेवंलऊर्जस्वंतोहविषंःसंतुभागाः । तवांग्नेयज्ञो३यमंस्तुसर्वस्तुभ्यंनमंतांप्रदि
शश्चतंस्रः । आग्नेयावैप्रयाजांआग्नेयाअनुयाजाइतिचब्राह्मणंछन्दोदेवताइत्यपरंछन्दांसिवैप्रयाजांश्छंदांस्यनुयाजाइ
तिचब्राह्मणंमृतुदेवताइत्यपरंमृतवोवैप्रयाजांऋतवोऽनुयाजाइतिचब्राह्मणंपशुदेवताइत्यपरंपशवोवैप्रयाजांःपशवोऽ
नुयाजाइतिचब्राह्मणंप्राणदेवताइत्यपरंप्राणावैप्रयाजांःप्राणावाअनुयाजाइतिचब्राह्मणंमात्मदेवताइत्यपरंमात्मावैप्र
याजांआत्मावाअनुयाजाइतिचब्राह्मणंमाग्नेयाइतितुस्थितिंर्भक्तिमात्रमितरंत्किमर्थंपुनरिदमुच्यतेंयस्यैदेवतायैहविर्गृ
हीतंस्यांत्तांमनसाध्यायेद्वषट्करिष्यन्नितिहविज्ञायतेंतान्येतान्येकादशाप्रीसूक्तानिंतेषांवासिष्ठमात्रेयंवाध्र्यश्वंगात्संमद
मितिंनाराशंसवंतिंमैधातिथंदैर्घतमसंप्रैषिकमित्युभयवंत्यंतोऽन्यानितनूनपात्वंतितनूनपात्वंति ॥ २२ ॥ (द्रविणो
दाःकस्मांद्द्रविणोदाद्रविणसोंमेद्यंतुतेऽथातआप्रियंःसमिद्धोअद्यतनूनपांन्नराशंसस्याजुह्वानंःप्राचीनंव्यचस्वतींरासु
ष्वयंतीदैव्याहोतारांनोयज्ञंयइमेंआविष्ठोवनस्पतिंरुपावसृजांजंतिंदेवेभ्योवनस्पतेंवनस्पतेरशनयानियूयसद्योजातंः
प्रयाजान्मेद्वाविंशतिः) ॥ इतिनिरुक्तउत्तरषट्केद्वितीयोऽध्यायः ॥ २ ॥ ॥ ॥

ॐ ॥ अथयानिपृथिव्यायतनानिसत्त्वानिस्तुतिंलभंतेतान्यतोऽनुक्रमिष्यामस्तेषामश्वःप्रथमागामीभवत्यश्वो
व्याख्यातस्तस्यैषाभवति ॥ १ ॥ अश्वोवोह्वासुखंरथंहसनामुपमंत्रिणः । शेपोरोमण्वन्तौभेदौवारिन्मंडूकंइच्छ
तींद्रायेंदोपरिस्रव । अश्वोवोह्वासुखंवोह्वारथंवोह्वासुखमितिकल्याणनामकल्याणंपुण्यंसुहितंभवतिसुहितंगम्यतीति
वांहसैतावापातावापालयितावाशेपमृच्छतीतिवारिवारयतिमानोव्याख्यातस्तस्यैषाभवति ॥ २ ॥ मानोमित्रोवरुणो
अर्यमायुरिंद्रऋभुक्षामरुतःपरिख्यन् । यद्वाजिनोदेवजातस्यसप्तेःप्रवक्ष्यामोविदथेवीर्याणि । यद्वाजिनोदेवैर्जातस्य
सप्तेःसरणस्यप्रवक्ष्यामोयज्ञेविदथेवीर्याणिमानस्त्वंमित्रश्चवरुणश्चार्यमाचायुश्चवायुरयनइंद्रश्चोरुक्षयणऋभूणांराजेति
वामरुतश्चपरिख्यंन्छकुनिःशक्नोत्युन्नेतुमात्मानंशक्नोतिनदितुमितिवाशक्नोतितकितुमितिवासर्वतःशंकरोऽस्त्वितिवा
शक्नोतेर्वातस्यैषाभवति ॥ ३ ॥ कनिक्रदज्जनुषंप्रब्रुवाणइयर्तिवाचमरितेवनावम् ॥ सुमंगलश्चशकुनेभवासिमात्वाका
चिदभिभाविश्व्याविदत् । न्यक्रंदीज्जन्मप्रब्रुवाणोयथास्यशब्दस्तथानामेरयतिवाचमीरयितेवनावंसुमंगलश्चशकुने
भवकल्याणमंगलोमंगलंगिरतेर्गृणात्यर्थेगिरत्यनर्थानितिवांगलमंगवन्मज्जयतिपापकमितिनैरुक्तामागच्छत्वितिवा
माचत्वाकाचिदभिभूतिःसर्वतोविदद्गृत्समदमर्थमभ्युत्थितंकपिंजलोऽभिववाशेतदभिवादिन्येषर्ग्भवति ॥ ४ ॥ भद्रं
वंददक्षिणतोभद्रमुत्तरतोवद । भद्रंपुरस्तान्नोवदभद्रंपश्चात्कपिंजल । इतिसानिगदव्याख्यातागृत्समदोगृत्समदनो

गृत्सइतिमेधाविनामगृणातेःस्तुतिकर्मणोमंडूकामज्जूकामज्जनान्मदतेर्वामोदतिकर्मणोमंदतेर्वातृप्तिकर्मणोमंडयतेरि
तिवैयाकरणामंडएषामोकइतिवामंडोमदेर्वामुदेर्वातेषामेषाभवति ॥ ५ ॥ संवत्सरंशशयानाब्राह्मणाव्रतचारिणः ।
वाचंपर्जन्यजिन्वतांप्रमंडूकाअवादिषुः । संवत्सरंशिश्यानाब्राह्मणाव्रतचारिणोऽब्रुवाणाअपिवोपमार्थेस्याद्ब्राह्मणाइ
वव्रतचारिणइतिवाचंपर्जन्यप्रीतांप्रावादिषुर्मंडूकावसिष्ठोवर्षकामःपर्जन्यंतुष्टावतंमंडूकाअन्वमोदंतसमंडूकाननुमोद
मानान्दृष्ट्वातुष्टावतदभिवादिन्येषर्ग्भवति ॥ ६ ॥ उपप्लवदमंडूकिवर्षमावदतादुरि । मध्येह्रदस्यप्लवस्वनिगृह्यचतुरः
परः । इतिसानिगदव्याख्याताऽक्षाअश्नुवतएनानितिवाभ्यश्नुवतएभिरितिवातेषामेषाभवति ॥ ७ ॥ प्रावेपामाबृह
तोमादयंतिप्रवातेजाइरिणेवर्वृताना । सोमस्येवमौजवतस्यभक्षोविभीदकोजागृविर्मह्यमच्छान् । प्रवेपिणोमामहतो
विभीदकस्यफलानिमादयंतिप्रवातेजाःप्रवणेजाइरिणेवर्तमानाइरिणंनिर्ऋणंमृणातेरपार्णंभवत्यपरताअस्मादोषधयइ
तिवा । सोमस्येवमौजवतस्यभक्षः । मौजवतोमूजवतिजातोमूजवान्पर्वतोमुंजवान्मुंजोविमुच्यतइषीकयैषीकेषतेर्गति
कर्मणइयमपीतरेषीकैतस्मादेवविभीदकोविभेदनाज्जागृविर्जागरणान्मह्यमचच्छदत्प्रशंसत्येनान्प्रथमयानिंदत्युत्तरा ॥ ११ ॥
भिर्ऋषेरक्षपरिद्यूनस्यैतदार्षंवेदयंतेग्रावाणोहन्तेर्वागृणातेर्वागृह्णातेर्वातेषामेषाभवति ॥ ८ ॥ प्रैतेवदन्तुप्रवयंवदामग्रा
वभ्योवाचंवदतावदद्भ्यः । यदद्रयःपर्वताःसाकमाशवःश्लोकंघोषंभरथेंद्रायसोमिनः । प्रवदंत्वेतेप्रवदामवयंग्रावभ्यो

वाचंवदतवदन्द्यौयदद्रयः पर्वताअदरणीयाः सहसोममाशवः क्षिप्रकारिणः श्लोकः शृणोतेर्घोषोघुष्यतेः सोमिनोयूयंस्थे
तिवासोमिनोगृहेष्वितिवायेननराः प्रशस्यंतेसनाराशंसोमंत्रस्तस्यैषाभवति ॥ ९ ॥ अमंदान्स्तोमान्प्रभरेमनीषासिंधाव
धिक्षियतोभाव्यस्य । योमेसहस्रममिमीतसवानतूर्तोराजाश्रवइच्छमानः । अमंदान्स्तोमानबालिशाननल्पान्वाबालो
बलवर्तीभर्तव्योभवत्यंबास्माअलंभवतीतिवाबास्मैबलंभवतीतिवाबलोवाप्रतिषेधव्यवहितः प्रभरेमनीषयामनसईषया
स्तुत्याप्रज्ञयावासिंधावधिनिवसतोभावयव्यस्यराज्ञोयोमेसहस्रंनिरमिमीतसवानतूर्तोराजातूर्णइतिवात्वरमाणइति
वाप्रशंसामिच्छमानः ॥ १० ॥ यज्ञसंयोगाद्राजास्तुतिंलभेतराजसंयोगाद्युद्धोपकरणानितेषांरथः प्रथमागामीभवति
रथोरंहतेर्गतिकर्मणः स्थिरतेर्वास्याद्विपरीतस्यरममाणोऽस्मिंस्तिष्ठतीतिवारपतेर्वारसतेर्वातस्यैषाभवति ॥ ११ ॥ वन
स्पतेवीड्वंगोहिभूयाअस्मत्सखाप्रतरणः सुवीरः । गोभिः सन्नद्धोअसिवीळयस्वास्थातातेजयतुजेत्वानि । वनस्पतेदृढा
गोहिभवास्मत्सखाप्रतरणः सुवीरः कल्याणवीरोगोभिः संनद्धोअसिवीळयस्वेतिसंस्तंभस्वास्थातातेजयतुजेतव्यानिदुंदु
भिरितिशब्दानुकरणंद्रुमोभिन्नइतिवादुंदुभ्यतेर्वास्याच्छब्दकर्मणस्तस्यैषाभवति ॥ १२ ॥ उपश्वासयपृथिवीमुतद्यांपु
रुत्रातेमनुतांविष्ठितंजगत् । सदुंदुभेसजूरिंद्रेणदेवैर्दूराद्दवीयोअपसेधशत्रून् । उपश्वासयपृथिवींचदिवंचबहुधातेघोषं
मन्यतांविष्ठितंस्थावरंजंगमंचयत्सदुंदुभेसहजोषणइंद्रेणचदेवैश्चदूराद्दूरतरमपसेधशत्रूंनिषुधिरिषूणांनिधानंतस्यैषाभ

 वति ॥ १३ ॥ बह्वीनांपिताबहुरंस्यपुत्राश्चिश्चाकृणोतिसमंनावगत्यं । इषुधिःसंकाःपृतंनाश्चसर्वाःपृष्ठेनिनंद्धोजय
॥ १२ ॥ तिप्रसूतः । बहूनांपिताबहुरस्यपुत्रंइतीषूनभिप्रेत्यंप्रस्मयतइवापाव्रियमाणंःशब्दानुकरणंवासंकाःसचतेंःसंपूर्वाद्वा
किरतेंःपृष्ठेनिनद्धोजयतिप्रसूतइतिव्याख्यातंहस्तघ्नोहस्तेहन्यतेतस्यैषाभवति ॥ १४ ॥ अहिंरिवभोगैःपर्येतिबाहुं
ज्यायांहेतिंपरिबाधमानः । हस्तघ्नोविश्वांवयुनांनिविद्वान्पुमान्पुमांसंपरिंपातुविश्वतंः । अहिरिवभोगैःपरिवेष्टयति
बाहुंज्यायावधात्परित्रायमाणोंहस्तघ्नःसर्वाणिप्रज्ञानानिप्रजानंन्पुमान्पुरुमनाभवतिंपुंसतेर्वाभीशवोव्याख्यातांस्तेषा
मेषाभवति ॥ १५ ॥ रथेतिष्ठंन्नयतिवाजिनंःपुरोयत्रंयत्रकामयंतेसुषारथिः । अभीशूनांमहिमानंपनायतमनंःपश्चा
दनुंयच्छंतिरश्मयंः । रथेतिष्ठन्नयतिवाजिनःपुरस्तात्सतोंयत्रयत्रकामयतेंसुषारथिःकल्याणसारथिरभीशूनांमहि
मानंपूजयामिंमनःपश्चात्संतोऽनुयच्छंतिरश्मयोंधनुर्धन्वतेर्गतिकर्मणोवधकर्मणोवांधन्वंत्यस्मादिषवंस्तस्यैषाभवति
॥ १६ ॥ धन्वंनागाधन्वंनाजिंजयेमधन्वंनातीव्राःसमदोंजयेम । धनुःशत्रोरपकामंकृणोतिधन्वंनासर्वाःप्रदिशों
जयेम । इतिसानिगदव्याख्यातांसमदःसमदोवात्तेःसंमदोवांमदतेर्ज्याजयतेर्वाजिनातेर्वांप्रजावयतीषूनितिवांतस्या ॥ १२ ॥
एषाभवति ॥ १७ ॥ वक्ष्यंतीवेदागंनीगंतिकर्णंप्रियंसखांयंपरिषस्वजाना । योषेवशिंक्तेवितताधिधन्वन्ज्याइयंसमंने
पारयंती । वक्ष्यंतीवागच्छतिकर्णंप्रियमिवसखायमिषुंपरिष्वजमानांयोषेवशिंक्तेशब्दंकरोतिंवितताधिधनुषिंज्येयंस

मनेसंग्रामेपारयंतीपारंनयंतीषुरीषतेर्गतिकर्मणोवधकर्मणोवातस्यैषाभवति ॥ १८ ॥ सुपर्णंवस्तेमृगोअस्यादंतोगो
भिःसंनद्धापततिप्रसूता । यत्रानरःसंचविचद्रवंतितत्रास्मभ्यमिषवःशर्मयंसन् । सुपर्णंवस्तइतिवाजानभिप्रेत्यमृग
मयोऽस्यादंतोमृगयतेर्वागोभिःसंनद्धापततिप्रसूतेतिव्याख्यातंयत्रनराःसंद्रवंतिचविद्रवंतिचतत्रास्मभ्यमिषवःशर्म
यच्छंतुशरणंसंग्रामेष्वश्वाजनींकशेत्याहुःकशाप्रकाशयतिभयमश्वायकृष्यतेर्वाणूभावाद्वाक्पुनःप्रकाशयत्यर्थान्खश
याक्रोशतेर्वाश्वकशायाएषाभवति ॥ १९ ॥ आजंघंतिसान्वेषांजघनाँऽउपजिघ्नते । अश्वाजनिप्रचेतसोऽश्वान्त्समत्सु
चोदय । आघ्नंतिसानून्येषांसरणानिसक्थीनिसक्थिसचतेरासक्तोऽस्मिन्कायोजघनानिचोपघ्नंतिजघनंजंघन्यते
रश्वाजनिप्रचेतसःप्रवृद्धचेतसोऽश्वान्त्समत्सुसमरणेषुसंग्रामेषुचोदयोलूखलमुरुकरंवोर्करंवोर्ध्वखंवोरुमेकुर्वित्यब्रवी
त्तदुलूखलमभवदुरुकरंचैतदुलूखलमित्याचक्षतेपरोक्षेणेतिचब्राह्मणंतस्यैषाभवति ॥ २० ॥ यच्चिद्धित्वंगृहेगृहउलू
खलकयुज्यसे । दहद्युमत्तमंवदजयतामिवदुंदुभिः । इतिसानिगदव्याख्याता ॥ २१ ॥ वृषभःप्रजांवर्षतीतिवातिबृह
तिरेतइतिवातद्वृषभकर्मावर्षणाद्वृषभस्तस्यैषाभवति ॥ २२ ॥ न्यक्रंदयन्नुपयंतएनममेहयन्वृषभंमध्यआजेः । तेनसूभ
र्वंशतवत्सहस्रंगवांमुद्गलःप्रधनेजिगाय । न्यक्रंदयन्नुपयंतएनमितिव्याख्यातंममेहयन्वृषभंमध्यआजेराजयनस्याज
वनस्येतिवातेनतंसूभर्वंराजानंभर्वतिरत्तिकर्मातद्वासूभर्वंसहस्रंगवांमुद्गलःप्रधनेजिगायंप्रधनइतिसंग्रामनामप्रकीर्णा

न्यस्मिन्धनानिभवंतिंद्रुघणोद्रुममयोघनंस्तत्रेतिहासमाचक्षतेंमुद्गलोभार्म्यश्वऋषिर्वृषभंचद्रुघणंचयुक्त्वासंग्रामेव्यवह
त्याजिंजिगायंतदभिवादिन्येषर्ग्भवति ॥ २३ ॥ इमंतंपश्यवृषभस्ययुंजंकाष्ठायामध्येद्रुघणंशयानं । येनंजिगायंशत
वंत्सहस्रंगवांमुद्गंलःपृतनाज्येंषु । इमंतंपश्यवृषभस्यसहयुजंकाष्ठायामध्येद्रुघणंशयानंयेनजिगायशतवत्सहस्रंगवांमु
द्गलःपृतनाज्येषुंपृतनाज्यमितिसंग्रामनामंपृतनानामजनाद्वाजयनाद्वामुद्गलोमुद्गवान्मुद्गगिलोवांमदनंगिलतीतिवांम
दंगिलोवामुदंगिलोवांभार्म्यश्वोभृम्यश्वस्यपुत्रोंभृम्यश्वोभृमयोऽस्याश्वांअश्वभरणाद्वांपितुरित्यन्ननामंपातेर्वापिबते
र्वाप्यायतेर्वातस्यैषाभवति ॥ २४ ॥ पितुंनुस्तोषंमहोधर्माणंतविंषीं । यस्यंत्रितोव्योजंसावृत्रंविपर्वमर्दयंत् । तंपि
तुंस्तौमिमहतोधारयितारंबलस्यंतविषीतिबलनामंतवतेर्वावृद्धिकर्मणोयस्यत्रितओजसाबलेनंत्रितस्त्रिस्थानंइंद्रोवृत्रं
विपर्वाणंव्यर्दयातिंनद्योव्याख्यातांस्तासामेषाभवति ॥ २५ ॥ इमंमेंगंगेयमुनेसरस्वतिशुतुंद्रिस्तोमंसचतापरुष्ण्या ।
असिक्न्यामंरुद्वृधेवितस्तयाजींकीयेशृणुह्यासुषोमंया । इमंमेगंगेयमुनेसरस्वतिंशुतुद्रिपरुष्णिस्तोममासेवध्वंमसि
क्न्याचसहमरुद्वृधेंवितस्तयाचार्जीकीयंआशृणुहिसुषोमयाचेतिंसमस्तार्थोऽथैकपदनिरुक्तंगंगागमनाद्यमुनाप्रयुवतीग
च्छतीतिवांप्रयुवितंगच्छतीतिवांसरस्वतीसरइत्युदकनामंसर्तेस्तद्वतींशुतुद्रीशुद्राविणींक्षिप्रद्राविण्यांशुतुन्नेवद्रवतीति
वेंरावतींपरुष्णीत्याहुंःपर्ववतीभास्वतीकुटिलगामिंन्यसिक्न्यशुक्लासितांसितमितिवर्णनामंतत्प्रतिषेधोऽसितंमरुद्वृधाः

सर्वानद्योमरुतएनावर्धयंतिवितस्ताविदग्धाविवृद्धामहाकूलार्जीकीयांविपाळित्याहुंर्ऋजीकप्रभवावर्जुगामिनीवांविपा
ड्विपाटनाद्वाविपाशनाद्वाविप्रापणाद्वांपाशाअस्यांव्यपाश्यंतवसिष्ठस्यमुमूर्षतस्तस्माद्विपाळुच्यतेपूर्वमासीदुरुंजिरासु
षोमासिंधुर्यदेनामभिप्रसुवंतिनद्यःसिंधुःस्यंदनादापआप्नोतेस्तासामेषाभवति ॥ २६ ॥ आपोहिष्ठामयोभुवस्तान
ऊर्जेदधातन । महेरणायचक्षसे । आपोहिस्थसुखभुवस्तानोऽन्नायधत्तमहतेचनोरणायरमणीयायचदर्शनायौषध
यओषद्धयंतीतिवौषत्येनाधयंतीतिवादोषंधयंतीतिवातासामेषाभवति ॥ २७ ॥ याओषधीःपूर्वाजातादेवेभ्यस्त्रियु
गंपुरा । मनैनुबभ्रूणामहंशतंधामानिसप्तचं । याओषधयःपूर्वाजातादेवेभ्यस्त्रीणियुगानिपुरामन्येनुतद्बभ्रूणामहंब
भ्रुवर्णानांहरणानांभरणानामितिवाशतंधामानिसप्तचेतिधामानित्रयाणिभवंतिस्थानानिनामानिजन्मानीतिजन्मा
न्यत्राभिप्रेतानिसप्तशतंपुरुषस्यमर्मणांतेष्वेनादधतीतिवारात्रिर्व्याख्यातातस्याएषाभवति ॥ २८ ॥ आरात्रिपा
र्थिवंरजःपितरःप्रायुधामभिः । दिवःसदांसिबृहतीवितिष्ठसआत्वेषंवर्ततेतमः । आपूपुरस्त्वंरात्रिपार्थिवंरजःस्थानैर्म
ध्यमस्यदिवःसदांसिबृहतीमहतीवितिष्ठसआवर्ततेत्वेषंतमोरजोऽरण्यान्यरण्यस्यपत्न्यरण्यमपार्णंग्रामादरमणंभवती
तिवातस्याएषाभवति ॥ २९ ॥ अरण्यान्यरण्यान्यसौयाप्रेवनश्यसि । कुथाग्रामंनपृच्छसिनत्वाभीरिवविंदतीँ ३।
अरण्यानीत्येनामामंत्रयतेयासावरण्यानिवनानिपराचीवनश्यसिकथंग्रामंनपृच्छसिनत्वाभीर्विंदतीवेतीवःपरिभयार्थे

वांश्रद्धाश्रद्धानांत्तस्याएषाभवति ॥ ३० ॥ श्रद्धयाग्निःसमिध्यतेश्रद्धयाहूयतेहविः । श्रद्धांभगस्यमूर्धनिवचसावेद
यामसि । श्रद्धयाग्निःसाधुसमिध्यतेश्रद्धयाहविःसाधुहूयतेश्रद्धांभगस्यभागधेयस्यमूर्धनिप्रधानांगेवचनेनावेदयामः
पृथिवीव्याख्यातातस्याएषाभवति ॥ ३१ ॥ स्योनापृथिविभवानृक्षरानिवेशनी । यच्छानःशर्मसप्रथः । सुखानः
पृथिविभवानृक्षरानिवेशन्यृक्षरःकण्टकऋच्छतेःकंटकःकंतपोवाकृततेर्वाकंटतेर्वास्याद्गतिकर्मणउद्गततमोभवतियच्छ
नःशर्मयच्छंतुशरणंसर्वतःपृथ्वप्वाव्याख्यातातस्याएषाभवति ॥ ३२ ॥ अमीषांचित्तंप्रतिलोभयंतीगृहाणांगान्यप्वे
परेहि । अभिप्रेहिनिर्दहहृत्सुशोकैरंधेनामित्रास्तमसासचंतां । अमीषांचित्तानिप्रज्ञानानिप्रतिलोभयमानागृहाणां
गान्यप्वेपरेह्यभिप्रेहिनिर्दहैषांहृदयानिशोकैरंधेनामित्रास्तमसासंसेव्यंतामग्नाय्यग्नेःपत्नीतस्याएषाभवति ॥ ३३ ॥
इहेंद्राणीमुपह्वयेवरुणानींस्वस्तये । अग्नायींसोमपीतये । इतिसानिगदव्याख्याता ॥ ३४ ॥ अथातोऽष्टौद्वंद्वान्यु
लूखलमुसलेउलूखलंव्याख्यातंमुसलंमुहुःसरंतयोरेषाभवति ॥ ३५ ॥ आयजीवाजसातमाताह्यु१च्चाविजर्भृतः ।
हरीइवांधांसिबप्सता । आयष्टव्येअन्नानांसंभक्ततमेतेह्युच्चैर्विह्रियेतेहरीइवान्नानिभुंजानेहविर्धानेहविषांनिधानेतयो
रेषाभवति ॥ ३६ ॥ आवामुपस्थमद्रुहादेवाःसीदंतुयज्ञियाः । इहाद्यसोमपीतये । आसीदंतुवामुपस्थउपस्थानंमद्रो
ग्धव्येइतिर्वायज्ञियादेवायज्ञसंपादिनइहाद्यसोमपानायद्यावापृथिव्यौव्याख्यातेतयोरेषाभवति ॥ ३७ ॥ द्यावा

नःपृथिवीइमंसिध्रमद्यदिविस्पृशं । यज्ञंदेवेषुयच्छतां । द्यावापृथिव्यौनइमंसाधनमद्यदिविस्पृशंयज्ञंदेवेषुनियच्छतां
विपाट्छुतुद्र्यौव्याख्यातेतयोरेषाभवति ॥ ३८ ॥ प्रपर्वतानामुशतीउपस्थादश्वेइवविषितेहासमाने । गावेवशुभ्रेमा
तरारिहाणेविपाट्छुतुद्रीपयसाजवेते । पर्वतानामुपस्थादुपस्थानादुशत्यौकामयमानेअश्वेइवविमुक्तेइतिवाविषण्णेइ
तिवाहासमानेहासतिःस्पर्धायांहर्षमाणेवागावाविवशुभ्रेशोभनेमातरौसंरिहाणेविपाट्छुतुद्र्यौपयसाप्रजवेतेआर्जीअ
र्जन्यौवारण्यौवारिषण्यौवातयोरेषाभवति ॥ ३९ ॥ तेआचरंतीसमनेवयोषामातेवपुत्रंबिभृतामुपस्थे । अपशत्रून्वि
ध्यतांसंविदानेआर्त्नीइमेविस्फुरंतीअमित्रान् । तेआचरंत्यौसमनसाविवयोषेमातेवपुत्रंबिभृतामुपस्थउपस्थानेऽपवि
ध्यतांशत्रून्त्संविदानेआर्त्यौविमेविघ्नत्यावमित्रान्छुनासीरौशुनोवायुःशुएत्यंतरिक्षेसीरआदित्यःसरणात्तयोरेषाभव
ति ॥ ४० ॥ शुनासीराविमांवाचंजुषेथांयद्दिवि चक्रथुःपयः । तेनेमामुपसिंचतं । इतिसानिगदव्याख्यातादेवीजो
ष्ट्रीदेव्यौजोषयित्र्यौद्यावापृथिव्यावितिवाहोरात्रेइतिवासस्यंचसमाचेतिकात्थक्यस्तयोरेषसंप्रैषोभवति ॥ ४१ ॥
देवीजोष्ट्रीवसुधितीययोरन्याघाद्वेषांसियुयवदान्यावक्षद्वसुवार्याणियजमानायवसुवनेवसुधेयस्यवीतांयज । देवीजो
ष्ट्रीदेव्यौजोषयित्र्यौवसुधितीवसुधान्यौययोरन्याघानिद्वेषांस्यवयावयत्यावहत्यन्यावसूनिवरणीयानियजमानायव
सुवननायचवसुधानायचवीतांपिबेतांकामयेतांवायजेतिसंप्रैषोदेवीऊर्जाहुतीदेव्याऊर्जाहान्यौद्यावापृथिव्यावितिवा

होरात्रेइतिवांसस्यंचसमाचेतिकात्थक्यस्तयोरेषसंप्रैषोभवति ॥ ४२ ॥ देवीऊर्जाहुतीइषमूर्जमन्यावक्षत्सग्धिंसपीति
मन्यानवेंनपूर्वंदयमानाःस्यामंपुराणेननवंतामूजैमूर्जाहुतीऊर्जयमानेअधातांवसुवनेवसुधेयस्यवीतांयर्ज । देवीऊर्जाहु
तीदेव्याऊर्जाह्वान्यांवन्नंचरसंचावहत्यावहत्यन्यांसहजग्धिंचसहपीतिंचान्यांनवेनपूर्वंदयमानाःस्यामंपुराणेननवंता
मूर्जमूर्जाहुतीऊर्जयमानेअधातांवसुवननायचवसुधानायचंवीतांपिबेतांकामयेतांवांयजेतिसंप्रैषोयजेतिसंप्रैषः ॥ ४३ ॥
(अथयान्यश्वोवोह्वांमानोमित्रःकनिक्रदंज्जद्रंवदसंवत्सरंमुपप्लवदप्रावेपाःप्रैतेवदंत्वमंदान्यंज्ञसंयोगाद्वनस्पतंउपश्वा
सयबह्वीनांमहिरिवभोगैरथेतिष्ठंन्धन्वनागावक्ष्यंतीवंसुपर्णवस्तआजंघंतिंयच्चिद्धित्वंवृषभोन्यक्रंदयंन्निमंतंपितुंन्विमं
मआपोहिंयाओषधीरारात्र्यरण्यानिंश्रद्धयास्योनामीषांमिहेंद्राणीमथातोष्टांवायजीआवामुपस्थंद्यावानंःप्रपर्वतानांते
आचरंतींशुनासीरौदेवीजोष्ट्रींदेवीऊर्जाहुतीत्रिचत्वारिंशत्) ॥ इतिनिरुक्तउत्तरषट्केतृतीयोऽध्यायः ॥ ३ ॥ ॥
ॐ ॥ अथातोमध्यस्थानादेवतांस्तासांवायुःप्रथमागामीभवतिंवायुर्वातेर्वेतेर्वास्याद्गतिकर्मणएतेरितिस्थौलाष्ठीविं
रनर्थकोवकारस्तस्यैषाभवति ॥ १ ॥ वायुवायांहिदर्शतेमेसोमाअरंकृताः । तेषांपाहिश्रुधीहवँ । वायवायाहिदर्शनी
येमेसोमाअरंकृतअलंकृतांस्तेषांपिबशृणुनोह्वानमितिंकमन्यंमध्यमादेवमवक्ष्यंत्तस्यैषापराभवति ॥ २ ॥ आसस्राणा
सः शवसानमच्छेंद्रंसुचक्रेरथ्यांसोअश्वाः । अभिश्रवऋज्यंतोवहेयुर्नूचिन्नुवायोरमृतंमिदंस्येत् । आससृवांसोऽभिबलाय

मानंमिंद्रंकल्याणचक्रेरथेयोगायरथ्याअश्वारथस्यवोह्लारंऋज्यंतऋजुगामिनोऽन्नमभिवहेयुर्नवंचपुराणंचश्रवइत्यन्न नामंश्रूयतइतिसतौवायोश्चास्यभक्षौयथानविदस्येदितींद्रप्रधानेत्येकेनैघंटुकंवायुकमौभयप्रधानेत्यपरंवरुणोवृणोती तिसतंस्तस्यैषाभवति ॥३॥ नीचीनंबारंवरुणःकवंधंप्रससर्जरोदसीअंतरिक्षं । तेनविश्वस्यभुवनस्यराजायवंनवृष्टिर्व्युन त्तिभूम । नीचीनद्वारंवरुणःकवंधंमेघंकवनमुदकंभवतितदस्मिन्धीयतंउदकमपिकवंधमुच्यतेबंधिरनिभृतत्वेकंमनि भृतंचप्रसृजतिद्यावापृथिव्यौचांतरिक्षंचमहत्त्वेनंतेनसर्वस्यभुवनस्यराजायवमिववृष्टिर्व्युनत्तिभूमितस्यैषापराभवति ॥ ४ ॥ तमूषुसमनागिरापितॄणांचमन्मभिः । नाभाकस्यप्रशस्तिभिर्यःसिंधूनामुपोदयेसप्तस्वसासमध्यमोनभंतामन्य केसमे । तंस्वभिष्टौमिसमानयागिरागीत्यास्तुत्यापितॄणांचमननीयैःस्तोमैर्नाभाकस्यप्रशस्तिभिर्ऋषिर्नाभाकोबभूवयः स्यंदमानानांमासामपामुपोदयेसप्तस्वसारमेनमाहवाग्भिःसमध्यमइतिनिरुच्यतेऽथैषएवभवति । नभंतामन्यकेसमे । माभूवन्नन्यकेसर्वेयेनोद्विषंतिदुर्धियःपापधियःपापसंकल्पारुद्रोरौतीतिसतोरोरूयमाणोद्रवतीतिवारोदयतेर्वायदरुद त्तद्रुद्रस्यरुद्रत्वमितिकाठकंयदरोदीत्तद्रुद्रस्यरुद्रत्वमितिहारिद्रविकंतस्यैषाभवति ॥ ५ ॥ इमारुद्रायस्थिरधन्वनेगिरः क्षिप्रेषवेदेवायस्वधाव्ने । अषाह्लायसहमानायवेधसेतिग्मयुधायभरताशृणोतुनः । इमारुद्रायदृढधन्वनेगिरःक्षिप्रेष वेदेवायान्नवतेऽषाढायान्यैःसहमानायविधात्रेतिग्मायुधायभरतशृणोतुनस्तिग्मंतेजतेरुत्साहकर्मणआयुधमायोधना

त्तस्यैषापराभवति ॥ ६ ॥ यातेदिद्युदवसृष्टादिवस्परिक्ष्मयाचरतिपरिसावृणक्तुनः । सहस्रंतेस्वपिवातभेषजामानं
स्तोकेषुतनयेषुरीरिषः । यातेदिद्युदवसृष्टादिवस्परिदिवोऽधिदिद्युद्द्यतेर्वाद्युतेर्वाद्योततेर्वाक्ष्मयाचरतिक्ष्मापृथिवी
तस्यांचरतितयाचरतिविक्ष्मापयंतीचरतीतिवापरिवृणक्तुनःसासहस्रंतेस्वाप्तवचनभैषज्यानिमानस्त्वंपुत्रेषुचपौत्रेषुच
रीरिषंस्तोकंतुद्यतेस्तनयंतनोतेरग्निरपिरुद्रउच्यतेतस्यैषाभवति ॥ ७ ॥ जराबोधतद्विविड्ढिविशेविशेयज्ञियाय । स्तोमं
रुद्रायदृशीकं । जरास्तुतिर्जरतेःस्तुतिकर्मणस्तांबोधतयाबोधयितरितिवातद्विविड्ढितत्कुरुमनुष्यस्यमनुष्यस्ययजना
यंस्तोमंरुद्रायदर्शनीयमिंद्रइरांदृणातीतिवेरांददातीतिवेरांदधातीतिवेरांदारयतइतिवेरांधारयतइतिवेंदवेद्रवतीतिवे
दौरमतइतिवेंधेभूतानीतिवातद्यदेनंप्राणैःसमैंधंस्तदिंद्रस्येंद्रत्वमितिविज्ञायतेइदंकरणादित्याग्रायणइदंदर्शनादित्यौप
मन्यवइंदतेवैश्वर्यकर्मणइन्छत्रूणांदारयितावाद्रावयितावादरयिताचयज्वनांतस्यैषाभवति ॥ ८ ॥ अर्दर्दुरुत्समसृ
जोविखानित्वमर्णवान्बद्धधानाँऽअरम्णाः । महांतमिंद्रपर्वतंवियद्वःसृजोविधाराअवदानवंहन् । अदृणाउत्समुत्स
उत्सरणाद्वोत्सदनाद्वोत्स्यंदनाद्वोनत्तेर्वाव्यसृजोऽस्यखानित्वंमर्णवानर्णस्वतएतान्माध्यमिकान्त्संस्त्यायांन्वावध्यमा
नानरम्णारम्णातिःसंयमनकर्माविसर्जनकर्मावामहांतमिद्रपर्वतंमेघंयद्व्यवृणोर्व्यसृजोऽस्यधाराअवहन्नेनंदानवंदानक ॥ १६ ॥
र्माणंतस्यैषापराभवति ॥ ९ ॥ योजातएवप्रथमोमनस्वान्देवोदेवान्क्रतुनापर्यभूषत् । यस्यशुष्माद्रोदसीअभ्यसे

तांनृम्णस्यंमह्नासजंनासइंद्रंः । योजायमानएवप्रथमोमनस्वींदेवोदेवान्क्रतुनाकर्मणापर्यभवंत्पर्यगृह्णात्पर्यरक्षंदत्यक्रा
मदितिवांयस्यबलाद्द्यावापृथिव्यावप्यबिभीतांनृम्णस्यमह्नाबलस्यमहत्त्वेनंसजनासइंद्रइंत्यृषेर्द्दष्टार्थस्यप्रीतिर्भवंत्या
ख्यानसंयुक्तांपर्जन्यस्तृपेराद्यंतविपरीतस्यंतर्पयिताजन्यंःपरोजेतावाजनयितावांप्रार्जयितावारसानांतस्यैषाभवति
॥ १० ॥ विवृक्षान्हंत्युतहंतिरक्षसोविश्वंबिभायभुवंनंमहावंधात् । उतानांगाईषतेवृष्ण्यांवतोयत्पर्जन्यंःस्तनयन्हंतिं
दुष्कृतंः । विहन्तिवृक्षान्विहंतिचरक्षांसिंसर्वांणिचास्माद्भूतानिंबिभ्यतिमहावधांन्महान्ह्यस्यवधोंऽप्यनपराधोभीतः
पलायतेंवर्षकर्मवतोंयत्पर्जन्यःस्तनयंन्हंतिदुष्कृतःपापकृतोंबृहस्पतिर्बृहतंःपातावापालयितावांतस्यैषाभवति ॥ ११ ॥
अश्नापिंनद्धंमधुपर्यंपश्यन्मत्स्यंनदीनउदनिंक्षियन्तं । निष्टज्जंभारचमसंनवृक्षाद्बृहस्पतिंर्विरवेणांविकृत्यं । अशनवता
मेघेनापिनद्धंमधुपर्यपश्यंन्मत्स्यमिवदीनउदकेनिवसंतंनिर्जहारतच्चमसमिववृक्षांच्चमसःकस्मांच्चमंत्यस्मिन्निंतिंबृहस्प
तिर्विरवेणशब्देनविकृत्यंब्रह्मणस्पतिर्ब्रह्मणंःपातावापालयितावांतस्यैषाभवति ॥ १२ ॥ अश्मांस्यमवतंब्रह्मणस्पतिर्मधुं
धारमभियमोजसातृंणत् । तमेवविश्वेंपपिरेस्वर्द्दशोंबहुसाकंसिंसिचुरुत्संमुद्रिणं । अशनवंतमास्यंदनवंतमवातितंब्र
ह्मणस्पतिंर्मधुधारमभियंमोजसाबलेनाभ्यतृणंत्तमेवसर्वेपिबंतिरश्मयंःसूर्यद्दशोबह्वेनंसहसिंचंत्युत्समुद्रिणमुदकवंतं
॥ १८ ॥ क्षेत्रस्यपतिःक्षेत्रंक्षियतेर्निवासकर्मणंस्तस्यपातावापालयितावांतस्यैषाभवति ॥ १४ ॥ क्षेत्रंस्यपतिंनावयंहि

तेनैवजयामसि । गामश्वंपोषयित्वासनोमृळातीदृशे । क्षेत्रस्यपतिनावयंसुहितेनेवजयामोगामश्वंपुष्टंपोषयितृचाहरे
तिसनोमृळातीदृशे । बलेनवाधनेनवामृळतिर्दानकर्मातस्यैषापराभवति ॥ १५ ॥ क्षेत्रस्यपतेमधुमन्तमूर्मिंधेनुरिवपयो
अस्मासुधुक्ष्व । मधुश्चुतंघृतमिवसुपूतमृतस्यनःपतयोमृळयंतु । क्षेत्रस्यपतेमधुमंतमूर्मिंधेनुरिवपयोऽस्मासुधुक्ष्वेतिम
धुश्चुतंघृतमिवोदकंसुपूतमृतस्यनःपातारोवापालयितारोवामृळयंतुमृळयतिरुपदयाकर्मापूजाकर्मावातद्यत्समान्यामृ
चिसमानाभिव्याहारंभवतितज्जामिभवतीत्येकंमधुमंतंमधुश्चुतमितियथायदेवसमानेपादेसमानाभिव्याहारंभवतित
ज्जामिभवतीत्यपरं । हिरण्यरूपःसहिरण्यसंदृगितियथायथाकथाचविशेषोऽजामिभवतीत्यपरं । मंडूकाइवोदकान्मंडू
काउदकादिवेतियथा । वास्तोष्पतिर्वास्तुर्वसतेर्निवासकर्मणस्तस्यपातावापालयितावातस्यैषाभवति ॥१६॥ अमीवहा
वास्तोष्पतेविश्वारूपाण्याविशन् । सखासुशेवएधिनः । अभ्यमनहावास्तोष्पतेसर्वाणिरूपाण्याविशन्त्सखानःसुसुखो
भवशेवइतिसुखनामशिष्यतेर्वकारोनामकरणोऽतस्थांतरोपलिंगीविभाषितगुणःशिवमित्यप्यस्यभवतियद्यद्रूपंकाम
यतेतत्तद्देवताभवति । रूपंरूपंमघवाबोभवीतीत्यपिनिगमोभवतिवाचस्पतिर्वाचःपातावापालयितावातस्यैषाभवति
॥ १७ ॥ पुनरेहिवाचस्पतेदेवेनमनसासह । वसोष्पतेनिरामयमय्येवतन्वं१ मम । इतिसानिगदव्याख्यातापान्नपा
त्तनूनप्त्राव्याख्यातस्तस्यैषाभवति ॥ १८ ॥ योअनिध्मोदीदयदप्स्वं१तर्यंविप्रासईळतेअध्वरेषु । अपान्नपान्मधुम ॥ १७ ॥

तीरपोद्रायाभिरिंद्रोवावृधेवीर्याय । योऽनिध्मोदीदयद्दीप्यतेऽभ्यंतरमप्सुयंमेधाविनःस्तुवंतियज्ञेषुसोऽपान्नपान्मधु
मतीरपोदेह्यभिषवार्ययाभिरिंद्रोवर्धतेवीर्यायवीरकर्मणेयमोयच्छतीतिसतंस्तस्यैषाभवति ॥ १९ ॥ परेयिवांसंप्रवतो
महीरनुबहुभ्यःपंथामनुपस्पशानं । वैवस्वतंसंगमनंजनानांयमंराजानंहविषादुवस्य । परेयिवांसंपर्यागतवंतंप्रवतउद्व
तोनिवतइत्यवतिर्गतिकर्माबहुभ्यःपंथानमनुपस्पाशयमानंवैवस्वतंसंगमनंजनानांयमंराजानंहविषादुवस्येतिदुवस्यती
राध्नोतिकर्माग्निरपियमउच्यतेतमेताऋचोऽनुप्रवदंति ॥ २० ॥ सेनेवसृष्टामंदधात्यस्तुर्नदिद्युत्त्वेषप्रतीका । यमोह
जातोयमोजानित्वंजारःकनीनांपतिर्जनीनां । तंवश्चराथावयंवसत्यास्तंनगावोनक्षंतइद्धं । इतिद्विपदाःसेनेवसृष्टाभयं
वाबलंवादधात्यस्तुरिवदिद्युत्त्वेषप्रतीकाभयप्रतीकाबलप्रतीकायशःप्रतीकामहाप्रतीकादीप्तप्रतीकावा । यमोहजात
इंद्रेणसहसंगतः । यमाविहेहमातरेत्यपिनिगमोभवतियमइवजातोयमोजनिष्यमाणोजारःकनीनांजरयिताकन्यानां
पतिर्जनीनांपालयिताजायानांतत्प्रधानाहियज्ञसंयोगेनभवंति। तृतीयोअग्निष्टेपतिरित्यपिनिगमोभवतितंवश्चराथाचरं
त्यापश्वाहुत्यावसत्याचनिवसंत्यौषधाहुत्यास्तंयथागावआप्नुवंतितथाप्नुयामेद्धंसमृद्धंभोगैर्मित्रःप्रमीतेस्त्रायतेसंमिन्वा
नोद्रवतीतिवामेदयतेर्वातस्यैषाभवति ॥ २१ ॥ मित्रोजनान्यातयतिब्रुवाणोमित्रोदाधारपृथिवीमुतद्यां । मित्रःकृष्टीरनि
मिषाभिचष्टेमित्रायहव्यंघृतवज्जुहोत । मित्रोजनानायातयतिब्रुवाणःशब्दंकुर्वन्मित्रएवधारयतिपृथिवींचदिवंच

मित्रःकृष्टीरनिमिषन्नभिविपश्यतीतिंकृष्टयइतिमनुष्यनामंकर्मवंतोभवंतिंविकृष्टदेहावांमित्रायहव्यंघृतवज्जुहोतेति
व्याख्यातंजुहोतिर्दानकर्मांकःकमनोवाक्रमणोवांसुखोवातस्यैषाभवति ॥ २२ ॥ हिरण्यगर्भःसमंवर्तताग्रेंभूतस्यंजा
तःपतिरेकंआसीत् । सदांधारपृथिवींद्यामुतेमांकस्मैंदेवायंहविषांविधेम । हिरण्यगर्भोंहिरण्यमयोगर्भोंहिरण्यमयो
गर्भोऽस्येतिवांगर्भोगृभेर्गृणात्यर्थेंगिरत्यनर्थांनितिवांयदाहिस्त्रीगुणान्गृह्णातिंगुणाश्चास्यागृह्यंतेंऽथगर्भोभवतिंसमभ
वदग्रेंभूतस्यजातःपतिरेकोबभूवंसधारयतिपृथिवींचदिवंचंकस्मैदेवायहविषाविधेमेतिव्याख्यातंविधतिर्दानकर्मांसर
स्वान्व्याख्यातंस्तस्यैषाभवति ॥ २३ ॥ येतेंसरस्वऊर्मयोमधुंमंतोघृतश्चुतंः । तेभिंर्नोंविताभंव । इतिसानिगद
व्याख्याता ॥ २४ ॥ विश्वकर्मासर्वस्यकर्तांतस्यैषाभवति ॥ २५ ॥ विश्वकंर्माविमंनाआद्विहांयाधातांविधातापं
रमोतसंदृक् । तेषांमिष्टानिसमिषामंदंतियत्रांसप्तऋषीन्परएकंमाहुः । विश्वकर्मांविभूतमनांव्याप्ताधाताचविधाताचं
परमश्चसंद्रष्टाभूतानांतेषामिष्टानिवाकांतानिवाक्रांतानिवांगतानिवामतानिवानतानिवांद्भिःसहसंमोदंतेंयत्रैतानिसप्त
ऋषीणानिज्योतींषितेभ्यःपरआदित्यंस्तान्येतस्मिन्नेकंभवंतींत्यधिदैवतमथाध्यात्मंविश्वकर्मांविभूतमनांव्याप्ताधाता
चविधाताचंपरमश्चसंदर्शयितेंद्रियाणांमेषामिष्टानिवांकांतानिवाक्रांतानिवांगतानिवामतानिवानतानिवांन्नेनसहसं ॥ १८ ॥
मोदन्तेंयत्रेमानिसप्तऋषीणानींद्रियांण्येभ्यःपरआत्मांतान्येतस्मिन्नेकंभवंतींत्यात्मगतिमाचष्टेंतत्रेतिहासमाचक्षतेंवि

श्वकर्माभौवनः सर्वमेधेसर्वाणिभूतानिजुहवांचकारसआत्मानमप्यन्ततोजुहवांचकारतदभिवादिन्येषर्ग्भवतियइमा
विश्वाभुवनानिजुह्वदितितस्योत्तराभूयसेनिर्वचनाय ॥ २६ ॥ विश्वकर्मन्हविषावावृधानःस्वयंयजस्वपृथिवीमुत
द्यां । मुह्यन्त्वन्येअभितोजनासइहास्माकंमघवासूरिरस्तु । विश्वकर्मन्हविषावर्धयमानःस्वयंयजस्वपृथिवींचदिवंच
मुह्यन्त्वन्येअभितोजनाःसपत्नाइहास्माकंमघवासूरिरस्तुप्रज्ञातातार्क्ष्यस्त्वष्ट्राव्याख्यातस्तीर्णेऽन्तरिक्षेक्षियतितूर्णमर्थं
रक्षत्यश्नोतेर्वातस्यैषाभवति ॥ २७ ॥ त्यमूषुवाजिनंदेवजूतंसहावानंतरुतारंरथानां । अरिष्टनेमिंपृतनाजमाशुंस्वस्त
येतार्क्ष्यमिहाहुवेम । तंभृशमन्नवन्तंजूतिर्गतिःप्रीतिर्वादेवजूतंदेवगतंदेवप्रीतंवासहस्वन्तंतारयितारंरथानामरिष्टने
मिंपृतनाजितमाशुंस्वस्तयेतार्क्ष्यमिहह्वयेमेतिकमन्यंमध्यमादेवमवक्ष्यत्तस्यैषापराभवति ॥ २८ ॥ सद्यश्चिद्यःशवसा
पंचकृष्टीःसूर्यइवज्योतिषापस्ततान । सहस्रसाःशतसाअस्यरंहिर्नस्मावरन्तेयुवतिंनशर्यां । सद्योऽपियःशवसाबलेन
तनोत्यपःसूर्यइवज्योतिषापंचमनुष्यजातानिसहस्रसानिनीशतसानिन्यस्यसागतिर्नस्मैनांवारयंतिप्रयुवतीमिवशरम
यीमिषुंमन्युर्मन्यतेर्दीप्तिकर्मणःक्रोधकर्मणोवधकर्मणोवामन्युन्त्यस्मादिषवस्तस्यैषाभवति ॥ २९ ॥ त्वयामन्योसर
थमारुजन्तोहर्षमाणासोऽधृषितामरुत्वः । तिग्मेषवआयुधासंशिशानाअभिप्रयन्तुनरोअग्निरूपाः । त्वयामन्योसरथ
मारुह्यरुजंतोहर्षमाणासोऽधृषितामरुत्वंस्तिग्मेषवआयुधानिसंशिश्यमानाअभिप्रयंतुनरोअग्निरूपाअग्निकर्माणःसंन

॥ १९ ॥ द्धाःकवचिनइतिवादधिक्राव्याख्यातंस्तस्यैषाभवति ॥ ३० ॥ आदधिक्राःशवसापंचकृष्टीःसूर्यइवज्योतिषापस्ततान ।
सहस्रसाःशतसावाज्यर्वापृणक्तुमध्वासमिमावचांसि । आतनोतिदधिक्राःशवसाबलेनापःसूर्यइवज्योतिषापंचमनु
ष्यजातानिसहस्रसाःशतसावाजीवेजनवानवैरणवान्त्संपृणक्तुनोमधुनोदकेनवचनानीमानीतिमधुधमतेर्विपरीतस्य
सवितासर्वस्यप्रसविताातस्यैषाभवति ॥ ३१ ॥ सवितायंत्रैःपृथिवीमरम्णादस्कंभनेसवितायामदृंहत् । अश्वमिवा
धुक्षद्धुनिमंतरिक्षमतूर्तेबद्धंसवितासमुद्रं । सवितायंत्रैःपृथिवीमरमयदनारंभणेऽतरिक्षेसवितायामदृंहदश्वमिवाधु
क्षद्धुनिमंतरिक्षेमेघंवद्धमतूर्तेबद्धमतूर्णइतिवात्वरमाणइतिवासवितासमुदितारमितिकमन्यंमध्यमादेवमवक्ष्यदादि
त्योऽपिसवितोच्यतेतथाचहैरण्यस्तूपेस्तुतोऽर्चन्हिरण्यस्तूपऋषिरिदंसूक्तंप्रोवाचतदभिवादिन्येषग्भवति ॥ ३२ ॥
हिरण्यस्तूपःसवितर्यथात्वांगिरसोजुह्वेवाजेअस्मिन् । एवात्वार्चन्नवसेवंदमानःसोमस्येवांशुंप्रतिजागराहं । हिरण्य
स्तूपोहिरण्यमयःस्तूपोहिरण्यमयःस्तूपोऽस्येतिवास्तूपःस्त्यायतेःसंघातःसवितर्यथात्वांगिरसोजुह्वेवाजेऽन्नेऽस्मिन्नेवं
त्वार्चन्नवनायवंदमानःसोमस्येवांशुंप्रतिजागर्म्यहंत्वष्टाव्याख्यातंस्तस्यैषाभवति ॥ ३३ ॥ देवस्त्वष्टासविताविश्वरू ॥ १९ ॥
पःपुपोषप्रजाःपुरुधाजजान । इमाचविश्वाभुवनान्यस्यमहद्देवानामसुरत्वमेकं । देवस्त्वष्टासवितासर्वरूपःपोषतिप्रजा
रसानुप्रदानेनबहुधाचेमाजनयतीमानिचसर्वाणिभूतान्युदकान्यस्यमहच्चास्मैदेवानामसुरत्वमेकंप्रज्ञावत्त्वंवानवत्वं

वांपिवासुरितिप्रज्ञानामांस्यत्यनर्थानस्ताश्चास्यामर्थांअसुरत्वमादिलुप्तंवातोवातीतिसतस्तस्यैषाभवति ॥ ३४ ॥ वात
आवांतुभेषजंशंभुमंयोभुनोंहृदे । प्रणआयूंषितारिषत् । वातआवातुभैषज्यानिशंभुमयोभुचनोहृदयायंप्रवर्धयतुच
नआयुरग्निर्व्याख्यातंस्तस्यैषाभवति ॥ ३५ ॥ प्रतित्यंचारुमध्वरंगोंपीथायप्रहूयसे । मरुद्भिरग्नआगंहि । तंप्रतिचा
रुमध्वरंसोमपानायप्रहूयसेसोऽग्नेमरुद्भिःसहागच्छेतिकमन्यंमध्यमादेवमवक्ष्यंत्तस्यैषापराभवति ॥ ३६ ॥ अभित्वां
पूर्वपीतयेसृजामिंसोम्यंमधुं । मरुद्भिरग्नआगंहि । अभिसृजामित्वापूर्वपीतयेपूर्वपानायंसोम्यंमधुसोममयंसोऽग्नेमरु
द्भिःसहागच्छेति ॥ ३७ ॥ वेनोवेनतेःकान्तिकर्मणंस्तस्यैषाभवति ॥ ३८ ॥ अयंवेनश्चोंदयत्पृश्निगर्भाज्योतिंर्जरायूर
जंसोविमानें । इममपांसंगमेसूर्यस्यशिशुंनविप्रामतिभींरिहन्ति । अयंवेनश्चोदयत्पृश्निगर्भाःप्राष्टवर्णगर्भाआपइतिवां
ज्योतिर्जरायुंर्ज्योतिरस्यजरायुस्थानीयंभवतिंजरायुजरयागर्भस्यजरयायूयतइतिवेमंमपांचसंगमनेसूर्यस्यचंशिशुमि
वविप्रामतिभीरिहंतिंलिहंतिस्तुवंतिंवर्धयंतिपूजयंतीतिवांशिशुःशंसनीयोभवतिंशिशीतेर्वांस्याद्दानकर्मणश्चिरलब्धो
गर्भोंभवत्यसुनीतिरसून्नयतिंतस्यैषाभवति ॥ ३९ ॥ असुंनीतेमनोंअस्मासुंधारयजीवातंवेसुप्रतिंरानआयुंः । रारंधिनः
सूर्यस्यसन्दृशिंघृतेनत्वंतन्वंवर्धयस्व । असुनीतेमनोऽस्मासुधारयंचिरंजीवनायंप्रवर्धयचनआयूरंधयचनःसूर्यस्यसं
दर्शनायंरध्यतिर्वशगमनेऽपिदृश्यते । मारधामद्विषतेसोमराजन्नित्यपिनिगमोभवतिंघृतेनत्वमात्मानंतन्वंवर्धयस्वं

तोंव्याख्यातंस्तस्यैशभवति ॥ ४० ॥ ऋतस्यहिशुरुधःसंतिपूर्वीॠतस्यधीतिर्वृजिनानिहंति । ऋतस्यश्लोकोबधिरातर्दकर्णाबुधानःशुचमानआयोः । ऋतस्यहिशुरुधःसंतिपूर्वीॠतस्यप्रज्ञावर्जनीयानिहंतिऋतस्यश्लोकोबधिरस्यापिकर्णावातृणत्तिबधिरोबद्धश्रोत्रःकर्णौबोधयन्दीप्यमानश्चायोरयनस्यमनुष्यस्यज्योतिषोवोदकस्यवैदुरिंधेरुनत्तेर्वातस्यैषाभवति ॥ ४१ ॥ प्रतद्वोचेयंभव्यायेन्दवेहव्योनयइषवान्मन्मरेजतिरक्षोहामन्मरेजति । स्वयंसोअस्मदानिदोवधैरंजेतदुर्मतिं । अवंस्रवेदघशंसोऽवतरमवंक्षुद्रमिवस्रवेत् । प्रब्रवीमितद्भव्यायेन्दवेहवनार्हइवयइषवानन्नवान्कामवान्वामननानिचनोरेजयतिरक्षोहाचवलेनरेजयतिस्वयंसोऽस्मदभिनिंदितारं । वधैरंजेतदुर्मतिं । अवस्रवेदघशंसस्ततश्चावतरंक्षुद्रमिवावस्रवेदभ्यासेभूयांसमर्थंमन्यंतेयथाहोदर्शनीयाहोदर्शनीयेतितत्परुच्छेपस्यशीलंपरुच्छेपऋषिःपर्ववच्छेपःपरुषिपरुषिशेपोऽस्येतिवेतीमानिसप्तविंशतिर्देवतानामधेयान्यनुक्रांतानिसूक्तभांजिहविर्भांजितेषामेतान्यहविर्भांजिवेनोऽसुनीतिॠतइंदुःप्रजापतिःप्रजानांपातावापालयितावातस्यैषाभवति ॥ ४२ ॥ प्रजापतेनत्वदेतान्यन्योविश्वाजातानिपरितावभूव । यत्कामास्तेजुहुमस्तन्नोअस्तुवयंस्यामपतयोरयीणां । प्रजापतेनहित्वदेतान्यन्यःसर्वाणिजातानितानिपरिबभूवयत्कामास्तेजुहुमस्तन्नोअस्तुवयंस्यामपतयोरयीणामित्याशीरहिर्व्याख्यातस्तस्यैषाभवति ॥ ४३ ॥ अब्जामुक्थैरहिंगृणीषेबुध्नेनदीनांरजःसुषीदन् । अप्सुजमुक्थैरहिंगृणीषेबुध्नेनदीनांरजःसूदकेषुसीदन्बुध्नमन्तरिक्षंब

द्धा अस्मिन्धृता आप इतिवेंदमपीतरद्बुध्नमेतस्मादेवंबद्धा अस्मिन्धृताः प्राणा इतिंयोऽहिः सबुध्न्योबुध्नमन्तरिक्षंतन्निवा
सात्तस्यैषाभवति ॥ ४४ ॥ मानोऽहिर्बुध्न्यौरिषेधान्मायज्ञोअस्यस्रिधदृतायोः । माचनोऽहिर्बुध्न्योरेषणायधान्मास्ययज्ञो
स्राचस्रिधद्यज्ञकामस्यंसुपर्णोव्याख्यातंस्तस्यैषाभवति ॥ ४५ ॥ एकंःसुपर्णःससंमुद्रमाविवेशसइदंविश्वंभुवनंविचं
ष्टे । तंपाकेनमनंसापश्यमंतितस्तंमातारेह्लिसउरेह्लिमातरं । एकःसुपर्णःससमुद्रमाविशतिसइमानिसर्वाणिभूतान्य
भिविपश्यातितंपाकेनमनसापश्यमंतितइत्यृषेर्दृष्टार्थस्यप्रीतिर्भवत्याख्यानसंयुक्तांतंमातारेह्लिवागेषामाध्यमिकांसउ
मातरंरेह्लिपुरूरवाबहुधारोरूयतेतस्यैषाभवति ॥ ४६ ॥ समस्मिञ्जायमानआसतग्नाउतेमवर्धन्नद्य१स्वगूर्ताः । महे
यत्त्वांपुरूरवोरणायावंर्धयन्दस्युहत्यांयदेवाः । समासतास्मिञ्जायमाणेग्नागमनांदापोदेवपत्न्योवांपिचैनमवर्धयन्न
द्यःस्वगूर्ताःस्वयंगामिन्योमहतेचयत्त्वापुरूरवोरणायरमणीयायसंग्रामायावर्धयन्दस्युहत्यायचदेवादेवाः ॥ ४७ ॥
(अथातोमध्यस्थानावायवायांह्यासस्नाणासोनीचीनबारंतमूष्विमारुद्रायंयातेदिद्युज्जराबोधांदर्दर्योजातोविवृक्षानश्चा
पिनद्धंमश्मास्यमवतंक्षेत्रस्यपतिःक्षेत्रस्यपतिनाक्षेत्रस्यपतेऽमीवहापुनरेहियोअनिध्मःपरेयिवांसंसेनेवसृष्टामित्रोजनां
न्हिरण्यगर्भोयेतेसरस्वोविश्वकर्मासर्वस्यकर्ताविश्वकर्माविमनाविश्वकर्मन्हविषात्यमूषुसद्यश्चित्त्वयामन्योआदधि
क्राःसविताहिरण्यस्तूपोदेवस्त्वष्टावातआवातुंप्रतित्यमभित्वावेनोवेनतेरयंवेनोऽसुनीतऋतस्यहिंप्रतद्वोचेयंप्रजापते

ऽबजमुक्थैर्मानोहिरेकः सुपर्णः समस्मिन्त्सप्तचत्वारिंशत्) ॥ इतिनिरुक्तउत्तरषट्केचतुर्थोऽध्यायः समाप्तः ॥ ४ ॥

ॐ । श्येनोव्याख्यातस्तस्यैषाभवति ॥ १ ॥ आदायश्येनोअभरत्सोमंसहस्रंसवाँअयुतंचसाकं । अत्रापुरंधिर जहादरातीर्मदेसोमस्यमूराअमूरः । आदायश्येनोऽहरत्सोमंसहस्रंसवानयुतंचसहसहस्रंसहस्रसाव्यमभिप्रेत्यतत्रायु तंसोमभक्षास्तत्संबंधेनायुतंदक्षिणाइतिवातत्रपुरंधिरजहादमित्रानदानानितिवामदेसोमस्यमूराअमूरइत्यैंद्रेचसूक्तेसो मपानेनचस्तुतस्तस्मादिंद्रमन्यंतओषधिःसोमःसुनोतेर्यदेनमभिषुण्वंतिबहुलमस्यनैघंटुकंवृत्तमाश्चर्यमिवप्राधान्येनत स्यपावमानीषुनिदर्शनायोदाहरिष्यामः ॥ २ ॥ स्वादिष्ठयामदिष्ठयापवस्वसोमधारया । इंद्रायपातवेसुतः । इतिसानि गदव्याख्यातायैषापराभवतिचंद्रमसोवैतस्यवा ॥ ३ ॥ सोमंमन्यतेपपिवान्यत्संपिंषंत्योषधिं । सोमंयंब्रह्माणोविदुर्न तस्याश्नातिकश्चन । सोमंमन्यतेपपिवान्यत्संपिंषंत्योषधिमितिवृथासुतमसोममाहसोमंयंब्रह्माणोविदुरितिनतस्याश्ना तिकश्चनायज्वेत्यधियज्ञमथाधिदैवतंसोमंमन्यतेपपिवान्यत्संपिंषंत्योषधिमितियजुःसुतमसोममाहसोमंयंब्रह्माणोवि दुश्चंद्रमसंनतस्याश्नातिकश्चनादेवइत्यथैषापराभवतिचंद्रमसोवैतस्यवा ॥ ४ ॥ यत्त्वादेवप्रपिबंतिततआप्यायसे पुनः । वायुःसोमस्यरक्षितासमानांमासआकृतिः । यत्त्वादेवप्रपिबंतिततआप्यायसेपुनरितिनाराशंसानभिप्रेत्यपूर्वप क्षापरपक्षावितिवावायुःसोमस्यरक्षितावायुमस्यरक्षितारमाहसाहचर्याद्रसहरणाद्वासमानांसंवत्सरणांमासआकृतिः

सोमोरूपविशेषैरोषधिश्चंद्रमावाचंद्रमाश्चायंद्रमतिचंद्रोमाताचांद्रंमानमस्येतिवांचंद्रश्चंदतेःकांतिकर्मणश्चंदनमित्यप्य
स्यभवतिचारुद्रमतिचिरंद्रमतिचमेर्वापूर्वंचारुरुचेर्विपरीतस्यंतस्यैषाभवति ॥ ५ ॥ नवोंनवोभवतिजायमानोऽह्नांके
तुरुषसामेत्यग्रं । भागंदेवेभ्योविदधात्यायन्प्रचंद्रमास्तिरतेदीर्घमायुः । नवोनवोभवतिजायमानइतिपूर्वपक्षादिमभि
प्रेत्यांह्नांकेतुरुषसामेत्यग्रमित्यपरपक्षांतमभिप्रेत्यादित्यदैवतोद्वितीयःपादइत्येकेभागंदेवेभ्योविदधात्यायन्नित्यर्धमा
सेज्यामभिप्रेत्यंप्रवर्धयतेचंद्रमादीर्घमायुर्मृत्युर्मारयतीतिसतोमृतंच्यावयतीतिवांशतबलाक्षोमौद्गल्यंस्तस्यैषाभवति
॥ ६ ॥ परंमृत्योअनुपरेहिपंथांयस्तेस्वइतरोदेवयानात् । चक्षुष्मतेशृण्वतेतेब्रवीमिमानःप्रजांरीरिषोमोतवीरान् ।
परंमृत्योध्रुवंमृत्योध्रुवपरेहिमृत्योकथितंतेनमृत्योमृतंच्यावयतेभवतिमृत्योमदेर्वामुदेर्वातेषामेषाभवति ॥ ७ ॥ त्वेष
मित्थासमरणंशिमीवतोरिंद्राविष्णूसुतपावांमुरुष्यति । यामर्त्यायप्रतिधीयमानमित्कृशानोरस्तुरसनामुरुष्यथः ।
इतिसानिगदव्याख्याताविश्वानरोव्याख्यातंस्तस्यैषाभवति ॥ ८ ॥ प्रवोमहेमंदमानायांधसोऽर्चाविश्वानरायवि
श्वाभुवे । इंद्रस्ययस्यसुमखंसहोमहिश्रवोनृम्णंचरोदसीसपर्यतः । प्रार्चतयूयंस्तुतिंमहतेऽधसोऽन्नस्यदात्रेमंदमाना
यमोदमानायंस्तूयमानायशब्दाय्यमानायेतिवाविश्वानरायसर्वंविभूतायेंद्रस्ययस्यप्रीतौसुमहद्बलंमहच्चश्रवणीयंयशो
नृम्णंचबलंनृन्नतंद्यावापृथिव्यौवःपरिचरतइतिकमन्यंमध्यमादेवमवक्ष्यंत्तस्यैषापराभवति ॥ ९ ॥ उदुज्योतिरमृतं

विश्वजन्यंविश्वानरःसवितादेवोअश्रेत् । उदशिश्रियज्ज्योतिरमृतंसर्वजन्यंविश्वानरःसवितादेवइतिधातासर्वस्यवि
धातातस्यैषाभवति ॥ १० ॥ धातादददातुदाशुषेप्राचींजीवातुमक्षितां । वयंदेवस्यधीमहिसुमतिंसत्यधर्मणः । धाता
ददातुदत्तवतेप्रवृद्धांजीविकामनुपक्षीणांवयंदेवस्यधीमहिसुमतिंकल्याणींमतिंसत्यधर्मणोविधाताधात्राव्याख्यातस्त
स्यैषनिपातोभवतिबहुदेवतायामृचि ॥ ११ ॥ सोमस्यराज्ञोवरुणस्यधर्मणिबृहस्पतेरनुमत्याउशर्मणि । तवाहमद्यमघव
न्नुपस्तुतौधातर्विधातःकलशाँअभक्षयं । इत्येताभिर्देवताभिरभिप्रसूतःसोमकलशानभक्षयमितिकलशःकस्मात्कलाअ
स्मिन्छेरतेमात्राःकलिश्चकलाश्चकिरतेर्विकीर्णमात्राः ॥ १२ ॥ अथातोमध्यस्थानादेवगणास्तेषांमरुतःप्रथमागामिनोभ
वंतिमरुतोमितराविणोवामितरोचिनोवामहद्द्रवंतीतिवातेषामेषाभवति ॥ १३ ॥ आविद्युन्मद्भिर्मरुतःस्वर्कैरथेभिर्यात
ऋष्टिमद्भिरश्वपर्णैः । आवर्षिष्ठयानइषावयोनपप्तता सुमायाः । विद्युन्मद्भिर्मरुतःस्वर्कैःस्वंचनैरितिवास्वर्चनैरितिवास्व
र्चिभिरितिवारथैरायातऋष्टिमद्भिरश्वपर्णैरश्वपतनैर्वर्षिष्ठेनचनोऽन्नेनवयइवापतततसुमायाःकल्याणकर्माणोवाकल्या
णप्रज्ञावारुद्राव्याख्यातास्तेषामेषाभवति ॥ १४ ॥ आरुद्रासइंद्रवंतःसजोषसोहिरण्यरथाःसुवितायगंतन । इयंवोअस्म ॥ २२ ॥
त्प्रतिहर्यतेमतिस्तृष्णजेनदिवउत्साउदन्यवे । आगच्छतरुद्राइंद्रेणसहजोषणाःसुवितायकर्मणइयंवोऽस्मदपिप्रतिकाम
यतेमतिस्तृष्णजइवदिवउत्साउदन्यवेतृष्णक्तृष्यतेरुदन्युरुदन्यतेर्ऋभवउरुभांतीतिवर्तेनभांतीतिवर्तेनभवंतीतिवाते

षामेषाभवति ॥ १५ ॥ विष्ट्वीशमीतरणित्वेनवाघतोमर्तासःसंतोअमृतत्वमानशुः । सौधन्वनाऋभवःसूरचक्षसःसंव
त्सरेसमपृच्यंतधीतिभिः । कृत्वाकर्माणिक्षिप्रत्वेनवोढारोमेधाविनोवामर्तासःसंतोऽमृतत्वमानशिरेसौधन्वनाऋभ
वःसूरख्यानावासूरप्रज्ञावासंवत्सरेसमपृच्यंतधीतिभिःकर्मभिर्ऋभुर्विभ्वावाजइतिसुधन्वनआङ्गिरसस्यत्रयःपुत्राबभू
वुस्तेषांप्रथमोत्तमाभ्यांबहुवन्निगमाभवंतिनमध्यमेनतदेतदृभोश्चबहुवचनेनचमसस्यचसंस्तवेनबहूनिदशतयीषुसूक्ता
निभवंत्यादित्यरश्मयोऽप्यृभवउच्यंते । अगोह्यस्ययदसस्तेनागृहेदुतद्येदमृभवोनानुगच्छथ । अगोह्यआदित्योऽगूह
नीयस्तस्ययदस्वपथगृहेयावत्तत्रभवथनतावदिहभवथेत्यंगिरसोव्याख्यातास्तेषामेषाभवति ॥ १६ ॥ विरूपासइदृष
यस्तइद्गंभीरवेपसः । तेअङ्गिरसःसूनवस्तेअग्नेःपरिजज्ञिरे । बहुरूपाऋषयस्तेगंभीरकर्माणोवागंभीरप्रज्ञावातेऽङ्गिरसः
पुत्रास्तेऽग्नेरधिजज्ञिरइत्यग्निजन्मपितरोव्याख्यातास्तेषामेषाभवति ॥ १७ ॥ उदीरतामवरउत्परासउन्मध्यमाःपित
रःसोम्यासः । असुंयईयुरवृकाऋतज्ञास्तेनोऽवंतुपितरोहवेषु । उदीरतामवरउदीरतांपरउदीरतांमध्यमाःपितरःसो
म्याःसोमसंपादिनस्तेऽसुंयेप्राणमन्वीयुरवृकाअनमित्राःसत्यज्ञावायज्ञज्ञावातेनआगच्छंतुपितरोह्वानेषुमाध्यमिकोय
मइत्याहुस्तस्मान्माध्यमिकान्पितॄन्मन्यंतेऽगिरसोव्याख्याताःपितरोव्याख्याताभृगवोव्याख्याताअथर्वाणोऽथनवंत
स्थर्वतिश्चरतिकर्मातत्प्रतिषेधस्तेषामेषासाधारणाभवति ॥ १८ ॥ अंगिरसोनःपितरोनवग्वाअथर्वाणोभृगवःसोम्या

॥ २३ ॥ सः । तेषांवयंसुमतौयज्ञियानामपिभद्रेसौमनसेस्याम । अंगिरसोनःपितरोनवगतयोनवनीतगतयोवाथर्वाणोभृगवः
सोम्याःसोमसंपादिनस्तेषांवयंसुमतौकल्याण्यांमतौयज्ञियानामपिचैषांभद्रेभंदनीयेभाजनवतिवाकल्याणेमनसिस्यामे
तिमाध्यमिकोदेवगणइतिनैरुक्ताःपितरइत्याख्यानमथाप्यृषयःस्तूयंते ॥ १९ ॥ सूर्यस्येववक्षथोज्योतिरेषांसमुद्रस्ये
वमहिमागंभीरः । वातस्येवप्रजवोनान्येनस्तोमोवसिष्ठाअन्वेतवेवः । इतियथाआप्याआप्नोतेस्तेषामेषनिपातोभवत्यै
न्द्र्यामृचि ॥ २० ॥ स्तुषेय्यंपुरुवर्पसमृभ्वमिनतममाप्यमाप्यानां । आदर्षतेशवसासप्तदानून्प्रसाक्षतेप्रतिमानां
निभूरि । स्तोतव्यंबहुरूपमुरुभूतमीश्वरतममाप्तव्यमाप्तव्यनामाद्दणातियःशवसाबलेनसप्तदातृनितिवासप्तदानवा
नितिवाप्रसाक्षतेप्रतिमानिबहूनिसाक्षतिराप्नोतिकर्मा ॥ २१ ॥ अथातोमध्यस्थानाःस्त्रियस्तासामदितिःप्रथमा
गामिनीभवत्यदितिर्व्याख्यातातस्याएषाभवति ॥ २२ ॥ दक्षस्यवादितेजन्मनिव्रतेराजानामित्रावरुणाविवाससि ।
अतूर्तपंथाःपुरुरथोअर्यमासप्तहोताविषुरूपेषुजन्मसु । दक्षस्यवादितेजन्मनिव्रतेकर्मणिराजानौमित्रावरुणौपरिचर
सिविवासतिःपरिचर्यायांहविष्माँआविवासतीत्याशास्तेर्वातूर्तपंथाअत्वरमाणपंथाबहुरथोऽर्यमादित्योऽरीन्नियच्छतिं ॥ २३ ॥
सप्तहोतासप्तास्मैरश्मयोरसानभिसंनामयंतिसप्तैनमृषयःस्तुवंतीतिवाविषमरूपेषुजन्मसुकर्मसूदयेष्वादित्योदक्षइत्या
हुरादित्यमध्येचस्तुतोऽदितिर्दाक्षायणी । अदितेर्दक्षोअजायतदक्षाद्वदितिःपरीतिचतत्कथमुपपद्येतसमानजन्मानौ

स्यातामित्यपिवादेवधर्मेणेतरेतरजन्मानौस्यातामितरेतरप्रकृतीअग्निरप्यदितिरुच्यतेतस्यैषाभवति ॥ २३ ॥ यस्मै
त्वंसुद्रविणोददाशोऽनागास्त्वमदितेसर्वताता । यंभद्रेणशवसाचोदयासिप्रजावताराधसातेस्याम । यस्मैत्वंसुद्रविणो
ददास्यनागास्त्वमनपराधत्वमदितेसर्वासुकर्मततिष्वागआङ्पूर्वाद्गमेरेनएतेःकिल्बिषंकिल्भिदंसुकृतकर्मणोभयंकीर्ति
मस्यभिनत्तीतिवायंभद्रेणशवसाबलेनचोदयसिप्रजावताचराधसाधनेनतेवयमिहस्यामेतिसरमासरणात्तस्याएषाभव
ति ॥ २४ ॥ किमिच्छंतीसरमाप्रेदमानड्दूरेह्यध्वाजगुरिःपराचैः । कास्मेहितिःकापरितक्म्यासीत्कथंरसायाअतरः
पयांसि । किमिच्छंतीसरमेदंप्रानड्दूरेह्यध्वाजगुरिर्जगम्यतेःपरांचनैरचितःकातेऽस्मास्वर्थहितिरासीत्किंपरितकनं
परितक्म्यारात्रिःपरितएनांतक्मंतक्मेत्युष्णनामतकतइतिसतःकथंरसायाअतरःपयांसीतिरसानदीरसतेःशब्दकर्म
णःकथंरसानितान्युदकानीतिवादेवशुनींद्रेणप्रहितापणिभिरसुरैःसमूदइत्याख्यानंसरस्वतीव्याख्यातातस्याएषाभव
ति ॥ २५ ॥ पावकानःसरस्वतीवाजेभिर्वाजिनीवती । यज्ञंवष्टुधियावसुः । पावकानःसरस्वत्यन्नैरन्नवतीयज्ञंवष्टुधि
यावसुःकर्मवसुस्तस्याएषापराभवति ॥ २६ ॥ महोअर्णःसरस्वतीप्रचेतयतिकेतुना । धियोविश्वाविराजति । महदर्णः
सरस्वतीप्रचेतयतिप्रज्ञापयतिकेतुनाकर्मणाप्रज्ञयावेमानिचसर्वाणिप्रज्ञानान्यभिविराजतिवागर्थेषुविधीयतेतस्मान्मा
ध्यमिकांवाचंमन्यंतेवाग्व्याख्यातातस्याएषाभवति ॥ २७ ॥ यद्वाग्वदंत्यविचेतनानिराष्ट्रीदेवानांनिषसादमंद्रा ।

चतंस्रऊर्जंदुदुहेपयांसिक्कस्विदस्याःपरमंजंगाम । यद्वाग्वदंत्यविचेतनान्यविज्ञातार्निराष्ट्रीदेवानांनिषसादमंद्रामदनां
॥ २४ ॥ च्चतस्रोऽनुदिशऊर्जंदुदुहेपयांसिक्कस्विदस्याःपरमंजगामेतिंयत्पृथिवींगच्छतीतिवांयदादित्यरश्मयोहरंतीतिवातस्या
एषापराभवति ॥ २८ ॥ देवींवाचंमजनयंतदेवास्तांविश्वरूपाःपशवोंवदंति । सानोंमंद्रेषमूर्जंदुहांनाधेनुर्वांगस्मानुप
सुष्टुतैतुं । देवींवाचमजनयंतदेवास्तांसर्वरूपाःपशवोवदंतिंव्यक्तवाचश्चाव्यक्तवाचश्चंसानोमदनान्नंचरसंचदुहानांधे
नुर्वांगस्मानुपैतुसुष्टुतानुमतींराकेतिदेवपत्न्याविर्तिनैरुक्तांःपौर्णमास्याविर्तियाज्ञिकांयापूर्वापौर्णमासीसाऽनुमतिर्यो
त्तरासाराकेतिविज्ञायतेंऽनुमतिरनुमननांत्तस्याएषाभवति ॥ २९ ॥ अन्विदंनुमतेत्वंमन्यांसैशंचंनस्कृधि । क्रत्वेद
क्षांयनोहिनुप्रणआयूंषितारिषः । अनुमन्यस्वानुमतेत्वंसुखंचनःकुर्वन्नंचनोऽपत्यायधेर्हिप्रवर्धयचनआयूंराकारातेर्दा
नकर्मणंस्तस्याएषाभवति ॥ ३० ॥ राकामहंसुहवांसुष्टुतीहुंवेशृणोतुंनःसुभगाबोधंतुत्मनां । सीव्यत्वपंःसूच्याच्छिद्यमा
नयाददांतुवीरंशतदांयमुक्थ्यं । राकामहंसुह्वानांसुष्टुत्याह्वयेंश्रृणोतुनःसुभगाबोधत्वात्मनांसीव्यत्वपःप्रजननकर्मसू
च्याच्छिद्यमानयांसूचीसीव्यतेर्ददातुवीरंशतप्रदंमुक्थ्यंवक्तव्यप्रशंसंसिनीवालीकुहूरितिंदेवपत्न्याविर्तिनैरुक्तांअमा ॥ २४ ॥
वास्येइतियाज्ञिकांयापूर्वामावास्यासासिनीवालींयोत्तरासाकुहूरितिविज्ञायतेंसिनीवालीसिनमन्नंभवतिंसिनातिभूता
निंवालंपर्ववृणोतेस्तस्मिन्नन्नवतीवालिनीवांवालेनैवास्यामणुत्वाच्चंद्रमांःसेवितव्योभवतीतिवांतस्याएषाभवतिं ॥ ३१ ॥

सिनीवालिपृथुष्टुकेयादेवानामसिस्वसा । जुषस्वहव्यमाहुतंप्रजांदेविदिदिड्ढिनः । सिनीवालिपृथुजघनैस्तुकस्त्याय तेःसंघातःपृथुकेशस्तुकेपृथुस्तुकेवायात्वंदेवानामसिस्वसास्वसासुअसास्वेषुसीदतीतिवाजुषस्वहव्यमदनंप्रजांचदेवि दिशनःकुहूर्गूहतेःक्वाभूदितिवाक्कसतीहूयतइतिवाक्काहुतंहविर्जुहोतीतिवातस्याएषाभवति ॥ ३२ ॥ कुहूमहंसुवृतं विद्मनापसमस्मिन्यज्ञेसुहवांजोहवीमि । सानोददातुश्रवणंपितृणांतस्यैतेदेविहविषाविधेम । कुहूमहंसुकृतंविदितक र्माणमस्मिन्यज्ञेसुह्वानामाह्वयेसानोददातुश्रवणंपितृणां।पित्र्यंधनमितिवापित्र्यंयशइतिवातस्यैतेदेविहविषाविधेमेति व्याख्यातंयमीव्याख्यातातस्याएषाभवति ॥ ३३ ॥ अन्यमूषुत्वंयम्यन्यउत्वांपरिष्वजातेलिबुजेववृक्षं । तस्यवात्वं मनइच्छासवातवाधांकृणुष्वसंविदंसुभद्रां । अन्यमेवहित्वंयम्यन्यस्त्वांपरिष्वंक्ष्यतेलिबुजेववृक्षंतस्यवात्वंमनइच्छस वातवांधानेनकुरुष्वसंविदंसुभद्रांकल्याणभद्रांयमीयमंचकमेतांप्रत्याचचक्षइत्याख्यानं ॥ ३४ ॥ उर्वशीव्याख्याता तस्याएषाभवति ॥ ३५ ॥ विद्युन्नयापतन्तीदविद्योद्भरन्तीमेअप्याकाम्यानि । जनिष्टोअपोनर्यःसुजातःप्रोर्वशीति रतदीर्घमायुः । विद्युदिवयापतंत्यद्योततंहरंतीमेअप्याकाम्यान्युदकान्यंतरिक्षलोकस्ययदानूनमयंजायेताद्भ्योऽध्यय इतिनर्योमनुष्योनृभ्योहितोनरापत्यमितिवासुजातःसुजाततरोऽथोर्वशीप्रवर्धयतेदीर्घमायुःपृथिवीव्याख्याताःतस्याए षाभवति ॥ ३६ ॥ बळित्थापर्वतानांखिद्रंबिभर्षिपृथिवि । प्रयाभूमिंप्रवत्वतिमह्नाजिनोषिमहिनि । सत्यंत्वंपर्वता

नांमेघानांखेदनंछेदनंभेदनंबलमसुत्रधारयसिपृथिविप्रजिन्वसियाभूमिंप्रवणवतिमहत्त्वेनमहतीत्युदकवतीतिवैंद्राणीं
द्रस्यपत्नीतस्याएषाभवति ॥ ३७ ॥ इन्द्राणीमासुनारिषुसुभगामहमश्रवं । नह्यस्याअपरंचनजरसामरतेपतिर्विश्व
स्मादिन्द्रउत्तरः । इन्द्राणीमासुनारिषुसुभगामहमशृणवंनह्यस्याअपरामपिसमांजरयाम्रियतेपतिःसर्वस्माद्यइंद्रउत्त
रस्तमेतद्ब्रूमस्तस्याएषापराभवति ॥ ३८ ॥ नाहमिंद्राणिरारणसख्युर्वृषाकपेर्ऋते । यस्येदमप्यंहविःप्रियंदेवेषुगच्छ
तिविश्वस्मादिंद्रउत्तरः । नाहमिंद्राणिरमेसख्युर्वृषाकपेर्ऋतेयस्येदमप्यंहविरप्सुशृतमद्भिःसंस्कृतमितिवाप्रियंदेवेषु
निगच्छतिसर्वस्माद्यइंद्रउत्तरस्तमेतद्ब्रूमोगौरीरोचतेर्ज्वलतिकर्मणोऽयमपीतरोगौरोवर्णएतस्मादेवप्रशस्योभवतितस्या
एषाभवति ॥ ३९ ॥ गौरीर्मिमायसलिलानितक्षत्येकपदीद्विपदीसाचतुष्पदी । अष्टापदीनवपदीबभूवुषीसहस्राक्षरा
परमेव्योमन् । गौरीनिर्मिमायसलिलानितक्षतीकुर्वत्येकपदींमध्यमेनद्विपदींमध्यमेनचादित्येनचचतुष्पदींदिग्भिरष्टा
पदींदिग्भिश्चावांतरदिग्भिश्चनवपदींदिग्भिश्चावांतरदिग्भिश्चादित्येनचसहस्राक्षराबहूदकापरमेव्यवनेतस्याएषापरा
भवति ॥ ४० ॥ तस्याःसमुद्राअधिविक्षरंतितेनजीवंतिप्रदिशश्चतस्रः । ततःक्षरत्यक्षरंतद्विश्वमुपजीवति । तस्याः ॥ २५ ॥
समुद्राअधिविक्षरंतिवर्षंतिमेघास्तेनजीवंतिदिगाश्रयाणिभूतानिततःक्षरत्यक्षरमुदकंतत्सर्वाणिभूतान्युपजीवंतिगौ
र्व्याख्यातातस्याएषाभवति ॥ ४१ ॥ गौरमीमेदनुवत्संमिषंतंमूर्धानंहिङ्ङकृणोन्मातवाउ । सृक्वाणंघर्ममभिवावशा

नामिमांतिमायुंपर्यंतेपयोभिः । गौरन्वमीमेद्वत्संनिमिषंतमनिमिषंतमादित्यमितिवामूर्धानमस्याभिहिङ्करोन्मनना
यंसृक्काणंसरणंघर्महरणमभिवावशानामिमातिमायुंप्रप्यायतेपयोभिर्मायुमिवादित्यमितिवावागेषामाध्यमिकाघर्मधु
गितियाज्ञिकाधेनुर्धयतेर्वाधिनोतेर्वातस्याएषाभवति ॥ ४२ ॥ उपह्वयेसुदुघांधेनुमेतांसुहस्तोगोधुगुतदोहदेनां । श्रे
ष्ठंसवंसवितासाविषन्नोऽभीद्धोघर्मस्तदुषुप्रवोचं । उपह्वयेसुदोहनांधेनुमेतांकल्याणहस्तोगोधुगपिचदोग्ध्येनांश्रेष्ठंसवं
सवितासुनोतुनइत्येषहिश्रेष्ठःसर्वेषांसवानांयदुदकंयद्वापयोयजुष्मदभीद्धोघर्मस्तंसुप्रब्रवीमिवागेषामाध्यमिकाघर्मधु
गितियाज्ञिकाअघ्न्याहंतव्याभवत्यघघ्नीतिवातस्याएषाभवति ॥ ४३ ॥ सूयवसाद्भगवतीहिभूयाअथोवयंभगवंतः
स्याम । अद्धितृणमघ्न्येविश्वदानींपिबशुद्धमुदकमाचरंती । सुयवसादिनीभगवतीहिभवाथेदानींवयंभगवंतःस्यामा
द्धितृणमघ्न्येसर्वदापिबचशुद्धमुदकमाचरंतीतस्याएषापराभवति ॥ ४४ ॥ हिंकृण्वतीवसुपत्नीवसूनांवत्समिच्छंती
मनसाभ्यागात् । दुहामश्विभ्यांपयोअघ्न्येयंसावर्धतांमहतेसौभगाय । इतिसानिगदव्याख्यातापथ्यास्वस्तिःपंथाअं
तरिक्षंतन्निवासात्तस्याएषाभवति ॥ ४५ ॥ स्वस्तिरिद्धिप्रपथेश्रेष्ठारेक्णस्वत्यभियावाममेति । सानोअमासोअरणेनि
पातुस्वावेशाभवतुदेवगोपा । स्वस्तिरेवहिप्रपथेश्रेष्ठारेक्णस्वतीधनवत्यभ्येतियावसूनिवननीयानिसानोऽमागृहेसानि
रमणेसानिर्गमनेपातुस्वावेशाभवतुदेवीगोप्त्रीदेवान्गोपायत्वितिदेवाएनांगोपायंत्वितिवोषाव्याख्यातातस्याएषाभ

वति ॥ ४६ ॥ अपोषाअनसःसरत्संपिष्टादहविभ्युषी । नियत्सीँशिश्नथद्वृषा । अपासरदुषाअनसःसंपिष्टान्मेघाद्वि
भ्युष्यनोवायुरनितेरपिवोपमार्थेस्यादनसइवशकटादिवानःशकटमानद्धमस्मिंश्चीवरंमनितेर्वास्याज्जीवनकर्मणउपजी
वंत्येनंन्मेघोऽप्यनएतस्मादेवयन्निरशिश्नथद्वृषावर्षितामध्यमस्तस्याएषापराभवति ॥ ४७ ॥ एतदस्याअनःशयेसुसं
पिष्टंविपाश्या । ससारसींपरावतः । एतदस्याअनआशेतेसुसंपिष्टमितरदिवविपाशिविमुक्तपाशिससारोषाःपरावतः
प्रेरितवतःपरागतावेळाव्याख्यातातस्याएषाभवति ॥ ४८ ॥ अभिनइळायूथस्यमातास्मन्नदीभिरुर्वशीवागृणातु ।
उर्वशीवाबृहद्दिवागृणानाभ्यूर्ण्वानाप्रभृथस्यायोः । सिषक्तुनऊर्जव्यस्यपुष्टेः । अभिगृणातुनइळायूथस्यमातासर्वस्य
मातास्मदभिनदीभिरुर्वशीवागृणातूर्वशीवाबृहद्दिवामहद्दिवागृणानाभ्यूर्ण्वानाप्रभृथस्यप्रभृतस्यायोरयनस्यमनुष्य
स्यज्योतिषोवोदकस्यवासेवतांनोऽन्नस्यपुष्टेरोदसीरुद्रस्यपत्नीतस्याएषाभवति ॥ ४९ ॥ रथंनुमारुतंवयंश्रवस्युमाहु
वामहे । आयस्मिन्तस्थौसुरणानिबिभ्रतीसचामरुत्सुरोदसी । रथंक्षिप्रंमारुतंमेघंवयंश्रवणीयमाह्वयामहआयस्मिन्त
स्थौसुरमणीयान्युदकानिबिभ्रतीसचामरुद्भिःसहरोदसीरोदसी ॥ ५० ॥ (श्येनोव्याख्यातआदायस्वादिष्ठयासोमं ॥ २६ ॥
मन्यतेयत्त्वादेवनवोनवःपरंमृत्योत्वेषमित्थाप्रवोमहउदुज्योतिर्धाताददातुसोमस्यराज्ञोऽथातोमध्यस्थानादेवगणा
आविद्युन्मद्भिरारुद्रासोविष्ठीशमीविरूपासउदीरतामंगिरसोनःसूर्यस्येवस्तुषेय्यमथातोमध्यस्थानाःस्त्रियोदक्षस्यवा

यस्मैत्वँकिमिच्छंतीपावकानोंमहोअर्णोयद्वाग्वदंतींदेवींवाचमन्विदनुमतेंराकामहंसिनीवालिंकुहूमहमन्यमूषूर्वशींवि
द्युन्नबळित्थैंद्राणींनाहर्मिंद्राणिंगौरीर्मिमायतस्याःसमुद्रांगौरमीमेदुपह्वयेंसूयवसाद्धिंकृण्वतींस्वस्तिरिध्यपोषांएतद
स्याअभिनइळरथंनुपञ्चाशत्) ॥ इतिनिरुक्तउत्तरषट्केपंचमोऽध्यायःसमाप्तः ॥ ५ ॥

ॐ ॥ अथातोद्युस्थानादेवतांस्तासामश्विनौप्रथमागामिनौभवतोंऽश्विनौयद्व्यश्नुवातेंसर्वंरसेनान्योज्योतिषांन्योऽ
श्वैरश्विनावित्यौर्णवाभंस्तत्कावश्विनौंद्यावापृथिव्यावित्येकेंऽहोरात्रावित्येकेंसूर्याचंद्रमसावित्येकेंराजानौपुण्यकृता
वित्यैतिहासिकांस्तयोःकालऊर्ध्वमर्धरात्रांत्प्रकाशीभावस्यांनुविष्टंभमनुतमोभागोहिमध्यमोंज्योतिर्भागआदित्यंस्तयो
रेषाभवति ॥ १ ॥ वसातिषुस्मचरथोऽसितौपेत्वांविव । कुदेदमंश्विनायुवमभिदेवाँअंगच्छतं । इतिसानिगदव्या
ख्यातांवसातिषुस्मचरथोंवसातयोरातयोंवसंतेस्माइतरेतरातयोंवक्तेर्वावहतेर्वासितौपेत्वामिव । अपेत्वावृत्रहणंसुरा
तयोस्तयोःसमानकालयोंःसमानकर्मणोःसंस्तुतप्राययोंरसंस्तवेनैषोऽर्धर्चोभवतिंवासात्योऽन्यउच्यतंउषःपुत्रस्तवान्य
इतितयोरेषापराभवति ॥ २ ॥ इहेहजातासमंवावशीतामरेपसातन्वउनामभिःस्वैः । जिष्णुर्वामन्यःसुमखस्यसूरिर्दि
वोअन्यःसुभगःपुत्रऊहे । इहचेहचजातौसंस्तूयेतेंपापेनालिप्यमानयातन्वांनामभिश्चस्वैर्जिष्णुर्वामन्यःसुमहतोबल
शि. वे. १४ स्येरयितामध्यमोंदिवोऽन्यःसुभगःपुत्रऊह्यतआदित्यंस्तयोरेषापराभवति ॥ ३ ॥ प्रातर्युजाविबोधयाश्विनावेहगं

च्छतां । अस्यसोमस्यपीतये । प्रातर्योगिनौविबोधयाश्विनाविहागच्छतामस्यसोमस्यपानायतयोरेषापराभवति
॥ ४ ॥ प्रातर्यजध्वमश्विनाहिनोतनसायमस्तिदेवयाअजुष्टं । उतान्योअस्मद्यजतेविचावःपूर्वःपूर्वोयजमानोवनी
यान् । प्रातर्यजध्वमश्विनौप्रहिणुतनसायमस्तिदेवेज्याअजुष्टमेतदप्यन्योऽस्मद्यजतेविचार्वःपूर्वःपूर्वोयजमानोवनीयां
न्वनयितृतमस्तयोःकालःसूर्योदयपर्यंतस्तस्मिन्नन्यादेवताओप्यंतउषावष्टेःकांतिकर्मणउच्छतेरितरामाध्यमिकातस्या
एषाभवति ॥ ५ ॥ उषस्तच्चित्रमाभरास्मभ्यंवाजिनीवति । येनतोकंचतनयंचधामहे । उषस्तच्चित्रंचायनीयंमंहनी
यंधनमाहरास्मभ्यमन्नवतियेनपुत्रांश्चपौत्रांश्चदधीमहितस्याएषापराभवति ॥ ६ ॥ एताउत्याउषसःकेतुमक्रतपूर्वेअर्धे
रजसोभानुमंजते । निष्कृण्वानाआयुधानीवधृष्णवःप्रतिगावोऽरुषीर्यंतिमातरः । एतास्ताउषसःकेतुमकृषतप्रज्ञान
मेकस्याएवंपूजनार्थेबहुवचनंस्यात्पूर्वेऽर्धेऽन्तरिक्षलोकस्यसमंजतेभानुना । निष्कृण्वानाआयुधानीवधृष्णवः । नि
रित्येषसमित्येतस्यस्थानंएमीदेषांनिष्कृतंजारिणीवेत्यपिनिगमोभवतिप्रतियंतिगावोगमनादरुषीरारोचनान्मातरोभा
सोनिर्मात्र्यःसूर्यासूर्यस्यपत्नयैषैवाभिसृष्टकालतमातस्याएषाभवति ॥ ७ ॥ सुकिंशुकंशल्मलिंविश्वरूपंहिरण्यवर्णसु ॥ २७ ॥
वृतंसुचक्रं । आरोहसूर्येअमृतस्यलोकंस्योनंपत्येवहतुंकृणुष्व । सुकाशनंशन्नमलंसर्वरूपमपिवोपमार्थेस्यात्सुकिंशुक
मिवशल्मलिमितिकिंशुकंक्रंशतेःप्रकाशयतिकर्मणःशल्मलिःसुशरोभवतिशरवान्वारोहसूर्येअमृतस्यलोकमुदकस्यसु

खंपत्येवहतुंकुरुष्वंसवितासूर्याप्रायच्छंत्सोमायराज्ञेप्रजापतयेवेतिचब्राह्मणंवृषाकपायीवृषाकपेःपत्न्यैषैवाभिसृष्टकाल
तमांतस्याएषाभवति ॥ ८ ॥ वृषाकपायिरेवंतिसुपुत्रआदुसुस्नुषे । घसंत्तइंद्रंउक्षणंःप्रियंकांचित्करंहविर्विश्वंस्मादिं
द्रउत्तरः । वृषाकपायिरेवतिंसुपुत्रेमध्यमेनसुस्नुषेंमाध्यमिकयावाचांस्नुषासाधुसादिनीतिवांसाधुसानिनीतिवांस्वप
त्यंतत्सनोतीतिवांप्राश्नातुतइंद्रउक्षणंएतान्माध्यमिकान्त्संस्त्यायांनुक्षणउक्षतेर्वृद्धिकर्मणंउक्षंत्युदकेनेतिवांप्रियंकुरु
ष्वसुखाचयकरंहविःसुखकरंहविंःसर्वस्माद्यइन्द्रउत्तरस्तमेतद्ब्रूमंआदित्यंसरण्यूःसरणात्तस्याएषाभवति ॥ ९ ॥ अपांगू
हन्नमृतांमर्त्येभ्यःकृत्वीसवर्णामददुर्विवस्वते । उताश्विनांवभरद्यत्तदासीदजंहादुद्वामिथुनासंरण्यूः । अप्यगूहन्नमृ
तांमर्त्येभ्यंःकृत्वीसवर्णामददुर्विवस्वतेंऽप्यश्विनावभरद्यत्तदासींदजहाद्वौमिथुनौसरण्यूर्मध्यमंचमाध्यमिकांचवाच
मितिनैरुक्तांयमंचयमींचेत्यैतिहासिकांस्तत्रेतिहासमाचक्षतेंत्वाष्ट्रीसरण्यूर्विवस्वतआदित्यांद्यमौमिथुनौजनयांचकार
सासवर्णामन्यांप्रतिनिधायांश्वंरूपंकृत्वाप्रदुद्रावंसविवस्वानादित्यंआश्वमेवरूपंकृत्वांतामनुसृत्यसंबभूवंततोऽश्विनौ
जज्ञातेंसवर्णायांमनुंस्तदभिवादिन्येषर्ग्भवति ॥ १० ॥ त्वष्टांदुहित्रेवंहंतुकृणोतीतीदंविश्वंभुवनंसमेति । यमस्यंमा
तापर्युह्यमांनामहोजायाविवंस्वतोननाश । त्वष्टादुहितुर्वहनंकरोतींतीदंविश्वंभुवनंसमेतींमानिचसर्वाणिभूतान्यभि
समागच्छंतियमस्यमातापर्युह्यमानांमहतोजायाविवस्वतोननाशंरात्रिरादित्यस्यांदित्योदयेंऽतर्धीयते ॥ ११ ॥ सवि

ताव्याख्यातंस्तस्यकालोयदाद्यौरपहततमस्काकीर्णरश्मिर्भवतितस्यैषाभवति ॥ १२ ॥ विश्वारूपाणिप्रतिमुञ्चतेक
विःप्रासावीद्भद्रंद्विपदेचतुष्पदे । विनाकमख्यत्सवितावरेण्योऽनुप्रयाणमुषसोविराजति । सर्वाणिप्रज्ञानानिप्रतिमुं
चतेमेधावीकविःक्रांतदर्शनोभवतिकवतेर्वाप्रसुवतिभद्रंद्विपाद्भ्यश्चतुष्पाद्भ्यश्चव्यचिख्यपन्नाकंसवितावरणीयःप्रया
णमनूषसोविराजत्यधोरामःसावित्रइतिपशुसमाम्नायेविज्ञायतेकस्मात्सामान्यादित्यधस्तात्तद्वेळायांतमोभवत्येतस्मा
त्सामान्यादधस्ताद्रामोऽधस्तात्कृष्णःकस्मात्सामान्यादित्यग्निंचित्वानरामामुपेयाद्रामारमणायोपेयतेनधर्मायकृष्ण
जातीयैतस्मात्सामान्यात्कृकवाकुःसावित्रइतिपशुसमाम्नायेविज्ञायतेकस्मात्सामान्यादितिकालानुवादंपरीत्यकृकवा
कोःपूर्वंशब्दानुकरणंवचेरुत्तरंभगोव्याख्यातस्तस्यकालःप्रागुत्सर्पणात्तस्यैषाभवति ॥ १३ ॥ प्रातर्जितंभगमुग्रंहुवेम
वयंपुत्रमदितेर्योविधर्ता । आध्रश्चिद्यंमन्यमानस्तुरश्चिद्राजाचिद्यंभगंभक्षीत्याह । प्रातर्जितंभगमुग्रंह्वयेमवयंपुत्रमदि
तेर्योविधारयितासर्वस्याध्रश्चिद्यंमन्यमानआढ्याळुर्दरिद्रस्तुरश्चित्तुरइतियमनामतरतेर्वात्वरतेर्वात्वरयातूर्णगतिर्यमो
राजाचिद्यंभगंभक्षीत्याहांधोभगइत्याहुरनुत्सृप्तोनदृश्यतेप्राशित्रमस्याक्षिणीनिर्जघानेतिचब्राह्मणंजनंभगोगच्छतीति
वाजनंगच्छत्यादित्यउदयेनसूर्यःसर्तेर्वासुवतेर्वास्वीर्यतेर्वातस्यैषाभवति ॥१४॥ उदुत्यंजातवेदसंदेवंवहंतिकेतवः । दृशे
विश्वायसूर्यं । उद्वहंतितंजातवेदसंरश्मयःकेतवःसर्वेषांभूतानांदर्शनायसूर्यमितिकमन्यमादित्यादेवमवक्ष्यत्तस्यैषापरा

भवति ॥ १५ ॥ चित्रंदेवानामुदगादनीकंचक्षुर्मित्रस्यवरुणस्याग्नेः । आप्राद्यावापृथिवीअंतरिक्षंसूर्यआत्माजगतस्त
स्थुषश्च । चायनीयंदेवानामुदगमदनीकंख्यानंमित्रस्यवरुणस्याग्नेश्चापूपुरद्द्यावापृथिव्यौचांतरिक्षंचमहत्त्वेनंतेनसू
र्यआत्माजंगमस्यचस्थावरस्यचाथयद्रश्मिपोषंपुष्यतितत्पूषाभवतितस्यैषाभवति ॥ १६ ॥ शुक्रंतेअन्यद्यजतंतेअन्य
द्विषुरूपेअहनीद्यौरिवासि । विश्वाहिमायाअवसिस्वधावोभद्रातेपूषन्निहरातिरस्तु । शुक्रंतेअन्यल्लोहितंतेअन्यद्य
जतंतेअन्यद्यज्ञियंतेअन्यद्विषमरूपेतेअहनीकर्मद्यौरिवचासिसर्वाणिप्रज्ञानान्यवस्यन्नवन्भाजनवतीतेपूषन्निहदत्तिर
स्तुतस्यैषापराभवति ॥ १७ ॥ पथस्पथःपरिपतिंवचस्याकामेनकृतोअभ्यानळर्कं । सनोरासच्छुरुधश्चन्द्राग्राधियं
धियंसीषधातिप्रपूषा । पथस्पथोऽधिपतिंवचनेनकामेनकृतोऽभ्यानळर्कमभ्यापन्नोऽर्कमितिवासनोददातुचायनी
याग्राणिधनानिकर्मकर्मचनःप्रसाधयतुपूषेत्यथयद्विषितोभवतितद्विष्णुर्भवतिविष्णुर्विशतेर्वाव्यश्नोतेर्वातस्यैषाभव
ति ॥ १८ ॥ इदंविष्णुर्विचक्रमेत्रेधानिदधेपदं । समूढमस्यपांसुरे । यदिदंकिंचतद्विक्रमतेविष्णुस्त्रिधानिधत्तेपदं
त्रेधाभावायपृथिव्यामंतरिक्षेदिवीतिशाकपूर्णिःसमारोहणेविष्णुपदेगयशिरसीत्यौर्णवाभःसमूढमस्यपांसुरेप्यायनेऽ
न्तरिक्षेपदंनदृश्यतेऽपिवोपमार्थेस्यात्समूढमस्यपांसुलइवपदंनदृश्यतइतिपांसवःपादैःसूयंतइतिवापन्नाःशेरतइतिवा
पसंनीयाभवंतीतिवा ॥ १९ ॥ विश्वानरोव्याख्याततस्तस्यैषनिपातोभवत्यैन्द्राम्मृचि ॥ २० ॥ विश्वानरस्यवस्प

तिमनानतस्यशवसः । एवैश्चचर्षणीनामूतीहुवेरथानां । विश्वानरस्यादित्यस्यानानतस्यशवसोमहतोबलस्यैवैश्वकामै
॥ २९ ॥ रयनैरवनैर्वाचर्षणीनांमनुष्याणामूत्याचपथारथानामिंद्रमस्मिन्यज्ञेह्वयामिवरुणोव्याख्यातस्तस्यैषाभवति ॥ २१ ॥
येनापावकचक्षसाभुरण्यंतंजनाँअनु । त्वंवरुणपश्यसि । भुरण्युरितिक्षिप्रनामभुरण्युःशकुनिर्भूरिमध्वानंनयतिस्व
र्गस्यलोकस्यापिवोढातत्संपातीभुरण्युरनेनपावकख्यानेन । भुरण्यंतंजनाँअनु । त्वंवरुणपश्यसि । तत्त्वेवयंस्तुमइ
तिवाक्यशेषोऽपिवोत्तरस्यां ॥ २२ ॥ येनापावकचक्षसाभुरण्यंतंजनाँअनु । त्वंवरुणपश्यसि । विद्यामेषिरजस्पृ
थ्वहामिमानोअक्तुभिः । पश्यन्जन्मानिसूर्य । व्येषिद्यांरजश्चपृथुंमहांतंलोकंमहानिचमिमानोक्तुभीरात्रिभिःसहपश्य
न्जन्मानिजातानिसूर्यापिवापूर्वस्यां ॥ २३ ॥ येनापावकचक्षसाभुरण्यंतंजनाँअनु । त्वंवरुणपश्यसि । प्रत्यङ्देवानां
विशःप्रत्यङ्ङुदेषिमानुषान् । प्रत्यङ्विश्वंस्वर्दृशे । प्रत्यङ्ङिदंसर्वमुदेषिप्रत्यङ्ङिदंज्योतिरुच्यतेप्रत्यङ्ङिदंसर्वमभिविपश्य
सीत्यपिवैतस्यामेव ॥ २४ ॥ येनापावकचक्षसाभुरण्यन्तंजनाँअनु । त्वंवरुणपश्यसि । तेननोजनानभिविपश्यसिके
शीकेशारश्मयस्तैस्तद्वान्भवतिकाशनाद्वाप्रकाशनाद्वातस्यैषाभवति ॥ २५ ॥ केश्य१ग्निंकेशीविषंकेशीबिभर्तिरोदसी । ॥ २९ ॥
केशीविश्वंस्वर्दृशेकेशीदंज्योतिरुच्यते । केश्यग्निंचविषंचविषमित्युदकनामविष्णातेर्विपूर्वस्यस्नातेःशुद्ध्यर्थस्यविपूर्वस्य
वासचतेद्यावापृथिव्यौचधारयतिकेशीदंसर्वमिदमभिविपश्यतिकेशीदंज्योतिरुच्यतइत्यादित्यमाहाथाप्येतेइतरेज्यो

तिर्षीकेशिनीउच्येतेंधूमेनाग्नीरजसाचमध्यमंस्तेषामेषासाधारणाभवति ॥ २६ ॥ त्रयंःकेशिनंऋतुथाविचक्षतेसंवत्सरेवं पतएकंएषां । विश्वमेकोंअभिचंष्टेशचींभिर्ध्राजिरेकंस्यदद्दशेनरूपं । त्रयःकेशिनऋतुथाविचक्षतेंकालेकालेऽभिविप श्यंतिंसंवत्सरेवपतएकएषामित्यग्निःपृथिवींदहतिंसर्वमेकोऽभिविपश्यतिंकर्मभिरादित्योंगतिरेकस्यदृश्यतेंनरूपंमध्य मस्यांथयद्रश्मिभिरभिप्रकम्पयन्नेतिंतद्वृषाकपिर्भवतिंवृषाकम्पनस्तस्यैषाभवति ॥ २७ ॥ पुनरेहिंवृषाकपेसुविताकंल्प यावहै । यएषःस्वंप्नंनंशनोऽस्तमेषिंपथापुनर्विश्वंस्मादिंद्रउत्तरः । पुनरेहिवृषाकपेंसुप्रसूतानिवःकर्माणिकल्पयावहैंय एषःस्वप्ननंशनंःस्वप्नान्नाशयस्यांदित्यउदयेनसोंऽस्तमेषिपथापुनंःसर्वस्माद्यइंद्रउत्तरस्तमेतद्भूमंआदित्यंयमोव्याख्यातं स्तस्यैषाभवति ॥ २८ ॥ यस्मिन्वृक्षेसुंपलाशेदेवैःसंपिबंतेयमः । अत्रांनोविश्पतिंःपितापुंराणाँअनुंवेनति । यस्मिन्वृ क्षेसुपलाशेंस्थानेवृतःक्षयेवांपिवोपमार्थेस्यांद्वृक्षइवसुपलाशइतिंवृक्षोव्रश्चनांत्पलाशंपलाशनांद्देवैःसंगच्छतेयमोंरश्मि भिरादित्यंस्तत्रनःसर्वस्यपातावापालयितावांपुराणाननुकामयेतांजएकपादजनएकःपादंएकेनपादेनपातीतिंवैंकेनपा देनपिबतीतिंवैंकोऽस्यपादइतिवा । एकंपादंनोत्खिदतीत्यपिनिगमोभवतिंतस्यैषनिपातोभवतिंवैश्वदेव्यामृचि ॥ २९ ॥ पावींरवीतन्यतुरेकंपादजोदिवोधर्तासिंधुरापंःसमुद्रियंः । विश्वेंदेवासंःशृणवन्वचांसिमेसरंस्वतीसह धीभिःपुरंध्या । पविःशल्योभवतिंयद्विपुनातिकायंतद्वत्पवीरमायुधंतद्वानिंद्रःपवीरवान् । अतितस्यौपवीरवानित्य

पिनिगमोभवतितद्देवतावाक्पावीरवींपावीरवीचदिव्यावांक्तन्यतुस्तनित्रीवाचोऽन्यस्यांअजश्चैकपाद्दिवोधारयिता
सिन्धुश्चापश्चसमुद्रियाश्चंसर्वेचदेवाःसरस्वतीचसहपुरन्ध्यांस्तुत्याप्रयुक्तानिधीभिःकर्मभिर्युक्तानिशृण्वंतुवचनानीमा
नीतिंपृथिवीव्याख्यातातस्याएषनिपातोभवत्यैंद्राग्न्यामृचि ॥ ३० ॥ यदिंद्राग्नीपरमस्यांपृथिव्यांमध्यमस्यामवम
स्यांमुतस्थः। अतःपरिंवृषणावाहियातमथासोमस्यपिबतंसुतस्य । इतिसानिगदव्याख्यातासमुद्रोव्याख्यातंस्तस्यैष
निपातोभवतिंपावमान्यामृचि ॥ ३१ ॥ पवित्रवंतःपरिवाचमासतेपितैषांप्रत्नोअभिरक्षतिव्रतं । महःसमुद्रंवरुण
स्तिरोदधेधीराइच्छेकुर्धरुणेष्वारभं । पवित्रवंतोरश्मिवंतोमाध्यमिकादेवगणाःपर्यासतेमाध्यमिकांवाचंपितैषांप्रत्नः
पाद्व्याख्यातःपृथिवीव्याख्यातासमुद्रोव्याख्यातंस्तेषामेषनिपातोभवत्यपरस्यांबहुदेवतायामृचि ॥ ३२ ॥ उतनोऽ
हिर्बुध्न्यःशृणोत्वजएकंपात्पृथिवीसमुद्रः। विश्वेदेवाऋतावृधोहुवानाःस्तुतामंत्राःकविशस्ताअवंतु । अपिचनोऽहि
र्बुध्न्यःशृणोत्वजश्चैकपात्पृथिवीचसमुद्रश्चसर्वेचदेवाःसत्यवृधोवायज्ञवृधोवाहूयमानामंत्रैःस्तुतामंत्राःकविशस्ताअवंतु
मेधाविशस्तादध्यङ्प्रत्यक्तोध्यानमितिवाप्रत्यक्तमस्मिन्ध्यानमितिवाथर्वाव्याख्यातोमनुर्मननात्तेषामेषनिपातोभवत्यै
न्द्र्यामृचि ॥ ३३ ॥ यामथर्वामनुष्पितादध्यङ्धियमत्नत । तस्मिन्ब्रह्माणिपूर्वथेंद्रउक्थासमग्मतार्चन्ननुस्वराज्यं ।

॥ ३० ॥

यामथर्वाचमनुश्चपितामानवानांदध्यङ्चधियमतनिषतंतस्मिन्ब्रह्माणिकर्माणिपूर्वैन्द्रउक्थानिचसंगच्छंतांमर्चन्योऽ
नूपास्तेस्वाराज्यं ॥ ३४ ॥ अथातोद्युस्थानादेवगणास्तेषामादित्याःप्रथमागामिनोभवंत्यादित्याव्याख्यातास्तेषामेषाभ
वति ॥ ३५ ॥ इमागिरंआदित्येभ्योघृतस्नूःसनाद्राजभ्योजुह्वाजुहोमि । शृणोतुमित्रोअर्यमाभगोनस्तुविजातोवरु
णोदक्षोअंशः । घृतस्नूर्घृतप्रस्नाविन्योघृतप्रस्नाविण्योघृतसानिन्योघृतसारिण्यइतिवाहुतीरादित्येभ्यश्चिरंजुह्वाजुहो
मिचिरंराजभ्यइतिवाशृणोतुनइमागिरोमित्रश्चार्यमाचभगश्चबहुजातश्चधातादक्षोवरुणोऽशश्चांशोऽशुनाव्याख्यातः
सप्तऋषयोव्याख्यातास्तेषामेषाभवति ॥ ३६ ॥ सप्तऋषयःप्रतिहिताःशरीरेसप्तरक्षंतिसदमप्रमादं । सप्तापःस्वपतो
लोकमीयुस्तत्रजागृतोअस्वप्नजौसत्रसदौचदेवौ । सप्तऋषयःप्रतिहिताःशरीरेरश्मयआदित्येसप्तरक्षंतिसदमप्रमादंसं
वत्सरमप्रमाद्यन्तःसप्तापनास्तएवंस्वपतोलोकमस्तमितमादित्यंयन्तितत्रजागृतोऽस्वप्नजौसत्रसदौचदेवौवाय्वादित्या
वित्यधिदैवतमथाध्यात्मंसप्तऋषयःप्रतिहिताःशरीरेषाळिंद्रियाणिविद्यासप्तम्यात्मनिसप्तरक्षंतिसदमप्रमादंशरीरमप्र
माद्यन्तिसप्तापनानीमान्येवंस्वपतोलोकमस्तमितमात्मानंयंतितत्रजागृतोऽस्वप्नजौसत्रसदौचदेवौप्राज्ञश्चात्मातैजस
श्चेत्यात्मगतिमाचष्टेतेषामेषापराभवति ॥ ३७ ॥ तिर्यग्बिलश्चमसऊर्ध्वबुध्नोयस्मिन्यशोनिहितंविश्वरूपं । अत्रासत
ऋषयःसप्तसाकंयेअस्यगोपामहतोबभूवुः । तिर्यग्बिलश्चमसऊर्ध्वबंधनऊर्ध्वबोधनोवायस्मिन्यशोनिहितंसर्वरूपमत्रा

सतऋषयःसप्तसहादित्यरश्मयोंयेअस्यगोपामहतोबभूवुरिंत्यधिदैवतमथाध्यात्मंतिर्यग्बिलश्चमसऊर्ध्वबंधनऊर्ध्वबो
॥ ३१ ॥ धनोवांयस्मिन्यशोनिहितंसर्वरूपंमत्रासतऋषयःसप्तसहेंद्रियाणिंयान्यस्यगोप्तॄणिमहतोबभूवुरित्यांत्मगतिमाचष्टेंदेवा
व्याख्यातांस्तेषामेषाभवति ॥ ३८ ॥ देवानांभद्रासुंमतिर्ऋजूयतांदेवानांरातिरभिनोनिर्वर्ततां । देवानांसख्यमुपं
सेदिमावयंदेवानआयुःप्रतिरंतुजीवसें । देवानांवयंकल्याण्यांमतांवृजुगामिनामृतुगामिनामितिवांदेवानांदानमभि
नोनिवर्ततांदेवानांसख्यमुपसीदेमवयंदेवानआयुःप्रवर्धयंतुचिरंजीवनायंविश्वेदेवाःसर्वेदेवांस्तेषामेषाभवति ॥ ३९ ॥
ओमांसश्चर्षणीधृतोविश्वेंदेवासआगंत । दाश्वांसोंदाशुषःसुतं । अवितारोवावनीयावांमनुष्यधृतःसर्वेचदेवांइहाग
च्छतदत्तवंतोदत्तवतःसुतमितिंतदेतदेकमेवंवैश्वदेवंगायत्रंतृचंदशतयीषुविद्यतेंयत्तुकिंचिद्बहुदैवतंतद्वैश्वदेवानांस्था
नेयुज्यतेंयदेवविश्वलिंगमितिशाकपूणिंरनत्यंतगतस्त्वेषउद्देशोभवतिंबभ्रुरेकइतिदशद्विपदांअलिंगाभूतांशःकाश्यपं
आश्विनमेकलिंगमभितष्टीयंसूक्तमेकलिंगंसाध्यादेवाःसाधनांत्तेषामेषाभवति ॥ ४० ॥ यज्ञेनंयज्ञमंयजंतदेवास्ता
निधर्मांणिप्रथमान्यांसन् । तेहनाकंमहिमानंःसचंतयत्रपूर्वेंसाध्याःसंतिंदेवाः । यज्ञेनयज्ञमयजंतदेवांअग्निनाग्निमय ॥ ३१ ॥
जंतदेवांअग्निःपशुरासीत्तमालभंतंतेनायजंतेतिचब्राह्मणं । तानिधर्मांणिप्रथमान्यांसन् । तेहनाकंमहिमानःसमसेवं
तंयत्रपूर्वेंसाध्याःसंतिदेवाःसाधनांद्द्युस्थानोदेवगणइतिनैरुक्तांःपूर्वंदेवयुगमित्याख्यानंवसवोयद्विवसतेंसर्वमग्निर्वसु

भिर्वासवइतिसमाख्यातस्मात्पृथिवीस्थानांइंद्रोवसुभिर्वासवइतिसमाख्यातस्मान्मध्यस्थानांवसवआदित्यरश्मयोवि
वासनांत्तस्माद्द्युस्थानांस्तेषामेषाभवति ॥ ४१ ॥ सुगावोंदेवाःसदनमकर्मयआजग्मुःसवनमिदंजुषाणाः । जक्षिवां
संःपपिवांसश्चविश्वेऽस्मेधत्तवसवोवसूनि । स्वागमनानिवोदेवाःसुपथान्यकर्मयआगच्छतसवनानीमानिजुषाणाःखा
दितवंतःपीतवंतश्चसर्वेऽस्मासुधत्तवसवोवसूनितेषामेषापराभवति ॥ ४२ ॥ ज्मयाअत्रवसवोरंतदेवाउरावंतरि
क्षेमर्जयंतशुभ्राः । अर्वाक्पथउरुज्रयःकृणुध्वंश्रोतादूतस्यजग्मुषोनोअस्य । ज्मयाअत्रवसवोऽरमन्तदेवांज्मापृथि
वीतस्यांभवांउरौचान्तरिक्षेमर्जयन्तंगमयन्तरमयन्तशुभ्राःशोभमानांअर्वाचएनान्पथोबहुजवाःकुरुध्वंशृणुतदूतस्य
जग्मुषोनोऽस्याग्नेर्वाजिनोव्याख्यातांस्तेषामेषाभवति ॥ ४३ ॥ शंनोभवन्तुवाजिनोहवेषुदेवतातामितद्रवःस्वर्काः ।
जंभयंतोऽहिंवृकंरक्षांसिसनेम्यस्मद्युयवन्नमीवाः । सुखानोभवन्तुवाजिनोह्वानेषुदेवतातौयज्ञेवितद्रवःसुमितद्रवःस्व
र्काःस्वंचनाइतिवास्वर्चनाइतिवास्वर्चिषइतिवाजम्भयंतोऽहिंचवृकंचरक्षांसिचक्षिप्रमस्मद्यावयन्त्वमीवादेवाश्वाइति
वादेवपत्न्योदेवानांपत्न्यस्तासामेषाभवति ॥ ४४ ॥ देवानांपत्नीरुशतीरवंतुनःप्रावन्तुनस्तुजयेवाजसातये । याःपा
र्थिवासोयाअपामपिव्रतेतानोदेवीःसुहवाःशर्मयच्छत । देवानांपत्न्यउशत्योऽवंतुनःप्रावंतुनस्तुजयेऽपत्यजननायचा
न्नसंसननायचंवाःपार्थिवासोयाअपामपिव्रतेकर्मणितानोदेव्यःसुहवाःशर्मयच्छन्तुशरणंतासामेषापराभवति ॥ ४५ ॥

उतग्नाव्यंतुदेवपत्नीरिंद्राण्य१ग्नाय्यश्विनीराट् । आरोदसीवरुणानीशृणोतुव्यंतुदेवीर्यऽऋतुर्जनीनां । अपिचग्नाव्यंतु देवपत्न्यंइन्द्राणींद्रस्यपत्न्यग्नाय्यग्नेःपत्न्यश्विन्यश्विनोःपत्नींराड्राजतेरोदसीरुद्रस्यपत्नींवरुणानीचवरुणस्यपत्नींव्यंतुदे व्यःकामयंतांयऋतुःकालोजायानांयऋतुःकालोजायानां ॥ ४६ ॥ (अथातोद्युस्थानावसातिर्षुस्मेहेहजाताप्रातर्युजा प्रातर्यजध्वमुषस्तच्चित्रमेताउत्याःसुकिंशुकंवृषाकपाय्यपागूहंस्त्वष्टादुहित्रेसविताविश्वारूपाणिप्रातर्जितमुदुत्यंचित्रं शुक्रंतेपथस्पथइदंविष्णुर्विश्वानरोव्याख्यातोंविश्वानरस्ययेनापावकेतिचतुष्कंकेश्यग्निंत्रयःकेशिनःपुनरेहियस्मिन्वृक्षे पावीरवींयदिंद्राग्नीपवित्रवंतउतनोहिर्यामथर्वाथातोद्युस्थानादेवगणाइमागिरःसप्तऋषयस्तिर्यग्बिलोदेवानांभद्रौमासो यज्ञेनसुगावोदेवाज्मयाअत्रशंनोभवंतुदेवानांपत्नीरुतग्नाव्यंतुषट्चत्वारिंशत्) ॥ इतिनिरुक्तउत्तरषट्केषष्ठोऽध्यायः ६

॥ अथपरिशिष्टम् ॥

ॐ ॥ अथेमाअतिस्तुतयइत्याचक्षतेंऽपिवासंप्रत्ययएवस्यान्माहाभाग्यादेवतायाःसोऽग्निमेवप्रथममाहत्वमग्नेद्यु भिस्त्वमाशुशुक्षणिरितियथैतस्मिन्त्सूक्तेनहित्वदारेनिमिषश्चनेशइतिवरुणस्याथैषेंद्रस्य ॥ १ ॥ यद्द्यावइंद्रतेशतंशतं भूमीरुतस्युः । नत्वावज्रिन्त्सहस्रंसूर्याअनुनजातमष्टरोदसी । यदितइंद्रशतंदिवःशतंभूमयःप्रतिमानानिस्युर्नत्वाव

त्रिन्त्सहस्रमपिसूर्यांनद्यावापृथिव्यावप्यभ्यश्नुवीतामित्यर्थैषादित्यस्य ॥ २ ॥ यदुदंचोवृषाकपेगृहमिंद्राजंगंतन ।
क्व स्यपुल्वघोमृगःकमंगंजनयोपनोविश्वंस्मादिंद्रउत्तंरः । यदुदंचोवृषाकपेगृहमिंद्राजगमतंक्वस्यपुल्वघोमृगःक्वसब
ह्वादीमृगोंमृगोमार्ष्टेर्गतिकर्मणःकमगमद्देशंजनयोपनःसर्वस्माद्यइंद्रउत्तरस्तमेतद्भूमआदित्यमर्थैषादित्यरश्मीनां ॥३॥
विहिसोतोरसृक्षतनेंद्रंदेवमंमंसत । यत्रामंदद्वृषाकपिरर्यःपुष्टेषुमत्सखाविश्वंस्मादिंद्रउत्तंरः । व्यसृक्षतहिप्रसवायन
चेंद्रंदेवममंसतंयत्रामाद्यद्वृषाकपिरर्यईश्वरःपुष्टेषुपोषेषुमत्सखाममसखामदनसखायेनःसखायस्तैःसहेतिवासर्वस्माद्य
इंद्रउत्तरस्तमेतद्भूमआदित्यमर्थैषाश्विनोः॥४॥ सृण्येववजर्भरीतुर्फरीतूनैतोशेवंतुर्फरीपर्फरीका । उदन्यजेवजेमनामदेरू
तामेजराय्वजरंमरायु । सृण्येवेतिद्विविधासृणिर्भवतिभर्ताचहंताचतथाश्विनौचापिभर्तारौजर्भरीभर्तारावित्यर्थस्तुर्फ
रीतूहंतारौ । नैतोशेवंतुर्फरीपर्फरीका । नितोशस्यापत्यंनैतोशंनैतोशेवतुर्फरीक्षिप्रहन्तारौ । उदन्यजेवजेमनामदेरू।
उदन्यजेवेत्युदकजेइवरत्नेसामुद्रेचान्द्रमसेवाजेमनेजयमनेजेमनामदेरू । तामेजराय्वजरंमरायु । एतज्जरायुजंश
रीरंशरदमजीर्णमर्थैषासोमस्य ॥ ५ ॥ तरत्समन्दीधावतिधारासुतस्यांधसः । तरत्समंदीधावति । तरतिसपापंसर्वं
मंदीयःस्तौतिधावतिगच्छत्यूर्ध्वांगतिं । धारासुतस्यांधसः । धारयाभिषुतस्यसोमस्यमंत्रपूतस्यवाचास्तुतस्यार्थैषा
शि. वे. १५ यज्ञस्य ॥ ६ ॥ चत्वारिशृंगात्रयोअस्यपादाद्वेशीर्षेसप्तहस्तासोअस्य । त्रिधाबद्धोवृषभोरोरवीतिमहोदेवोमर्त्यांआ

 विवेश । चत्वारिशृंगेतिवेदावाएतउक्तास्त्रयोऽस्यपादाइतिसवनानित्रीणिद्वेशीर्षेप्रायणीयोदयनीयेसप्तहस्तासःसप्तछं
 दांसित्रिधाबद्धस्त्रेधा बद्धोमंत्रब्राह्मणकल्पैर्वृषभोरोरवीतिरोरवणमस्यसवनक्रमेणऋग्भिर्यजुर्भिःसामभिर्यदेनमृग्भिः
शंसंतियजुर्भिर्यजंति सामभिःस्तुवंतिमहोदेवइत्येषहिमहान्देवोयद्यज्ञोमर्त्याँआविवेशेत्येषहिमनुष्यानाविशतियजना
यतस्योत्तराभूयसेनिर्वचनाय ॥ ७ ॥ स्वर्यंतोनापेक्षंतआद्यांरोहंतिरोदसी । यज्ञंयेविश्वतोधारंसुविद्वांसोवितेनिरे ।
स्वर्गच्छंतईजानावानेक्षंतेतेऽमुमेवलोकँगतवंतमीक्षंतमिति । आद्यांरोहंतिरोदसी । यज्ञंयेविश्वतोधारंसर्वतोधारँ
सुविद्वांसोवितेनिरइत्यथैषावाचःप्रवह्लितेव ॥ ८ ॥ चत्वारिवाक्परिमितापदानितानिविदुर्ब्राह्मणायेमनीषिणः ।
गुहात्रीणिनिहितानेंगयंतितुरीयंवाचोमनुष्यावदंति । चत्वारिवाचःपरिमितानिपदानितानिविदुर्ब्राह्मणायेमेधावि
नोगुहायांत्रीणिनिहितानिनार्थवेदयंतेगुहागूहतेस्तुरीयंत्वरतेःकतमानितानिचत्वारिपदान्योंकारोमहाव्याहृतयश्चेत्या
र्षंनामाख्यातेचोपसर्गनिपाताश्चेतिवैयाकरणामंत्रःकल्पोब्राह्मणंचतुर्थीव्यावहारिकीतियाज्ञिकाऋचोयजूंषिसामानि
चतुर्थीव्यावहारिकीतिनैरुक्ताःसर्पाणांवाग्वयसांक्षुद्रस्यसरीसृपस्यचतुर्थीव्यावहारिकीत्येकेपशुषुतूणवेषुमृगेष्वात्मनि
चेत्यात्मप्रवादाअथापिब्राह्मणंभवति सावैवाक्सृष्टाचतुर्धाव्यभवदेष्वेवलोकेषुत्रीणिपशुषुतुरीयंयापृथिव्यांसाग्नौसार
थंतरेयांतरिक्षेसावायौसावामदेव्येयादिविसादित्येसाबृहतिसास्तनयित्नावथपशुषुततोयावागत्यरिच्यततांब्राह्मणेष्व

दधुंस्तस्माद्ब्राह्मणाउभयींवाचंवदंतियाचदेवानांयाचमनुष्याणामित्यथैषाक्षरस्य ॥ ९ ॥ ऋचोअक्षरेंपरमेव्योंम
न्यास्मिन्देवाअधिविश्वेंनिषेदुः । यस्तन्नवेदकिमृचाकरिष्यतिइयत्तद्विदुस्तइमेसमासते । ऋचोअक्षरेपरमेव्यवनेय
स्मिन्देवाअधिनिषण्णाःसर्वेयस्तन्नवेदकिंसऋचाकरिष्यतियइत्तद्विदुस्तइमेसमासतइतिविदुषउपदिशतिकतमत्तदेतद
क्षरमो३मित्येषावागितिशाकपूणिर्ऋचश्चह्यक्षरेपरमेव्यवनेधीयंतेनानादेवतेषुचमंत्रेष्वेतद्धवाएतदक्षरंयत्सर्वांत्रयींवि
द्यांप्रतिप्रतीतिचब्राह्मणं ॥ १० ॥ आदित्यइतिपुत्रःशाकपूणेरेषर्ग्भवतियदेनमर्चंतिप्रत्यृचःसर्वाणिभूतानितस्ययद
न्यन्मंत्रेभ्यस्तदक्षरंभवतिरश्मयोऽत्रदेवाउच्यंतेयएतस्मिन्नधिनिषण्णाइत्यधिदैवतमथाध्यात्मंशरीरमत्रऋगुच्यतेयदे
नेनार्चंतिप्रत्यृचःसर्वाणींद्रियाणितस्ययदविनाशिधर्मंतदक्षरंभवतींद्रियाण्यत्रदेवाउच्यन्तेयान्यस्मिन्नात्मन्येकंभव
न्तीत्यात्मप्रवादाः ॥ ११ ॥ अक्षरंनक्षरतिनक्षीयतेवाक्षरंभवतिवाचोऽक्षइतिवाक्षोयानस्यांजनात्तत्प्रकृतीतरद्वर्तन
सामान्यादित्ययंमंत्रार्थचिंताभ्यूहोऽभ्यूढोऽपिश्रुतितोपितर्कतोनतुपृथक्त्वेनमंत्रानिर्वक्तव्याःप्रकरणशएवतुनिर्वक्त
व्यानह्येषुप्रत्यक्षमस्त्यनृषेरतपसोवापारोवर्यवित्सुतुखलुवेदितृषुभूयोविद्यःप्रशस्योभवतीत्युक्तंपुरस्तान्मनुष्यावाऋषि
षूत्क्रामत्सुदेवानब्रुवन्कोनऋषिर्भविष्यतीतितेभ्यएतंतर्कमृषिंप्रायच्छन्मंत्रार्थचिन्ताभ्यूहमभ्यूढंतस्माद्यदेवकिंचानू
चानोऽभ्यूहंत्यार्षंतद्भवति ॥ १२ ॥ हृदातष्टेषुमनसोजवेषुयद्ब्राह्मणाःसंयजंतेसखायः । अत्राहत्वंविजहुर्वेद्याभिरो

हंब्रह्माणोविचंरंत्युत्वे । हृदातष्टेषुमनसांप्रजवेषुयद्ब्राह्मणाःसंयजंतेसमानाख्यानाऋत्विजोऽत्राहत्वंविजहुर्वेद्याभिर्वे
दितव्याभिःप्रवृत्तिभिरोहब्रह्माणऊहब्रह्माणंऊहएषांब्रह्मेतिवांसेयंविद्याश्रुतिमतिबुद्धिस्तस्यास्तपसापारमीप्सितव्यंत
दिदमायुरिच्छतानिर्वक्तव्यंतस्माच्छन्दःसुशेषाउपेक्षितव्यांअथागमोयांयांदेवतांनिराहंतस्यास्तस्यास्ताद्भाव्यमनुभव
त्यनुभवति ॥ १३ ॥ (अथेमायद्यावोयदुदंचोविहिसोतोंःसृण्येवतरत्सचत्वारिशृंगांस्वर्यंतश्चत्वारिवागृचोअक्षरंआ
दित्यइत्यक्षरंनक्षरतिंहृदातष्टेषुत्रयोदशं) ॥ इतिनिरुक्तउत्तरषट्केसप्तमोऽध्यायः ॥ ७ ॥ ॥ ॥ ॥

ॐ ॥ व्याख्यातंदैवतंयज्ञांगंचांथातऊर्ध्वमार्गगतिंव्याख्यास्यामंःसूर्यआत्मेत्युदितस्यहिकर्मद्रष्टांऽथैतदनुप्रवदं
त्यथैतंमहांतमात्मानंमेषर्ग्गणःप्रवदंतींद्रंमित्रंवरुणमग्निमाहुरित्यथैषमहानात्मात्मजिज्ञासयात्मानंप्रोवाचांग्निरस्मिज
न्मनाजातवेदांअहमस्मिप्रथमजाइत्येताभ्यां ॥ १ ॥ अग्निरंस्मिजन्मंनाजातवेंदाघृतंमेचक्षुंरमृतंमआसन् । अर्कस्त्रि
धातूरजंसोविमानोऽजंस्रोघर्मोंहुविरंस्मिनामं । अहमंस्मिप्रथमजाऋतस्यपूर्वंदेवेभ्योंअमृतंस्यनाभिंः । योमाददांति
सइद्देवमावांअहमन्नमन्नंमदंतंमद्मि । इतिसहज्ञात्वाप्रादुर्बभूवैवंतंव्याजहारायतमात्मानंमभ्यात्मजमंतिकमन्यस्मा
आचचक्ष्वेति ॥२॥ अपंश्यंगोपामनिंपद्यमानमाचपरांचपथिभिश्चरंतं । ससध्रीचीःसविषूचीर्वसांनआवंरीवर्तिभुवंने
ष्वंतः । आवरीवर्तिभुवनेष्वंतरित्यथैषमहानात्मासत्वलक्षणंस्तत्परंतद्ब्रह्मंतत्सत्यंतत्सलिलंतदव्यक्तंतदस्पर्शंतदरूपंतदर
॥ ३४ ॥

सँतदगंधंतदमृतँतच्छुक्लंतन्निष्ठोभूतात्मांसैषाभूतप्रकृतिरित्येकैंतत्क्षेत्रंतदज्ञानांत्क्षेत्रज्ञमनुप्राप्यनिशात्मजमंथैषमहाना
त्मात्रिविधोभवतिंसत्वंरजस्तमइतिंसत्वंतुमध्येविशुद्धंतिष्ठत्यंभितोरजस्तमसीइतिंकामद्वेषस्तमइत्यविज्ञातस्यंविशुध्य
तोविभूतिंकुर्वतंःक्षेत्रज्ञपृथक्त्वायकल्पतेंप्रतिभातिलिंगोमहानात्मांतमोलिंगोविद्याप्रकाशलिंगंस्तमोऽपिनिश्चयलिंग
आकाशः ॥ ३ ॥ आकाशगुणःशब्दंआकाशाद्वायुर्द्विगुणःस्पर्शेनंवायोज्योतिस्त्रिगुणंरूपेणंज्योतिषआपश्चतुर्गुणा
रसेनांद्भ्यःपृथिवीपंचगुणागंधेनंपृथिव्याभूतग्रामस्थावरजंगमांस्तदेतदहर्युगसहस्रंजागर्तितस्यान्तेसुषुप्स्यन्नंगानिप्रत्या
हरतिंभूतग्रामाःपृथिवीमपियंतिंपृथिव्यपआपोज्योतिषंज्योतिर्वायुंवायुराकाशंमाकाशोमनोमनोविद्यांविद्यामहांतमा
त्मानंमहानात्माप्रतिभांप्रतिभाप्रकृतिंसास्वपितियुगसहस्रंरात्रिस्तावेतावहोरात्रावजस्रंपरिवर्तेतेंसकालस्तदेतदहर्भव
तिंयुगसहस्रपर्यन्तंमहर्यद्ब्रह्मणोविदूंरात्रिंयुगसहस्रांतांतेऽहोरात्रविदोजनाइति ॥ ४ ॥ तंपरिवर्तमानमन्योऽनु
प्रवर्ततेंस्रष्टाद्रष्टाविभक्तार्तिमात्रोऽहमितिगम्यतेंसमिथ्यादर्शनेदंपावकंमहाभूतेषुचिरोण्वाकाशांद्वायोःप्राणश्चक्षुश्चव
कारंचंतेजसोऽद्भ्यःस्नेहंपृथिव्यामूर्तिंःपार्थिवांस्त्वष्टौगुणान्विद्यांत्रीन्मातृतस्त्रीन्पितृतौंस्थिस्नायुमज्जानःपितृतंस्त्व
ङ्मांसशोणितानिमातृतोंऽन्नपानमित्यष्टौंसोऽयंपुरुषःसर्वमयंःसर्वज्ञानोऽपिक्लृप्तः ॥ ५ ॥ सयद्यनुरुध्यतेतद्भवतिंयदिध
र्मोऽनुरुध्यतेतद्देवोभवतिंयदिज्ञानमनुरुध्यतेतदमृतोभवतिंयदिकाममनुरुध्यतेसंच्यवतंइमांयोनिंसंदध्यांत्तदिदमत्र

मतंश्लेष्मारेतसःसंभवतिश्लेष्मणोरसोरसाच्छोणितंशोणितान्मांसंमांसान्मेदोमेदसःस्नावास्नाव्नोऽस्थीन्यस्थिभ्योम
ज्जामज्जातोरेतस्तदिदंयोनौरेतःसिक्तंपुरुषःसंभवतिशुक्रातिरेकेपुमान्भवतिशोणितातिरेकेस्त्रीभवतिद्वाभ्यांसमेननपुं
सकोभवतिशुक्रभिन्नेनयमोभवतिशुक्रशोणितसंयोगान्मातृपितृसंयोगाच्चतत्कथमिदंशरीरंपरंसंयम्यतेसौम्योभवत्ये
करात्रोषितंकललंभवतिपंचरात्राद्बुद्बुदाःसप्तरात्रात्पेशीद्विःसप्तरात्रादर्बुदःपंचविंशतिरात्रःस्वस्थितोघनोभवतिमास
मात्रात्कठिनोभवतिद्विमासाभ्यंतरेशिरःसंपद्यतेमासत्रयेणग्रीवाव्यादेशोमासचतुष्केणत्वग्व्यादेशःपंचमेमासेनखरो
मव्यादेशःषष्ठेमुखनासिकाऽक्षिश्रोत्रंचसंभवतिसप्तमेचलनसमर्थोभवत्यष्टमेबुद्ध्याध्यवस्यतिनवमेसर्वांगसंपूर्णोभवति ।
मृतश्चाहंपुनर्जातोजातश्चाहंपुनर्मृतः । नानायोनिसहस्राणिमयोषितानियानिवै । आहाराविविधाभुक्ताःपीतानां
नाविधाःस्तनाः । मातरोविविधादृष्टाःपितरःसुहृदस्तथा । अवाङ्मुखःपीड्यमानोजंतुश्चैवसमन्वितः । सांख्यं
योगंसमभ्यस्येत्पुरुषंवापंचविंशकमिति ततश्चदशमेमासेप्रजायतेजातश्चवायुनास्पृष्टस्तन्नस्मरतिजन्ममरणंमंतेचशु
भाशुभंकर्मैतच्छरीरस्यप्रामाण्यं ॥ ६ ॥ अष्टोत्तरंसन्धिशतंमष्टाकपालंशिरःसंपद्यतेषोडशवपापलानिनवस्नायु
शतानिसप्तशतंपुरुषस्यमर्मणामर्धचतस्रोरोमाणिकोट्योहृदयंह्यष्टकपालानिद्वादशकपालानिजिह्वावृषणौह्यष्टसुपर्णौत
थोपस्थगुदपाय्वेतन्मूत्रपुरीषंकस्मादाहारपानसिक्तत्वादनुपचितकर्मणावन्योन्यंजायेतेइतितंविद्याकर्मणीसमन्वार

भेतेंपूवप्रज्ञाचमहत्यज्ञानतमसिमग्नौंजरामरणक्षुत्पिपासांशोकक्रोधलोभमोहंमदभयमत्सरंहर्षविषादे ष्यांसूयात्मकैर्द्व
द्वैरभिभूयमानंःसोऽस्मादार्जवंजवीभावानांतन्निर्मुच्यतेंसोऽस्मापान्नंमहाभूमिकावच्छरीरांन्निमेषमात्रैःप्रक्रम्यंप्रकृति
रधिपरीत्यंतैजसंशरीरंकृत्वांकर्मणोऽनुरूपंफलमनुभूयंतस्यसंक्षयेपुनरिमंलोकंप्रतिपद्यते ॥ ७ ॥ अथयेहिंसामा
श्रित्यंविद्यामुत्सृज्यमहत्तपस्तेपिरेंचिरेणवेदोक्तानिवाकर्माणिकुर्वन्तितेधूममभिसंभवंतिंधूमाद्रात्रिंरात्रेरपक्षीयमाणप
क्षंमपक्षीयमाणपक्षाद्दक्षिणायनंदक्षिणायनात्पितृलोकंपितृलोकाच्चंद्रमसंचंद्रमसोवायुंवायोर्वृष्टिंवृष्टेरोषधयश्चैतद्भूत्वां
तस्यसंक्षयेपुनरेवेमंलोकंप्रतिपद्यते ॥ ८ ॥ अथयेहिंसामुत्सृज्यंविद्यामाश्रित्यंमहत्तपस्तेपिरेंज्ञानोक्तानिवाकर्माणि
कुर्वंतितेऽर्चिरभिसंभवंत्यर्चिषोऽहरह्नआपूर्यमाणपक्षंमापूर्यमाणपक्षादुदगयनंमुदगयनाद्देवलोकंदेवलोकादादित्यंमा
दित्याद्वैद्युतंवैद्युतान्मानसंमानसःपुरुषोभूत्वांब्रह्मलोकमभिसंभवन्तितेनपुनरावर्तंतेशिष्टादंदशूकांयतइदंनजानन्ति
तस्मादिदंवेदितव्यमथाप्याह ॥ ९ ॥ नतंविदाथयइमाजजानान्यद्युष्माकमंतरंबभूव । नीहारेणप्रावृताजल्प्यां
चासुतृपंउक्थशासंश्चरंति । नतंविद्ययाविदुषोंयमेवंविद्वांसोवदंत्यक्षरंब्रह्मणस्पतिंमन्यद्युष्माकमंतरंमन्यदेषामंतरं
बभूवेतिंनीहारेणप्रावृतास्तमसाजल्प्याचांसुतृपउक्थशासःप्राणंसूर्यंयत्पथगामिनश्चरंत्यविद्वांसंःक्षेत्रज्ञमनुप्रवदंत्यथ।
होविद्वांसंःक्षेत्रज्ञोऽनुकल्पतेंतस्यतपसासहाप्रमादमेत्यथास्यव्योभवतितेनासंततमिच्छेत्तेनसख्यमिच्छेद्देषहिसखाश्रे

ष्ठः संजानातिंभूतंभवद्भविष्यदितिंज्ञाताकस्माज्जायतेंसखाकस्मात्सख्यतेसहभूतेंद्रियैःशेरतेंमहाभूतानिसेंद्रियाणिप्र
ज्ञयाकर्मकारयतीतिंतस्ययदापःप्रतिष्ठाशीलंमुपशमआत्माब्रह्मेतिंसब्रह्मभूतोभवतिंसाक्षिमात्रोव्यवतिष्ठतेंऽबंधोज्ञान
कृतोऽथात्मनोमहतंःप्रथमंभूतनामधेयान्यनुक्रमिष्यामंः ॥ १० ॥ हंसः । घर्मः । यज्ञः । वेनः । मेधः । कृमिंः ।
भूमिंः । विभुः । प्रभुः । शंभुः । राभुः । वधकर्मा । सोमंः । भूतं । भुवंनं । भविष्यत् । आपंः । महत् ।
व्योंम । यशंः । महंः । स्वर्णीकं । स्वृतींकं । स्मृतींकं । सतींकं । सतीनं । गहंनं । गभीरं । गह्वरं । कं । अन्नं ।
हविः । सद्मं । सदंनं । ऋतं । योनिंः । ऋतस्ययोनिंः । सत्यं । नीरं । हविः । रयिः । सत् । पूर्णं । सर्वं ।
अक्षितं । बर्हिः । नामं । सर्पिः । अपः । पवित्रं । अमृतं । इंदुंः । हेम । स्वंः । सर्गाः । शम्बरं । अम्बरं ।
वियत् । व्योंम । बर्हिः । धन्वं । अंतरिंक्षं । आकाशं । आपंः । पृथिवी । भूः । स्वयंभूः । अध्वा । पुष्करं ।
सगंरः । समुद्रः । तपंः । तेजंः । सिंधुः । अर्णवः । नाभिंः । वृक्षः । ऊर्ध्वः । तत् । यत् । किं । ब्रह्म । वरें-
ण्यं । हंसः । आत्मा । भवंति । वधंत्यंध्वानं । यद्वाहिंष्या । शरीराणि । अव्ययंचसंकुरुते । यज्ञः । आत्मा ।
भवंति । यदेनंतन्वतेऽथैतंमहांतमात्मानंमेतानिसूक्तान्येताऋचोऽनुप्रवदंति ॥ ११ ॥ सोमंःपवतेजनितामंतीनांज
नितादिवोजंनितापृथिव्याः । जनिताग्नेर्जंनितासूर्यस्यजनितेंद्रस्यजनितोतविष्णोः । सोमःपवतेसोमःसूर्यःप्रसवना

ज्जनितामतीनाँप्रकाशकर्मणामादित्यरश्मीनाँदिवोद्योतनकर्मणामादित्यरश्मीनाँपृथिव्याःप्रथनकर्मणामादित्यरश्मी
नांमग्नेर्गतिकर्मणामादित्यरश्मीनाँसूर्यस्यस्वीकरणकर्मणामादित्यरश्मीनांमिंद्रस्यैश्वर्यकर्मणामादित्यरश्मीनांविष्णो
र्व्याप्तिकर्मणामादित्यरश्मीनांमित्यधिदैवतमथाध्यात्मँसोमआत्माप्येतस्मादेवेंद्रियाणांजनितेत्यर्थः । अपिवासर्वाभि
र्विभूतिभिर्विभूततआत्मेत्यात्मगतिमाचष्टे॥१२॥ ब्रह्मादेवानांपदवीःकवीनामृषिर्विप्राणांमहिषोमृगाणाँ । श्येनोगृध्रा
णांस्वधितिर्वनानांसोमःपवित्रमत्येतिरेभन्। ब्रह्मादेवानामित्येषहिब्रह्माभवतिदेवानांदेवनकर्मणामादित्यरश्मीनांपद
वीःकवीनामित्येषहिपदंवेत्तिकवीनांकवीयमानानामादित्यरश्मीनांमृषिर्विप्राणामित्येषहिऋषिणोभवतिविप्राणांव्या
पनकर्मणामादित्यरश्मीनाँमहिषोमृगाणामित्येषहिमहान्भवतिमृगाणांमार्गणकर्मणामादित्यरश्मीनाँश्येनोगृध्राणामि
तिश्येनआदित्योभवतिश्यायतेर्गतिकर्मणोगृध्रआदित्योभवतिगृध्यतेःस्थानकर्मणोयतएतस्मिंस्तिष्ठतिस्वधितिर्वना
नामित्येषहिस्वयंकर्माण्यादित्योधत्तेवनानांवननकर्मणामादित्यरश्मीनाँसोमःपवित्रमत्येतिरेभन्नित्येषहिपवित्रंरश्मी
नांमत्येतिस्तूयमानएषएवैतंत्सर्वमक्षरमित्यधिदैवतमथाध्यात्मंब्रह्मादेवानामित्ययमपिब्रह्माभवतिदेवानांदेवनकर्म
णामिंद्रियाणाँपदवीःकवीनामित्ययमपिपदंवेत्तिकवीनांकवीयमानानामिंद्रियाणांमृषिर्विप्राणामित्ययमप्यृषिणोभव
तिविप्राणांव्यापनकर्मणामिंद्रियाणाँमहिषोमृगाणामित्ययमपिमहान्भवतिमृगाणांमार्गणकर्मणामिंद्रियाणांश्येनोगृ

 ध्राणामितिश्येनआत्माभवतिश्यायतेर्ज्ञानकर्मणोगृध्राणीन्द्रियाणिगृध्यतेर्ज्ञानकर्मणोयतएतस्मिंस्तिष्ठतिस्वधितिर्वना
नामित्ययमपिस्वयंकर्माण्यात्मनिधत्तेवनानांवननकर्मणामिंद्रियाणांसोमःपवित्रमत्येतिरेभन्नित्ययमपिपवित्रामिंद्रि
 याण्यत्येतिस्तूयमानोऽयमेवैतत्सर्वमनुभवत्यात्मगतिमाचष्टे ॥ १३ ॥ तिस्रोवाचईरयतिप्रवह्निर्ऋतस्यधीतिंब्रह्मणो
मनीषां । गावोयंतिगोपतिंपृच्छमानाःसोमंयंतिमतयोवावशानाः । वह्निरादित्योभवतिसतिस्रोवाचःप्रेरयत्यृचोयजूं
षिसामान्यृतस्यादित्यस्यकर्माणिब्रह्मणोमतान्येषएवैतत्सर्वमक्षरमित्यधिदैवतमथाध्यात्मंवह्निरात्माभवतिसतिस्रोवा
चईरथतिप्रेरयतिविद्यामतिबुद्धिमतामृतस्यात्मनःकर्माणिब्रह्मणोमतान्ययमेवैतत्सर्वमनुभवत्यात्मगतिमाचष्टे ॥१४॥
सोमंगावोधेनवोवावशानाःसोमंविप्रामतिभिःपृच्छमानाः । सोमःसुतःपूयतेअज्यमानःसोमेअर्कास्त्रिष्टुभःसंनवंते ।
एतएवसोमंगावोधेनवोरश्मयोवावश्यमानाःकामयमानाआदित्यंयंत्येवमेवसोमंविप्रारश्मयोमतिभिःपृच्छमानाःका
मयमानाआदित्यंयंत्येवमेवसोमःसुतःपूयतेअज्यमानएतमेवार्काश्चत्रिष्टुभश्चसन्नवंतेततएतस्मिन्नादित्यएकंभवंतीत्य
धिदैवतमथाध्यात्ममेतएवसोमंगावोधेनवइंद्रियाणिवावश्यमानानिकामयमानान्यात्मानंयंत्येवमेवसोमंविप्राइंद्रिया
णिमतिभिःपृच्छमानानिकामयमानान्यात्मानंयंत्येवमेवसोमःसुतःपूयतेअज्यमानइममेवात्माचसप्तऋषयश्चसंनवंते
तान्येतस्मिन्नात्मन्येकंभवंतीत्यात्मगतिमाचष्टे ॥ १५ ॥ अक्रान्त्समुद्रःप्रथमेविधर्मञ्जनयन्प्रजाभुवनस्यराजा ।

वृषापवित्रेअधिसानोअव्यैबृहत्सोमोवावृधेसुवानइंदुः । अत्यक्रमीत्समुद्रआदित्यःपरमेव्यवनेवर्षकर्मणाजनयन्प्र
जांभुवनस्यराजासर्वस्यराजावृषापवित्रेअधिसानोअव्यैबृहत्सोमोवावृधेसुवानइंदुरित्यधिदैवतमथाध्यात्ममत्यक्रमी
त्समुद्रआत्मापरमेव्यवनेज्ञानकर्मणाजनयन्प्रजांभुवनस्यराजासर्वस्यराजावृषापवित्रेअधिसानोअव्यैबृहत्सोमोवावृधे
सुवानइंदुरित्यात्मगतिमाचष्टे ॥ १६ ॥ महत्तत्सोमोमहिषश्चकारापांयद्गर्भोऽवृणीतदेवान् । अदधादिंद्रेपवमान
ओजोऽजनयत्सूर्येज्योतिरिंदुः । महत्तत्सोमोमहिषश्चकारापांयद्गर्भोऽवृणीतदेवानाधिपत्यमदधादिंद्रेपवमानओजो
ऽजनयत्सूर्येज्योतिरिंदुरादित्यइंदुरात्मा ॥ १७ ॥ विधुंदद्राणंसमनेबहूनांयुवानंसंतंपलितोजगार । देवस्यपश्यका
व्यंमहित्वाद्यामुमारसह्यःसमान । विधुंविधमनशीलंदद्राणंदमनशीलंयुवानंचंद्रमसंपलितआदित्योगिरतिसद्योम्रि
यतेसदिवासमुदितेत्यधिदैवतमथाध्यात्मंविधुंविधमनशीलंदद्राणंदमनशीलंयुवानंमहांतंपलितआत्मागिरतिरात्रौ
म्रियतेरात्रिःसमुदितेत्यात्मगतिमाचष्टे ॥ १८ ॥ साकंजानांसप्तथमाहुरेकजंषळिद्यमाऽऋषयोदेवजाइति । तेषामि
ष्टानिविहितानिधामशःस्थात्रेरेजंतेविकृतानिरूपशः । सहजातानांषण्णामृषीणामादित्यरश्मयस्तेषामिष्टानिवाकांता
निवाक्रांतानिवागतानिवामतानिवानतानिवाद्भिःसहसंमोदंतेयत्रैतानिसप्तऋषीणानिज्योतींषितेभ्यःपरआदित्यस्ता
न्येतस्मिन्नेकंभवंतीत्यधिदैवतमथाध्यात्मंसहजातानांषण्णामिंद्रियाणामात्मासप्तमस्तेषामिष्टानिवाकांतानिवाक्रांता

निर्वाणतानिवामतानिवानतानिर्वाणेनसहसंमोदंतेयत्रेमानिसप्तऽऋषीणानींद्रियाण्येभ्यःपरआत्मातान्येतस्मिन्नेकंभ
वंतीत्यात्मगतिमाचष्टे ॥ १९ ॥ स्त्रियःसतीस्ताँउमेपुंसआहुःपश्यदक्षण्वान्नविचेतदंधः । कविर्यःपुत्रःसईमाचिकेत
यस्ताविजानात्सपितुष्पितासत् । स्त्रियएवैतिताःशब्दस्पर्शरूपरसगंधहारिण्यस्ताअमुंपुंशब्देनिराहारःप्राणइतिपश्य
न्कष्टान्नविजानात्यंधःकविर्यःपुत्रःसइमाजानातियःसइमाजानातिसपितुष्पितासदित्यात्मगतिमाचष्टे ॥ २० ॥ सप्ता
र्धगर्भाभुवनस्यरेतोविष्णोस्तिष्ठंतिप्रदिशाविधर्मणि । तेधीतिभिर्मनसातेविपश्चितःपरिभुवःपरिभवंतिविश्वतः ।
सप्तैतानादित्यरश्मीनयमादित्योगिरतिमध्यस्थानोर्ध्वशब्दोयतएतस्मिंस्तिष्ठंतितानिधीतिभिश्चमनसाचविपर्ययंतिप
रिभुवःपरिभवंतिसर्वाणिकर्माणिवर्षकर्मणेत्यधिदैवतमथाध्यात्मंसप्तेमानींद्रियाण्ययमात्मागिरतिमध्यस्थानोर्ध्वशब्दो
यान्यस्मिंस्तिष्ठंतितानिधीतिभिश्चमनसाचविपर्ययंतिपरिभुवःपरिभवंतिसर्वाणींद्रियाणिज्ञानकर्मणेत्यात्मगतिमाचष्टे
॥२१॥ नविजानामियदिवेदमस्मिनिण्यःसन्नद्धोमनसाचरामि । नहिविजानान्बुद्धिमतःपुत्रःपरिवेदयंतेऽयमादित्योऽ
यमात्मा ॥२२॥ अपाङ्प्राङेतिस्वधयागृभीतोऽमर्त्योमर्त्येनासयोनिः । ताशश्वंताविषूचीनावियंतान्य१न्यंचिक्युर्ननि
चिक्युरन्यं । अपांचयतिप्रांचयतिस्वधयागृभीतोऽमर्त्यआदित्योमर्त्येनंचंद्रमसासहतौशश्वद्गामिनौविश्वगामिनौबहु
गामिनौवापश्यत्यादित्यंचंद्रमसमित्यधिदैवतमथाध्यात्ममपांचयतिप्रांचयतिस्वधयागृभीतोऽमर्त्यआत्मामर्त्येनंमन

सासहंतौशश्वद्वामिनौविश्वगामिनौबहुगामिनौवांपश्यत्यात्मानंनमनईत्यात्मगतिमाचष्टे ॥ २३ ॥ तदिदासभुवने
षुज्येष्ठंयतोजज्ञउग्रस्त्वेषनृम्णः । सद्योजज्ञानोनिरिणातिशत्रूननुयंविश्वेमदंत्यूमाः । तद्भवतिभूतेषुभुवनेषुज्येष्ठमा
दित्यंयतोजज्ञउग्रस्त्वेषनृम्णोदीप्तिनृम्णःसद्योजज्ञानोनिरिणातिशत्रूनितिरिणातिःप्रीतिकर्मादीप्तिकर्मावानुमदन्तियं
विश्वऊमाइत्यधिदैवतमथाध्यात्मंतद्भवतिभूतेषुभुवनेषुज्येष्ठमव्यक्तंतपोजायतउग्रस्त्वेषनृम्णोज्ञाननृम्णःसद्योजज्ञा
नोनिरिणातिशत्रूनितिरिणातिःप्रीतिकर्मादीप्तिकर्मावानुमदन्तियंसर्वऊमाइत्यात्मगतिमाचष्टे ॥ २४ ॥ कोअद्ययुं
क्तेधुरिगाऋतस्यशिमीवतोभामिनोदुर्हृणायून् । आसन्निषून्हृत्स्वसोमयोभून्यएषांभृत्यामृणधत्सजीवात् । कआदित्यो
धुरिगायुंक्तेरश्मीन्कर्मवतोभानुमतोदुराधर्षानसून्यसुनवंतीषुनिषुणवंतिमयोभूनिसुखभूनियइमंसंभृतंवेदकथंसजीव
तीत्यधिदैवतमथाध्यात्मंकआत्माधुरिगायुंक्तइन्द्रियाणिकर्मवतोभानुमतोदुराधर्षानसून्यसुनवंतीषूनिषुणवंतिमयो
भूनिसुखभूनियइमंसंभृतंवेदचिरंजीवतीत्यात्मगतिमाचष्टे ॥ २५ ॥ कईषतेतुज्यतेकोबिभायकोमंसतेसंतमिंद्रंको
अंति । कस्तोकायकइभायोतरायेऽधिब्रवत्तन्वेकोजनाय । कएवगच्छतिकोददातिकोबिभेतिकोमंसतेसंतमिंद्रंक
स्तोकायापत्यायमहतेचनोरणायरमणीयायचदर्शनीयाय ॥ २६ ॥ कोअग्निमीट्टेहविषाघृतेनस्रुचायजातात्रृतुभिर्ध्रु
वेभिः । कस्मैदेवाआवहनाशुहोमकोमंसतेवीतिहोत्रःसुदेवः । कआदित्यंपूरयतिहविषाचघृतेनचस्रुचायजाताऋतु

शि. चे. १६

भिर्ध्रुवेभिरिरितिंकस्मैदेवाआवहानाशुहोमार्थीन्कोमंसतेवीतिहोत्रःसुदेवंःकल्याणदेवइत्यधिदैवतमथाध्यात्मंकआत्मा
॥ ३९ ॥ नंपूरयतिंहविषाचघृतेनचंस्रुचायजाताऋतुभिर्ध्रुवेभिरिरितिंकस्मैदेवाआवहानाशुहोमार्थीन्कोमंसतेवीतिहोत्रःसुप्रज्ञंःक
ल्याणप्रज्ञइत्यात्मगतिमाचष्टे ॥ २७ ॥ त्वमंगप्रसंसिषोदेवःशंविष्ठमर्त्यं । नत्वदन्योमंघवन्नस्तिमर्डितेन्द्रब्रवीमि
तेवचंः । त्वमङ्गप्रशंसींदेवःशविष्ठमर्त्यंनत्वदन्योऽस्तिमघवंन्पातावापालयितावाजेतावासुखयितावेंन्द्रब्रवीमितेवचः
स्तुतियुक्तं ॥ २८ ॥ हंसःशुंचिषद्वसुरन्तरिक्षसद्धोतांवेदिषदतिंथिर्दुरोणसत् । नृषद्वरसदृतसद्व्योमसदब्जागोजा
ऋतजाअंद्रिजाऋतं । हंसइतिहंसाःसूर्यरश्मयंःपरमात्मापरंज्योतिंःपृथिवीव्याप्तेतिव्याप्तंसर्वंव्याप्तंवननकर्मणान
भ्यासेनादित्यमंडलेंनेतित्ययतीतिलोकोत्ययतीतिंहंसयंत्ययतीतिंहंसाःपरमहंसाःपरमात्मासूर्यरश्मिभिंःप्रभूतगभीरव
सतीतिंत्रिभिर्वसतीतिवांरश्मिर्वसतीतिवांवह्निर्वसतीतिवांसुवर्णरेताःपूषागर्भोंरिभेतिरिभंतांवनकुटिलानिंकुटंतारि
भंतांतरिक्षाचरत्पथांतरिक्षाचरदितिंदिविभुविगमनंवासुभानुंःसुप्रभूतोहोतादित्यस्यगताभवंत्यंतिथिर्दुरोणसंत्सर्वेंदु
रोणसंद्रवंसर्वैरसाविकर्षयतिंरश्मिर्विकर्षयतिंवह्निर्विकर्षयतिंवननंभवत्यंश्वगोजाअद्रिगोजाधरित्रिगोजांःसर्वेंगोजा ॥ ३९ ॥
ऋतजाबहुशब्दाभवंतिंनिगमोनिगमव्यतिभर्वत्यृषेनिर्वचनाय ॥ २९ ॥ द्वासुंपर्णासयुजासखांयासमानंवृक्षंपरिंष
स्वजाते । तयोंरन्यःपिप्पंलंस्वाद्वत्त्यनंश्नन्नन्योअभिचांकशीति । द्वौद्वौप्रतिष्ठितौंसुकृतौधर्मकर्तारौंदुष्कृतंपापंपरि

सारकमित्याचक्षतेसुपर्णासयुजासखायैत्यात्मानंदुरात्मानंपरमात्मानंप्रत्युत्तिष्ठतिशरीरएवतज्जायतेवृक्षंरक्षशरीरंवृक्षं
पक्षौप्रतिष्ठापयतितयोरन्यद्भुक्त्वान्नमनश्नन्नन्यैसरूपतांसलोकतामश्नुतेयएवंवेदान्नमनश्नन्नन्योअभिचाकशीतीत्या
त्मगतिमाचष्टे ॥ ३० ॥ आयाहींद्रपथिभिरीळितेभिर्यज्ञमिमंनोभागधेयंजुषस्व । तृप्तांजहुर्मातुळस्येवयोषाभागस्ते
पैतृष्वसेयींवपामिव। आगमिष्यंतिशक्रोदेवतास्ताभिस्त्रिभिस्तीर्थैभिः शक्रप्रतरैरीळितेभिस्त्रिभिस्तीर्थैर्यज्ञमिमंनोयज्ञभागं
मग्नीषोमभागाविंद्रोजुषस्वतृप्तामेवंमातुळयोगकन्याभागंसभर्तृकेवंसायादेवतास्तास्तत्स्थानैशक्रंनिदर्शनं ॥ ३१ ॥ विप्रं
विप्रासोऽवसेदेवंमर्तासऊतये । अग्निंगीर्भिर्हवामहे । विप्रंविप्रासोऽवसेविदुर्वेदविंदतेवेदितव्यंविमलशरीरेणवायु
नांविप्रस्तुहृत्पद्मनिलयस्थितंमकारसंमितमुकारंपूरयेन्मकारनिलयंगतंविप्रंप्राणेषुबिंदुसिक्तंविकसितंवह्नितेजःप्रभंक
नकपद्मेष्वमृतशरीरममृतजातस्थितममृतवाचामृतमुखेवदंति । अग्निंगीर्भिर्हवामहे । अग्निंसंबोधयेदग्निःसर्वादेव
ताइतितस्योत्तराभूयसेनिर्वचनाय ॥ ३२ ॥ जातवेदसेसुनवामसोममरातीयतोनिदहातिवेदः । सनःपर्षदतिदुर्गा
णिविश्वानावेवसिंधुंदुरितात्यग्निः । जातवेदसइतिजातमिदंसर्वंसचराचरंस्थित्युत्पत्तिप्रलयन्यायेनाच्छायसुनवाम
सोममितिप्रसवेनाभिषवार्यसोमंराजानममृतमरातीयतोयज्ञार्थमितिस्नोनिश्चयेनिदहातिदहतिभस्मीकरोतिसोमोदद
दित्यर्थः सनःपर्षदतिदुर्गाणिदुर्गमनानिस्थानानिनावेवसिंधुंयथाकश्चित्कर्णधारोनावेवसिंधोःस्यंदनान्नदींजलदुर्गाम

हाकूलांतारयतिंदुरितात्यग्निरितिंदुरितानितारयतिंतस्यैषापराभवति ॥ २३ ॥ इदंतेऽन्याभिरसमानमद्भिर्याःका
श्चसिंधुंप्रवहंतिनद्यः । सर्पोजीर्णामिवत्वचंजहातिपापंसशिरस्कोऽभ्युपेत्य । इदंतेऽन्याभिरसमानाभिर्याःकाश्चसिंधुं
पतिंकृत्वानद्योवहंतिसर्पोजीर्णामिवसर्पस्त्वचंत्यजतिपापंत्यजंत्यापआप्नोतेंस्तासामेषाभवति ॥ २४ ॥ त्र्यंबकंयजा
महेसुगन्धिंपुष्टिवर्धनं । उर्वारुकमिवबन्धनान्मृत्योर्मुक्षीयमामृतात् । त्र्यंबकोरुद्रस्तंत्र्यंबकंयजामहेसुगंधिंसुगंधिंसु
ष्ठुगंधिंपुष्टिवर्धनंपुष्टिकारकमिवोर्वारुकमिवफलंबंधनादारोधनान्मृत्योःसकाशान्मुंचस्वमांकस्मादित्येषामितरेषाप
राभवति ॥ २५ ॥ शतंजीवशरदोवर्धमानःशतंहेमंतान्छतमुवसंतान् । शतामिंद्राग्नीसवितावृहस्पतिःशतायुषाह
विषेमंपुनर्दुः । शतंजीवशरदोवर्धमानइत्यपिनिगमोभवतिशतमितिशतंदीर्घमायुर्मरुतएनावर्धयंतिशतमेनमेवंशता
त्मानंभवतिशतमनंतंभवतिशतमैश्वर्यंभवतिशतमितिशतंदीर्घमायुः ॥ २६ ॥ मातेराधांसिमातऊतयोवसोऽस्मा
न्कदाचनादभन् । विश्वाचनउपमिमीहिमानुषवसूनिचर्षणिभ्यआ । माचतेधामानिमाचतेकदाचनःसरिषुःसर्वा
णिप्रज्ञानान्युपमानायमनुष्यहितोऽयमादित्योऽयमात्माथैतदनुप्रवदन्त्यथैतंमहान्तमात्मानमेषग्गणःप्रवदतिवैश्वक
र्मणोदेवानांनुवयंजानानासदासीन्नोसदासीत्तदानीमितिर्चसैषात्मजिज्ञासासैषासर्वभूतजिज्ञासाब्रह्मणःसारिष्टंसरूप
तांसलोकतांगमयतियएवंवेदनमोब्रह्मणेनमोमहतेभूतायनमःपारस्करायनमोयास्कायब्रह्मशुक्लमसीयब्रह्मशुक्लमसीय

॥ ३७ ॥ व्याख्यातमग्निरस्मिजन्मनापश्यंगोपामाकाशगुणंस्तंपरिवर्तमानंसयद्यनुरुध्यतेऽष्टोत्तरमथयेहिंसामाश्रित्यांथयेहिंसामुत्सृज्यंनतंहंसोघर्मःसोमःपवतेंब्रह्मादेवानांतिस्रोवाचईरयतिंसोमंगावोऽक्रान्महत्तत्सोमोंविधुंदद्राणंसाकंजानांस्त्रियःसतीःसप्तार्धगर्भानविजानाम्यपाङ्प्राङेतितदिदासकोअद्ययुंक्तेकईषतेकोअग्निमीट्टेत्वसंगहंसःशुचिषंद्वासुपर्णायाहींद्रंविप्रंविप्रासोजातवेदसंइदंतेऽन्याभिस्त्र्यंबकंशतंजीवमातेराधांसीतिसप्तत्रिंशत् ॥ ॥ इतिनिरुक्त उत्तरषट्केऽष्टमोऽध्यायः ॥ ८ ॥ ॥ ॥ ॥

॥ इतिनिरुक्तउत्तरषट्कःसमाप्तः ॥



श्रीः ॥ ॥ अथास्यनिरुक्तस्याखिलपुरुषार्थोपकारवृत्तिसमर्थस्यसंग्रहः ॥ यथा—नामाख्यातोपसर्गनिपातलक्षणम् १, भावविकारलक्षणम् २, नामान्याख्यातजानिसर्वाणिचयथोपन्यस्यपक्षप्रतिपक्षतोविचार्यावधारणम् ३, सर्वाण्याख्यातजानिकानिचिदेवानेकधातुजान्यपीतिमंत्राणामर्थवत्त्वानर्थवत्त्वेविचार्य शास्त्रारंभप्रयोजनद्वारेणार्थवत्तावधारणम् ४, पदविभागपरिज्ञानप्रतिज्ञानबोधावलंबिप्रदर्शनायआदिमध्यांतानेकदैवतलिंगसंकटेषुमंत्रेषुयाज्ञिकपरिज्ञानद्वारेणदेवतापरिज्ञानप्रतिज्ञा ५, अर्थज्ञप्रशंसा ६, अर्थज्ञानावधारणम् ७, वेदवेदांगव्यूहः ८, सप्रयोजननिघंटुसमाम्नायविरचनम् ९, प्रकरणत्रयविभागेननैघंटुकप्रधानदेवताभिधानप्रविभागलक्षणम् १०, निर्वचनलक्षणद्वारेण शब्दवृत्तिविषयोपदेशः ११, अर्थप्राधान्याल्लोपोपधाविकारवर्णलोपविपर्ययोपदेशेनसामर्थ्योपप्रदर्शनायादिमध्यांतलोपोपधाविकारवर्णलोपविपर्ययाद्यंतवर्णव्यापत्तिवर्णोपजनोदाहरणचिंता १२, अंतस्थांतर्धातुनिमित्तेनसंप्रसार्यासंप्रसार्योभयप्रकृतिधातुनिर्वचनोपदेशः १३, भाषिकप्रायोवृत्तिभ्योनैगमशब्दार्थप्रसिद्धिः १४, नैगमप्रायोवृत्तिभ्योभाषिकशब्दार्थप्रसिद्धिः १५, देशव्यवस्थयाशब्दरूपव्यपदेशः १६, तद्धितसमासनामनिर्वचनलक्षणम् १७, शिष्यलक्षणम् १८, विशेषेणव्याख्ययातत्त्वपर्यायभेदसंख्यासंदिग्धोदाहरणान्निर्वचनव्यवस्थयानामाख्यातोपसर्गनिपातानांविभागेननैघंटुकप्रकरणानुक्रमणम् १९, अनेकार्थानवगतसंस्कारानुक्रमणम् २०, परोक्षकृत


प्रत्यक्षकृताध्यात्मिकमंत्रलक्षणम् २१, स्तुत्याशीःशपथाभिशापाभिख्यापरिदेवनानिंदाप्रशंसादिभिर्मंत्राभिव्यक्ति हेतूपदेशः २२, निदानपरिज्ञानव्याख्यापनायानादिष्टदेवतोपपरीक्षणायाध्यात्मोपदेशप्रकृतिभूमत्वम् २३, इतरेत रजन्मत्वम् २४, स्थानत्रयभेदशस्तिसृणामेकैकस्यामाहाभाग्यकृतोऽनेकनामधेयप्रतिलंभः २५, पृथगभिधानंतूत्प त्तिसंबंधाद्वा २६, देवतानामाकारचिंतनम् २७, भक्तिसाहचर्यसंस्तवकर्मसूक्तभाक्त्वहविर्भाक्त्वव्यंजनभाक्त्वानि २८–३३, पृथिव्यंतरिक्षद्युस्थानदेवतानामभिधेयाभिधानव्युत्पत्तिप्राधान्यश्रुत्युदाहरणम् ३४, तन्निर्वचनविचा रोपपत्त्यवधारणानुक्रमेणव्याख्यायदैवतप्रकरणनिर्णयः ३५, विद्यापारप्राप्त्युपायोपदेशः ३६, मंत्रार्थनिर्वचन द्वारेणदेवताभिधाननिर्वचनफलंदेवताताद्भाव्यम् ३७, इत्येषसमासतोनिरुक्तशास्त्रचिंताविषयः ॥ तस्यैषागवाद्या देवपत्न्यंतापंचाध्यायीसूत्रसंग्रहः । साचपुनरियंसाक्षात्कृतधर्मभ्योमहर्षिभ्यउपदेशेनमंत्रार्थमुपश्रुत्यश्रुतर्षिभिरवर शक्तिदौर्बल्यमवेक्ष्यतदनुजिघृक्षयावाच्यार्थसामर्थ्यादभिधेयानुन्नीयमंत्रार्थावबोधायछंदोभ्यःसमाहृत्यसमाहृत्यसमा म्नाता । सैषाछंदोवयवभूताछंदोधर्मिण्येवयथायथापन्नस्तागौर्गोधर्माइति ॥ ॥ ॥

इदं पुस्तकं पणशीकरोपाह्वलक्ष्मणशर्मतनुजनुषा वासुदेवशर्मणा संस्कृतं तच्च पाण्डुरङ्ग जावजी इत्येतैः स्वीये "निर्णयसागराख्य" मुद्रणालये मुद्रयित्वा प्रकाशितम् । शके १८५५, सन १९३४.

॥ इतिनिरुक्तंसमाप्तम् ॥

अथाश्वलायनश्रौतसूत्रप्रारंभः ॥

॥ पूर्वषट्कः ॥


॥ श्रीः ॥

श्रीगणेशायनमः ॥ श्रीवेदपुरुषायनमः ॥ हरिः॒ॐम् ॥ ॥ अथैतस्यसमाम्नायस्यवितानेयोगापत्तिंवक्ष्यामोऽग्न्याधे
यप्रभृतीन्याहवैतानिकानिदर्शपूर्णमासौतुपूर्वंव्याख्यास्यामस्तंत्रस्यतत्राम्नातत्वाद्दर्शपूर्णमासयोर्हविःष्वासन्नेषुहोता
मंत्रितःप्रागुदगाहवनीयादवस्थायप्राङ्मुखोयज्ञोपवीत्याचम्यदक्षिणावृद्धिहारंप्रपद्यतेपूर्वेणोत्करमपरेणप्रणीताइध्मम
परेणाप्रणीतैंचात्वालंचात्वालवत्स्वैतत्तीर्थमित्याचक्षतैतस्यनित्याःप्रांचश्चेष्टाअंकधारणाचंयज्ञोपवीतशौचेचविहाराद
व्यावृत्तिश्चतत्रचेत्कर्मैकांगवचनेदक्षिणंप्रतीयादनादेशेकर्मचोदनायांहोतारंददातीतियजमानंजुहोतिजपतीतिप्राय
श्चित्तेब्रह्माणंमृचंपादग्रहणेसूक्तंसूक्तादौहीनेपादेऽधिकेतृचंसर्वत्रजपानुमंत्रणाप्यायनोपस्थानान्युपांशुमंत्राश्चकर्मकर
र्णाःप्रसंगादपवादोबलीयान्प्रपद्याभिहततरेणपादेनवेदिःश्रोण्योत्तरयापार्ष्णीसमांनिधायप्रपदेनबर्हिराक्रम्यसंहितौ
पाणीधारयन्नाकाशवत्यंगुलीहृदयसंमितावंकसंमितौवाद्यावापृथिव्योःसंधिमीक्षमाणएतद्धोतुःस्थानमासनंवासर्वत्रैवं
भूतोवचनादन्यत्प्रेषितोजपति ॥१॥ नमःप्रवक्रेनमउपद्रष्ट्रेनमोनुख्यात्रेकइदमनुवक्ष्यतिसइदमनुवक्ष्यतिषण्मोर्वीरंह
सस्पांतुद्यौश्चपृथिवीचाहश्चरात्रिश्चापश्चौषधयश्चवाक्समस्थितयज्ञःसाधुच्छंदांसिप्रपद्येहमेवमाममुमितिस्वंनामादिशे
तंभूतेभविष्यतिजातेजनिष्यमाणआभजाम्यपाव्यंवाचोअशांतिंवहेत्यंगुल्यग्राण्यवकृष्यंजातवेदोरमयापशून्मयीतिप्र
तिसंदध्याद्वर्ममेद्यावापृथिवीवर्माग्निर्वर्मसूर्योवर्ममेसंतुतिरश्चिकाः ॥ तदद्यवाचःप्रथमंमसीयेतिसमाप्यसामिधेनीरन्वा

हाँहँ३ इतिहिंकृत्यभूर्भुवःस्वरो३मितिजपंत्येषोभिहिंकारोंभूर्भुवःस्वरित्येवजपित्वाकौत्सोहिंकरोतिंनचपूर्वंजपंजपंत्यथ
सामिधेन्यःप्रवोवाजाअभिद्यवोंऽग्नआयाहिवीतयेंगृणानईळेन्योनमस्यस्तिरोंग्निंदूतंवृणीमहेंसमिध्यमानोअध्वरेंसमि
द्धोअग्नआहुतेतिद्वैताएकश्रुतिसंततमनुब्रूयादुदात्तानुदात्तस्वरितानांपरःसन्निकर्षऐकश्रुत्यंस्वरादिमृगंतमोंकारंत्रि
मात्रंमकारांतंकृत्वोत्तरस्याअर्धर्चेवस्येत्तत्संततमेतदवसानंमुत्तरादानमविप्रमोहेंसमाम्नौप्रणवेनावसानंचतुर्मात्रोवसा
नेतस्यांतापत्तिस्पर्शेषुस्ववर्ग्यंमुत्तमंमंतस्थासुतांतामनुनासिकांरेफोष्मस्वनुस्वारंत्रिःप्रथमोत्तमेअन्वाहाध्यर्धकारमध्य
र्धामुक्त्वावस्येदथद्वेद्वेप्रथममुत्तमस्यामथाध्यर्धाताःपंचदशाभ्यस्ताभिरेतेनशस्त्रयाज्यानिगदानुवचनाभिष्टवनसंस्त
वनानिंनत्वन्यत्राध्यर्धकारंनजपःप्रागभिहिंकारान्नाभिहिंकाराभ्यासावबहुषुप्रकृत्यानावच्छेदादौशस्त्रेष्वेवहोत्रकाणा
मभिहिंकारःसामिधेनीनामुत्तमेनप्रणवेनाग्नेमहाँऽअसिब्राह्मणभारतेतिंनिगदेवसाय ॥ २ ॥ यजमानस्यार्षेयान्प्र
वृणीतेयावंतःस्युःपरंपरंप्रथमंपौरोहित्यात्राजविशांराजर्षीन्वाराज्ञांसर्वेषांमानवेतिसंशयेंदेवेद्धोमन्विद्धंऋषिष्टुतोवि
प्रानुमदितःकविशस्तोब्रह्मसंशितोंघृताहवनःप्रणीर्यज्ञानांरथीरध्वराणामतूर्तोहोतातूर्णिर्हव्यवाळित्यवसायास्पात्रंजु
हूर्देवानांचमसोदेवपानोंराँइवाग्नेनेमिंर्देवांस्त्वंपरिभूरस्यावहदेवान्यजमानायेतिंप्रतिपद्यदेवताद्वितीययाविभक्त्यादे
शमादेशमावहेत्यावाहयत्यादिंप्लावयंन्नग्नआवहेतितुप्रथमदेवतामग्निंसोममित्याज्यभागावग्निमग्नीषोमावितिपौर्णमा

॥ २ ॥

स्यांमग्नीषोमयोःस्थानंइंद्राग्नीअमावास्यायामसन्नयतंइंद्रंमहेंद्रंवासंनयतोंतरेणहविषीविष्णुंमुपाश्वैतरेयिणोंग्नीषोमीयं
पौर्णमास्यांवैष्णवममावास्यायांमेकेनैकेकंचनान्येषामप्युपांशूनांमावहस्वाहायाद्रप्रियाधामानींदंहविर्महोज्यायइत्यु
च्चैर्येऽन्येतद्वचनाःपरोक्षांस्तानुपांशूच्चैर्वाप्रत्यक्षमुपांशुंप्रतिचोदनमावाहनंसर्वाआदिश्यसकृदेकप्रदानांस्तथोत्तरेषुनिग
र्तोअस्तुप्रयस्वांनितिसंस्थितायांपत्न्यासहवाग्यतौग्नीन्ज्वलतोहरनश्नन्नुपासीतंद्व्योर्दुग्धेनवासेग्निहोत्रंजुहुयांदधिश्रि
तेन्यस्मिन्द्वितीयमवनयेँत्प्रातरिष्टिरग्निर्व्रतभृंत्स्वमग्नेव्रतभृच्छुचिरग्नेदेवाँइहावह । उपयज्ञंहविश्चनः । व्रतानिबिभ्रद्व्र
तपाअदब्धोयजानोदेवाँअजरःसुवीरः ॥ दधद्रत्नानिसुमृळीकोअग्नेगोपायनोजीवसेजातवेदइत्येषैवार्त्याश्रुपातेयद्याह
वनीयमप्रणीतमभ्यस्तमियांद्बहुविद्ब्राह्मणोग्निंप्रणयेँद्दर्भैर्हिरण्येग्रतोह्रियमाणेभ्युदितेचतुर्गृहीतमाज्यंरजतंचहिरण्यव
दग्रतोहरेयुरथैतदाज्यंजुहुयांत्पुरस्तात्प्रत्यङ्मुखउपविश्योषाःकेतुनाजुषतांस्वाहेतिकालात्ययेनशेषोनत्विहाग्निरनुग
म्यंआहवनीयेचेद्ध्रियमाणेगार्हपत्योनुगच्छेत्स्वेभ्यएनमवक्षामेभ्योमंथेयुरनुगमयेत्वितरंक्षामाभावेभस्मनारणीसंस्पृ
श्यमंथयेँदितोजज्ञेप्रथममेभ्योयोनिभ्योअधिजातवेदाः । सगायत्र्यात्रिष्टुभाजगत्यानुष्टुभाचदेवेभ्योहव्यंहवनःप्रजा
नन्नितिमथित्वांप्रणीयाहवनीयमुपतिष्ठेतांग्नेसम्राळिषेरायेरमस्वसहसेद्युम्नायोर्जेपत्याय । सम्राळसिस्वराळसि
सारस्वतौत्वोत्सौप्रावतांमन्नादंत्वान्नपत्यायादधइत्यतएवैकेप्रणयँत्यन्वाहृत्यदक्षिणंसहभस्मानंवांगार्हपत्यायतनेनि ॥ २१ ॥
धायांथप्रांचमाहवनीयमुद्धरेँत्ततइष्टिरग्निस्तपस्वान्जनद्वान्पावकवांनायाहितपसाजनेष्वग्नेपावकोअर्चिषा । उपेमां
सुष्टुतिंमम । आनोयाहितपसाजनेष्वग्नेपावकदीद्यत् । हव्यादेवेषुनोदधदितिंप्रणीतेनुगतेप्राग्घोमादिष्टिरग्निर्ज्योति

ष्मान्वरुणंउदग्नेशुचयस्तवांग्रेबृहन्नुषसामूर्ध्वोंअस्थादितिंसर्वांश्चेदनुगतानांदित्योभ्युदियाद्वाभ्यस्तमियाद्वाग्न्याधेयंपु
नराधेयंवांसमारूह्वेषुचारणीनाशे ॥ १२ ॥ अथाग्नेय्यइष्टयोंव्रतातिपत्तौव्रतपतयेंसाग्नावग्निप्रणयनेंग्निवतेक्षामायागा
रदाहेंशुचयेसंसर्जनेंग्निनान्येनमिथश्चेद्विविचयेंगार्हपत्याहवनीययोर्वीतयेंग्राम्येणसंवर्गायेंवैद्युतेनाप्सुमतेंवैश्वानराय
विमतानामन्नभोजनंएषैवकपालेनष्टेनुद्वासितेंभ्याश्राविर्तेवांसुरभयएवंयस्मिन्जीवेमृतशब्दंस्त्वमग्नेव्रतपाअसियद्वोव
यंप्रमिनामव्रतान्यंग्निनाग्निःसमिध्यतेत्वंह्यग्नेअग्निनांग्नेत्वमस्मद्युयोध्यमीवांअक्रंददग्निस्तनयन्निवद्यौंर्विंतेविष्विग्वातजू
तासोअग्नेत्वामग्नेमानुषीरीळतेविशोंग्नआयाहिवीतयेंयोअग्निंदेववीतयेंकुवित्सुनोगविष्टयेंमानोअस्मिन्महाधनेंप्स्वग्नेस
धिष्टवंयदग्नेदिविजाअंस्यग्निर्होतान्यसीदद्यजीयांन्त्साध्वीमकर्देववीतिंनोअद्यंतिंयस्यभार्यागौर्वायमौजनयेंदिष्टिमंरु
तःसान्नाय्येपुरस्तांच्चंद्रमसाभ्युदितेंग्निर्दातेंद्रःप्रदातांविष्णुःशिपिविष्टोग्नेदादाशुषेरयिंसयंताविप्रएषांदीर्घस्तेअस्त्वंकु
शोंभद्रातेहस्तासुकृतोतपाणींवषट्तेविष्णवासऽआकृणोमिंप्रतत्तेअद्यशिपिविष्टनामेंत्यपिवाप्रायश्चित्तेष्टीनांस्थानेंतस्यै
तस्यैदेवतायैंपूर्णाहुतिंजुहुयादितिविज्ञायतेंहविषांस्कन्नमभिमृशेंद्देवांजनमगन्यज्ञंस्तस्यमाशीरवंतुवर्धतां ॥ भूतिर्घृते
नमुंचतुयज्ञोयज्ञपतिमंहसः ॥ भूपतयेस्वाहाभुवनपतयेस्वाहांभूतानांपतयेस्वाहा ॥ यज्ञस्यत्वाप्रमयोन्मयाभिमया
प्रतिमयांद्रप्सश्चस्कंदेत्याहुतिश्चेंद्धहिष्परिध्याग्नीध्रएनांजुहुयांद्धुतवतेपूर्णपात्रंदद्यांद्देवतेअनुवाक्येयाज्येवाविपरिहृत्यां

ज्येअवदानेहविषीवायद्वोदेवाअतिपातयानिवाचाचप्रयुतीदेवहेळनं ॥ अरायोअस्माँअभिदुच्छुनायतेंन्यत्रास्मन्मरु
स्तन्निधेतनस्वाहेत्याज्याहुतिंहुत्वामुख्यंधनंदद्यात्स्थानिनीमनावाह्यदेवतामुपोत्थायावाहयेन्मनसेत्येकंआज्येनास्था
निनींयजेत् ॥१३॥ हविषिदुःशृतेंचतुःशरावमोदनंब्राह्मणान्भोजयेत्क्षामेशिष्टेनेष्ट्वापुनर्यजेताशेषेपुनरावृत्तिःप्रागावा
हनाच्चदोषेंप्यत्यंतंगुणभूतानांप्राक्स्विष्टकृतउक्तंप्रधानभूतानामवदानदोषेपुनरायतनादवदानंद्वेष्ट्रेत्विहदक्षिणांदद्यां
द्दक्षिणादानउर्वरांदद्यात्कपालंभिन्नमनपवृत्तकर्मंगायत्र्यात्वाशताक्षरयासंदधामीतिंसंधायापोभ्यवहरेयुरभिन्नोघर्मो
जीरदानुर्यतआर्तस्तदंगन्पुनः॥ इध्मोवेदिःपरिधयश्चसर्वेयज्ञस्यायुरनुसंतरंतु ॥ त्रयस्त्रिंशत्तंतवोयान्वितन्वतइमंयज्ञंस्व
धजायेयजंते ॥ तेभिश्छिद्रंप्रतिदध्मोयजत्रस्वाहायज्ञोअप्येतुदेवानित्येवमवलीढाभिःक्षिप्तेष्वपएवान्यानिमृन्मयानि
भूमिर्भूमिमगान्मातामातरमप्यगात्॥ भूयास्मपुत्रैःपशुभिर्योनोद्वेष्टिसभिद्यतामितिंयदिपुरोळाशःस्फुटेद्वोत्पतेतवाव
र्हिष्येनंनिधायाभिमंत्रयेतंकिमुत्पतसिकिमुत्प्रोष्ठाःशांतःशांतेरिहागंहि ॥ अघोरोयज्ञियोभूत्वासीदसदनंस्वमासीदसदं
नंस्वमितिंमाहिंसीर्देवप्रेरितंआज्येनतेजसाज्यस्वमानःकिंचनरीरिषः। योगक्षेमस्यशांत्याअस्मिन्नासीदबर्हिषींत्यग्निहोत्रा ॥ २२ ॥
यकालेंग्नावजायमानेंप्यन्यमानीयजुहुयुःपूर्वालाभउत्तरोत्तरंब्राह्मणपाण्यजकर्णंदर्भस्तंबाप्सुकाष्ठेषुपृथिव्यांहुत्वात्वपि
मंथनेंपाणौचेद्वासेनवरोधःकर्णेचेन्मांसवर्जनंस्तंबेचेन्नाधिशयीताप्सुचेदविवेकंएतत्सांवत्सरव्रतंयावज्जीविकंवाग्नावनु

गतंतराहुतीर्हिरण्यउत्तरांजुहुयाद्धिरण्यउत्तरांजुहुयात् ॥१४॥ इत्याश्वलायनश्रौतसूत्रेपूर्वषट्केतृतीयोऽध्यायः ॥ ३ ॥
हरिः ॐ३म् ॥ दर्शपूर्णमासाभ्यामिष्टीष्टिपशुचातुर्मास्यैरथसोमेनोर्ध्वंदर्शपूर्णमासाभ्यांयथोपपत्त्येकेप्रागपिसोमेनैके तस्यर्त्विजश्चत्वारस्त्रिपुरुषास्तस्यतस्योत्तरेत्रयोहोतामैत्रावरुणोच्छावाकोग्रावस्तुदध्वर्युःप्रतिप्रस्थातानेष्टोन्नेताब्रह्माब्राह्मणाच्छंस्याग्नीध्रःपोतोद्गाताप्रस्तोताप्रतिहर्तासुब्रह्मण्यइत्येतेहोनैकाहैर्याजयंत्येतएवाहिताग्नयइष्टप्रथमयज्ञागृहपतिसप्तदशादीक्षित्वासमोप्याग्नींस्तन्मुखाःसत्राण्यासतेतेषांसमावापादियथार्थमभिधानमैष्टिकेतंत्रेदीक्षणाद्यनग्नीनामग्निर्मुखमितिचयाज्यानुवाक्ययोर्दंडप्रदानेप्रैषेषुनिवित्सुघृतयाज्यायांकुह्वांचाच्छावाकनिगदोपहवप्रत्युपहवेचार्षेयाणिगृहपतेःप्रवरित्वात्मादीनांमुख्यानामेवंद्वितीयतृतीयचतुर्थानांयावंतोनंतर्हिताःसमानगोत्रास्तावतांसकृदावर्तयेद्वाद्रव्यान्वयाःसंस्काराःसाग्निचित्येषुक्रतुषूखासंभरणीयामिष्टिमेकेग्निर्ब्रह्मण्वानग्निःक्षत्रवानग्निःक्षत्रभृदेतेनाग्नेब्रह्मणावावृधस्वंब्रह्मचतेजातवेदोनमश्चपुरूण्यग्नेपुरुधात्वायासचित्रचित्रंचितयंतमस्मे । अग्निरीशेबृहतःक्षत्रियस्याचामितेसुमतिंघोष्यर्वागितीदंप्रभृतिकर्मणांशनैस्तरामुत्तरोत्तरंमेतत्त्वपिपौर्णमासात्प्रायणीयावत्सोमप्रवहणंमूर्ध्वंप्रथमायाअग्निप्रणयनीयायांऔपवसथ्येनियमोमध्यमादिधर्मे ॥ १ ॥ दीक्षणीयायांधाय्येविराजावग्नाविष्णू ॥ अग्निर्मुखंप्रथमोदेवतानांसंगतानामुत्तमोविष्णुरासीत् ॥ यजमानायपरिगृह्यदेवान्दीक्षयेदंहविरागच्छतंनः ॥ अग्निश्चविष्णोतपउत्तमंमहो

दीक्षापालायवनतंहिशक्रा ॥ विश्वैर्देवैर्यज्ञियैःसंविदानौदीक्षामस्मैयजमानायधत्तमितिसाग्निचित्येत्रीण्यन्यानिवै
श्वानरआदित्याःसरस्वत्यदितिर्वाधारयंतआदित्यासोजगत्स्थाइतिद्वेएतेएवभुवद्वद्भ्योभुवनपतिभ्योवानेदमादिषुमा
र्जनंमर्वागुदयनीयायांइदमादीळायांसूक्तवाकेचागूराशीस्थानेउपहूतोयंयजमानोस्ययज्ञस्यागुरउद्दचमशीयेतितस्मि
न्नुपहूतआशास्तेयंयजमानोस्ययज्ञस्यागुरउद्दचमशीयेत्याशास्तेनचात्रनामादेशःप्रकृत्यांत्यऊर्ध्वंपश्चिळायादीक्षितानां
संचरौगार्हपत्याहवनीयावंतराग्नेःप्रणयनाद्दीक्षणादिरात्रिसंख्यानेनंदीक्षाअपरिमिताएकाहप्रभृत्यासंवत्सरात्संवत्सरं
त्वेवसत्रेतेंद्वादशाहतापश्चितेषुयथासुत्योपसदःकर्माचारस्त्वेकाहानामेकातिस्रोवादीक्षास्तिस्रउपसदःसुत्यमहरुत्तमंदी
क्षांतेराजक्रयः ॥ २ ॥ तदहःप्रायणीयेष्टिःपथ्यास्वस्तिरग्निःसोमःसवितादितिःस्वस्तिनःपथ्यासुधन्वस्वितिद्वेअग्ने
नयसुपथारायेअस्मानादेवानामपिपंथामगन्मत्वंसोमप्रचिकितोमनीषायातेधामानिदिवियापृथिव्यामाविश्वदेवंसत्प
तिंयइमाविश्वाजातानिसुत्रामाणंपृथिवींद्यामनेहसंमहीमूषुमातरंसुव्रतानांसेदग्निरग्नींरत्यस्त्वन्यानितिद्वेसंयाज्येशंय्वं
तेयमनाज्यभागासंस्थितायां ॥ ३ ॥ राजानंक्रीणंतितंप्रवक्ष्यत्सुपश्चादनसस्त्रिपदमात्रेऽतरेणवर्त्मनीअवस्थाय्यंप्रे
षितोग्रेभिहिंकारांत्त्वंविप्रस्त्वंकविस्त्वंविश्वानिधारयंन् ॥ अपजन्यंभयंनुदेत्यंस्पंदयन्पार्ष्णींप्रपदेनंदक्षिणापांसूंस्त्रि ॥ २३ ॥
रुदुप्यानुब्रूयांद्भद्रादभिश्रेयःप्रेहिबृहस्पतिःपुरएतातेअस्तु ॥ अथेमवस्यवरआपृथिव्याआरेशत्रून्कृणुहिसर्ववीरइति

तिष्ठन्ननुव्रजन्नुत्तरांअंतरेणैववर्त्मनींसोमयास्तेमयोभुवइतितिस्रःसर्वेनंदंतियशसागतेनांगन्देवऋतुभिर्वर्धतुक्षयमित्य
र्धर्चआरमेदवस्थितेनसिदक्षिणातपक्षादभिक्रम्यराजानमभिमुखोवतिष्ठतेप्रपाद्यमानेराजन्यंग्रेणानोनुसंव्रजेंद्यातेधा
मानिहविषायजंतींमांधियंशिक्षमाणस्यदेवेतिनिहितेपरिदध्याद्रांजानमुपस्पृशन्वसनेंशुषुवा ॥ ४ ॥ अथातिथ्येळां
तांतस्याअग्निमंथनंधाय्येअतिथिमंतौंसमिधाग्निंदुवस्यतांप्यायस्वसमेतुतइतिविष्णुरिदंविष्णुर्विंचक्रमेतदस्यप्रियम
भिपाथोअश्यांहोतारंचित्ररथमध्वरस्यंप्रप्रायमग्निर्भरतस्यशृण्वइतिसंयाज्येसंस्थितायामाज्यंतानूनप्त्रंकरिष्यंतोभि
मृशंत्यनाधृष्टमस्यनाधृष्यंदेवानामोजोअभिशस्तिपाः ॥ अनभिशस्त्यंजसासत्यमुपगेषांस्वितेमाधाइतिस्पृष्टोदकंरा
जानमाप्याययंतींदमादिमदंतीरवर्थउपसंत्स्वंशुरंशुष्टेदेवसोमांप्यायतामिंद्रायैकधनिविदंआतुभ्यमिंद्रःप्यायतांमात्व
मिंद्रायप्यायस्वांप्याययास्मान्सखीन् ॥ सन्यामेधयास्वस्तितेदेवसोमसुत्यामुद्दचमशीयेतिस्पृष्टोदकंनिह्नवंतेप्रस्तरे
पाणीन्निधायोंत्तानांदक्षिणान्त्सव्यांनीचंएष्टारायएष्टावामानिप्रेषेभगाय ॥ ऋतमृतवादिभ्योनमोदिवेनमःपृथिव्या
इति ॥ ५ ॥ स्पृष्टोदकंप्रवर्ग्येणचरिष्यत्सूंत्तरेणखरंपरिव्रज्यपश्चादस्योपविश्यप्रेषितोभिष्टुयांद्दगावानमृचमृचंमनवा
नमुक्त्वाप्रणुत्यावस्यैंद्रह्मजज्ञानंप्रथमंपुरस्ताद्विसीमतःसुरुचोवेनआवः ॥ सबुध्न्याउपमाअस्यविष्ठाःसतश्चयोनिमस
तश्चविवः ॥ इयंपित्रेराष्ट्र्येत्यग्रेप्रथमायजनुषेभूमनेष्ठाः ॥ तस्माएतंसुरुचंह्वारमह्यंधर्मंश्रीणंतिप्रथमस्यधासेः ॥ महा

न्महीअस्तभायद्विजातोंद्यांपितासद्मपार्थिवंचरजः ॥ सबुध्नादाष्टजनुषाभ्युग्रंबृहस्पतिर्देवतातस्यसम्राट् ॥ अभि
त्यंदेवंसवितारमोण्योंःकविक्रतुमर्चामिसत्यसवंरत्नधामभिप्रियंमतिंकविं ॥ ऊर्ध्वायस्यामतिर्भाअदिद्युतत्सवीमनिं
हिरण्यपाणिरमिमीतसुक्रतुःकृपास्वंस्तृपास्वरितिवांसंसीदस्वमहाँअसीतिसंसाद्यमानंजंतियंप्रथयंतोनविप्राइत्यज्यमा
नेंपतंगमक्तमसुरस्यमाययायोनःसनुत्योअभिदासदग्नेभवानोअग्नेसुमनाउपेताविति्द्वृचाःकृणुष्वपाजःप्रसितिंनपृथ्वी
मितिपंचंपरित्वागिर्वणोगिरोंधि्द्वयोंरदधाउक्थ्यंवचंःशुक्रंतेअन्यद्यजतंतेअन्यंदपश्यंगोपामनिपद्यमानंस्रक्केद्रप्सस्यां
यंवेनश्चोदयत्पृश्निगर्भाःपवित्रंतेविततंब्रह्मणस्पतइतिद्वेंवियत्पवित्रंधिषणाअतन्वतंघर्मंशोचंतंप्रणवेषुबिभ्रतः ॥ समु
द्रेअंतरायवोविचक्षणंत्रिरह्नोनामसूर्यस्यमन्वत ॥ गणानांत्वाप्रथश्चयस्यांपश्यंत्वेत्येतस्याद्ययायजमानमीक्षतेंद्वि
तीययापत्नींतृतीययात्मानंकाराधद्धोत्राश्विनावामितिनवांभात्यग्निर्ग्रावाणेवेंळेद्यावापृथिवीइतिप्रागुत्तमायांअरूरुच
दुषसःपृश्निरग्रियइत्यावपेतोंत्तरेणार्धर्चेनपत्नीमीक्षेतोंत्तमयापरिहितेसमुत्थाप्यैनानध्वर्यवोवाचयंतीतिनुपूर्वंपटलम्
॥ ६ ॥ अथोत्तरमुपविष्टेष्वध्वर्युर्घर्मदुघामाह्वयतिंससंप्रैषउत्तरस्यानभिहिंकृत्योंपह्वयेसुदुघांधेनुमेतामितिद्वेंअभि
त्वादेवसवितंःसमीवत्संनमातृभिःसंवत्सइवमातृभिर्यस्तेस्तनःशशयोयोमयोभूर्गौंरमीमेदनुवत्संमिषंतंनमसेदुपसीदतं
संजानानाउपसीदन्नभिज्ञ्वांदशभिर्विवस्वतोदुहंतिंसप्तैकांसामद्धोअग्निरश्विनांतप्तोवांघर्मआगतं ॥ दुह्यंतेगावोवृषणेह ॥ २४ ॥

धेनवोदस्रांमदंतिकारवः ॥ समिद्धोअग्निर्वृ२णारतिर्दिवस्तप्तोघर्मोदुह्यतेवामिषेमधु ॥ वयंहिवापुरुतमासोअश्विनां
हवामहेसधमादेषुकारवः ॥ तदुप्रयक्षतममस्यकर्मोत्मन्वन्नभोदुह्यतेघृतंपयंउत्तिष्ठब्रह्मणस्पतइत्येतामुक्त्वावतिष्ठतेदु
ग्धायांमधुक्षत्पिप्युषीमिषमित्याह्रियमाणंउपद्रवपयसागोधुघोर्षमाघर्मेसिंचपयउस्रियायाः ॥ विनाकमख्यत्सवि
तावरेण्योनुद्यावापृथिवीसुप्रणीतिरित्यासिच्यमानंआनूनमश्विनोर्ऋषिरितिगव्यंआसुतेसिंचतश्रियमित्याजआसिक्त
योः समुत्येमहतीरपइतिमहावीरमादायोत्तिष्ठत्सूदुष्यदेवः सविताहिरण्ययेत्यनुत्तिष्ठेत्प्रैतुब्रह्मणस्पतिरित्यनुव्रजेद्गंधर्व
इत्थापदमस्यरक्षतीतिखरमवेक्ष्यंतमतिक्रम्यंनाकेसुपर्णमुपयत्पतंतमितिसमाप्यंप्रणवेनोपविशेदनिरस्यतृणंप्रेषितोयज
तितप्तोवांघर्मोनक्षतिस्वहोतांप्रवामध्वर्युश्चरतिप्रयस्वान् ॥ मधोर्दुग्धस्याश्विनातनायांवीतंपातंपयसउस्रियायाः ॥
उभापिबतमश्विनेतिचोभाभ्यामनवानंमग्नेवीहीत्यनुवषट्कारोघर्मस्याग्नेवीहीतिवांब्रह्मावषट्कृतेजपत्यनुवषट्कृतेचंवि
श्वाआशादक्षिणसाद्विश्वान्देवानयाळिहं ॥ स्वाहाकृतस्यघर्मस्यमध्वः पिबतमश्विनेत्येवमेवापराह्णिकेयदुस्रियास्वाहु
तंघृतंपयोयंसवामश्विनाभागआगतं ॥ माध्वीधर्ताराविदथस्यसत्पतीतप्तंघर्मंपिबतंसोम्यंमधु ॥ अस्यपिबतम
श्विनेतिचाप्रेषितोहोतानुवषट्कृतेस्वाहाकृतः शुचिर्देवेषुघर्मोयोअश्विनोश्चमसोदेवपानः ॥ तमींविश्वेअमृतासोजुषा
णांगंधर्वस्यप्रत्यास्नारिहंति ॥ समुद्रादूर्मिमुदियर्तिवेनोद्रप्सः समुद्रमभियज्जिगाति ॥ सखेसखायमभ्यावववृत्स्वो

ध्र्वंऊषुणऊतयइतिद्वेंतंघेमित्थानमस्विनइतिंप्रागाथींपूर्वाह्णेकाण्वीमपराह्णेन्यतरांवात्यंतंकाण्वींत्वेवोत्तमेंपावकशोचे
तवहिक्षयंपरीत्युक्त्वांभक्षमाकांक्षेंद्वाजिनेनभक्षोपायोंहुतंहविर्मधुहविंरिंद्रतमेग्नावश्यामतेदेवघर्मं ॥ मधुमतःपितुम
तोवाजवतोंगिरस्वतोंनमस्तेअस्तुमामाहिंसीरितिभक्षजपंःकर्मिणोघर्मंभक्षयेयुंःसर्वेतुदीक्षिताःसर्वेषुदीक्षितेषुगृहपतेस्तृ
तीयोत्तमौभक्षौसंप्रेषितंःश्येनोनयोनिंसदनंधियाकृतंमायस्मिन्त्सप्तवासवांरोहंतुपूर्व्यारुहः ॥ ऋषिर्हदीर्घश्रुत्तमंमिंद्रस्य
घर्मोअतिंथिः ॥ सूयवसाद्भगवतीहिभूयाइतिपरिदध्यांदुत्तमेप्रागुत्तमायांहविर्हविष्मोमहिसद्मदैव्यमित्यावपेत ॥ ७ ॥
अथोपसत्तस्यांपित्र्ययाजपांःप्रादेशोपवेशनेचंप्रकृत्येहोपस्थंउपसद्यायमीढुषइतितिस्रंएकैकांत्रिरनवानंताःसामिधेन्यं
स्तासामुत्तमेनप्रणवेनांग्निंसोमंविष्णुमित्यावाह्योपविशेंन्नावाहयेदित्येकेंनावाहनेष्येताएवदेवतांअग्निर्वृत्राणिजंघनद्यं
उग्रइवशर्यहांत्वंसोमासिसत्पतिंर्गयस्फानोअमीवहेंदंविष्णुर्विंचक्रमेंत्रीणिपदाविचक्रमइतिंस्विष्टकृदादिलुप्यतेंप्रया
जाआज्यभागौचंनित्यमाप्यायनंनिह्नवश्चैषैवापराह्णेइमांमेअग्नेसमिधंमिमामितितुसामिधेन्योंविपर्यासोयाज्यानुवा
क्यानांपाण्योश्चनिह्नवईत्युपसदःसुपूर्वाह्णेस्वपराह्णेचराजक्रयांद्यहःसंख्यानेनैकाहानांतिस्रःषड्वाहीनानांद्वादशचतुर्विं
शतिःसंवत्सरइतिसत्राणांप्रथमयज्ञेनैकेघर्मौपवसथ्यउभेपूर्वाह्णेप्रथमस्यामुपसदिवृत्तायांप्रेषितःपुरीष्यचितयेन्वाहंहो
तादीक्षितश्चैद्यजमानोदीक्षितेपश्चांत्पदमात्रेवस्थायाभिहिंकृत्यंपुरीष्यासोअग्नयइतिंत्रिरुपांशुसप्रणवांमपिवासुमंद्रंव्रज ॥ २५ ॥

त्स्वनुव्रजेत्तिष्ठत्सुविसृष्टवाक्प्रणयतेतिब्रूयादथाग्निंसंचितमनुगीतमनुशंसेत्पश्चादग्निपुच्छस्योपविश्याभिहिंकृत्याग्निर
स्मिजन्मनाजातवेदाइतित्रिर्मध्यमयावाचैतस्मिन्नेवासनेवैश्वानरीयस्ययजतित्रयमेतत्साग्निचित्येब्रह्माप्रतिरथंजपि
त्वादक्षिणतोग्नेर्बहिर्वेद्यास्तंऔदुंबर्याभिहवनादुक्तमग्निप्रणयनंदीक्षितस्तुवसोर्धारामुपसर्पेत् ॥८॥ हविर्धानेप्रवर्तयंतित
दुक्तंसोमप्रवहणेनंदक्षिणस्यतुहविर्धानस्योत्तरस्यचक्रस्यांतरावर्त्मपादयोर्युंजेवांब्रह्मपूर्व्यंनमोभिःप्रेतांयज्ञस्यशंभुवायु
वांयमेइवयतमानेयदैतमधिद्वयोरदधाउक्थ्यंवचइत्यर्धर्चआरमेदव्यवस्ताचेद्रराटींविश्वारूपाणिप्रतिमुंचतेकविरिति
व्यवस्तायांमेथ्योरुपनिहतयोःपरित्वागिर्वणोगिरइतिपरिदध्यात् ॥९॥ अग्नीषोमौप्रणेष्यत्सुतीर्थेनप्रपद्योत्तरेणाग्नीध्री
यायतनंसदश्चंपूर्वयाद्वाशपत्नीशालांप्रपद्योत्तरेणशालामुखीयमतिव्रज्यपश्चादस्योपविश्यप्रेषितोनुब्रूयात्सावीर्हिदेवप्र
थमायपित्रेवर्ष्माणमस्मैवरिमाणमस्मै ॥ अथास्मभ्यंसवितःसर्वतातादिवेदिवआसुवाभूरिपश्वइत्यासीनोनुव्रजन्नुत्तराः
प्रैतुब्रह्मणस्पतिर्होतादेवोअमर्त्यःपुरस्तादुपत्वाग्नेदिवेदिवेदोषावस्तरुपप्रियंपनिप्नतमित्यर्धर्चआरमेदाग्नीध्रीयेनिहिते
भिहूयमानेग्नेजुषस्वप्रतिहर्यतद्वचइतिसमाप्यप्रणवेनोपरमेदुत्तरेणाग्नीध्रीयमतिव्रजत्स्वतिव्रज्यसोमोजिगातिगातुविदे
वानांतमस्यराजावरुणस्तमश्विनेत्यर्धर्चआरमेत्प्रपाद्यमानंराजानमनुप्रपद्येतांऽतश्चप्रागाअदितिर्भवासिंदश्येनोनयोनिं
सदनंधियाकृतंमस्तभ्नाद्द्यामसुरोविश्ववेदाइतिपरिदध्यादुत्तरयावाक्षेमाचारेब्रह्मैवमेवप्रपद्यापरेणवेदिमतिव्रज्यदक्षि

णंतःशालामुखीयस्योपविशेत्सहोतारमनूत्थार्यंयथेतमग्रतोव्रजेद्यदिराजानंप्रणयेदुक्तमप्रणयतःप्राप्यहविर्धानेगृहपत
येराजानंप्रदार्यहविर्धानेअग्रेणापरेणवातिव्रज्यंदक्षिणतआहवनीयस्योपविशेदंग्निपुच्छस्यसाग्निचित्यायामेतद्ब्रह्मासनं
पशौप्रातश्चावपाहोमाद्यदित्वग्रेणप्रत्येयात्प्रपाद्यमाने ॥ १० ॥ अथाग्नीषोमीयेणचरंत्युत्तरवेद्यामादंडप्रदानादंडंप्रदा
यमैत्रावरुणमग्रतःकृत्वोत्तरेणहविर्धानेअतिव्रज्यंपूर्वयाद्वारासदःप्रपद्योत्तरेणयथास्वंधिष्ण्यावतिव्रज्यपश्चात्स्वस्याधि
ष्ण्यस्योपविशतिहोतावतिष्ठतइतरोयदिदेवसूनांहवींष्यन्वायातयेयुरग्निर्गृहपतिःसोमोवनस्पतिःसवितासत्यप्रसवोबृ
हस्पतिर्वाचस्पतिरिंद्रोज्येष्ठोमित्रःसत्योवरुणोधर्मपतीरुद्रःपशुमान्पशुपतिर्वा ॥ त्वमग्नेबृहद्वयोहव्यवाळग्निजरःपि
तानंस्त्वंचसोमनोवशोब्रह्मादेवानांपदवीःकवीनांमाविश्वदेवंसत्पतिंनप्रमियेसवितुर्दैव्यस्यतद्बृहस्पतेप्रथमंवाचोअग्रं
हंसैरिवसखिभिर्वावदभिःप्रससाहिषेपुरुहूतशत्रूंन्भुवत्स्वमिंद्रब्रह्मणामहाननमीवासइळयामदंतःप्रसमित्रमर्तोअस्तुप्र
यस्वांस्त्वान्नष्टवान्महिमायपृच्छतेत्वयाबद्धोमुमुक्षते ॥ त्वंविश्वस्माद्भुवनात्पासिधर्मणासुर्यात्पासिधर्मणा ॥ यत्किंचे
दंवरुणदैव्येजनंउपतेस्तोमान्पशुपाइवाकरमितिद्वे ॥ ११ ॥ यद्युवैसर्वपृष्ठान्यंग्निर्गायत्रस्त्रिवृद्राथंतरोवासंतिकइंद्रस्त्रै
ष्टुभःपंचदशोबार्हतोग्रैष्मोविश्वेदेवाजागताःसप्तदशावैरूपावार्षिकामित्रावरुणावानुष्टुभावेकविंशौवैराजौशारदौबृह
स्पतिःपांक्तस्त्रिणवःशाक्वरोहैमंतिकःसवितातिच्छंदास्त्रयस्त्रिंशोरैवतःशैशिरोदितिर्विष्णुपत्न्यनुमतिः ॥ समिद्दिशामा

शयानःस्वर्विन्मधुरेतोमाधवःपात्वस्मान् ॥ अग्निर्देवोदुष्टरीतुरदाभ्यंइदंक्षत्रंरक्षतुपात्वस्मान् ॥ रथंतरंसामभिःपात्व
स्मान्गायत्रीछंदसांविश्वरूपा ॥ त्रिवृन्नोविष्टयास्तोमोअह्नांसमुद्रोवातइदमोजःपिपर्तु ॥ उग्रादिशामभिभूतिर्वयो
धाःशुचिःशुक्रेअहन्योजसीनां ॥ इंद्राधिपतिःपिपृतादतोनोमहिक्षत्रंविश्वतोधारयेदं ॥ बृहत्सामक्षत्रभृद्वृद्धवृष्ण्यंत्रि
ष्टुभौजःशुभितमुग्रवीरं ॥ इंद्रस्तोमेनपंचदशेनमध्यमिदंवातेनसगरेणरक्ष ॥ प्राचीदिशांसहयशायशस्वतीविश्वेदेवाः
प्रावृषाह्नांस्वर्वती ॥ इदंक्षत्रंदुष्टरमस्त्वोजोऽनाधृष्यंसहस्यंसहस्वत् ॥ वैरूपेसामंनिहतच्छकेयंजगत्यैनंविक्ष्वावेशया
नि ॥ विश्वेदेवाःसप्तदशेनवर्चइदंक्षत्रंसलिलवातमुग्रं ॥ धर्त्रींदिशांक्षत्रमिदंदाधारोपस्थाशानांमित्रवदस्त्वोजः ॥
मित्रावरुणाशरदाह्नांचिकित्वंमस्मैराष्ट्रायमहिशर्मयच्छतं ॥ वैराजेसामन्नधिमेमनीषांनुष्टुभासंभृतंवीर्यंसहः ॥ इदंक्ष
त्रंमित्रवदार्द्रदानुंमित्रावरुणारक्षतमाधिपत्ये ॥ सम्राड्दिशांसहसाम्नीसहस्वत्यृतुर्हेमंतोविष्टयानःपिपर्तु ॥ अवस्युवा
ताबृहतीनुशक्करींमंयज्ञमवतुनोघृताचीं ॥ स्वर्वतीसुदुघानःपयस्वतींदिशांदेव्यवतुनोघृताची ॥ त्वंगोपाःपुरएतोतप
श्चांबृहस्पतेयाम्यांयुङ्ग्धिवाचं ॥ ऊर्ध्वादिशांरंतिराशौषधीनांसंवत्सरेणसवितानोअह्ना ॥ रैवत्सामातिच्छंदाउच्छंदो
ऽजातशत्रुःस्योनानोअस्तु ॥ स्तोमत्रयस्त्रिंशेभुवनस्यपत्नींविवस्वद्वातेअभिनोगृणीहि ॥ घृतवतीसवितराधिपत्यैपय
स्वतीरंतिराशानोअस्तु ॥ ध्रुवादिशांविष्णुपत्न्यघोरांस्येशानासहसोयामनोता ॥ बृहस्पतिर्मातरिश्वोतवायुःसंध्वाना

वाताअभिनोगृणंतु ॥ विष्टंभोदिवोधरुणःपृथिव्याअस्येशानाजगतोविष्णुपत्नी ॥ व्यचस्वतीषयंतीसुभूतिंःशिवानो अस्त्वदितेरुपस्थे ॥ अनुनोद्यानुमतिर्यज्ञंदेवेषुमन्यतां ॥ अग्निश्चहव्यवाहनोभवतंदाशुषेमयः ॥ अन्विदनुमतेत्वंम न्यासैशंचनस्कृधि ॥ क्रत्वेदक्षायनोहिनुंप्रणआयूंषितारिषदितिंवैश्वानरीयंनवमंकायंदशमंकोअद्ययुंक्तेधुरिगाऋतस्ये तिद्वेंऔपयजैरंगारैरनभिपरिहारेप्रयतेरन्नाग्नीध्रीयाच्चेदुत्तरेणहोतारंशामित्राच्चेद्दक्षिणेनमैत्रावरुणमुपोत्थानमग्रेकृत्वा निष्क्रम्यवेदंगृह्णीयान्नेदमादिषुहृदयशूलंमर्वागनूबंध्यायाःसंस्थितेवसतीवरीःपरिहरंतिदीक्षिताअभिपरिहारयेरन् ॥१२॥ अथैतस्यारात्रेर्विवासकालेप्राग्वयसांप्रवादात्प्रातरनुवाकायामंत्रितोवाग्यतस्तीर्थेनप्रपद्याग्नीध्रीयेजान्वाच्याहु तिंजुहुयादासन्यान्मामंत्रात्पाहिकस्याश्चिदभिशस्त्यैस्वाहेत्याहवनीयेवागग्रेगाअग्रएतुसरस्वत्यैवाचेस्वाहा ॥ वाचंदे वींमनोनेत्रांविराजंमुग्रांजैत्रीमुत्तमामेहभक्षां ॥ तामादित्यानावमिवारुहेमांनुमतांपथिभिःपारयंतींस्वाहेतिद्वितीयां मातःसमानंब्रह्मणश्चप्राप्यहविर्धानेररराटीमभिमृशंत्युर्वंतरिक्षंवीहीतिद्वार्येस्थूणेदेवीद्वारौमामासंताप्तंलोकंमेलोककृ तौकृणुतमितिप्रपद्यांतरेणयुगधुराउपविश्यप्रेषितःप्रातरनुवाकमनुब्रूयान्मंद्रेणापोरेवतीःक्षयथाहिवस्वउपप्रयंतइतिसू क्तेअवानोअग्नइतिषळग्निमीळेग्निंदूतंवसिष्वाहीतिसूक्तयोरुत्तमामुद्धरेत्त्वमग्नेव्रतपाइत्युत्तमामुद्धरेत्त्वंनोअग्नेमहोभिरि तिनवेमेविप्रस्येतिसूक्तेयुक्ष्वाहिप्रेष्ठंवस्त्वमग्नेबृहद्वयइत्यष्टादशार्चंतस्त्वेतिसूक्तेअग्नेपावकदूतंवइतिसूक्तेअग्निर्होतानोअ

ध्वरइतितिस्रोग्निर्होताग्नइळेतिचतस्रःप्रवोवाजाउपसद्यार्यत्वमग्नेयज्ञानामितितिस्रउत्तमाउद्धरेदग्नेहंस्याग्निंहिन्वंतुनः
प्राग्नयेवाचमितिसूक्तंइमांमेअग्नेसमिधमिमामितित्रयाणामुत्तमामुद्धरेदितिगायत्रंत्वमग्नेवसूंस्त्वंहिक्षैतवदग्नायोहोता
जनिष्टप्रवोदेवायाग्नेकदातइतिपंचसखायःसंवस्त्वामग्नेहविष्मंतइतिसूक्तेबृहद्वयइतिदशानांचतुर्थनवमेउद्धरेदुत्तमामु
त्तमांचादितस्त्रयाणामित्यानुष्टुभमबोध्यग्निःसमिधेतिचत्वारिप्राग्नयेबृहतेप्रवेधसेकवयेत्वंनोअग्नेवरुणस्यविद्वानित्येत
त्प्रभृतीनिचत्वार्यूर्ध्वऊषुणःससस्ययद्वियुतेतिपंचभद्रंतेअग्नइतिसूक्तेसोमस्यमातवसंप्रत्यग्निरुषसइतित्रीण्याहोतेतिद
शानांतृतीयाष्टमेउद्धरेद्दिवस्परीतिसूक्तयोःपूर्वस्योत्तमामुद्धरेत्त्वंह्यग्नेप्रथमइतिषण्णांद्वितीयमुद्धरेत्पुरोवोमंद्रमितिच
त्वारितंसुप्रतीकमितिषड्ढुवेवःसुद्योत्मानंनिहोताहोतृषदनइतिसूक्तेत्रिमूर्धानमितित्रीणिवर्हियशसमुपप्रजिन्वन्निति
त्रीणिकातउपेतिरितिसूक्तेहिरण्यकेशइतितिस्रोपश्यमस्यमहतइतिसूक्तेद्वेविरूपेइतिसूक्तेअग्नेनयाग्नेबृहन्नित्यष्टानामु
त्तमादुत्तमास्तिस्रउद्धरेत्त्वमग्नेसुहवोरण्वसंदृगितिपंचाग्निंवोदेवमितिदशानांतृतीयचतुर्थेउद्धरेदितित्रैष्टुभमेनावोअ
ग्निंप्रवोयह्वमग्नेविवस्वत्सखायस्त्वायमग्निरग्नआयाह्यच्छानःशीरशोचिषमितिषळदर्शिगातुवित्तमइतिसप्तेतिबार्हतंमग्ने
वाजस्येतितिस्रःपुरुत्वात्वामग्नईळिष्वाहीत्यौष्णिहंजनस्यगोपास्त्वामग्नऋतायवइममूषुवोअतिथिमुषर्बुधमितिनवत्व
मग्नेद्युभिरितिसूक्तेत्वमग्नेप्रथमोअंगिरानूचित्सहोजाअमृतोनितुंदतइतिपंचवेदिषदइतिषण्णांतृतीयमुद्धरेदिमंस्तोमम

र्हतंसंजागृवद्भिश्चित्रइच्छिशोर्वसुंनचित्रमहसमितिजागतंमग्निंतंमन्यइतिपांक्तमित्याग्नेयःक्रतुः ॥ १३ ॥ अथोषस्यः
प्रतिष्यासूनरींकस्तउषइतितिस्रइतिगायत्रंमुषोभद्रेभिरित्यानुष्टुभंमिदंश्रेष्ठंपृथूरथइतिसूक्तेप्रत्यर्चिरित्यष्टौद्युतद्यामान
मुषोवाजेनेंदमुत्यदुदुश्रियइतिसूक्तेव्युषाआवोदिविजाइतिषळितित्रैष्टुभंप्रत्युअदर्शिसहवामेनेतिबार्हतंमुषस्तच्चित्रमा
भरेतितिस्रऔष्णिहमेताउत्याइतिचतस्रोजागतंमहेनोअद्येतिपांक्तमित्युषस्यःक्रतुः ॥ १४ ॥ अथाश्विनएषोउषाः
प्रातर्युजेतिचतस्रोश्विनायज्वरीरिषंआश्विनावश्वावत्यागोमदूषुनासत्येतितृचांदूरादिहेवेतितिस्रउत्तमाउद्धरेद्वाहिष्ठो
वांहयानामितिचतस्रउदीराथामामेहवमितिगायत्रंयदद्यस्थइतिसूक्तेआनोविश्वाभिस्त्यंचिदत्रिमित्यानुष्टुभंमाभात्य
ग्निरितिसूक्तेग्रावाणेवनासत्याभ्यामितित्रीणिधेनुःप्रत्नस्यकउश्रवदितिसूक्तेस्तुषेमरेतिसूक्तेयुवोरजांसीतिपंचानांतृती
यमुद्धरेत्प्रतिवांरथमितिसप्तानांद्वितीयमुद्धरेदितित्रैष्टुभंमिमाउवामयंवामोत्यमह्वआरथमितिसप्तद्युम्नीवांयत्स्थइति
बार्हतंमश्विनावर्तिरस्मदाश्विनावेहगच्छतमितितृचौयुवोरुषूरथंहुवइतिपंचदशेत्यौष्णिहंमबोध्यग्निर्ज्मएषस्यभानुरा
वांरथमभूदिदंयोवांपरिज्मेतित्रीणित्रिश्चिन्नोअद्येळेद्यावापृथिवीइतिजागतंप्रतिप्रियतममितिपांक्तमित्येतेषांच्छंदसां ॥ २८ ॥
पृथक्सूक्तानिप्रातरनुवाकःशतप्रभृत्यपरिमितोनान्यैराग्नेयंगायत्रमत्यावपेद्ब्राह्मणस्यनत्रैष्टुभंराजन्यस्यनजागतंवैश्य
स्यांध्यासवदेकपदद्विपदांयथास्थानंध्रुवाणिमांगलान्यंगन्ममहातारिष्मैळेद्यावापृथिवीइतिंसंजागृवद्भिरितिचंयःप्रेष्य

न्त्स्वर्गकामंईळेद्यावीयमावर्तयैंदातमसोपघातांत्कालउत्तमयोत्सृप्यासनांन्मध्यमस्थानेनंप्रतिप्रियतममित्युपसंतनुयां
त्पुनरुत्सृप्योंत्तमयोत्तमस्थानेनपरिदध्यांदंतरेणद्वार्येस्थूणेंअनभ्याहतमाश्रावयन्निवाश्रावयन्निव ॥ १५ ॥ इत्याश्व
लायनश्रौतसूत्रेपूर्वषट्केचतुर्थोऽध्यायः ॥ ४ ॥ ॥ ॥ ॥ ॥

हरिःॐम् ॥ ॥ परिहितेपइष्यहोतरित्युक्तौंनभिहिंकृत्यापोनप्त्रीयाअन्वाहैंषच्छनैस्तरांपरिधानीयायांस्तासां
निगदादिशनैस्तरांताभ्यश्चाप्रसर्पणांत्परंमंद्रेणप्रातःसवनंचांध्यर्धकारंप्रथमामृगावानंमुत्तरावृष्टिकामस्यंप्रकृत्यावाप्र
कृतिभावेपूर्वेष्वांसामर्धर्चेषुलिंगानिकांक्षेंत्प्रदेवत्राब्रह्मणेगातुरेत्विविनिर्वहिनोतानोअध्वरंदेवयज्येतिदशमींमावर्वृतती
रधनुद्विधाराइत्यांवृत्तास्वेकधनासुंप्रतियदापोअदृश्रमायतीरितिंप्रतिदृश्यमानास्वांधेनवःपयसातूर्ण्यर्थांःसमन्यायं
त्युपयंत्यन्याइतिंतीर्थदेशेहोतृचमसेपांपूर्यमाणंआपोनदेवीरुपयंतिहोत्रियमितिसमाप्यंप्रणवेनोपरमैंदागतमध्वर्युंमवे
रपोध्वर्या३उइतिपृच्छंत्युतेमनंनमुरितिप्रत्युक्तौंनिगदंब्रुवन्प्रतिनिष्क्रामैंत्तास्वध्वर्योइंद्रायसोमंसोतामधुंमंतं । वृष्टिव
निंतीव्रांतंबहुरमध्यंवसुमतेरुद्रवतआदित्यवतऋभुमतेंविभुमतेवाजवतेबृहस्पतिवतेविश्वदेव्यावतंइत्यंतमनवानमु
क्त्वोंदगासांपथोवतिष्ठेतोंपातीतास्वन्वावर्तेतंयस्येंद्रःपीत्वावृत्राणिजंघनंत्प्रसजन्यानितारिषों३मंबयोयंत्यध्वभिरिति
तिस्रंउत्तमयानुप्रपद्येतेंमाअग्मन्रेवतीर्जीवधन्याइतिद्वेंसन्नासूत्तरयापरिधायोंत्तरांद्वार्यामासाद्यंराजानमभिमुखउप

विशेदनिरस्यतृणं ॥ १ ॥ उपांशुहूयमानंप्राणंयच्छस्वाहात्वासुहवसूर्यायप्राणप्राणंमेयच्छेत्यनुमंत्र्यंउः इत्यनुप्राण्यादंत
र्यामंमपानंयच्छस्वाहात्वासुहवसूर्यायापानापानंमेयच्छेत्यनुमंत्र्यंऊँइतिचाभ्यपान्यादुपांशुसवनंग्रावाणंव्यानायत्वेत्य
भिमृश्यवाचंविसृजेत्पवमानायसर्पणेन्वक्छंदोगान्मैत्रावरुणोब्रह्माचनित्यौतावंतरेणेतरेदीक्षिताश्चेंद्रप्सश्चस्कंदेति
द्वाभ्यांविप्रुड्ढोमौहुत्वाध्वर्युमुखाः समन्वारब्धाः सर्पत्यातीर्थदेशात्तत्स्तोत्रायोपविशंत्युद्गातारमभिमुखास्तान्होतानुमंत्र
यतेत्रैवासीनोयोदेवानामिहसोमपीथोयज्ञेबर्हिषिवेद्यांतस्यापिभक्षयामसिमुखमसिमुखमसिमुखंभूयासमितिदीक्षितश्चे
द्व्रजेत्स्तोत्रोपस्वारार्यंसर्पेच्चोत्तरयोः सवनयोर्ब्रह्मन्स्तोष्यामः प्रशास्तरितिस्तोत्रायातिसर्जितावतिसृजतौभूरिंद्रवंतः सवि
तृप्रसूताइतिजपित्वोंस्तुध्वमितिब्रह्माप्रातः सवनेभुवइतिमाध्यंदिनेस्वरितितृतीयसवनेभूर्भुवः स्वरिंद्रवंतः सवितृप्रसू
ताइत्यूर्ध्वमाग्निमारुतात्स्तुतदेवेनसवित्राप्रसूताऋतंचसत्यंचवदंत ॥ आयुष्मत्यऋचोमागातंतनूपात्साम्नओ३मिति
जपित्वामैत्रावरुणः स्तुध्वमित्युच्चैः ॥ २ ॥ अथसवनीयेनपशुनाचरंतियद्देवतोभवत्याग्नेयोग्निष्टोमऐंद्राग्नउक्थ्येद्वि
तीयऐंद्रोवृष्णिः षोळशिनितृतीयः सारस्वतीमेष्यतिरात्रेचतुर्थीतिक्रतुपशवः परिव्ययणाद्युक्तमग्नीषोमीयेणाचात्वाल ॥ २९ ॥
मार्जनाद्दंडप्रदानवर्जमुपविश्याभिहिंकृत्यपरिव्ययणीयांत्रिरावहदेवान्त्सुन्वतेयजमानायेत्यावाहनादिसुन्वच्छब्दोग्रे
यजमानशब्दादैष्टिकेषुनिगमेषुनांत्याद्धारियोजनादूर्ध्वंनप्राविन्नंसाधुतेयजमानदेवताओमन्वतीतेस्मिन्यज्ञेयजमाने

तिचप्रागाज्यपेभ्र्यंःसवनदेवताआवाहयेँदिंद्रंवसुमंतमावहेँद्रंरुद्रवंतमावहेँद्रमादित्यवंतमृभुमंतंविभुमंतंवाजवंतंबृह
स्पतिवंतंविश्वदेव्यावंतमावहेतिताःसूक्तवाकएवानुवर्तयेंत्प्रवृताहुतीर्जुहोतिवषट्कर्तारोन्येच्छावाकाश्चात्वालेमार्जयि
त्वांध्वर्युपथउपतिष्ठंतआदित्यप्रभृतीन्धिष्ण्यांमादित्यमग्रेध्वनामध्वपतेश्रेष्ठःस्वस्त्यस्याध्वनःपारमशीयेतिंयूपादित्या
हवनीयनिर्मंथ्यांनग्नयःसगराःसगरांअग्नयःसगरास्थसगरेणनाम्ना ॥ पातमाग्नयःपिपृतमाग्नयोंनमोवोअस्तुमामाहिंसि
ष्टेतिंसव्यावृतःशामित्रोवध्यगोहंचात्वालोत्करास्तावानेवमेवंदक्षिणावृतआग्नीध्रीयंमच्छावाकस्यवादंदक्षिणंमार्जालीयं
खरमित्युंत्तरेणाग्नीध्रीयंपरिव्रज्यंप्राप्यसदोभिमृशंत्युर्वंतरिक्षंवीहीतिद्वार्येसंमृश्यैंवमपरानुपतिष्ठंतंउपस्थितांश्चानुपस्थि
तांश्चाप्यपश्यंतोव्यनीक्षमाणांहोतामैत्रावरुणोब्राह्मणाच्छंसींपोतानेष्टेतिंपूर्वयाद्वारासदःप्रसर्पंत्युरुंनोलोकमनुनेषिवि
द्वानितिजपंतंउत्तरेणसर्वान्धिष्ण्यान्त्संनात्संनानपरेणंयथास्वंधिष्ण्यानांपश्चादुपविश्यजपंतिंयोअद्यसौम्योवधोघायू
नामुदीरति ॥ विषूकुहमिवधन्वनाव्यस्यांःपरिपंथिनंसदसस्पतयेनमइंत्येवमपरयाब्रह्माप्रसृप्यंदक्षिणपुरस्तान्मैत्राव
रुणस्योपविशेंत्तमन्वंचऋत्विजःप्रसर्पकाःपूर्वेणौदुंबरीमंपरेणधिष्ण्यान्यथांतरंमनूपविशंत्यैतयावृताग्नीध्रंआग्नीध्रीयम
प्याकाशंदक्षिणादयोधिष्ण्यांउदक्संस्थाःप्रसर्पिणांमाद्यौतुविपरीतौंतेषांविसंस्थितसंचरांयथास्वंधिष्ण्यांनुत्तरेणदक्षि
णमधिष्ण्यानां ॥ २ ॥ अथैंद्रैःपुरोळाशैरनुसवनंचरंतिंधानावंतंकरंभिणमितिंप्रातःसवनेनुवाक्यांमाध्यंदिनस्यसवन

स्यंधानाइतिमाध्यंदिनेंतृतीयेधानाःसवनेपुरुष्टुतेतितृतीयसवनेंहोतायक्षदिंद्रंहरिवाँऽइंद्रोधानाअत्त्वितिप्रैषौंलिंगैरनु
सवनमुद्धृत्यांदेशपदंतेनैवेज्यांहोतायक्षदसौयजयोस्तुस्थानंआगूर्वषट्कारौंयत्रक्कचप्रैषेणयजेंदथस्विष्टकृतोंग्नेजुषस्व
नोहविर्माध्यंदिनेसवनेजातवेदोंग्नेतृतीयेसवनेहिकानिषइत्यनुसवनमनुवाक्यांहोतायक्षदग्निंपुरोळाशानामितिप्रैषोंह
विरग्नेवीहीतियाज्यैतास्वनुवाक्यासुंपुरोळाशशब्दंबहुवदेकेविज्ञायतेपूयतिवाएतद्दचोक्षरंयदेनदूहतितस्माद्दचंनोहेत्
॥ ४ ॥ द्विदेवत्यैश्चरंतिंवायवइंद्रवायुभ्यांवायवायाहिदर्शतेंद्रवायूइमेसुताइत्यनुवाक्येअनवानंपृथक्प्रणवेंहोतायक्ष
द्वायुमग्रेगांहोतायक्षदिंद्रवायूअर्हंतेतिंप्रैषावनवानंमग्रंपिबामधूनामितियाज्येअनवानमेकागुरेंपृथग्वषट्कारेंइदमाद्य
नवानंप्रातःसवनइज्यानुवाक्येंप्रैषैाचोत्तरयोर्ग्रहयोर्हुत्वैतद्ग्रहपात्रमाहरत्यध्वर्युस्तद्गृह्णीयांदैतुवसुःपुरूवसुरितिप्रतिगृह्य
दक्षिणमूरुमपोच्छाद्यंतस्मिन्त्सादयित्वांकाशवतीभिरंगुलीभिरपिदध्यांदेवमुत्तरेसव्येनत्वपिधायंतयोःप्रतिग्रहोभक्ष
णंचमैत्रावरुणस्यांयंवांमित्रावरुणांहोतायक्षन्मित्रावरुणांगृणानाजमदग्निनेत्यैतुवसुर्विदद्वसुरितिप्रतिगृह्यंदक्षिणेनैंद्र
वायवंहृत्वांभ्यात्मंसादनमाश्विनस्यंप्रातर्युजाविबोधयंहोतायक्षदश्विनानासत्यांवावृधानाशुभस्पतीइत्यैतुवसुःसंयद्व ॥ ३० ॥
सुरितिप्रतिगृह्यैवमेवहृत्वोत्तरेणंशिरःपरिहृत्याभ्यात्मतरंसादनंमनुवचनप्रैषयाज्यासुंनित्योध्वर्युतःसंप्रैषंउन्नीयमाने
भ्योन्वाहांत्वावहंत्वसाविदेवंमिहोपयातेत्यनुसवनंहोतायक्षदिंद्रंप्रातःप्रातःसावस्यंहोतायक्षदिंद्रंमाध्यंदिनस्यसवनस्यं

होतायक्षदिंद्रंतृतीयस्यसवनस्येतिंप्रेषितःप्रेषितोहोतानुसवनंप्रस्थितयाज्याभिर्यजतिंनामादेशमितरैंप्रशास्ताब्राह्मणा
च्छंसींपोतानेष्टाग्नीध्रोच्छावाकश्चोत्तरयोःसवनयोंःपुराग्नीध्रादिदंतेसोम्यंमधुमित्रंवयंहवामहइंद्रत्वावृषभंवयंमरुतोय
स्यहिक्षयेंग्नेपत्नीरिहावहोंक्षान्नायवशान्नायेतिंप्रातःसवनिक्यःप्रस्थितयाज्याःपिबासोममभियमुग्रतर्दइतितिस्रोंर्वाङे
हिसोमकामंत्वाहुंस्तवायंसोमस्त्वमेह्यर्वाङिंद्रायसोमाःप्रदिवोविदानाऽआपूर्णोअस्यकलशस्वाहेतिमाध्यंदिन्यइंद्रऋभु
भिर्वाजवद्भिःसमुक्षितंमिंद्रावरुणासुतपाविमंसुतंमिंद्रश्चसोमंपिबतंबृहस्पतंआवोवहंतुसप्तयोरघुष्यदोंमेवनःसुहवाऽ
आहिगंतनैंद्राविष्णूपिबतंमध्वोअस्येंमंस्तोममर्हतेजातवेदसइतिंतार्तीयसवनिक्यःसोमस्याग्नेवीहीत्यनुवषट्कारंःप्रस्थि
तयाज्यासुशस्त्रयाज्यासुंमरुत्वतीयेहारियोजनेंमहिम्नयाश्विनेचतैरोअन्ह्येतदेषाभियज्ञगाथागीयते । ऋतुयाजान्द्वि
देवत्यान्यश्चपात्नीवतोग्रहः । आदित्यग्रहसावित्रौतान्त्समानुवषट्कृथाइतिंप्रतिवषट्कारंभक्षणंतूष्णीमुत्तरमेत्यध्व
र्युरयाळग्नीदितिपृच्छंत्ययाळितिप्रत्याहंसभद्रमकर्योनःसोमस्यपाययिष्यतीतिहोताजपति ॥ ५ ॥ ऐंद्रवायवमुत्तरेर्धे
गृहीत्वांध्वर्यवेप्रणामयेंदेषवसुःपुरूवसुरिहवसुःपुरूवसुर्मयिवसुःपुरूवसुर्वाक्पावाचंमेपाह्युपहूतावाकूसहप्राणेनोपमां
वाक्सहप्राणेनह्वयतांमुपहूताऋषयोदैव्यासंस्तनूपावानस्तन्वस्तपोजांउपमामृषयोदैव्यासोह्वयंतांतनूपावानस्तन्वस्त
पोजाइंत्यध्वर्यउपह्वयस्वेत्युक्त्वांवघ्रायनासिकाभ्यांवाग्देवीसोमस्यतृप्यत्विंतिभक्षयेंत्सर्वत्रप्रतिभक्षितंहोतृचमसेंकिं

चिदवनीयानाचम्यौपह्वानादिपुनःसंभक्षयित्वांनसोमेनोच्छिष्टाभवंतीत्युदाहरंतिशेषंहोतृचमसआनीयोत्सृजेंदेवमु
त्तरेंनत्वेनयोःपुनर्भक्षोंनकंचनाद्विदेवत्यानांमनवनीतमवसृजेन्मैत्रावरुणंमेषवसुर्विदद्वसुरिहवसुर्विदद्वसुर्मयिवसुर्विद
द्वसुंश्चक्षुष्पाश्चक्षुर्मेपाह्युपहूतंचक्षुःसहमनसोपमांचक्षुःसहमनसाह्वयतांमुपहूताऋषयोदैव्यासंस्तनूपावानस्तन्वस्तपोजां
उपमामृषयोदैव्यासोह्वयंतांतनूपावानस्तन्वस्तपोजाइत्यक्षीभ्यांत्विहावेक्षणंदक्षिणेनाग्रेसव्येनपाणिनांहोतृचमसमाद
दीतैंतुवसूनांपतिर्विश्वेषांदेवानांसमिदितितस्यारत्निनांतस्योरोर्वसनमपोच्छाद्यंतस्मिन्त्सादयित्वांकाशवतीभिरंगुली
भिरपिदध्यांदाश्विनंयथाहृतंपरिहृत्यंपुनःसादयित्वाध्वर्यवेप्रणामयेंदेषवसुःसंयद्वसुरिहंवसुःसंयद्वसुर्मयिवसुःसंयद्व
सुःश्रोत्रपाःश्रोत्रंमेपाह्युपहूतंश्रोत्रंसहात्मनोपमांश्रोत्रंसहात्मनाह्वयतांमुपहूताऋषयोदैव्यासंस्तनूपावानस्तन्वस्तपोजां
उपमामृषयोदैव्यासोह्वयंतांतनूपावानस्तन्वस्तपोजाइतिंकर्णाभ्यांत्विहोपोद्यच्छेद्दक्षिणायाग्रेनिधायंहोतृचमसंस्पृष्ट्वोद
कंमिळामुपह्वयतंउपोद्यच्छंतिंचमसानवांतरेळांप्राश्याचम्यंहोतृचमसंभक्षयेंदध्वर्यउपह्वयस्वेत्युक्त्वादीक्षितोंदीक्षिता
उपह्वयध्वंयजमानाइतिवांमुख्यान्वापृथग्घोत्रकाउपह्वयध्वमितींतरानेवमितरेंयथासभक्षंत्वदीक्षितांमुख्यचमसादच ॥ ३१ ॥
मसांद्रोणकलशाद्वोक्तःसोमभक्षजपंःसर्वत्रहोतुर्वषट्कारेंचमसाहूयंतंउद्गातुर्ब्रह्मणोयजमानस्यंतेषांहोताग्रेभक्षयेदिति
गौतमोंभक्षस्यवषट्कारान्वयत्वांदभक्षणमितरेषामितितौल्वलिःकृतार्थत्वाद्भक्षयेयुरितिगाणगारिंरतःसंस्कारत्वांत्का

चतच्चमसतास्यांन्नचान्यःसंबंधोभक्षयित्वांपामसोममममृताअभूमंशंनोभवहृदआपीतइंदविंतिंमुखहृदयेअभिमृशेरन्ना
प्यायस्वसमेतुतेंसंतेपयांसिसमुयंतुवाजाइतिंचमसानाद्योपाद्यान्पूर्वयोःसवनयोंराद्यांस्तृतीयसवनेंसर्वत्रात्मानमन्यत्रै
कपात्रेभ्यंआप्यायितांश्चमसान्त्सादयंतिंतेनाराशंसाभवंति ॥ ६ ॥ एतस्मिन्कालेप्रपद्याच्छावाकंउत्तरेणाग्नीध्रीयं
परिव्रज्यंपूर्वेणसदआत्मनोंधिष्ण्यदेशउपविशेंत्पुरोळाशद्दगळंप्रत्तमिळामिवोद्यम्यांच्छावाकवदस्वेत्युक्तोंच्छावोअग्नि
मवसइतितृचमन्वाहांत्येनप्रणवेनोपसंतनुयांद्यजमानहोतरध्वर्योंग्नींद्ब्रह्मन्पोतर्नेष्टंरुतोपवक्तरिषेषयध्वंमूर्जोर्जयध्वंनि
वोजामयोजिहतांन्यजामयोनिःसपत्नायामनिबाधितासोंजयताभीत्वरींजयताभीत्वर्याःश्रवद्धइंद्रःशृणवद्धोअग्निःप्र
स्थायेंद्राग्निभ्यांसोमंवोचतोंपोअस्मान्ब्राह्मणान्ब्राह्मणाह्वयध्वमितिंसमाप्तेस्मिन्निगदेध्वर्युंहोंतर्युपहवंकांक्षतेंप्रत्येतासु
न्वन्यजमानंःसूक्तावामग्रभींदुतप्रतिष्ठोतोपवक्तंरुतनोगावउपहूतांउपहूतइत्युपह्वयतंउपहूतःप्रत्यस्तांइत्युन्नीयमाना
यानूच्यंप्रातर्यावभिरागतमितियजतिंनिधायपुरोळाशद्दगळंस्पृष्ट्वोदकंचमसंभक्षयेन्नास्पृष्ट्वोदकांःसोमेनेतराणिहवीं
ष्यालभेरंन्नादायैनदादित्यप्रभृतींन्धिष्ण्यानुपस्थायांपरयाद्वारासदःप्रसृप्यंपश्चात्स्वस्यधिष्ण्यस्योपविश्यप्राश्नीयांदुप
विष्टेब्रह्माग्नीध्रीयंप्राप्यंहविरुच्छिष्टंसर्वेप्राश्नीयुंःप्रागेवेतरेगताभवंतिंप्राश्यप्रतिप्रसृप्य ॥ ७ ॥ ऋतुयाजैश्चरंतिंते
षांप्रैषाःपंचमंप्रैषसूक्तंतेनतेनैवप्रेषितःप्रेषितंःससयथाप्रैषंयजतिंहोताध्वर्युगृहपतिभ्यांहोतरेतद्यजेत्युक्तःस्वयंषष्ठेपृष्ठ

ष्ट्याहर्निपश्चादुत्तरवेदेरुपविश्याऽध्वर्युः पश्चाद्गार्हपत्यस्यंगृहपतिरथैतद्दतुपात्रमानंतर्येणवषट्कर्तारोभक्षयंतिपृथगध्वर्युः
प्रतिभक्षयेंत्तास्मिंश्चैवोपहवः ॥ ८ ॥ पराङध्वर्यावावृत्तेंसुमत्पद्धग्देपितामातरिश्वाच्छिद्रापदाधादच्छिद्रोक्थाकवयः
शंसन्त्सोमोविश्वविन्नीथानिनेषद्बृहस्पतिरुक्थामदानिशंसिषद्वागायुर्विश्वायुर्विश्वमायुःकइदंशंसिष्यतिसइदंशंसिष्य
तीतिजपित्वानभिहिंकृत्यशोंसावोमित्युच्चैराहूयतूष्णींशंसंशंसेंदुपांशुसप्रणवंमसंतन्वन्नेषआहावःप्रातःसवनेशस्त्रादिषु
पर्यायप्रभृतीनांचसर्वत्रचांतःशस्त्रंतेनचोपसंतानःशस्त्रस्वरःप्रतिगरंओथामोदैवेतिशोंसामोदैवेत्याहावेप्लुतादिःप्रणवे
प्लुतादिरवसानेंप्रणवेप्रणवआहावोत्तरेवसानेचप्रणवांतोवायत्रयत्रचांतःशस्त्रंप्रणवेनावस्यतिप्रणवांतएवतत्रप्रतिगरः
शस्त्रांतेतुप्रणवोभूरग्निर्ज्योतिर्ज्योतिरग्नों३ मूइंद्रोज्योतिर्भुवोज्योतिरिंद्रों३ मूसूर्योज्योतिर्ज्योतिःस्वःसूर्यो३ मितित्रिपद
स्तूष्णींशंसोयद्युवैषट्पदःपूर्वेंज्योतिःशब्दैरग्रेवस्येंदुच्चैर्निविदंयथानिशांतमग्निर्देवेद्धइतिनास्याआह्वानंनचोपसंतानउ
त्तमेनपदेनंप्रवोदेवायेत्याज्यमुपसंतनुयादेतेननिविदउत्तराःसर्वेचपदसमाम्नायांउपसंतानस्त्वन्यत्राह्वानंचनिविदांमा
ज्याद्यांत्रिःशंसेंदर्धर्चशोविग्राहंतन्निदर्शयिष्यामः ॥ प्रवोदेवायाग्नयेबर्हिष्ठमर्चास्मै ॥ गर्मद्देवेभिरासनोयजिष्ठोबर्हि ॥ ३२॥
रासदो३ मित्यृगावानंवैवमेवैतेनाद्याःप्रतिपदामनृगावानमनुब्राह्मणंवानुपूर्व्यमाहूयोत्तमयापरिदधातिसर्वशस्त्रपरि
धानीयास्वेवमुक्थंवाचिघोषायत्वेतिशस्त्वाजपेदग्नइंद्रश्चदाशुषोदुरोणइतियाज्योक्थपात्रमग्रेभक्षयेत्ततश्चमसांश्चमसि

नंःसर्वशस्त्रयाज्यांतेषुंवषट्कर्तैकपात्रांण्यादित्यग्रहसावित्रवर्जं ॥ ९ ॥ स्तोत्रमग्रेशस्त्रादेषेतिप्रोक्तंउद्गातुर्हिंकारेप्रा
तःसंवनआह्वयीरंन्प्रतिहारउत्तरयोःसवनयोंर्वायुरग्रेगायत्रप्रीरितिंसप्तानांपुरोरुचाँतस्यास्तस्याउपरिष्टात्तृचंतृचंशं
सेंद्वायवायाहिदर्शतेतिसप्ततृचांद्वितीयांप्रउगेत्रिःपुरोरुग्भ्यआह्वयीतंषष्ठ्यांत्रिरवस्यैदर्धर्चेर्धर्चंउत्तमांनशंसेंच्छंसंत्येके
तृचआह्वानंमशंसनेमाधुच्छंदसंप्रउगमित्येतदाचक्षतंउक्थंवाचिश्लोकायत्वेतिशस्त्वाजपैद्विश्वेभिःसोम्यंमध्वितिया
ज्यांप्रशास्ताब्राह्मणाच्छंस्यच्छावाकइतिशस्त्रिणोहोत्रकास्तेषांचतुराहावानिंशस्त्राणिप्रातःसवनेंतृतीयसवनेपर्यायेष्वति
रिक्तेषुचंपंचाहावानिमाध्यंदिनैंस्तोत्रियानुरूपेभ्यंःप्रतिपदनुचरेभ्यंःप्रगाथेभ्योधाय्याभ्यइतिपृथगाह्वानंहोतुरपितेभ्य
श्चान्यदनंतरंमादौनिविद्धानीयानांसूक्तानांमनेकंचेत्प्रथमेष्वाहावंआपोदेवतेचतृचैंतेषांतृचास्तोत्रियानुरूपांःशस्त्रादि
षुसर्वत्रमाध्यंदिनैंप्रगाथास्तृतीयायथाग्रहणंमन्यद्याज्यांतानिशस्त्रांण्युक्थंवाचीत्येषांशस्त्वाजपंःप्रातःसवनऊर्ध्वंचषो
ळशिनंःसर्वेषामुक्थंवाचींद्रायेतिमाध्यंदिनंउक्थंवाचींद्रायदेवेभ्यंइत्युक्थेषुसषोळशिकेंष्वनंतरस्यपूर्वेणंस्तोत्रियेणानु
रूपस्यंछंदःप्रमाणलिंगदैवतान्यार्षंचैकंआनोमित्रावरुणांनोगंतंरिशादसांप्रवोमित्रायंप्रमित्रयोर्वरुणयोरितिनवांयातं
मित्रावरुणेतियाज्यांयाहिसुषुमाहितइतिषट्स्तोत्रियानुरूपांवनंतराःसप्तेंद्रत्वावृषभमुद्धेदभीतितिस्रंइंद्रक्रतुविदंसुत
शि. वे. २२ मितियाज्यैंद्राग्नीआगतंसुतंमिंद्राग्नीअपसस्परि । तोशावृत्रहणाहुवइतितिस्रंइहेंद्राग्नीउपेयंवांमस्यमन्मनइतिनवैंद्रा

श्नीआगतंसुतमितियाज्या ॥ १० ॥ संस्थितेषुसवनेषुंषोळशिनिचातिरात्रेंप्रशास्तःप्रसुहीत्युक्तःसर्पतेतिप्रशास्ताति
सृजेंद्धोतादक्षिणेनौदुंबरीमंजसैंतरेपरयाद्वारौत्तरांवेदिःश्रोणीमभिनिःसर्पतिंमृगतीर्थमित्येतदाचक्षतंएतेननिष्क्रम्यंय
थार्थंनत्वेवान्यन्मूत्रेभ्यंएतेननिष्क्रम्यकृत्वोदकार्थंवेद्यांसमस्तानुपस्थायापरयाद्वारांनित्ययावृतासदोद्वार्येचाभिमृश्यं
तूष्णींप्रतिप्रसर्पंत्येषावृत्सर्पतेतिवचनैंपूर्वयैवगृहपतिः ॥ ११ ॥ एतस्मिन्कालेग्रावस्तुत्प्रपद्यतेंतस्योक्तमुपस्थानंपूर्व
याद्वाराहविर्धानेप्रपद्यंदक्षिणस्यहविर्धानस्यंप्रागुदगुत्तरस्यांक्षशिरसस्तृणंनिरस्यंराजानमभिमुखोवतिष्ठतेंनात्रोपवेश
नौयोअद्यसौम्यइतिंत्वथास्मा अध्वर्युरुष्णीषंप्रयच्छतिंतदंजलिनाप्रतिगृह्यंत्रिःप्रदक्षिणंशिरःसमुखंवेष्टयित्वायदासोमां
शूनभिषवायव्यपोहंत्यथग्राव्णोभिष्टुयान्मंध्यमस्वरेणेदंसवनंमभित्वादेवसवितंर्युंजतेमनउतयुंजतेधियंआतूनइंद्रक्षु
मंतंमाचिदन्यद्विशंतंप्रैतेवदंत्वित्यर्बुदंप्रागुत्तमायांआवक्रंजसेप्रवोग्रावाणइतिसूक्तयोरंतरोपरिष्टात्पुरस्ताद्वापावमा
नीरोप्यंयथार्थमावाग्रहग्रहणाच्छिष्टयापरिधायंवेद्यंयजमानस्योष्णीषमादायंयथार्थमंत्येष्वहःसुप्रतिप्रयच्छेदितरेष्व
थापरमभिरूपंकुर्यादितिगाणगारिंराप्यायस्वसमेतुतइतितिस्रोंमृजंतित्वादशक्षिपंएतमुत्यंदशक्षिपोंमृज्यमानःसुह ॥ ३२ ॥
स्त्यांदशभिर्विवस्वतोंदुहंतिसप्तैकामधुक्षत्पिप्युषीमिषंमाकलशेषुधावतिंपवित्रेपरिषिच्यतइत्येकांकलशेषुधावतिंश्ये
नोवर्मंविगाहतइतिद्वेंएतासामर्बुदस्यचतुर्थींमुद्धृत्यंतृचांतेषुतृचानवदध्यांदाप्याय्यमानेप्रथमंमृज्यमानेद्वितीयंदुह्यमा

नेतृतीयंमासिच्यमानेचतुर्थंबृहच्छन्दे बृहच्छन्दे चतुर्थीमाचिदन्यद्विशंसतेतिंयदिग्रावाणःसंह्रादेरन्त्समानमन्यदर्बुद
मेवेत्येकेंप्रवोग्रावाणइत्येकंउक्तंसर्पणंस्तुतेमाध्यंदिनेंपवमानेविहृत्यांगारान् ॥ १२ ॥ दधिघर्मेणचरंतिप्रव
र्ग्यवांश्चेत्तस्योकमृगावानेंघर्मेणेज्याभक्षिणश्चहोतर्वदस्वेत्युक्तंउत्तिष्ठतावपश्यतेत्याहंश्रातंहविरित्युक्तःश्रातंहविरित्य
न्वाहंश्रातंमन्यऊधनिश्रातमग्नावितियजत्यंग्नेवीहीत्यनुवषट्कारोंदधिघर्मस्याग्नेवीहीतिवा ॥ मयित्यदिंद्रियंबृहंन्म
यिद्युम्नमुतक्रतुः ॥ त्रिश्रुद्धर्मोविभातुमआकूत्यामनसासहंविराजाज्योतिषासह ॥ तस्यदोहमशीयतेंतस्यतइंद्रपी
तस्यंत्रिष्टुपछंदसउपहूतस्योंपहूतोभक्षयामीतिभक्षजपोयंधिष्ण्यवतांप्रांचंमंगारैरभिविहरेयुंःपश्चात्स्वस्यधिष्ण्यस्योपवि
श्योपहवमिष्ट्वांपरित्वाग्नेपुरंवयमितिजपेंदनिष्ठादीक्षितेंःसवनीयानांपुरस्तादुपरिष्टाद्वांपशुपुरोळाशेनचरंत्यक्रियामेकें
न्यत्रतदर्थवादवदर्नात्क्रियामाश्मरथ्योन्विताप्रतिषेधात्पुरोळाशाद्युक्तमानाराशंससादनांन्नत्विहद्विदेवत्यांएतस्मि
न्कालेदक्षिणानीयंतेंहीनैकाहेषुकृष्णाजिनानिधून्वंतंःस्वयमेवदक्षिणापथंयंतिंदीक्षिताःसत्रेष्विदमहंमांकल्याण्यैकीर्त्यै
तेजसेयशसेमृतत्वायात्मानंदक्षिणान्नयानीतिजपंतंउन्नेष्यमाणास्वांग्नीध्रीयआहुतीजुह्वतिंददानीत्यग्निर्वदतिंवायुराह
तथेतितत् ॥ हंतेतिचंद्रमाःसत्यमादित्यंःसत्यमोमापस्तत्सत्यमाभरन् ॥ दिशोयज्ञस्यदक्षिणांदक्षिणानांप्रियोभूया
संस्वाहा ॥ प्राचिह्येधिप्राचिजुषाणांप्राच्याज्यस्यवेतुस्वाहेतिद्वितीयां ॥ कइदंकस्माअदात्कामःकामायादांत्कामोदा

॥ ३४ ॥ ताकामः प्रतिग्रहीतांकामंसमुद्रमाविशकामेनत्वाप्रतिगृह्णामिकामैतत्तेवृष्टिरसिद्यौस्त्वाददातुंपृथिवीप्रतिगृह्णात्वित्य
तीतास्वनुमंत्रयेतंप्राण्यभिमृशेदप्राणिकन्यांचंसर्वत्रचैवंप्रतिगृह्याग्नीध्रीयंप्राप्यंहविरुच्छिष्टंसर्वेंप्राश्नीयुंःप्राश्यप्रतिप्रस्
प्य ॥ १३ ॥ मरुत्वतीयेनग्रहेणचरंतींद्रमरुत्वइहपाहिसोमंहोतायक्षदिंद्रंमरुत्वंतंसजोषाइंद्रसगणोमरुद्भिरितिंभक्षयि
त्वैतत्पात्रंमरुत्वतीयंशस्त्रंशंसेदध्वर्योशोंसावोमितिमाध्यंदिनेंशस्त्रादिष्वाहावंआत्वारथंयथोतयंइदंवसोसुतमंधइति
मरुत्वतीयस्यप्रतिपदनुचरांविंद्रनेदीयएदिहीतींद्रनिहवःप्रगाथंःप्रनूनंब्रह्मणस्पतिरितिब्राह्मणस्पत्यस्तृचांःप्रतिपदनु
चराद्वृचाःप्रगाथांआतोर्धर्चंसर्वंस्तोत्रियानुरूपांःप्रतिपदनुचराःप्रगाथांःसर्वत्रप्राक्चछंदांसिंत्रैष्टुभात्सर्वांश्चैवाचतुष्प
दांःपंक्तिषुद्विरवस्येंद्वयोर्द्वयोःपादयोरंर्धर्चशोवाश्विनेपच्छःशस्यगतांतुंपच्छःसमासमुत्तमेपदेंपच्छोन्यत्पादैरवसायार्ध
र्चांतैःसंतानोंग्निर्नेतात्वंसोमक्रतुभिंःपिन्वंत्यपइतिधाय्यांःप्रवइंद्रायबृहतइतिंमरुत्वतीयःप्रगाथोंजनिष्ठाउग्रइत्येकभूय
सीःशस्त्वांमरुत्वतीयांनिविदंदध्यांत्सर्वत्रैवमयुजासुमाध्यंदिनेएकांतृचेर्धायुग्मास्वेकांशिष्ट्वातृतीयसवनेंक्षिणीमृजानः
परिदध्यांध्यायन्नेनआत्मनोंन्यत्राप्येतयापरिदधदेवंमुक्थंवाचींद्रायशृण्वतेत्वेतिशस्त्वाजपेंद्येत्वाहिहत्येमघवन्नवर्ध ॥ ३४ ॥
न्नितियाज्या ॥ १४ ॥ निष्केवल्यस्यांभित्वाशूरनोनुमोंभित्वापूर्वपीतयइतिंप्रगाथौस्तोत्रियानुरूपौंयदिरथंतरंपृष्ठंयद्यु
वैबृहंत्त्वामिद्धिहवामहेंत्वंह्येहिचेरवइतिंप्रगाथाएतेभवंतिंतान्द्वेतिस्रस्कारंशंसेंच्चतुर्थषष्ठौपादौंबार्हतेप्रगाथेपुनरभ्यसि

त्वोत्तरयोरवस्यैंद्बृहतीकारंचेत्तावेवार्द्धिस्तृतीयपंचमौतुकाकुभेषुंप्रत्यादानाद्युत्तरैवंमेतत्पृष्ठेष्वहःस्विंद्रनिहवब्राह्मणस्प
त्यान्बृहतीकारमितरेषुपृष्ठेषुंबृहद्रथंतरयोश्चतृचस्थयौंर्होत्रकाश्चयेषांप्रगाथांस्तोत्रियानुरूपाःसर्वमन्यद्यथास्तुतंपरिमि
तशस्यएकाहःसयद्युभयसामायत्पवमानैंतस्ययोनिरनुरूपौयोनिस्थानएवैनामन्यत्रशंसेदूर्ध्वंधाय्यायायोनिस्थानंमने
कानंतर्येसकृत्पृथग्वाह्वानंमेवमूर्ध्वमिंद्रनिहवात्प्रगाथानाँयद्वावानेतिधाय्यांपिबासुतस्यरसिनइतिसामप्रगाथंइंद्रस्यनु
वीर्याणीत्येतस्मिन्नैंद्रींनिविदंदध्यांदनुब्राह्मणंवास्वरउक्थंवाचींद्रायोपश्रृण्वतेत्वेतिशस्त्वाजपेंत्पिबासोमामिंद्रमंदतुत्वे
तियाज्या ॥ १५ ॥ होत्रकाणांकयानश्चित्रआभुवत्कयात्वंनऊत्याकस्तमिंद्रत्वावसुंसद्योहजातएवात्वामिंद्रोंशन्नुषुणः
सुमनाउपाकइतियाज्यांतंवोदस्ममृतीषहंतत्त्वायामिसुवीर्यमितिंप्रगाथौस्तोत्रियानुरूपांउदुत्येमधुमत्तमांइंद्रःपूर्भिदु
दुब्रह्माण्यृंजीषीवज्रीवृषभस्तुराषाळितियाज्यांतरोभिर्वोविदद्वसुंतरणिरित्सिषासतीतिंप्रगाथौस्तोत्रियानुरूपांउदिन्व
स्यरिच्यतेंभूयइदिमामूर्ष्वित्युपोत्तमामुद्धरेत्सर्वत्रंपिबावर्धस्वतवघासुतासइतियाज्या ॥ १६ ॥ अथतृतीयसवनंमु
त्तमस्वरेणादित्यग्रहेणचरंत्यादित्यानामवसानूतनेनंहोतायक्षदादित्यांन्प्रियान्प्रियधाम्नंआदित्यासोअदितिर्मादयंता
मितिंनैतंग्रहमीक्षेतंहूयमानंस्तुतआर्भवेंपवमानेविहृत्यांगारांन्मनोतादिपश्विळांतंपशुकर्मकृत्वांपुरोळाशाद्युक्तमाना
राशंससादनांत्सन्नेषुम्रदिष्ठात्पुरोळाशस्यंतिस्रस्तिस्रःपिंड्योदक्षिणतःप्रतिस्वंचमसेभ्यःस्वेभ्यःपितृभ्यउपास्येयुरत्रपित

रोमादयध्वँयथाभागमावृषायध्वमितिंसव्यावृतआग्नीध्रीयंप्राप्यंहविरुच्छिष्टंसर्वेप्राश्नीयुः प्राश्यप्रतिप्रसृप्य ॥ १७ ॥
सावित्रेणग्रहेणचरँत्यभूद्देवः सवितावंद्योनुनोंहोतायक्षद्देवंसवितारँदमूनादेवः सवितावरेण्योंदधद्रत्नादक्षपितृभ्यआयु
नि ॥ पिबात्सोमंममदन्नेनमिष्टयंःपरिज्माचिद्रमतेअस्यधर्मणीतिंवषट्कृतेहोतावैश्वदेवंशस्त्रंशंसेत्सर्वादिशोध्यायेच्छं
सिष्यंन्यस्यांद्वेष्योनतामध्वर्योंशोशोंसावोमितितृतीयसवनेंशस्त्रादिष्वाहावंस्तत्सवितुर्वृणीमहेंद्यानोदेवसवितरितिंवै
श्वदेवस्यप्रतिपदनुचरांवभूद्देवएकयाचदशभिश्चस्वभूतेंद्वाभ्यामिष्टयेविंशत्याचंतिसृभिश्चवहसेत्रिंशताचंनियुद्भिर्वाय
विहताविमुंचंप्रद्यावेतिंदैर्घतमसँसुरूपकृत्नुमूतयेंतक्षन्रथमयंवेनश्चोदयत्पृश्निगर्भायेभ्योमातामधुमत्पिन्वतेपयंएवापित्रे
विश्वदेवायवृष्णंआनोभद्राःऋतवोयंतुविश्वतइतिंनववैश्वदेवँवैश्वदेवाग्निमारुतयोःसूक्तेषुसावित्रादिनिविदोदध्यांच्च
तस्रोवैश्वदेवउत्तरास्तिस्रउत्तरैंसूक्तानांतद्धिदैवतंदैवतेनसूक्तांतोंधाय्याश्चात्रैकपातिनींरदितिद्यौंरदितिरंतरिक्षमितिप
रिदध्यांत्सर्वत्रवैश्वदेवेद्विःपच्छोर्धर्चशः सकृद्भूमिमुपस्पृशन्नुक्थंवाचींद्रायदेवेभ्यंआश्रुत्यैत्वेतिशस्त्वाजपेंद्विश्वेदेवाः
शृणुतेमंहवंमइतियाज्या ॥ १८ ॥ त्वंसोमपितृभिःसंविदानंइतिसौम्यस्ययाज्यांतंघृतयाज्याभ्यांमुपांशूभयतःप ॥ ३५ ॥
रियजंतिंघृताहवनोघृतपृष्ठोअग्निर्घृतेश्रितोघृतम्वस्यधाम ॥ घृतप्रुषस्त्वाहरितोवहंतुघृतंपिबन्यजसिदेवदेवानितिपुर
स्तांदुरुविष्णोविक्रमस्वोंरुक्षयायनस्कृधि ॥ घृतंघृतयोनेपिबंप्रप्रयज्ञपतिंतिरेंत्युपरिष्टादन्यतरतश्चेदंन्नाविष्णूमहि

धामप्रियंवामित्युपांश्वेवाहृतंसौम्यंपूर्वमुद्गातृभ्योगृहीत्वावेक्षेतंयत्तेचक्षुर्दिवियत्सुपर्णेयेनैकराज्यमजयोहिना ॥ दीर्घं
यच्चक्षुरदितेरनंतंसोमोनृचक्षामयितद्दधात्वित्यंपश्यन्हृदिस्पृक्क्रतुस्पृग्वर्चोधावर्चोअस्मासुधेहि ॥ यन्मेमनोयमंगतं
यद्वामेअपरागतं ॥ राज्ञासोमेनतद्वयंमस्मासुधारयामसि ॥ भद्रंकर्णेभिःशृणुयामदेवाइतिचांगुष्ठोपकनिष्ठिकाभ्यां
माज्येनाक्षिणीअज्यछंदोगेभ्यःप्रयच्छेद्विहृतेषुशालाकेष्वाग्नीध्रःपात्नीवतस्ययजत्यैभिरग्नेसरथंयाह्यर्वाङित्युपांश्वेवने
ष्टारंविसंस्थितसंचरेणानुप्रपद्यतस्योपस्थउपविश्यभक्षयेत् ॥ १९ ॥ अथयथेतंस्वभ्यग्रमाग्निमारुतंतस्याद्यांपच्छऋगा
वानंपच्छःशस्याचेदर्धर्चशइतरांसंतानमुत्तमेनवचनेनंवैश्वानरायपृथुपाजसेशंनःकरत्यर्वतेप्रत्वक्षसःप्रतवसोयज्ञायज्ञा
वोअग्नयेदेवोवोद्रविणोदाइतिप्रगाथौस्तोत्रियानुरूपौप्रतव्यसींनव्यसींमापोहिष्ठेतितिस्रोवियतमपउपस्पृशन्नन्वारब्धे
ष्वपावृतशिरस्कंइदमादिप्रतिप्रतीकमाह्वानमुतनोहिर्बुध्न्यःशृणोतुदेवानांपत्नीरुशतीरवंतुनइतिद्वेराकामहमितिद्वेपा
वीरवीकन्याचित्रायुरिमंयमप्रस्तरमाहिसीदेम।तलीकव्यैर्यमोअंगिरोभिरुदीरतामवरउत्परासआहंपितृन्त्सुविदत्राँऽ
अवित्सींदंपितृभ्योनमोअस्त्वद्यस्वादुष्किलायमितिचतस्रोमध्येचाह्वानमदामोदैवमोदामोदैवोमित्यासांप्रतिगरौययो
रोजसास्कभितारजांसिवीर्येभिर्वीरतमाशविष्ठा ॥ यापत्येतेअप्रतीतासहोभिर्विष्णूअगन्वरुणापूर्वहूतौ ॥ विष्णोर्नुकंवी
र्याणिप्रवोचंतंतुतन्वन्त्रजसोभानुमन्विह्येवानइंद्रोमघवाविरप्शीतिपरिदध्यांद्भूमिमुपस्पृशन्नुत्तमेनवचनेनंध्रुवावनय

नंकांक्षेंदुक्थंवाचींद्रायदेवेभ्यंआश्रुतायत्वेतिशस्त्वाजपैंदग्नेमरुद्भिःशुभयद्भिर्ऋक्वभिरितियाज्यैत्यंतोग्निष्टोमोग्निष्टोमः
॥ २० ॥ इत्याश्वलायनश्रौतसूत्रेपूर्वषट्केपंचमोऽध्यायः ॥ ५ ॥ ॥ ॥ ॥
॥ ॐम् ॥ उक्थ्येतुहोत्रकाणांमेहूषुब्रवाणितंआग्निरगामिभारतंश्चर्षणीधृतमस्तभ्नाद्द्यामसुरइतितृचांविंद्रावरु
णायुवमावांराजानांविंद्रावरुणामधुमत्तमस्येतियाज्यांवयमुत्वामपूर्व्यंयोनइदमिदंपुरेतिंप्रगाथौसर्वाःककुभंःप्रमंहि
ष्ठायोदग्रुतोच्छामइंद्रंबृहस्पतेयुवमिंद्रश्चवस्वइतियाज्यांधाहींद्रगिर्वणइयंतइंद्रगिर्वणंऋतुर्जनित्रीनूमर्तोभवामित्रःसंवां
कर्मणैंद्राविष्णूमदपतीमदानामितियाज्येत्यंतउक्थ्यः ॥ १ ॥ अथषोळश्यंसाविसोमइंद्रतइतिस्तोत्रियानुरूपांवात्वा
वहंतुहरयइतितिस्रोंगायत्र्यउपोषुश्रृणुहीगिरंःसुसंदृशंत्वावयंमघवन्नित्येकाद्वेचपंक्तीयदिंद्रपृतनाज्येऽयंतेअस्तुहर्यंत
इंत्यौष्णिहबार्हतौतृचावांधूर्ष्वस्माइतिद्विपदांब्रह्मन्वीरब्रह्मकृतिंजुषाणइतित्रिष्टुंबेषब्रह्मायऋत्वियंइंद्रोनामश्रुतोगृणे ।
विस्रुतयोयथापथंइंद्रत्वद्यंतिरातयः ॥ त्वामिच्छवसस्पतेंयंतिगिरोनसंयतइतितिस्रोद्विपदांःप्रतेमहेविदथेशंसिषंहरी
इतितिस्रोजगत्यंस्त्रिकद्रुकेषुमहिषोयवाशिरं ॥ प्रोष्वस्मैपुरोरथमितितृचावातिच्छंदसौंपच्छःपूर्वंद्वेधाकारंमुत्तरमनुष्टु ॥ ३६ ॥
ब्गायत्रीकारंप्रचेतनप्रचेतयायाहिपिबमत्स्व ॥ ऋतुश्छंदऋतंबृहत्सुम्नआधेहिनोवसवित्यनुष्टुंप्प्रप्रवस्त्रिष्टुभमिषमर्चत
प्रार्चत ॥ योव्यतींरफाणयदितितृचाआनुष्टुभांउत्तमस्योत्तमांशिष्टौत्तमांनिविदंदध्यांल्लिंगैःपदानुपूर्वंव्याख्यास्यामों

मत्सदहिंवृत्रमपांजिन्वदुदार्यमुग्रांदिविसमुद्रंपर्वताँऽइहौंद्यद्भ्रस्यविष्टपमितिपरिधानीयैंवाह्येवैवाहींद्रं ॥ एवाहिश
क्रोवशीहिशक्रइतिजपित्वापाः पूर्वेषांहरिवः सुतानामितियजति ॥२॥ विहृतस्येंद्रजुषस्वंप्रवहायाहिशूरहरीइह ॥ पिबा
सुतस्यमतिर्नमध्वश्चकानश्चारुर्मदाय ॥ इंद्रजठरंनव्यंनंपृणस्वमधोर्दिवोन ॥ अस्यसुतस्यस्वर्णोपत्वामदाः सुवाचोअ
स्थुः ॥ इंद्रस्तुराषाण्मित्रोनंजघानवृत्रंयतिर्न ॥ बिभेदवलंभृगुर्नससाहेशत्रून्मदेसोमस्य ॥ श्रुधीहवंनइंद्रोनंगिरोजुष
स्ववज्रीन ॥ इंद्रसयुग्भिर्दिद्युंनंमत्स्वामदायमहेरणाय ॥ आत्वाविशंतुकविर्नसुतासइंद्रत्वष्टान ॥ पृणस्वकुक्षीसोमो
नांविद्धीशूरधियाहियानः ॥ साधुर्नगृध्नुर्ऋभुर्नास्तेवशूरश्चमसोन ॥ यातेवभीमोविष्णुर्नत्वेषः समत्सुक्रतुर्नेतिस्तोत्रिया
नुरूपांऊर्ध्वंस्तोत्रियानुरूपाभ्यांतदेवशस्यंविहरेंत्पादान्व्यवधायार्धर्चशः शंसेंत्पूर्वासांपूर्वाणिपदानिगायत्र्यः पंक्तिभिः
पंक्तीनांतुद्वेद्वेपदेशिष्येतेताभ्यांप्रणुयांदुष्णिहोबृहतीभिंरुष्णिहांतूत्तमान्पादान्द्वौकुर्याच्चतुरक्षरंमाद्यंद्विपदाश्चतुर्धाकृ
त्वांप्रथमात्रिष्टुभोत्तराजगतीभिंरुत्तमायाश्चतुर्थमक्षरमंत्यंपूर्वस्याद्यमुत्तरस्यांनुष्टुभमतिछंदः स्ववदध्यांद्वितीयतृतीययो
स्तृतीययोः पादयोरवसानतउपदध्यात्प्रचेतनेतिपूर्वस्यांप्रचेतयेत्युत्तरस्यांमुत्तरास्वितरान्पादान्षष्ठान्कृत्वानुष्टुप्कारंशं
सेंदूर्ध्वंस्तोत्रियानुरूपाभ्यांमातोविहृतस्तत्रप्रतिगरंओथामोदैवंमदेमदामोदेवोमथेतियाज्यांजपेनोपसृजेंदेवाह्येवापाः पू
र्वेषांहरिवः सुतानामेवाहींद्रं ॥ अथौंइदंसवंनंकेवलंते ॥ एवाहिशक्रोममद्धिसोमंमधुमंतामिंद्रवशीहिशक्रः सत्रावृषंजठ

रआवृषस्वेतिसमानमन्यत्स्तोत्रियायंनिविदेपरिधानीयायाइत्याहावआहृतंषोळशिपात्रंसमुपहावंभक्षयंतिंघर्मेचभक्षि
णोमैत्रावरुणंस्त्रयश्छंदोगाइंद्रषोळशिन्नोजस्विस्त्वंदेवेष्वस्योजस्वंतंमामायुष्मंतंवर्चस्वंतंमनुष्येषुकुरु ॥ तस्यतइंद्रपीत
स्यानुष्टुपछंदसउपहूतस्योपहूतोभक्षयामीतिभक्षजपः ॥ ३ ॥ अतिरात्रेपर्यायाणामुक्तःशस्योपायोहोतुरपियथाहोत्रका
णांप्रथमेपर्यायेहोतुराद्यांवर्जयित्वाप्रत्यृचंस्तोत्रियानुरूपेषुप्रथमानिपदानिद्विरुक्त्वावस्यंतिशिष्टेसमसित्वाप्रणुवंतिस
र्वेसर्वासांमध्यमेमध्यमानिप्रत्यादायंऋगंतैःप्रणुवंत्युत्तमान्युत्तमेचतुरक्षराणित्वच्छावाकश्चतुःशस्त्राःपर्यायाहोतुराद्यं
याज्याभ्यःपूर्वेपर्यासाःपांतमावोअंधसोपादुशिग्र्यंधसंस्त्यमुवःसत्रासाहमितिसूक्तशेषोभित्यंमेषमध्वर्यवोभरतेंद्राय
सोममितियाज्याप्रवइंद्रायमादनंप्रकृतान्यृजीषिणःप्रतिश्रुतायवोधृषदितिपंचदशंदिवश्चिदस्येतिपर्यासःसनोनव्येभि
रितिचास्यमदेपुरुवर्पांसिविद्वानितियाज्यावयमुत्वातदिदर्थावयमिंद्रत्वायवोभिवार्त्रहत्यायेत्युत्तमामुद्धरेदिंद्रोअंगम
हद्भयमंभिन्यूषुवाचमप्सुधूतस्यहरिवःपिबेहेतियाज्यैंद्रायमद्वनेसुतमिंद्रमिद्गाथिनोबृहदैंद्रसानसिमेतोन्विंद्रंस्तवामे
शानंमानोअस्मिन्मघवन्निंद्रपिबतुभ्यंसुतोमदायेतियाज्यायंतइंद्रसोमोयंतेमानुषेजनंउद्धेदभीत्युत्तमामुद्धरेदहंभुवम ॥ ३७ ॥
प्राय्यस्यांधसोमदायेतियाज्यातूनइंद्रक्षुमंतमाप्रद्रवपरावतोनह्यन्यंबळाकरमित्यष्टावींखयंतीरहंदापातासुतमिंद्रोअ
स्तुसोमंहंतावृत्रमितियाज्याभित्वावृषभासुतेभिप्रगोपतिंगिरातूनइंद्रमद्यगितिसूक्तेंअश्वावतिप्रोग्रांप्रीतिंवृष्णइयमिंस

त्यामितियाज्यैंदंवसोसुतमंधंइंद्रेहिमत्स्यंधसंःप्रसम्राजमुपक्रमस्वाभरघृषतातदस्मैनंव्यमस्यपिबयस्यजज्ञानइंद्रेतिया
ज्यैंदंह्यन्वोजसामहांइंद्रोयओजसांसमस्यमन्यवेविशइतिद्विचत्वारिंशंद्विश्वजितेतिष्ठाहरीरथआयुज्यमानेतियाज्यां
त्वेतानिषीदतात्वशत्रवागार्हिनकिरिंद्रत्वदुत्तरइत्युत्तमामुद्धरेंच्छ्त्तेदधामीदंत्यत्पात्रमिंद्रपानमितियाज्यांयोगेयोगेतव
स्तरंयुंजंतिब्रध्नमरुषंयदिंद्राहंप्रतेमहंऊतीशचीवस्तववीर्येणेतियाज्यैंद्रःसुतेषुसोमेषुंयइंद्रसोमपातमंआघायेअग्निमिंधत
इतिसप्तदशंयइंद्रचमसेष्वासोमंःप्रवःसतांप्रोद्रोणेहरयःकर्मांग्मन्निितियाज्यैंतिपर्यायाःपर्यासवर्जंगायत्राः ॥ ४ ॥ संस्थि
तेष्वाश्विनायस्तुवतेशंसिष्यंन्विसंस्थितसंचरेणनिष्क्रम्यांग्नीध्रीयेजान्वाच्याहुतीर्जुहुयांदग्निरज्वीगायत्रेणच्छंदसांतम
श्यांतमन्वारभेंतस्मैमामवतुतस्मैस्वाहा ॥ ऊषाअज्विनीत्रैष्टुभेनच्छंदसांतामश्यांतामन्वारभेंतस्यैमामवतुतस्यैस्वाहा ॥
अश्विनावज्विनौजागतेनच्छंदसांतावश्यांतावन्वारभेंताभ्यांमामवतुताभ्यांस्वाहा ॥ बण्महाँऽअसिसूर्येतिद्वाभ्यांमिं
द्रंवोविश्वतस्परीतिचंप्राश्याज्यशेषमपउपस्पृशेन्नाचामेंद्विज्ञायतेदेवरथोवाएषयद्धोतांनाक्षमद्भिःकरवाणीतिंप्राश्य
प्रतिप्रसृप्यंपश्चात्स्वस्यधिष्ण्यस्योपविशेंत्समस्तजंघोरुरंरत्निभ्यांजानुभ्यांचोपस्थंकृत्वांयथाशकुनिरुत्पतिष्यंन्नुपस्थकृत
स्त्वेवाश्विनंशंसेंदग्निर्होतागृहपतिःसराजेतिंप्रतिपदेकपातिनीपच्छंएतयाग्नेयंगायत्रमुपसंतनुयांत्प्रातरनुवाकन्यायेनं
तस्यैवसमाम्नायस्यंसहस्रावममोदेतोःशंसेंद्धार्हतास्त्रयस्तृचांःस्तोत्रियाःप्रगाथावांतान्पुरस्तादनुदैवतंस्वस्यच्छंदसोय

थास्तुतंशंसेद्येषुवान्येषुपच्छोद्विपदाउपसंतनुयादेकपदास्ताभ्यश्चोत्तराविच्छंदसउद्धरेदपिवातन्यायेनशंसनंनतुपच्छो
न्यास्त्रिष्टुब्जगतीभ्यःपांक्तेनोदितेसौर्याणिप्रतिपद्यतेसूर्योनोदिवउदुत्यंजातवेदसमितिनवचित्रंदेवानांनमोमित्रस्येंद्र
क्रतुंनआभराभित्वाशूरनोनुमोबहवःसूरचक्षसइतिप्रगाथामहीद्यौःपृथिवीचनस्तेहिद्यावापृथिवीविश्वशंभुवाविश्वस्य
देवीमृचयस्यजन्मनोनयारोषातिनग्रभदितिद्विपदाबृहस्पतेअतियदर्योअर्हादितिपरिधानीयाप्रतिपदेपरिधानीयायाइ
त्याहावोबृहत्सामचैत्तस्ययोनिंप्रगाथेषुद्वितीयांतृतीयांवानवाश्विनेनग्रहेणसपुरोळाशेनचरंतीमेसोमासस्तिरोअन्ह्यास
स्तीव्रास्तिष्ठंतिपीतयेयुवभ्यां ॥ हविष्मतानासत्यारथेनायातमुपभूषतंपिबध्याइत्यनुवाक्याहोतायक्षदश्विनासोमानां
तिरोअन्ह्यानामितिप्रैषःप्रवामंधांसिमद्यान्यस्थुरुभापिबतमश्विनेतियाज्येअध्यर्धामनवानंयद्येतस्यपुरोळाशस्यस्विष्ट
कृदाचरेयुःपुरोळाअग्नेपचतोग्नेवृधानआहुतिमितिसंयाज्ये ॥ ५ ॥ यदिपर्यायानभिव्युच्छेत्सर्वेभ्यएकंसंभरेयुःप्रथमा
द्धोताद्वितीयान्मैत्रावरुणोब्राह्मणाच्छंसीचोत्तमादच्छावाकोद्वौचेद्द्वौप्रथमाद्वाउत्तमादपिवासर्वेस्युःस्तोमनिर्ह्रस्तांऊर्ध्वं
स्तोत्रियानुरूपेभ्यःप्रथमोत्तमांस्तृचांछंसेयुर्निर्ह्रासएवैकस्मिन्होतृवर्जमित्येकआश्विनायैकस्तोत्रियोग्नेविवस्वदुषसइति ॥ ३८ ॥
तंपुरस्तादनुदैवतंस्वस्यच्छंदसोयथास्तुतंशंसेत्रीणिषष्टिशतान्याश्विनंविमतानांप्रसवसंनिपातेसंसवोनंतर्हितेषुनद्यावा
पर्वतेनवाप्येकंतर्हितेष्वपितथासतिसंत्वरादेवतावाहनात्कयाशुभेतिचमरुत्वतीयेपुरस्तात्सूक्तस्यशंसेद्योजातएवेतिनि

ष्केवल्यैं ममाग्नेवर्चइतिवैश्वदेवसूक्तस्यापिवैतेष्वेवनिविदोदध्यादुद्धरेदितराणिस्थानंचेन्निविदोतिहरेन्माप्रगामेतिपुर
स्तात्सूक्तंशस्त्वान्यस्मिंस्तद्दैवतेदध्यात् ॥ ६ ॥ सोमातिरेकेस्तुतशस्त्रोपजनःप्रातःसवनेस्तिसोमोअयंसुतोगौर्धयतिम
रुतामितिस्तोत्रियानुरूपौमहाँऽइंद्रोयओजसातोदेवाअवंतुनइत्यैंद्रीभिर्वैष्णवीभिश्चस्तोममतिशस्यैंद्रायजेद्वैष्णव्यावैं
द्रावैष्णव्येतिगाणगारिर्दैवतप्रधानत्वात्संवाकर्मणासमिषाहिनोमीतिमाध्यंदिनेबण्महाँऽअसिसूर्योदुत्यद्दर्शतंवपुरिति
प्रगाथौस्तोत्रियानुरूपौमहाँइंद्रोनृवद्विष्णोर्नुकंयाविश्वासांजनितारामतीनामितियाज्यातृतीयसवनउत्तरोत्तरांसंस्था
मुपेयुरातिरात्रादतिरात्राच्चेत्प्रतत्तेअद्यशिपिविष्टनामंप्रतद्विष्णुस्तवतेवीर्येणेतिस्तोत्रियानुरूपौमाध्यंदिनेनशेषस्त्वेष
मित्थासमरणंशिमीवतोरितिवायाज्या ॥ ७ ॥ क्रीतेराजनिनष्टेदग्धेवापिदग्धानिसदोहविर्धानान्यनावृताक्रियेरन्ना
वृतावान्यंराजानमभिषुणुयुरनधिगमेपूतीकान्फाल्गुनान्यन्यावाओषधयःपूतीकैःसहप्रायश्चित्तंवाहुत्वोत्तरमालभेत
सुत्यासूक्तमेवमन्येतंप्रतिधुक्प्रातःसवनेशृतंमाध्यंदिनेदधितृतीयसवनेश्रायंतीयंब्रह्मसामंयदिफाल्गुनानिवारवंतीयं
यज्ञायज्ञीयस्यस्थानेश्रायंतीयमेकंएकदक्षिणंयज्ञंसंस्थाप्योदवसायपुनर्यजेततस्मिन्पूर्वस्यदक्षिणांदद्यात्सोमाधिगमेप्र
कृत्या ॥ ८ ॥ दीक्षितानामुपतापेपरिहितेप्रातरनुवाकेनुपाकृतेवापुष्टिपतेपुष्टिश्चक्षुषेचक्षुःप्राणायप्राणंत्मनेत्मानंवाचे
शि. वे. २३ वाचमस्मैपुनर्धेहिस्वाहेतिंब्रह्माहुतिंहुत्वाशीतोष्णाअपःसमानीयैकविंशतिमासुयवान्कुशपिंजूलांश्चावधायंता भिरद्भि

रवर्थंकुर्वीतताभिरेनमाप्लावयेज्जीवानामस्थतां ३॥ इममुंजीवयतजीविकानामस्थतां ३॥ इममुंजीवयतसंजीवानाम स्थतां ३॥इममुंसंजीवयतसंजीविकानामस्थतां ३॥इममुंसंजीवयतेत्यौषधिसूक्तेन चाप्लाव्यानुमृजेदुपांश्वंतर्यामौतेप्रा णापानौपातामसाउपांशुसवनंस्तेव्यानंपात्वसावैंद्रवायवंस्तेवाचंपात्वसौमैत्रावरुणंस्तेचक्षुषीपात्वसावाश्विनंस्तेश्रोत्रं पात्वसावाग्रयणंस्तेदक्षक्रतूपात्वसाउक्थ्यंस्तेंगानिपात्वसौध्रुवंस्तआयुःपात्वसाविति॑यथासनमनुपरिक्रमणंत्रातारमिंद्र मवितारमिंद्रमितिताक्ष्यार्दिर्यद्यप्यन्यदैकाहिकाद्वैश्वदेवंस्वस्त्यात्रेयेनिविदंदध्यात्प्रकृत्यानिगदे ॥ ९ ॥ संस्थितेतीर्थेन निर्हृत्यावभृथेप्रेतालंकारान्कुर्वंतिकेशश्मश्रुलोमनखानिवापयंतिनलदेनानुलिंपंतिनलदमालांप्रतिमुंचंतिनिष्पुरीषमेके कृत्वांपृषदाज्यंपूरयंत्यहतस्यवाससःपाशतःपादमात्रमवच्छिद्यप्रोर्णुवंतिप्रत्यग्दशेनाविःपादमवच्छेदमस्यपुत्राअमाकु र्वीरन्नग्नीनस्यसमारोप्यंदक्षिणतोबहिर्वेदिदहेयुराहार्येणानाहिताग्निंपत्नींचप्रत्येत्याहःसमापयेयुःप्रातरनभ्यासमनभि हिंकृतानिशस्त्रानुवचनाभिष्टवनसंस्तवनानिपुराग्रहग्रहणात्तीर्थेननिष्क्रम्यत्रिःप्रसव्यमायतनंपरीत्यपर्युपविशंतिपश्चा द्धोतोत्तरोध्वर्युस्तस्यपश्चाच्छंदोगाआयंगौःपृश्निरक्रमीदित्युपांशुस्तुवतेस्तुतेहोताप्रसव्यमायतनंपरिव्रजन्स्तोत्रियमनु व्रजेदप्रणुवन्यामीश्वंप्रेहिप्रेहिपथिभिःपूर्व्येभिरितिपंचानांतृतीयमुद्धरेन्स्मैनमग्नेविदहोमाभिशोचइतिषड्पूषात्वेतश्च्या वयतुप्रविद्वानितिचतस्रउपसर्पमातरंभूमिमेतामितिचतस्रःसोमएकेभ्यउरूणसावसुतृपाउदुंबलाविति चसमाप्यंसंचि

॥ ३९ ॥

त्यतीर्थेनप्रपाद्यंयथासनमासादयेयुर्भक्षेषुप्राणभक्षान्भक्षयित्वादक्षिणेमार्जालीयेनिनयेयुर्दक्षिणस्यावावेदिश्रोण्यांसप्त
दशमहर्भवतितिवृतःपवमानारथंतरपृष्ठोग्निष्टोमःसंस्थितेऽवभृथमेकेगमयंत्येतस्यैतदहरभिशब्दयंतोनिर्मंथ्येनवाद
ग्ध्वानिखायसंवत्सरादेनमग्निष्टोमेनयाजयेयुर्नेदिष्ठिनंवादीक्षयेयुरपिवोत्थानंगृहपतांउक्तःस्तुतशस्त्रविकारंएकाहेषुय
यजमानासनेशयीतंसंस्थितेपायतीष्ववभृथंगमयेयुरित्यालेखनःपूर्वेणसदोदहेयुरित्याश्मरथ्यंएषएवावभृथः ॥ १० ॥
अग्निष्टोमोत्यग्निष्टोमउक्थ्यःषोळशीवाजपेयोतिरात्रोप्तोर्यामइतिसंस्थास्तासांयामुपयंतितस्याअंतेयज्ञपुच्छमनुयाजाद्यु
क्तंपशुनाशंयुवाकादुत्तमस्त्विहसूक्तवाकप्रैषौवीवृधतेतिपुरोळाशदेवतांपशुदेवतामेकेयदिसवनीयस्यपशोःपशुपुरोळा
शंकुर्युरवीवृधेतांपुरोळाशैरित्येवब्रूयात्सवनीयैरेवेंद्रोवर्धतेपशुपुरोळाशेनपशुदेवतोर्ध्वंशंयुवाकाद्धारियोजनोपाःसोमम
स्तमिंद्रप्रयाहिधानासोमानामिंद्राद्धिचपिबचंयुनज्मितेब्रह्मणाकेशिनाहरीइतीज्यानुवाक्येअंत्येष्वहस्सुतिष्ठासुकंमघ
वन्मापरागांअयंयज्ञोदेवयाअयंमियेधइतीतरेषुपरायाहिमघवन्नाचयाहीतिवानुवाक्योत्तरवत्स्वहःस्वननुवषट्कृतेतिं
प्रैषंमैत्रावरुणंआहेहमदएवंमघवन्निंद्रतेश्वइत्यंद्येत्यतिरात्रेद्यसुत्यामितिचंतस्यांतंश्रुत्वाग्नीध्रःश्वःसुत्यांप्राहश्वःसुत्यांवा
एषांब्राह्मणानांतामिंद्रायेंद्राग्निभ्यांप्रब्रवीमिमित्रावरुणाभ्यांवसुभ्योरुद्रेभ्यंआदित्येभ्योविश्वेभ्योदेवेभ्योब्राह्मणेभ्यः
सौम्येभ्यःसोमपेभ्योब्रह्मन्वाचंयच्छेति ॥ ११ ॥ आहृतमुन्नेत्राद्रोणकलशंमिळामिवप्रतिगृह्योपहवमिष्ट्वावेक्षेतंहरिव

तस्तेहारियोजनस्यंस्तुतस्तोमस्यशस्त्वोक्थस्यैष्टयजुषो योभक्षौंगोसनिरश्वसानिंस्तस्यतउपहूतस्योपहूतोभक्षयामीतिंप्राण
भक्षंभक्षयित्वांप्रतिप्रदायद्रोणकलशंमात्मानमाप्याय्यंयथाप्रसृप्तंविनिःसृप्याग्नीध्रीयेंविनिःसृप्ताहुतीजुहृत्ययंपीतइंदु
रिंद्रंमदेधांदयंविप्रोवाचमर्चंन्नियच्छन् ॥ अयंकस्यचिद्दुहतादभीकेंसोमोराजानसखायंरिषेधात्स्वाहा ॥ इदंराधो
अग्निनादत्तमागांद्यशोभर्गःसहओजोबलंच ॥ दीर्घायुत्वायशतशारदायंप्रतिगृभ्णामिमहतेवीर्यायस्वाहेंत्याहवनीये
षट्षट्शकलान्यभ्यादधातिंदेवकृतस्यैनसोवयजनमसिस्वाहा ॥ पितृकृतस्यैनसोवयजनमसिस्वाहा ॥ मनुष्यकृतस्यै
नसोवयजनमसिस्वाहा ॥ आत्मकृतस्यैनसोवयजनमसिस्वाहा ॥ एनसएनसोवयजनमसिस्वाहा ॥ यद्वोदेवाश्चकृ
मजिह्वयागुर्विंतिचंद्रोणकलशाद्धानागृहीत्वावेक्षेरन्नांपूर्यास्थामापूरयतंप्रजयाचधनेनचैंद्रस्यकामदुघास्थकामान्मेधु
ङ्क्ष्वैंप्रजांचपशूंश्चेत्यवघ्रायांतःपरिधिदेशेनिवपेयुःप्रत्येत्यतीर्थदेशेंपांपूर्णांश्चमसांस्तान्त्सव्यावृतोप्रजंतिंहरिततृणानि
विमृज्यंप्रतिस्वंचमसेभ्यंस्त्रिःप्रसव्यमुदकैरात्मनःपर्युक्षंतैंदक्षिणैःपाणिभिरितरैर्वाप्रदक्षिणंस्वधापित्रेस्वधापितामहायं
स्वधाप्रपितामहायेत्युक्त्वैंजीवमृतेभ्यःपाणींश्चमसेष्ववधायांप्सुधूतस्यदेवसोमतेमतिविदौंनृभिःसुतस्यस्तुतस्तोमस्यश
स्त्वोक्थस्यैंष्टयजुषोयोभक्षौंगोसनिरश्वसनिंस्तस्यतउपहूतस्योपहूतोभक्षयामीतिंप्राणभक्षान्भक्षयित्वांमाहंप्रजांपरासि
चमिंत्येतेनाभ्यात्मंनिनीयांच्छायंयोमरुतःश्लोकएत्वित्येतयाभिमृशंतिंदधिक्राव्णोअकारिषमित्याग्नीध्रीयेंदधिद्रप्सा


न्प्राइयंसख्यानिविसृजंतंउभाकवीयुवानासत्यादाधर्मणस्पती ॥ परिसत्यस्यधर्मणाविसख्यानिसृजामहइति ॥ १२ ॥
पत्नीसंयाजैश्चरित्वावभृथंव्रजंतिव्रजंतःसाम्नोनिधनमुभयेंत्यवभृथेष्ठ्यातिष्ठंतश्चरंतिप्रयाजाद्यनुयाजांतांनास्यामिळा
नबर्हिष्मंतौप्रयाजानुयाजावप्सुमंतौगायत्रौवारुणंहविरवतेहेळोवरुणनमोभिरितिद्वैअग्नीवरुणौस्विष्टकृदर्थेत्वंनो
अग्नेवरुणस्यविद्वानितिद्वैसंस्थितायांपादानुदकांतेवदध्र्युर्नमोवरुणायाभिष्ठितोवरुणस्यपाशइतिततआचामंतिभक्ष
स्यावभृथोसिभक्षितस्यावभृथोसिभक्षंकृतस्यावभृथोसीतिप्रोथ्यप्रथमेनप्रष्ठीवंतिप्रगिरंत्युत्तराभ्यांततआचम्याप्लवंत
आपोअस्मान्मातरःशुंधयंत्विदमापःप्रवहतंसुमित्र्यानआपओषधयःसंत्वित्येतयावृताभ्युक्षेरन्नेवाप्यदीक्षितांउन्नेनैना
नुन्नयत्युन्नेतरुन्नोन्नयोंन्नेतर्वस्वोअभ्युन्नयानंइत्युन्नीयमानाजपंत्युद्धयंतमसस्परीत्युदेत्यसमानमतऊर्ध्वंहृदयशूलेनासं
स्थाजपांत्संस्थाजपेनोपतिष्ठंतेयेयेपवृत्तकर्माणः ॥ १३ ॥ गार्हपत्यउदयनीययाचरंतिसाप्रायणीययोक्तांपथ्यास्वस्ति
रिहोत्तमाज्यहविषांविपरीताश्चयाज्यानुवाक्यास्तेचैवकुर्युर्येप्रायणीयांप्रकृत्यासंयाज्येसंस्थितायांमैत्रावरुण्यनूबंध्यांस
दस्येकउत्तरवेद्यामेकेंहुतासांवपायांयद्येकादशिन्यग्रतःकृतांग्नीषोमीयेणसंचरेणव्रजित्वांगार्हपत्येत्वाष्ट्रेणपशुनाचरंत्यं
जनादिपर्यग्निकृत्वोत्सृजंत्यपुनरायनायंदित्वध्वर्यवआज्येनसमाप्नुयुस्तथैवहोताकुर्यात्संप्रैषवदादेशान्पशुवन्निपाता
न्यद्यनूबंध्येपशुपुरोळाशमनुदेविकाहवींषिनिर्वपेयुर्धातानुमतीराकासिनीवालीकुहूः ॥ धाताददातुदाशुषेप्राचींजीवा

तुमक्षितां ॥ वयंदेवस्यधीमहिंसुमतिंवाजिनीवतः ॥ धाताप्रजानामुतरायईशेंधातेदंविश्वंभुवनंजजान ॥ धाताकृ
ष्टीरनिमिषाभिचष्टेंधात्रइद्धव्यंघृतवज्जुहोतेतिंदेवीनांचेत्सूर्योद्यौरुषागौः पृथिवींस्त्पुरंधिर्नआगहीतिद्वेंआद्यांतनोषि
रश्मिभिंरावहंतीपोष्यावार्याणिंनताअर्वारेणुककाटोअश्रुतेंनतानशंतिनदभातितस्करौबळित्थापर्वतानाँदह्वाचिद्याव
नस्पतींन्पश्वलाभेपयस्यांमैत्रावरुण्यनूबंध्यास्थानंआज्यभागप्रभृतिवाजिनांतांकर्मिणोवाजिनंभक्षयेयुंःसर्वेतुदीक्षितां:
सर्वेतुदीक्षितोत्थितां:पृथगग्नीन्त्समारोप्यौदग्देवयजनान्मथित्वौदवसानीययायजंतेंपौनराधेयिक्यविकृताविकृता ॥
॥ १४ ॥ ॥ इत्याश्वलायनश्रौतसूत्रेपूर्वषट्केषष्ठोऽध्यायः ॥ ६ ॥ ॥ ॥ ॥

॥ इत्याश्वलायनश्रौतसूत्रेपूर्वषट्कः संपूर्णः ॥

॥ इत्याश्वलायनश्रौतसूत्रेपूर्वषट्कः ॥

॥ अथाश्वलायनगृह्यसूत्रप्रारंभः ॥



श्रीगणेशायनमः ॥ हरिः ॐ३म् ॥ उंक्तानिवैतानिकानिंगृह्याणिवक्ष्यामंस्त्रयःपाकयज्ञांहुताअग्नौहूयमानांअनग्नौप्र हुतांब्राह्मणभोजनेब्रह्मणिहुतांअथाप्यृचउदाहरंतिंयःसमिधायआहुतींयोवेदेनेतिंसमिधमेवापिश्रद्दधानंआदधन्मन्ये तंयजइदमितिनमस्तस्मैयआहुत्यायोवेदेनेतिंविद्ययैवाप्यस्तिप्रीतिंस्तदेतत्पश्यन्नृषिरुवाच ॥ अगोरुधायगविषेद्युक्षाय दस्म्यंवचः ॥ घृतात्स्वादीयोमधुनश्चवोचतेतिंवचएवमइदंघृताच्चमधुनश्चंस्वादीयोस्तिप्रीतिंःस्वादीयोस्त्वित्येवतदा ह ॥ आतेअग्नऋचाहविर्हृदातष्टंभरामसि ॥ तत्तेभवंतूक्षणंऋषभासोवशाउतेंत्येतएवमउक्षाणश्चंऋषभाश्चवशाश्चभवं तिंयइमंस्वाध्यायमधीयतइतिंयोनमसास्वध्वरइतिंनमस्कारेणवैखल्वपिंनवैदेवानमस्कारमतिंयज्ञोवैनमइतिहिब्राह्म णंभवति ॥ १ ॥ अथसायंप्रातःसिद्धस्यहविष्यस्यजुहुयांदग्निहोत्रदेवताभ्यंःसोमायवनस्पतयेग्नीषोमाभ्यांमिंद्राग्नि भ्यांद्यावापृथिवीभ्यांधन्वंतरयइंद्रायंविश्वेभ्योदेवेभ्योब्रह्मणेस्वाहेंत्यथबलिहरणंमेताभ्यश्चैवदेवताभ्योंद्भ्यओषधिवन स्पतिभ्योंगृहायगृहदेवताभ्योंवास्तुदेवताभ्यंइंद्रायेंद्रपुरुषेभ्योंयमाययमपुरुषेभ्योंवरुणायवरुणपुरुषेभ्यंःसोमायसो मपुरुषेभ्यइतिप्रतिदिशंब्रह्मणेब्रह्मपुरुषेभ्यइतिमध्येंविश्वेभ्योदेवेभ्यंःसर्वेभ्योभूतेभ्योंदिवाचारिभ्यइतिदिवांनक्तंचा

१ सौत्रमंत्राणांत्रैस्वर्ये नसंप्रदायस्थेमा बहुलंविपर्यासोपलंभात्। अतस्तएकश्रुत्यैवपठितुंयुक्ताः । अथापित्रिस्वरीरसिका यथात्रानुकुर्वन्तितथादर्शितम् ।

रिभ्यइतिनक्तंरक्षोभ्यइत्युत्तरतः स्वधापितृभ्यइतिंप्राचीनावीतीशेषंदक्षिणानिनयेत् ॥ २ ॥ [अथगृहबलिदेवता
नांकीर्तयिष्यामोयत्रयत्रवसंतिते ॥ द्वारेपितामहंविंद्यात्प्रक्रीळेचउमापतिं ॥ आग्नेय्यांबलभद्रंचयमंविष्णुंचदक्षिणे ॥
॥ २ ॥ नैर्ऋत्यांस्कंदवरुणंचसोमंसूर्यंचपश्चिमे ॥ वायव्यामश्विनौवसवः सोमोरुद्रउत्तरस्यांदिशि ॥ ईशान्यांनक्षत्राणींद्रगृहाः
पूर्वस्यांदिशि ॥ गृहमध्येब्रह्माणंप्रतिष्ठाप्यंऋद्धिर्वृद्धिः श्रियाकीर्तिरिति ॥ (प्रदक्षिणंनिष्क्रम्यगृहनिवेशनांतस्यंप्रा
गुदङ्प्रोक्ष्यबलिंनिवेदयेत् ॥) ततः स्मार्तबलित्रयंगृहांगणेदेयंविहितं ॥ येभूताः प्रचरंतिदिवानक्तंबलिमिच्छंतोवितु[2]
दस्यप्रेष्ठाः ॥ तेभ्योबलिंपुष्टिकामोददामिमयिपुष्टिंपुष्टिपतिर्ददातुस्वाहा ॥ ऐंद्रवारुणवायव्यायाम्यांनैर्ऋतिकाश्च
ये ॥ तेकाकाः प्रतिगृह्णंतुभूम्यांपिंडंमयार्पितं ॥ वैवस्वतकुलेजातौद्वौश्यामशबलौशुनौ ॥ ताभ्यांपिंडोमयादत्तोरक्षे
तांपथिमांसदा ॥ श्वचांडालभूतपतितवायसेभ्योंन्नंभूमौनिक्षिपेत् ॥ यमोसियमदूतोसिवायसोसिनमोस्तुते ॥ सप्त
जन्मकृतंपापंबलिंभक्षंतुवायसाः ॥ गोदोहनमात्रंतत्रस्थित्वाऽतिथिमाकांक्षेत् ॥ हस्तौपादौप्रक्षाल्याचम्यगृहंप्रविशे
त् ॥ शांतापृथिवीशिवमंतरिक्षंद्यौर्नोदेव्यभयंनोऽअस्तु ॥ शिवादिशः प्रदिशऽउद्दिशोनंऽआपोविद्युतः परिपांतुसर्व ॥ २ ॥
तः शांतिः शांतिः शांतिः ॥ इतिपरिशिष्टं ॥] अथखलुयत्रक्कचहोष्यन्त्स्यादिषुमात्रावरंसर्वतः स्थंडिलमुपलिप्योल्लि

१ इदंपरिशिष्टंनप्राचीनकोशेषूपलभ्यते भिन्नभिन्नपाठांतरयुक्तंचयथालब्धनिवेशितमितिज्ञेयम् । २ विदुरस्यप्रेष्ठाः ।

ख्यषड्लेखांउदगायतांपश्चात्प्रागायतेनानांतयोंस्तिस्त्रोमध्येतदभ्युक्ष्याग्निंप्रतिष्ठाप्यान्वाधायपरिस्तीर्यपुरस्ताद्दक्षिणतः
पश्चादुत्तरतइत्युदक्संस्थंतूष्णींपर्युक्षणंपवित्राभ्यामाज्यस्योत्पवनंमप्रच्छिन्नाग्रावनंतर्गर्भौप्रादेशमात्रौकुशौनानांतयो
र्गृहीत्वांगुष्ठोपकनिष्ठिकाभ्यामुत्तानाभ्यांपाणिभ्यांसवितुष्ट्वाप्रसवउत्पुनाम्यच्छिद्रेणपवित्रेणवसोःसूर्यस्यरश्मिभिरिति
प्रागुत्पुनातिसकृन्मंत्रेणद्विस्तूष्णींकृताकृतमाज्यहोमेषुपरिस्तरणंतथाज्यभागौपाकयज्ञेषुब्रह्माचधन्वंतरियज्ञशूलगव
वर्जममुष्मैस्वाहेतिजुहुयादग्निरिंद्रःप्रजापतिर्विश्वेदेवाब्रह्मेत्यनादेशएकबर्हिरिध्माज्यस्विष्टकृतःस्युस्तुल्यकालास्तदे
षाभियज्ञगाथागीयते ॥ पाकयज्ञान्त्समासाद्यैकाज्यानेकबर्हिषः ॥ एकःस्विष्टकृतःकुर्यान्नानापिसतिदैवतइति ॥३॥
उदगयनआपूर्यमाणपक्षेकल्याणेनक्षत्रेचौलकर्मोपनयनगोदानविवाहाःसार्वकालमेकेविवाहंतेषांपुरस्ताच्चतस्रआज्या
हुतीर्जुहुयादग्नआयूंषिपवसऽइतितिसृभिःप्रजापतेनत्वदेतान्यन्यऽइतिचव्याहृतिभिर्वासमुच्चयमेकेनैकेकांचनंत्वमर्य
माभवसियत्कनीनामितिविवाहेचतुर्थीं ॥ ४ ॥ कुलमग्रेपरीक्षेतयेमातृतःपितृतश्चेतियथोक्तंपुरस्ताद्बुद्धिमतेकन्यांप्र
यच्छेद्बुद्धिरूपशीललक्षणसंपन्नामरोगामुपयच्छेतदुर्विज्ञेयानिलक्षणान्यष्टौपिंडान्कृत्वाऽऋतमग्रेप्रथमंजज्ञेऽऋतेसत्यं
प्रतिष्ठितं ॥ यदियंकुमार्यभिजातांतदियमिहप्रतिपद्यतांयत्सत्यंतदृश्यतामितिपिंडानभिमंत्र्यकुमारींब्रूयादेषामेकंगृहा
णेतिक्षेत्राच्चेदुभयतःसस्याद्गृह्णीयादन्नवत्यस्याःप्रजाभविष्यतीतिविद्याद्गोष्ठात्पशुमतीवेदिपुरीषाद्ब्रह्मवर्चस्विन्यविदा

सिनोहृदात्सर्वसंपन्नांदेवनात्कितवींचतुष्पथाद्द्विप्रव्राजिनींरिणादधन्यांश्मशानात्पतिघ्नी ॥ ५ ॥ अलंकृत्यकन्यामु
दकपूर्वांदद्यादेषब्राह्मोविवाहस्तस्यांजातोद्वादशावरान्द्वादशपरान्पुनात्युभयतंऋत्विजेवितते कर्मणिदद्यादलंकृत्यसदै
वोदशावरान्दशपरान्पुनात्युभयतंःसहधर्मंचरतइतिप्राजापत्योऽष्टावरानष्टपरान्पुनात्युभयतोगोमिथुनंदत्त्वोपयच्छे
तसआर्षःसप्तावरान्त्सप्तपरान्पुनात्युभयतोमिथःसमयंकृत्वोपयच्छेतसगांधर्वोधनेनोपतोष्योपयच्छेतसआसुरःसुप्ता
नांप्रमत्तानांवापहरेत्सपैशाचोहत्वाभित्त्वाचशीर्षाणिरुदतींरुदद्भ्योहरेत्सराक्षसः ॥ ६ ॥ अथखलूच्चावचाजनपदध
र्माग्रामधर्माश्चंतान्विवाहेप्रतीयाद्यत्तुसमानंतद्वक्ष्यामः पश्चादग्नेर्दृषदमश्मानंप्रतिष्ठाप्योत्तरपुरस्तादुदकुंभंसमन्वार
ब्धायांहुत्वातिष्ठन्प्रत्यङ्मुखःप्राङ्मुख्याआसीनायांगृभ्णामितेसौभगत्वायहस्तमित्यंगुष्ठमेवगृह्णीयाद्यदिकामयीतपुमां
सएवमेपुत्राजायेरन्नित्यंगुलीरेवस्त्रीकामोरोमांतेहस्तंसांगुष्ठमुभयकामःप्रदक्षिणमग्निमुदकुंभंचत्रिःपरिणयन्जपत्यमो
हमस्मिसात्वंसात्वमस्यमोहंद्यौरहंपृथिवीत्वंसामाहमृक्त्वंतावेहविवहावहै ॥ प्रजांप्रजनयावहैसंप्रियौरोचिष्णूसुमन
स्यमानौजीवेवशरदःशतमितिपरिणीयपरिणीयाश्मानमारोहयतीममश्मानमारोहाश्मेवत्वंस्थिराभव ॥ सहस्वपृतना ॥ ३ ॥
यतोभितिष्ठपृतन्यतइतिवध्वंजलावुपस्तीर्यभ्राताभ्रातृस्थानोवाद्विर्लाजानावपतित्रिर्जामदग्न्यानांप्रत्यभिघार्यहविर
वत्तंचैषोवदानधर्मोऽर्यमणंनुदेवंकन्याअग्निमयक्षत ॥ सइमांदेवोऽअर्यमाप्रेतोमुंचातुनामुतस्वाहा ॥ वरुणंनुदेवंकन्या

अग्निमयक्षत ॥ सइमांदेवोवरुर्णः प्रेतोमुंचातुनामुतस्वाहा ॥ पूषणंनुदेवँकन्याऽअग्निमयक्षत ॥ सइमांदेवः पूषांप्रेतो
मुंचातुनामुतस्वाहेंत्यविच्छिंदत्यंजलिंस्रुचेवजुहुयांदपरिणीयशूर्पपुटेनाभ्यात्मँतूष्णींचतुर्थमोप्योप्यहैकैलाजान्परिण
यन्त्यंथोत्तमेआहुतीनसंनिपततौथास्यैशिखेविमुंचतिंयदिकृतेभवतंऊर्णास्तुकेकेशपक्षयोर्वद्धेभवतंःप्रत्वामुंचामिवरु
णस्यपाशादिंत्युत्तरामुत्तरयांथैनामपराजितायांदिशिंसप्तपदान्यभ्युत्क्रामयतींषएकपद्यूर्जेंद्विपदींरायस्पोषायत्रिपदीं
मायोभव्यायचतुष्पदींप्रजाभ्यःपंचपंद्यृतुभ्यःषट्पदींसखासप्तपदीभवंसामामनुव्रताभव ॥ पुत्रान्विंदावहैबहूंस्तेसंतु
जरदष्टयंइत्युभयोःसन्निधायशिरसींउदकुंभेनावसिच्यंब्राह्मण्याश्चवृद्धायांजीवपत्याजीवप्रजायांअगारएतांरात्रींवसें
द्ध्रुवमरुंधतींसप्तऋषीनितिदृष्ट्वांवाचंविसृजेतंजीवपत्नीप्रजांविंदेयेति ॥७॥ प्रयाणउपपद्यमानेंपूषात्वेतोनयतुहस्तगृह्ये
तिंयानमारोहयेंदश्मन्वतीरीयतेसंरभध्वमिंत्यर्धर्चेननावमारोहयेंदुत्तरेणोत्क्रमयेंज्जीवंरुदंतीतिरुदत्यांविवाहाग्निमग्र
तोजस्रंनयंतिंकल्याणेषुदेशवृक्षचतुष्पथेषुमाविदन्परिपंथिनइतिजपेंद्वासेवासेसुमंगलीरियंवधूरितींक्षकानीक्षेतेंहप्रियं
प्रजयातेसमृद्ध्यतांमितिगृहंप्रवेशयेंद्विवाहाग्निमुपसमाधायंपश्चादस्यानडुहंचर्मास्तीर्यंप्राग्ग्रीवमुत्तरलोमंतस्मिन्नुपवि
ष्टायांसमन्वारब्धायांमानःप्रजांजनयतुप्रजापतिरितिंचतसृभिःप्रत्यृचंहुत्वांसमंजंतुविश्वेदेवाऽइतिदध्नःप्राश्यंप्रतिप्र
यच्छेंदाज्यशेषेणवानक्तिहृदयेंतऊर्ध्वमक्षारालवणाशिनौंब्रह्मचारिणावलंकुर्वाणांवधःशायिनौस्यातांत्रिरात्रंद्वादशरा

 त्रंसंवत्सरंवैकऋषिर्जायतइतिचरितव्रतःसूर्याविदेवधूवस्त्रंदद्यादन्नंब्राह्मणेभ्योऽथस्वस्त्ययनंवाचयीत ॥ ८ ॥ पाणिग्रह
णादिगृह्यंपरिचरेत्स्वयंपत्न्यपिवापुत्रःकुमार्यंतेवासीवानित्यानुगृहीतःस्याद्यदितूपशाम्येत्पत्न्युपवसेदित्येकेतस्याग्निहो
 त्रेणप्रादुष्करणहोमकालौव्याख्यातौहोम्यंचमांसवर्जंकामंतुव्रीहियवतिलैरग्नयेस्वाहेतिसायंजुहुयात्सूर्यायस्वाहेतिप्रा
तस्तूष्णींद्वितीयेउभयत्र ॥९॥ अथपार्वणस्थालीपाकस्तस्यदर्शपूर्णमासाभ्यामुपवासइध्माबर्हिषोश्चसंनहनंदेवताश्चोपां
शुयाजेंद्रमाहेंद्रवर्जंकाम्याइतरास्तस्यैतस्यैदेवतायैचतुरश्चतुरोमुष्टीन्निर्वपतिपवित्रेअंतर्धायामुष्मैत्वाजुष्टंनिर्वपामीत्यथै
नान्प्रोक्षतियथानिरुप्तममुष्मैत्वाजुष्टंप्रोक्षामीत्यवहतांस्त्रिःफलीकृतान्नानाश्रपयेत्समोप्यवायदिनानाश्रपयेद्विभज्यतं
डुलानभिमृशेदिदममुष्माइदममुष्माइतियद्युवैसमोप्यंव्युद्धारंजुहुयाच्छृतानिहवींष्यभिघार्योदगुद्वास्यबर्हिष्यासाद्य
प्रत्यभिघार्येध्ममभिघार्यायंतइध्मआत्माजातवेदस्तेनेध्यस्ववर्धस्वचेद्धवर्धयचास्मान्प्रजयापशुभिर्ब्रह्मवर्चसेनान्नाद्येन
समेधयस्वाहेतितूष्णीमाघारावाघार्याज्यभागौजुहुयादग्नयेस्वाहासोमायस्वाहेत्युत्तरमाग्नेयंदक्षिणंसौम्यंविज्ञायतेचक्षु
षीवाएतेयज्ञस्ययदाज्यभागौतस्मात्पुरुषस्यप्रत्यङ्मुखस्यासीनस्यदक्षिणमक्ष्युत्तरंभवत्युत्तरंदक्षिणंमध्येहवींषिप्रत्यक्तरं ॥ ४ ॥
वाप्राक्संस्थान्युदक्संस्थानिवोत्तरपुरस्तात्सौविष्टकृतंमध्यात्पूर्वार्धाच्चहविषोवद्यतिमध्यात्पूर्वार्धात्पश्चार्धादितिपंचाव
त्तिनामुत्तरार्धात्सौविष्टकृतंनात्रहवींषिप्रत्यभिघारयतिस्विष्टकृतंद्विरभिघारयतियदस्यकर्मणोत्यरीरिचंयद्वान्यूनमि

हाकरं ॥ अग्निष्टत्स्विष्टकृद्विद्वान्त्सर्वंस्विष्टंसुहुतंकरोतुमे ॥ अग्नयेस्विष्टकृतेसुहुतहुतेसर्वप्रायश्चित्ताहुतीनांकामानांसम र्धयित्रेसर्वान्नःकामान्समर्धयस्वाहेतिंबर्हिषिपूर्णपात्रंनिनयेदेषोवभृथःपाकयज्ञानांमेतत्तंत्रंहविरुच्छिष्टंदक्षिणा ॥ १० ॥ अथपशुकल्पउत्तरतोग्नेःशामित्रस्यायतनंकृत्वापाययित्वापशुमाप्लाव्यपुरस्तात्प्रत्यङ्मुखमवस्थाप्याग्निंदूतमितिद्वाभ्यां हुत्वासपलाशयार्द्रशाखयापश्चादुपस्पृशेदमुष्मैत्वाजुष्टमुपाकरोमीतिंव्रीहियवमतीभिरद्भिःपुरस्तात्प्रोक्षत्यमुष्मैत्वाजुष्टं प्रोक्षामीतिंतासांपाययित्वादक्षिणमनुबाहुंशेषंनिनयेदावृतैवपर्यग्निकृत्वोदंचंनयंतितस्यपुरस्तादुल्मुकंहरंतिशामित्रए षभवतिवपाश्रपणीभ्यांकर्तापशुमन्वारभतेकर्तारंयजमानःपश्चाच्छामित्रस्यप्राक्शिरसंप्रत्यक्शिरसंवोदक्पादंसंज्ञप्य पुरानाभेस्तृणमंतर्धायवपामुत्खिद्यवपामवदायवपाश्रपणीभ्यांपरिगृह्याद्भिरभिषिच्यशामित्रेप्रताप्याग्रेणैनमग्निंहृत्वा दक्षिणतआसीनःश्रपयित्वापरीत्यजुहुयादेतस्मिन्नेवाग्नौस्थालीपाकंश्रपयंत्येकादशपशोरवदानानिसर्वांगेभ्योवदायशा मित्रेश्रपयित्वाहृदयंशूलेप्रताप्यस्थालीपाकस्याग्रतोजुहुयादवदानैर्वासहैकैकस्यावदानस्यद्विर्द्विरवद्यत्यावृतैवहृदयशू लेनचरंति ॥ ११ ॥ चैत्ययज्ञेप्राक्स्विष्टकृतश्चैत्यायबलिंहरेद्यद्युवैविदेशस्थंपलाशदूतेनयत्रवेत्थवनस्पतइत्येतयर्चाद्वौ पिंडौकृत्वावीवधेभ्याधायदूतायप्रयच्छेदिमंतस्मैबलिंहरेतिचैनंब्रूयादयंतुभ्यमितियोदूतायप्रतिभयंचेदंतराशस्त्रमपि किंचिन्नाव्याचेन्नद्यंतराप्लवरूपमपिकिंचिदनेनतरितव्यमितिधन्वंतरियज्ञेब्रह्माणमग्निंचांतरापुरोहितायाग्रेबलिंहरेत्

॥ १२ ॥ उपनिषदि गर्भलंभनँ पुंसवनमनवलोभनं चं यदि नाधीयांत्तृतीये गर्भमासें तिष्येणोपोषितायां: सरूपवत्सायागो
॥ ५ ॥ र्दधनिद्वौद्वौतुमाषौ यवं चं दधिप्रसृतेन प्राशयेंत्किंपिबसि किंपिबसीतिपृष्ट्वां पुंसवनं पुंसवनमितिंत्रि:प्रतिजानीयांदेवंत्री
न्प्रसृतांनथास्यैमंडलागारच्छायायांदक्षिणस्यांनासिकायांमजीतामोषधींनस्त:करोतिंप्रजावज्जीवपुत्राभ्यांहैके ॥ आ
तेगर्भोयोनिमैतुंपुमान्बाणइवेषुधिं ॥ आवीरोजायतांपुत्रस्तेदशमास्य: ॥ अग्निरेतुप्रथमोदेवतानांसोस्यैप्रजांमुंचतुमृ
त्युपाशात् ॥ तदयंराजावरुणोनुमन्यतांयथेयंस्त्रीपौत्रमघंनरोदादितिंप्राजापत्यस्यस्थालीपाकस्यहुत्वांहृदयदेशमस्या
आलभेतंयत्तेसुशीमेहृदयेंहितमंत:प्रजापतौ ॥ मन्येहंमांतद्विद्वांसँमाहंपौत्रमघंनियामिति ॥ १३ ॥ चतुर्थेगर्भमासे
सीमन्तोन्नयनंमापूर्यमाणपक्षेंयदापुंसानक्षत्रेणंचंद्रमायुक्त:स्यांदथाग्निमुपसमाधायंपश्चादस्यानडुहंचर्मास्तीर्यंप्राग्ग्रीव
मुत्तरलोमंतस्मिन्नुपविष्टायांसमन्वारब्धायांधातादंदातुदाशुषइतिद्वाभ्यांराकामहमितिद्वाभ्यांनेजमेषप्रजापतेनत्व
देतान्यन्यइतिचांथास्यैयुग्मेनशलाटुग्लप्सेनंत्र्येण्याचशलल्यांत्रिभिश्चकुशपिंजूलैरूर्ध्वंसीमंतंव्यूहतिंभूर्भुव:स्वरो३
मितित्रिश्चतुर्वांवीणागाथिनौसंशास्तिसोमंराजानंसंगायेतामितिंसोमोनोराजावतुमानुषी:प्रजांनिविष्टचक्रासाविंतिं ॥ ५ ॥
यांनदीमुपवसिताभवंतिंब्राह्मण्यश्चवृद्धांजीवपत्योजीवप्रजांयद्यदुपदिशेयुंस्तत्तत्कुर्युर्ऋषभोदक्षिणा ॥ १४ ॥ कुमारं
जातंपुरान्यैरालंभांत्सर्पिर्मधुनीहिरण्यनिकाषँहिरण्येनप्राशयेंत्प्रतेंददामि मधुंनोघृतस्यवेदँसवित्राप्रसूतंमघोनां ॥ आ

युष्मान्गुप्तोदेवताभिः शतंजीवशरदोलोकेअस्मिन्निर्तिकर्णयोरुपनिधार्यमेधाजननंजपर्तिमेधांतेदेवः सविर्तामेधांदेवी सरस्वती ॥ मेधांतेऽअश्विनौदेवावाधत्तांपुष्करस्रजावित्यंसावभिमृशत्यश्माभवपरशुर्भवहिरण्यमस्तृतंभव ॥ वेदो वैपुत्रनामासिसजीवशरदः शतमिर्ति(दक्षिणंस्तनंप्रक्षाल्यहिरण्योदकेनेमांकुमारोजरांधयतुंदीर्घमायुःप्रजीवसे ॥ अस्यै स्तनौप्रयुंजानांआयुर्वर्चोयशोबलमिर्तिदक्षिणंस्तनंप्रदायें)द्रश्रेष्ठानिद्रविणानिधेह्यस्मेप्रयंधिमघवन्नृजीषिन्निर्तिचंनाम चास्मैदद्युर्घोषवदाद्यंतरंतस्थंमभिनिष्ठानांतंद्व्यक्षरंचतुरक्षरंवांद्व्यक्षरंप्रतिष्ठाकामश्चतुरक्षरंब्रह्मवर्चसकामोयुग्मानित्वेव पुंसांमयुग्मानिस्त्रीणांमभिवादनीयंचसमीक्षेतंतन्मातापितरौविद्यातामोपनयनात्प्रवासादेत्यपुत्रस्यशिरःपरिगृह्यजपं त्यंगादंगात्संभवसिहृदयादधिजायसे ॥ आत्मावैपुत्रनामासिसजीवशरदः शतमिर्तिमूर्धनित्रिरवघ्रायांवृतैवकुमार्यै ॥ १५ ॥ षष्ठेमास्यन्नप्राशनंमाजमन्नाद्यकामस्तैत्तिरंब्रह्मवर्चसकामोघृतौदनंतेजस्कामो (दध्योदनमिंद्रियकामःक्षीरो दनंपशुकामो) दधिमधुघृतमिश्रमन्नंप्राशयेदन्नपतेऽन्नस्यनोदेह्यनमीवस्यशुष्मिणः ॥ प्रप्रदातारंतारिषंऽऊर्जनोधेहि द्विपदेचतुष्पदइत्यावृतैवकुमार्यै ॥ १६ ॥ तृतीयेवर्षेचौलंयथाकुलधर्मवोत्तरतोग्नेर्व्रीहियवमाषतिलानांपृथक्पूर्णश रावाणिनिदधार्तिपश्चात्कारयिष्यमाणोमातुरुपस्थआनडुहंगोमयंनवेशरावेशमीपर्णानिचोपनिहितानिभवंर्तिमातुःपि

१ धनुश्चिह्नगतोभागःक्वचिन्नास्ति ।

तादक्षिणतंएकविंशतिकुशपिंजूलान्यादायंब्रह्मावितानिधारयेत्पश्चात्कारयिष्यमाणस्यावस्थायंशीतोष्णाअपःसमानी
योष्णेनवायउदकेनेहीतिंतासांगृहीत्वांनवनीतंदधिद्रप्सान्वांप्रदक्षिणंशिरस्त्रिरुंदत्यदितिःकेशान्वपत्वापउंदंतुवर्चसइ
तिंदक्षिणेकेशपक्षेत्रीणित्रीणिकुशपिंजूलान्यभ्यात्माग्राणिनिदधात्योषधेत्रायस्वैनंस्वधितेमैनंहिंसीरितिंनिष्पीड्यलौहे
नक्षुरेणप्रच्छिनत्तियेनावपत्सविताक्षुरेणंसोमस्यराज्ञोवरुणस्यविद्वान् ॥ तेनब्रह्माणोवपतेंदमस्यायुष्मान्जरदष्टिर्यथा
सदितिंप्रच्छिद्यप्रच्छिद्यप्रागग्रान्छमीपर्णैःसहमात्रेप्रयच्छातिंतानानडुहेगोमयेनिदधाति ॥ येनधाताबृहस्पतेरग्नेरिंद्रस्य
चायुषेवपत् ॥ तेनतआयुषेवपामिंसुश्लोक्यायस्वस्तयऽइतिद्वितीयंयेनभूयश्चरात्र्यांज्योक्पश्यातिसूर्यं ॥ तेनतऽआ
युषेवपामिंसुश्लोक्यायस्वस्तयइतितृतीयंसर्वैर्मंत्रैश्चतुर्थमेवमुत्तरतस्त्रिःक्षुरतेजोनिमृजेंद्यत्क्षुरेणमर्चयतासुपेशसांवप्ताव
पसिकेशान् ॥ शुंधिशिरोमास्यायुःप्रमोषीरितिंनापितंशिष्यांच्छीतोष्णाभिरद्भिरबर्थंकुर्वाणोक्षण्वन्कुशलीकुर्वितिंय
थाकुलधर्मंकेशवेशान्कारयेदावृतैवकुमार्यै ॥१७॥ एतेनगोदानंषोडशेवर्षेकेशशब्देतुश्मश्रुशब्दान्कारयेंच्छ्मश्रूणीहों
दतिंशुंधिशिरोमुखंमास्यायुःप्रमोषीरितिंकेशश्मश्रुलोमनखान्युदक्संस्थानिकुर्वितिसंप्रेष्यत्याप्लुत्यवाग्यतःस्थित्वांहः
शेषमाचार्यसकाशेवाचंविसृजेतंवरंददामीतिंगोमिथुनंदक्षिणांसंवत्सरमादिशेत् ॥ १८ ॥ अष्टमेवर्षेब्राह्मणमुपनये

१ प्राशयेदित्युत्तरं 'सार्वकामोभवतीतिविज्ञायते' इतिक्वचिदधिकम् ।

द्गर्भाष्टमेवैकादशेक्षत्रियँद्वादशेवैश्यंमाषोडशाद्ब्राह्मणस्यानतीतःकालआद्वाविंशात्क्षत्रियस्याचतुर्विंशाद्वैश्यस्यातऊ
र्ध्वंपतितसावित्रीकाभवंतिनैनानुपनयेन्नाध्यापयेन्नयाजयेन्नैभिर्व्यवहरेयुरलंकृतंकुमारंकुशलीकृतशिरसंमहतेनवास
सासंवीतमैणेयेनवाजिनेनब्राह्मणंरौरवेणक्षत्रियंमाजेनवैश्यंयदिवासांसिवसीरन्रक्तानिवसीरन्काषायंब्राह्मणोमांजिष्ठं
क्षत्रियोहारिद्रंवैश्यस्तेषांमेखलामौंजीब्राह्मणस्यधनुर्ज्याक्षत्रियस्यावीवैश्यस्यतेषांदंडाःपालाशोब्राह्मणस्यौदुंबरःक्षत्रिय
स्यबैल्वोवैश्यस्यकेशसंमितोब्राह्मणस्यललाटसंमितःक्षत्रियस्यप्राणसंमितोवैश्यस्य ॥ १९ ॥ सर्वेवासर्वेषांसमन्वा
रब्धेहुत्वोत्तरतोग्नेःप्राङ्मुखआचार्योपतिष्ठतेपुरस्तात्प्रत्यङ्मुखइतरोपामंजलीपूरयित्वातत्सवितुर्वृणीमहइतिपूर्णेनास्य
पूर्णमवक्षारयत्यासिच्यदेवस्यत्वासवितुःप्रसवेश्विनोर्बाहुभ्यांपूष्णोहस्ताभ्यांहस्तंगृह्णाम्यसावितितस्यपाणिनापाणिंसां
गुष्ठंगृह्णीयात्सवितातेहस्तमग्रभीदसावितिद्वितीयमग्निराचार्यस्तवासावितितृतीयमादित्यमीक्षयेद्देवसवितरेषतेब्रह्म
चारीतंगोपायसमामृतेत्याचार्यःकस्यब्रह्मचार्यसिप्राणस्यब्रह्मचार्यसिकस्त्वाकमुपनयतेकायत्वापरिददामीतियुवासु
वासाःपरिवीतऽआगादित्यर्धर्चेनैनंप्रदक्षिणमावर्तयेत्तस्याध्यंसौपाणीकृत्वाहृदयदेशमालभेतोत्तरेणाग्निंपरिसमुह्यब्रह्म
शि.वे. २९ चारीतूष्णींसमिधमादध्यात्तूष्णींवैप्राजापत्यंप्राजापत्योब्रह्मचारीभवतीतिविज्ञायते ॥ २० ॥ मंत्रेणहैकेग्नयेसमिध

ताद्क्षिणतंएकविंशतिकुशपिंजूलान्यादायंब्रह्मावैतानिधारयेत्पश्चात्कारयिष्यमाणस्यावस्थायंशीतोष्णाअपःसमानी

योंष्णेनवायउदकेनेहीतिंतासांगृहीत्वांनवनीतंदधिद्रप्सान्वांप्रदक्षिणंशिरस्त्रिरुंदत्यंदितिःकेशान्वपत्वापउंदंतुवर्चसइ
॥ ६ ॥ तिंदक्षिणेकेशपक्षेंत्रीणित्रीणिकुशपिंजूलान्यंभ्यात्माग्राणिनिदधात्योषधेत्रायस्वैनंस्वधितेमैनंहिंसीरितिंनिष्पीड्यलौहे
नक्षुरेणप्रच्छिनत्तिंयेनावपत्सविताक्षुरेणंसोमस्यराज्ञोवरुणस्यविद्वान् ॥ तेनब्रह्माणोवपतेंदमस्यायुष्मान्जरदष्टिर्यथा
सदितिंप्रच्छिद्यप्रच्छिद्यप्रागग्रान्छमीपर्णैःसहमात्रेप्रयच्छतिंतानानडुहेगोमयेनिदधाति ॥ येनधाताबृहस्पतेंरग्नेरिंद्रस्य
चायुषेवपत् ॥ तेनतआयुषेवपामिंसुश्लोक्यायस्वस्तयऽइतिद्वितीयंयेनभूयश्चरात्र्यांज्योक्पश्यातिसूर्यं ॥ तेनतऽआ
युषेवपामिंसुश्लोक्यायस्वस्तयइतितृतीयंसर्वैर्मंत्रैश्चतुर्थमेवमुत्तरतस्त्रिःक्षुरतेजोनिमृजेंद्यत्क्षुरेणमर्चयतासुपेशसांवप्ताव
पसिकेशान् ॥ शुंधिशिरोमास्यायुःप्रमोषीरितिंनापितंशिष्यांच्छीतोष्णाभिरद्भिरबर्थंकुर्वाणोंक्षण्वन्कुशलीकुर्वितिंय
थाकुलधर्मंकेशवेशान्कारयेंदावृतैवकुमार्यै ॥१७॥ एतेनगोदानंषोडशेवर्षेंकेशशब्देतुश्मश्रुशब्दान्कारयेंच्छ्मश्रूणीहों
दतिंशुंधिशिरोमुखंमास्यायुःप्रमोषीरितिंकेशश्मश्रुलोमनखान्युदक्संस्थानिकुर्वितिसंप्रेष्यंत्याप्लुत्यवाग्यतःस्थित्वांहः ॥ ६ ॥
शेषमाचार्यसकाशेंवाचंविसृजेतंवरंददामीतिंगोमिथुनंदक्षिणांसंवत्सरमादिशेत् ॥ १८ ॥ अष्टमेवर्षेब्राह्मणमुपनये

---

१ प्राशयेदित्युत्तरं 'सार्वकामोभवतीतिविज्ञायते' इतिक्वचिदधिकम् ।

द्गर्भाष्टमेवैकादशेक्षत्रियंद्वादशेवैश्यंमाषोडशाद्ब्राह्मणस्यानतीतःकालआद्वाविंशात्क्षत्रियस्याचतुर्विंशाद्वैश्यस्यातऊ
र्ध्वंपतितसावित्रीकाभवंतिनैनानुपनयेन्नाध्यापयेन्नयाजयेन्नैभिर्व्यवहरेयुरलंकृतंकुमारंकुशलीकृतशिरसमहतेनवास
सासंवीतंमैणेयेनवाजिनेनब्राह्मणंरौरवेणक्षत्रियंमाजेनवैश्यंयदिवासांसिवसीरंन्नक्तानिवसीरन्काषायंब्राह्मणोमांजिष्ठं
क्षत्रियोहारिद्रंवैश्यस्तेषांमेखलामौंजीब्राह्मणस्यधनुर्ज्याक्षत्रियस्यावीवैश्यस्यतेषांदंडाःपालाशोब्राह्मणस्यौदुंबरःक्षत्रिय
स्यबैल्वोवैश्यस्यकेशसंमितोब्राह्मणस्यललाटसंमितःक्षत्रियस्यप्राणसंमितोवैश्यस्य ॥ १९ ॥ सर्वेवासर्वेषांसमन्वा
रब्धेहुत्वोत्तरतोग्नेःप्राङ्मुखआचार्योपतिष्ठतेपुरस्तात्प्रत्यङ्मुखइतरोपामंजलीपूरयित्वातत्सवितुर्वृणीमहइतिपूर्णेनास्य
पूर्णमवक्षारयत्यासिच्यदेवस्यत्वासवितुःप्रसवेश्विनोर्बाहुभ्यांपूष्णोहस्ताभ्यांहस्तंगृह्णाम्यसावितितस्यपाणिनापाणिंसां
गुष्ठंगृह्णीयात्सवितातेहस्तमग्रभींदसावितिद्वितीयमग्निराचार्यस्तवासावितितृतीयमादित्यमीक्षयेद्देवसवितरेषतेब्रह्म
चारीतंगोपायसमामृतेत्याचार्यःकस्यब्रह्मचार्यसिप्राणस्यब्रह्मचार्यसिकस्त्वाकमुपनयतेकायत्वापरिददामीतियुवासु
वासाःपरिवीतऽआगादित्यर्धर्चेनैनंप्रदक्षिणमावर्तयेत्तस्याध्यंसौपाणीकृत्वाहृदयदेशमालभेतोत्तरेणाग्निंपरिसमुह्यब्रह्म
चारीतूष्णींसमिधमादध्यात्तूष्णींवैप्राजापत्यंप्राजापत्योब्रह्मचारीभवतीतिविज्ञायते ॥ २० ॥ मंत्रेणहैकेन्नयेसमिध

शि.वे. २९

माहार्षंबृहतेजातवेदसे ॥ तयात्वमग्नेवर्धस्वसमिधाब्रह्मणावयंस्वाहेतिंसमिधमाधायाग्निमुपस्पृश्यमुखंनिमार्ष्टींत्रि
स्तेजसामासमनज्मीतितेजसाह्येवात्मानंसमनक्तीतिविज्ञायते ॥ मयिमेधांमयिप्रजांमय्यग्निस्तेजोदधातु ॥ मयिमे
धांमयिप्रजांमयींद्रइंद्रियंदधातु ॥ मयिमेधांमयिप्रजांमयिसूर्योभ्राजोदधातु ॥ यत्तेअग्नेतेजस्तेनाहंतेजस्वीभूयासं ॥
यत्तेअग्नेवर्चस्तेनाहंवर्चस्वीभूयासं ॥ यत्तेअग्नेहरस्तेनाहंहरस्वीभूयासमित्युपस्थायजान्वाच्योपसंगृह्यब्रूयादधीहिभोः
सावित्रींभो३अनुब्रूहीतिंतस्यवाससापाणिभ्यांचपाणीसंगृह्यसावित्रीमन्वाहंपच्छोर्धर्चशःसर्वांयथाशक्तिंवाचयीतंहृद
यदेशेस्योर्ध्वांगुलिंपाणिमुपदधातिममव्रतेहृदयंतेदधामिममचित्तमनुचित्तंतेअस्तु ॥ ममवाचमेकव्रतोजुषस्वबृहस्पति
ष्ट्वानियुनक्तुमह्यमिति ॥ ११ ॥ अथपरिशिष्टं ॥ इयंदुरुक्तात्परिबाधमानांशर्मवरूथंपुनतीनआगात् ॥ प्राणापाना
भ्यांबलमाभरंतींप्रियादेवानांसुभगामेखलेयं ॥ ऋतस्यगोप्त्रीतपसःपरस्पींघ्नतीरक्षःसहमानाअरातीः ॥ सानःसमंत
मनुपरेहिभद्रयाभर्तारस्तेमेखलेमारिषाम ॥ मेखलामाबध्यदंडंप्रदायंब्रह्मचर्यमादिशेद्ब्रह्मचार्यस्यपोशानकर्मकुरु
दिवामास्वाप्सीराचार्याधीनोवेदमधीष्वेतिंद्वादशवर्षाणिवेदब्रह्मचर्यंग्रहणांतंवासायंप्रातर्भिक्षेतंसायंप्रातःसमिधमाद
ध्यादंप्रत्याख्यायिनमग्रेभिक्षेतांप्रत्याख्यायिनींवाभवान्भिक्षांददात्वित्यनुप्रवचनीयमितिवांतदाचार्यायवेदयीतंतिष्ठे ॥ ७ ॥

१ ससमिधमित्यत्रत्यःसकारोवैदिकपाठेयद्यपिलुप्तप्रायोदृश्यतेतथापिवृत्तिकाराद्दतोस्ति ।

दहःशेषमस्तमितेब्रह्मौदनंमनुप्रवचनीयंश्रपयित्वांचार्यायवेदयीतांचार्यःसमन्वारब्धेजुहुयात्सदसस्पतिमद्भुतमितिं
सावित्र्याद्द्वितीयंयद्यत्किंचातऊर्ध्वमनूक्तंस्यांदृषिभ्यस्तृतीयंसौविष्टकृतंचतुर्थंब्राह्मणान्भोजयित्वावेदसमाप्तिंवाचयी
तांतऊर्ध्वमक्षारालवणाशीब्रह्मचार्यधःशायींत्रिरात्रंद्वादशरात्रंसंवत्सरंवांचरितव्रतायमेधाजननंकरोत्यनिंदितायांदि
श्येकमूलंपलाशंकुशस्तंबंवापलाशापचारेप्रदक्षिणमुदकुंभेनंत्रिःपरिषिंचंतंवाचयतिं सुश्रवःसुश्रवाअसिंयथात्वंसुश्रवः
सुश्रवाअस्येवंमांसुश्रवःसौश्रवसंकुरु ॥ यथात्वंदेवानांयज्ञस्यनिधिपोंस्येवमहंमनुष्याणांवेदस्यनिधिपोभूयासमित्येते
नवापनादिपरिदानांतंव्रतादेशनंव्याख्यातमित्यनुपेतपूर्वस्यांथोपेतपूर्वस्यंकृताकृतंकेशवपनंमेधाजननंचानिरुक्तंपरि
दानंकालश्चंतत्सवितुर्वृणीमहइतिसावित्रीं ॥ २२ ॥ ऋत्विजोवृणीतेन्यूनानतिरिक्तांगान्येमातृतःपितृतश्चेतियथोक्तं
पुरस्ताद्यूनऋत्विजोवृणीतइत्येकेब्रह्माणमेवप्रथमंवृणीतेथहोतारमथाध्वर्युमथोद्गातारंसर्वान्वायेहीनैकाहैर्याजयंतिसद
स्यंसप्तदशंकौषीतकिनःसमामनंतिंसकर्मणामुपद्रष्टाभवतीतिंतदुक्तमृग्भ्यांयमृत्विजोबहुधाकल्पयंतइतिंहोतारमेवप्र
थमंवृणीतेंग्निर्मेहोतासमेहोतांहोतारंत्वामुंवृणइतिहोतारंचंद्रमामेब्रह्मासमेब्रह्माब्रह्माणंत्वामुंवृणइतिब्रह्माणंमादित्यो
मेध्वर्युरित्यध्वर्युंपर्जन्योमउद्गातेत्युद्गातारंमापोमेहोत्राशंसिन्यइतिहोत्रकांन्रश्मयोमेचमसाध्वर्यवइतिंचमसाध्वर्यूंना
काशोमेसदस्यइतिसदस्यंसवृतोजपेन्महन्मेवोचोंभर्गोमेवोचोंभगोमेवोचोंयशोमेवोचंस्तोमंमेवोचंःक्लृप्तिंमेवोचोंभुक्तिं

मेवोर्चस्तृप्तिंमेवोर्चःसर्वंमेवोचइतिजपित्वाग्निष्टेहोतासतेहोतांहोताहंतेमानुषइतिंहोताप्रतिजानीतेंचंद्रमास्तेब्रह्मासते
ब्रह्मांब्रह्मैवमितरेयथादेशंतन्मामवतुतन्माविशतुंतन्माजिन्वतुंतेनभुक्षिषीयेतिचयाजयिष्यंन्त्वयस्तमार्त्विज्यमकार्यंमही
नस्यनीचदक्षिणस्यंव्याधितस्यातुरस्यंयक्ष्मगृहीतस्यांनुदेश्यभिशस्तस्यंक्षिप्तयोनेरितिचैतेषांसोमःप्रवाकंपरिपृच्छेत्कोय
ज्ञःकऋत्विजःकादक्षिणेतिंकल्याणैःसहसंप्रयोगोंनमांसमश्नीयुंर्नस्त्रियमुपेयुंराक्रतोरपवर्गांदेतेनाग्नेब्रह्मणावावृधस्वेतिं
दक्षिणाग्नावाज्याहुतिंहुत्वांयथार्थंप्रव्रजेंदेवमनाहिताग्निर्गृह्यंइमामग्नेशरणिंमीमृषोनइत्येतयर्चा ॥२३॥ ऋत्विजोवृत्वाम
धुपर्कमाहरेंत्स्नातकायोपस्थितायंराज्ञेचाचार्यंश्वशुरपितृव्यमातुलानांचंदधनिमध्वानीयंसर्पिर्वांमध्वलाभेंविष्टरःपाद्य
मर्घ्यमाचमनीयंमधुपर्कोंगौरित्येतेषांत्रिस्त्रिरेकैकंवेदयंतें ॥ अहंवर्ष्मंसजातानांविद्युतामिवसूर्यः ॥ इदंतमधितिष्ठामिं
योमाकश्चाभिदासतींत्युदगग्रेविष्टरउपविशेंदाक्रम्यवापादौंप्रक्षालापयीतंदक्षिणमग्रेब्राह्मणायप्रयच्छेत्सव्यंशूद्रायंप्रक्षा
लितपादोंर्घ्यमंजलिनाप्रतिगृह्यांथाचमनीयेनाचामंत्यमृतोपस्तरणमसीतिंमधुपर्कमाह्रियमाणमीक्षतेंमित्रस्यत्वाचक्षुषा
प्रतीक्षइतिंदेवस्यत्वासवितुःप्रसवेंश्विनोर्बाहुभ्यांपूष्णोहस्ताभ्यांप्रतिगृह्णामीतिंतदंजलिनाप्रतिगृह्यंसव्येपाणौकृत्वांम
धुवाताऋतायतइतितृचेनावेक्ष्यांनामिकयाचांगुष्ठेनचंत्रिःप्रदक्षिणमालोड्यंवसवस्त्वागायत्रेणच्छंदसाभक्षयंत्वितिंपु
रस्तान्निमार्ष्टिंरुद्रास्त्वात्रैष्टुभेनछंदसाभक्षयंत्वितिदक्षिणतंआदित्यास्त्वाजागतेनच्छंदसाभक्षयंत्वितिपश्चांद्विश्वेत्वादे

वाऽआनुष्टुभेनच्छंदसाभक्षयंत्वित्युत्तरतोंभूतेभ्यस्त्वेतिमध्यात्रिरुद्धृत्यविराजोदोहोसीतिप्रथमंप्राश्नीयाद्विराजोदोहम
शीयेतिद्वितीयंमयिदोहःपद्यायैविराजइतितृतीयंनसर्वंनतृप्तिंगच्छेद्ब्राह्मणायोदङ्ङुच्छिष्टंप्रयच्छेदलाभेप्सुसर्वंवाथाचम
नीयेनान्वाचामत्यमृतापिधानमसीतिसत्यंयशःश्रीर्मयिश्रीःश्रयतामितिद्वितीयमाचांतोदकायगांवेदयंतेंहतोमेपाप्मा
पाप्मामेहतइतिजपित्वोंकुरुतेतिकारयिष्यन्मातारुद्राणांदुहितावसूनामितिजपित्वोमुत्सृजतेत्युत्सृक्ष्यंन्नामांसोमधुप
र्कोभवतिभवति ॥ २४ ॥ ॥ इत्याश्वलायनीयेगृह्यसूत्रेप्रथमोऽध्यायः ॥ १ ॥ ॥ ॥
हरिः ॐ ३म् ॥ श्रावण्यांपौर्णमास्यांश्रवणाकर्माक्षतसक्तूनांनवंकलशंपूरयित्वादर्वींचबलिहरणींनवेशिक्येनिदध्यात्यक्षत
धानाःकृत्वासर्पिषार्धाअनक्त्यस्तमितेस्थालीपाकंश्रपयित्वैककपालंचपुरोळाशंमग्नेनयसुपथारायेअस्मानितिचतसृभिः
प्रत्यृचंहुत्वापाणिनैककपालमच्युतायभौमायस्वाहेत्यविप्लुतःस्यादाविःपृष्ठोवामानोअग्नेवसृजोअघायेत्यनेनमाशयेना
भिजुहोतिशंनोभवंतुवाजिनोहवेष्वित्यक्ताधानाअंजलिनामात्येभ्यइतरादद्यात्कलशात्सक्तूनांदर्वींपूरयित्वाप्रागुषनि
ष्क्रम्यशुचौदेशेपोवनिनीयसर्पदेवजनेभ्यःस्वाहेतिहुत्वानमस्करोतियेसर्पाःपार्थिवायआंतरिक्ष्यायेदिव्यायेदिश्यास्ते
भ्यइमंबलिमाहार्षंतेभ्यइमंबलिमुपाकरोमीतिप्रदक्षिणंपरीत्यपश्चाद्बलेरुपविश्यसर्पोसिसर्पतांसर्पाणामधिपतिरस्यन्नेन

१ अविप्लुतइतिपाठःप्रचुरप्रचारोप्ययबद्धोहेयएव ।

मनुष्यांस्त्रायसेंपूपेनसर्पान्यज्ञेनदेवांस्त्वयिमासंतंत्वयिसंतःसर्पामाहिंसिषुर्ध्रुवांतेपरिददामीतिंध्रुवामुंतेध्रुवामुंतइत्यमा
त्याननुपूर्वंध्रुवमांतेपरिददामींत्यात्मानमंततोंनैनमंतराव्यवेयुरापरिदानात्सर्पदेवजनेभ्यःस्वाहेतिंसायंप्रातर्बलिंहरेदा
प्रत्यवरोहणात्प्रसंख्यायहैकैंतावतोबलींस्तदहरेवोपहरंतिं ॥ १ ॥ आश्वयुज्यामाश्वयुजीकर्मंनिवेशनमलंकृत्यंस्नाताः
शुचिवाससःपशुपतयेस्थालीपाकंनिरुप्यजुहुयुंःपशुपतयेशिवायशंकरायंपृषातकायस्वाहेतिंपृषातकमंजलिनाजुहुयांदू
नंमेपूर्यतांपूर्णमेमोपसदंत्पृषातकायस्वाहेतिंसजूर्ऋतुभिःसजूर्विधाभिंःसजूरिंद्राग्निभ्यांस्वाहा ॥ सजूर्ऋतुभिःसजूर्वि
धाभिंःसजूर्विश्वेभ्योदेवेभ्यःस्वाहा ॥ सजूर्ऋतुभिःसजूर्विधाभिंःसजूर्द्यावापृथिवीभ्यांस्वाहेंत्याहिताग्नेराग्रयणस्थाली
पाकोंऽनाहिताग्नेरपिशालाग्नौ ॥ २ ॥ मार्गशीर्ष्यांप्रत्यवरोहणंचतुर्दश्यांपौर्णमास्यांवांनिवेशनंपुनर्नवीकृत्यंलेपनास्तर
णोपस्तरणैरस्तमितेपायसस्यजुहुयुंरपश्वेतपदाजहिंपूर्वेणचापरेणचं ॥ सप्तचवारुणीरिमांःसर्वाश्चराजबांधवीःस्वाहा ॥
नवैश्वेतश्चाभ्यागारेंहिर्जघानकिंचनं ॥ श्वेतायवैदार्वायनमःस्वाहेतिंनात्रसौविष्टकृंदभयंनःप्राजापत्येभ्योभूयादित्य
ग्निमीक्षमाणोजपतिंशिवोनःसुमनाभवेतिंहेमंतंमनसाध्यायांत्पश्चादग्नेःस्वस्तरःस्वास्तीर्णंस्तस्मिन्नुपविश्यंस्योनापृथिवि
भवेतिजपित्वांसंविशेत्सामात्यंःप्राक्शिराउदङ्मुखोंयथावकाशमितरेंज्यायान्ज्यायान्वांनंतरोमंत्रविदोंमंत्रान्जपेयुः
संहायांतोदेवाअवंतुनइतिंत्रिरेतांदक्षिणामुखांःप्रत्यङ्मुखाउदङ्मुखांश्चतुर्थंसंहायंसौर्याणिस्वस्त्ययनानिचजपित्वांन्नंसं

स्कृत्यंब्राह्मणान्भोजयित्वांस्वस्त्ययनंवाचयीतं ॥ ३ ॥ हेमंतशिशिरयोश्चतुर्णामपरपक्षाणामष्टमीष्वष्टकांऽएक
स्यांवांपूर्वेद्युःपितृभ्योदद्यांदोदनंकृसरंपायसंचतुःशरावस्यवापूपांनुदीरतामवरउत्परासइंत्यष्टाभिर्हुत्वायावतीभिर्वा
कामयीतांथश्वोभूतेष्टकाःपशुनास्थालीपाकेनचांप्यनडुहोयवसमाहरेंदग्निनावाकक्षमुपोषेंदेषामेष्टकेतिंनत्वेवानष्टकः
स्यांत्तांहैकेवैश्वदेवींब्रुवतेंआग्नेयीमेकेसौर्यामेकेंप्राजापत्यामेकेंरात्रिदेवतामेकेंनक्षत्रदेवतामेकंऋतुदेवतामेकेंपितृदेवता
मेकेंपशुदेवतामेकेंपशुकल्पेनपशुंसंज्ञप्यंप्रोक्षणोपाकरणवर्जंवपामुत्खिद्यजुहुयाद्वहवपांजातवेदःपितृभ्योंयत्रैनान्वेत्थ
निहितान्पराकेंमेदसःकुल्यांउपैनान्स्रवंतुंसत्याऽएताआशिषःसंतुसर्वाःस्वाहेंत्यथावदानानांस्थालीपाकस्यचांग्नेनयसुप
थारायेअस्मानितिद्वेंग्रीष्मोहेमंतऽऋतवःशिवानोंवर्षाःशिवाअभयाःशरन्नः ॥ संवत्सरोधिपतिःप्राणदोनोंहोरात्रेकृणु
तांदीर्घमायुःस्वाहा ॥ शांतापृथिवीशिवमंतरिक्षंद्यौर्नोदेव्यभयंनोअस्तु ॥ शिवादिशःप्रदिशउद्दिशोनआपोंविद्युतःप
रिपांतुसर्वतःस्वाहां ॥ आपोमरीचीःप्रवहंतुनोधियोंधातासमुद्रोवहंतुपापं॥ भूतंभविष्यदभयंविश्वमंस्तुमेंब्रह्माधिगुप्तः
स्वाराक्षराणिस्वाहा॥ विश्वआदित्यावसवश्चदेवांरुद्रागोप्तारोमरुतःसदंतु ॥ ऊर्जंप्रजाममृतंपिन्वमानंःप्रजापतिर्मयिप
रमेष्ठीदधातुस्वाहां ॥ प्रजापतेनत्वदेतान्यन्यंःसौविष्टकृत्यष्टमींब्राह्मणान्भोजयेदित्युक्तं ॥४॥ अपरेद्युरन्वष्टक्यंतस्यै
वमांसस्यप्रकल्प्यंदक्षिणाप्रवणेग्निमुपसमाधायंपरिश्रित्योत्तरतःपरिश्रितस्यद्वारंकृत्वांसमूलंबर्हिस्त्रिरपसलैरविधून्व

न्परिस्तीर्यहवींष्यासादयेदोदनंकृसरंपायसंदधिमंथान्मधुमंथांश्चपिंडपितृयज्ञकल्पेनहुत्वामधुमंथवर्जंपितृभ्योदद्यां
त्स्त्रीभ्यश्चसुराचाचाममित्यधिकंकर्षूष्वेकेद्वयोःषट्सुवापूर्वासुपितृभ्योदद्यादपरासुस्त्रीभ्यएतेनमाघ्यावर्षंप्रोष्ठपद्याअ
परपक्षेमासिमासिचैवंपितृभ्योयुक्षुप्रतिष्ठापयेन्नवावरान्भोजयेदयुजोवायुग्मान्वृद्धिपूर्तेष्वयुग्मानितरेषुप्रदक्षिणमुपचा
रोयवैस्तिलार्थः ॥ ५ ॥ रथमारोक्ष्यन्नानापाणिभ्यांचक्रेअभिमृशेदहंतेपूर्वंपादावारभेबृहद्रथंतरेतेचक्रेवामदेव्यमक्ष
इत्यक्षाधिष्ठानेदक्षिणपूर्वाभ्यामारोहेद्वायोष्ट्वावीर्येणारोहामींद्रस्यौजसाधिपत्येनेतिरश्मीन्त्संमृशेदरश्मिकान्वादंडेनं
ब्रह्मणोवस्तेजसासंगृह्णामिसत्येनवःसंगृह्णामीत्यभिप्रवर्तमानेषुजपेत्सहस्रसनिंवाजमभिवर्तस्वरथदेवप्रवहंवनस्पतेवी
डुंगोहिभूयाइत्येतयान्यान्यपिवानस्पत्यानिस्थिरौगावौभवतांवीळुरक्षऽइतिरथांगमभिमृशेत्सुत्रामाणंपृथिवींद्यामनेह
समितिनावंनवरथेनंयशस्विनंवृक्षंह्रदंवाविदासिनंप्रदक्षिणंकृत्वाफलवतीःशाखाआहरेदन्यद्वाकौडुंबंसंसदमुपयायाद
स्माकमुत्तमंकृधींत्यादित्यमीक्षमाणोजपित्वावरोहेदृषभंमासमानानामित्यभिक्रामन्वयमद्येंद्रस्यप्रेष्ठाइत्यस्तंयात्यादि
त्यैतद्वोदिवोदुहितरोविभातीरितिव्युष्टायां ॥ ६ ॥ अथातोवास्तुपरीक्षांनूखरमविवदिष्णुंभूमौषधिवनस्पतिवंद्यस्मि
न्कुशवीरिणंप्रभूतंकंटकिक्षीरिणस्तुंसमूलान्परिखायोद्वासयेदपामार्गःशाकस्तिल्वकःपरिव्याधइतिचैतानियत्रसर्वत
आपोमध्यंसमेत्यंप्रदक्षिणंशयनीयंपरीत्यप्राच्यःस्यंदेरन्नंप्रवदत्यस्तत्सर्वसमृद्धंसमवस्रवेभक्तशरणंकारयेद्धंह्वन्नंहभव

॥ १० ॥

र्तिंदक्षिणाप्रवणेसभांमापयेत्साद्यूताहभवतिंयुवानस्तस्याकितवाः कलहिनःप्रमायुकाभवंतियत्रसर्वतआपःप्रस्यंदेर
न्त्सास्वस्त्ययन्यद्यूताचं ॥ ७ ॥ अथैतैर्वास्तुपरीक्षेतंजानुमात्रंगर्तंखात्वातैरेवपांसुभिःप्रतिपूरयेदधिकेप्रशस्तंसमेवा
तंन्यूनेगर्हितंमस्तमितेपांपूर्णंपरिवासयेत्सोदकेप्रशस्तंमार्द्रेवातंशुष्केगर्हितंश्वेतंमधुरास्वादंसिकतोत्तरंब्राह्मणस्यंलोहितं
क्षत्रियस्यंपीतंवैश्यस्यंतत्सहस्रसीतंकृत्वांयथादिक्समचतुरस्रंमापयेदायतचतुरस्रंवांतच्छमीशाखयोदुंबरशाखयावांशं
तातीयेनत्रिःप्रदक्षिणंपरिव्रजन्प्रोक्षंत्यविच्छिन्नयाचोदकधारयांपोहिष्ठामयोभुवइतितृचेनंवंशांतरेषुशरणानिकारयेद्ग
र्तेष्ववकांशीपालमित्यवधापयेन्नास्यदाहुकोभवतीतिविज्ञायतेंमध्यमस्थूणायागर्तेवधार्यप्रागग्रोदगग्रान्कुशानास्तीर्य
व्रीहियवमतीरपआसेचयेदच्युतायभौमायस्वाहेत्यथैनामुच्छ्रीयमाणामनुमंत्रयेतेहैवतिष्ठनिमितांतिल्विलास्तामिराव
तींमध्येपोषस्यतिष्ठंतीं॥आत्वाप्रापन्नघायवंआत्वाकुमारस्तरुणंआवत्सोजायतांसह ॥ आत्वापरिश्रितःकुंभंआदध्नःकल
शैरयन्निति ॥ ८ ॥ वंशमाधीयमानंमृतेनस्थूणामधिरोहवंशंद्राघीयआयुःप्रतरंदधानाऽइतिंसदूर्वासुचतसृषुशिलासुमं
णिंकंप्रतिष्ठापयेत्पृथिव्याअधिसंभवेत्यरंगरोवावदीतिंत्रेधाबद्धोवरत्रया ॥ इरामुहप्रशंसंत्यनिरामपबाधतामितिवां
थास्मिन्नपआसेचयेदैतुराजावरुणोरेवतीभिरस्मिंस्थानेतिष्ठतुमोदमानः ॥ इरांवहंतोघृतमुक्षमाणांमित्रेणसाकंसहसंवि
शंत्वित्यथैनच्छमयांतिंव्रीहियवमतीभिरद्भिर्हिरण्यमवधार्यशंतातीयेनंत्रिःप्रदक्षिणंपरिव्रजन्प्रोक्षंत्यविच्छिन्नयाचोदक

॥ ११ ॥ धारयापोहिष्ठामयोभुवइतितृचेनंमध्येगारस्यस्थालीपाकंश्रपयित्वावास्तोष्पतेप्रतिजानीह्यस्मानितिचतसृभिःप्रत्यृचंहु
त्वान्नंसंस्कृत्यब्राह्मणान्भोजयित्वाशिवंवास्तुशिवंवास्त्वितिवाचयीत ॥ ९ ॥ उक्तंगृहप्रपदनंबीजवतोगृहान्प्रपद्येतक्षे
त्रंप्रकर्षयेदुत्तरैःप्रोष्ठपदैःफल्गुनीभीरोहिण्यावाक्षेत्रस्यानुवातंक्षेत्रस्यपतिनावयमितिप्रत्यृचंजुहुयाज्जपेद्वागाःप्रतिष्ठमा
नाअनुमंत्रयेतमयोभूर्वातोऽअभिवातूस्राइतिद्वाभ्यामायतीर्यासामूधश्चतुर्बिलंमधोःपूर्णंघृतस्यच ॥ तानःसंतुपयस्व
तीर्बह्वीर्गोष्ठेघृताच्यः ॥ उपमैतुमयोभुवऊर्जंचौजश्चबिभ्रतीः ॥ दुहानाअक्षितंपयोमयिगोष्ठेनिविशध्वंयथाभवाम्यु
त्तमोयादेवेषुतन्वमैरयंतेतिचसूक्तशेषमागावीयमेकेगणानात्वामुपतिष्ठेतांगुरुगवीनांभूतास्थप्रशस्तास्थशोभनाःप्रियाः
प्रियोवोभूयासंशंमयिजानीध्वंशंमयिजानीध्वं ॥ १० ॥ ॥ इतिगृह्यसूत्रेद्वितीयोऽध्यायः ॥ २ ॥ ॥
हरिः ॥ ॐ ३म् ॥ अथातःपंचयज्ञादेवयज्ञोभूतयज्ञःपितृयज्ञोब्रह्मयज्ञोमनुष्ययज्ञइतितद्यदग्नौजुहोतिसदेवयज्ञो
यद्बलिंकरोतिसभूतयज्ञोयत्पितृभ्योददातिसपितृयज्ञोयत्स्वाध्यायमधीतेसब्रह्मयज्ञोयन्मनुष्येभ्योददातिसमनुष्ययज्ञ
इतितानेतान्यज्ञानहरहःकुर्वीत ॥ १ ॥ अथस्वाध्यायविधिःप्राग्वोदग्वाग्रामान्निष्क्रम्यापआप्लुत्यशुचौदेशेयज्ञोप ॥ ११ ॥
वीत्याचम्याक्लिन्नवासादर्भाणांमहदुपस्तीर्यप्राक्कूलानांतेषुप्राङ्मुखउपविश्योपस्थंकृत्वादक्षिणोत्तरौपाणीसंधायपवित्रवं
तौविज्ञायतेपांवाएषऽओषधीनांरसोयद्दर्भाःसरसमेवतद्ब्रह्मकरोतिद्यावापृथिव्योःसंधिमीक्षमाणःसंमील्यवायथावा

युक्तमात्मानंमन्येतंतथायुक्तोधीयीतस्वाध्यायंमोंपूर्वाव्याहृतयंःसावित्रीमन्वाहंपच्छोर्धर्चशःसर्वामितितृतीयं ॥२॥अथ
स्वाध्यायमधीयीतंऋचोयजूंषिसामान्यथर्वांगिरसोब्राह्मणानिकल्पान्गाथानाराशंसीरितिहासपुराणानीतिंयदृचोधी
तेपयआहुतिभिरेवंतद्देवतास्तर्पयतिंयद्यजूंषिघृताहुतिभिर्यत्सामानिमध्वाहुतिभिर्यदथर्वांगिरसःसोमाहुतिभिर्यद्ब्राह्म
णानिकल्पान्गाथानाराशंसीरितिहासपुराणानीत्यमृताहुतिभिर्यदृचोधीतेपयसःकुल्याअस्यपितृन्स्वधाउपक्षरंतिंयद्य
जूंषिघृतस्यकुल्यांयत्सामानिमध्वःकुल्यांयदथर्वांगिरसःसोमस्यकुल्यांयद्ब्राह्मणानिकल्पान्गाथानाराशंसीरितिहासपु
राणानीत्यमृतस्यकुल्याःसयावन्मन्येतंतावदधीत्येतयापरिदधातिंनमोब्रह्मणेनमोअस्त्वग्नयेनमःपृथिव्यैनमओषधी
भ्यः ॥ नमोवाचेनमोवाचस्पतयेनमोविष्णवेमहतेकरोमीति॥३॥देवतास्तर्पयतिंप्रजापतिर्ब्रह्मावेदादेवाऋषयःसर्वाणि
च्छंदांस्योंकारोवषट्कारोव्याहृतयःसावित्रीयज्ञाद्यावापृथिवीऽअंतरिक्षमहोरात्राणिसांख्याःसिद्धाःसमुद्रानद्योगिरयंः
क्षेत्रौषधिवनस्पतिगंधर्वाप्सरसोनागावयांसिगावःसाध्याविप्रायक्षारक्षांसिभूतान्येवमंतान्यथऽऋषयःशतर्चिनोमा
ध्यमागृत्समदोविश्वामित्रोवामदेवोत्रिर्भरद्वाजोवसिष्ठःप्रगाथाःपावमान्यःक्षुद्रसूक्तामहासूक्ताइतिप्राचीनावीतीसुमं
तुजैमिनिवैशंपायनपैलसूत्रभाष्यभारतमहाभारतधर्माचार्याजानंतिबाहविगार्ग्यगौतमशाकल्यबाभ्रव्यमांडव्यमांडू
केयागर्गीवाचक्नवीवडवाप्रातीथेयीसुलभामैत्रेयीकहोळंकौषीतकंमहाकौषीतकंपैंग्यंमहापैंग्यंसुयज्ञंसांख्यायनमैतरेयं

 महैतरेयँशाकलंबाष्कलंसुजातवक्रंमौदवाहिंमहौदवाहिंसौजामिंशौनकमाश्वलायनंयेचान्येऽआचार्यास्तेसर्वेतृप्यन्त्वि
तिंप्रतिपुरुषंपितॄंस्तर्पयित्वागृहानेत्ययद्ददातिसादक्षिणाथापिविज्ञायतेयद्यदितिष्ठन्व्रजन्नासीनःशयानोवायंयंक्रतुमधी
 तेतेनतेनहास्यंक्रतुनेष्टंभवतीतिविज्ञायतेतस्यद्वावनध्यायौयदात्माशुचिर्यद्देशः ॥४॥ अथातोध्यायोपाकरणंमोषधीनां
प्रादुर्भावेश्रवणेनश्रावणस्यपंचम्यांहस्तेनवाज्यभागौहुत्वाज्याहुतीर्जुहुयात्सावित्र्यैब्रह्मणेश्रद्धायैमेधायैप्रज्ञायैधारणायै
सदसस्पतयेनुमतयेछंदोभ्यऽऋषिभ्यश्चेत्यथदधिसक्तूजुहोत्यग्निमीळेपुरोहितमित्येकाकुसुंभकस्तदब्रवीदावदंस्त्वंशकुने
भद्रमावदगृणानाजमदग्निनाधामंतेविश्वंभुवनमधिश्रितंगंतानोयज्ञंयज्ञियाःसुशर्मियोनस्वोऽअरणःप्रतिचक्ष्वविच
क्ष्वाग्नेयाहिमरुत्सखायत्तेराजन्छृतंहविरितिद्वृचाःसमानीवऽआकूतिरित्येकातच्छंयोरावृणीमहइत्येकाध्येष्यमाणोध्या
प्यैरन्वारब्धएताभ्योदेवताभ्योहुत्वासौविष्टकृतंहुत्वादधिसक्तून्प्राश्यततोमार्जनमपरेणाग्निंप्राक्कूलेषुदर्भेषूपविश्योद
पात्रेदर्भान्कृत्वाब्रह्मांजलिकृतोजपेदोंपूर्वाव्याहृतयःसावित्रींचत्रिरभ्यस्यवेदादिमारभेत्तथोत्सर्गेषण्मासानधीयीतंस
मावृत्तोब्रह्मचारिकल्पेनयथान्यायमितरेजायोपेयेत्येकेप्राजापत्यंतद्वार्षिकमित्येतदाचक्षतेमध्यमाष्टकायामेताभ्योदे ॥ १२ ॥
वताभ्योन्नेनहुत्वापोभ्यवयंत्येताएवतद्देवतास्तर्पयंत्याचार्यानृषीन्पितॄंश्चैतदुत्सर्जनं॥५॥अथकाम्यानांस्थानेकाम्याश्चर
वस्तानेवकामानाप्नोत्यथव्याधितस्यातुरस्ययक्ष्मगृहीतस्यवाषळाहुतिर्जुहुयान्मुंचामित्वाहविषाजीवनायकमित्येतेनस्वप्नम

मनोज्ञं दृष्ट्वां द्यानोदेवसवितरितिद्वाभ्यां यच्चगोषुदुःष्वप्न्यमितिं पंचभिरादित्यमुपतिष्ठेतं योमेराजन्युज्योवासखावेतिवा
क्षुत्वाजृंभित्वामनोज्ञं दृष्ट्वांपापकंगंधमाघ्रायांक्षिस्पंदनेकर्णध्वननेचंसुचक्षाअहमक्षीभ्यांभूयासंसुवर्चामुखेनंसुश्रुत्कर्णा
भ्यांमयिदक्षक्रतूइतिजपेंदगमनीयांगत्वाऽयाज्यंयाजयित्वाऽभोज्यंभुक्त्वाप्रतिग्राह्यंप्रतिगृह्यचैत्यंयूपंवोपहत्यपुनर्मामे
त्विंद्रियंपुनरायुःपुनर्भगः॥पुनर्द्रविणमैतुमांसर्वाश्चराजबांधवीःस्वाहा॥इमेयेधिष्ण्यासोअग्नयोयथास्थानमिहकल्पतां॥
वैश्वानरोवावृधानोंन्तर्यच्छतुमेमनोंहृद्यंतरममृतस्यकेतुःस्वाहेंत्याज्याहुतीर्जुहुयांत्समिधौवाजपेद्वा ॥ ६ ॥ अव्याधितं
चेत्स्वपंतंमादित्योभ्यस्तमियांद्वाग्यतोनुपविशंन्रात्रिशेषंभूत्वायेनसूर्यज्योतिषाबाधसेतमइतिंपंचभिरादित्यमुपतिष्ठेता
भ्युदियाच्चेदकर्मश्रांतमनभिरूपेणकर्मणावाग्यतइतिंसमानमुत्तराभिश्चतसृभिरुपस्थानंयज्ञोपवीतीनित्योदर्कः संध्यामु
पासीतंवाग्यतःसायमुत्तरांपराभिमुखोन्वष्टमदेशंसावित्रींजपेंदर्धास्तमितेमंडलेआनक्षत्रदर्शनांदेवंप्रातःप्राङ्मुखस्तिष्ठ
न्नामंडलदर्शनांत्कपोतश्चेदगारमुपहन्यादनुपतेद्वादेवाःकपोतइतिंप्रत्यृचंजुहुयाज्जपेद्वावयमुत्वापथस्पतइत्यर्थचर्यांच
रिष्यन्संपूषन्विदुषइतिंनष्टमधिजिगमिषन्मूढोवासंपूषन्नध्वनइतिंमहांतमध्वानमेष्यन्प्रतिभयंवा ॥ ७ ॥ अथैतान्युप
कल्पयीतंसमावर्तमानोमणिंकुंडलेवस्त्रयुगंछत्रंमुपानद्युगंदंडंस्रजमुन्मर्दनमनुलेपनंमांजनमुष्णीषमित्यात्मनेचाचार्या
शि.वे. ३० यचंयद्युभयोर्नविंदेतांचार्यायैवसमिधंत्वाहरेंदपराजितायांदिशियज्ञियस्यवृक्षस्यार्द्रामन्नाद्यकामःपुष्टिकामस्तेजस्कामो

वांब्रह्मवर्चसकामंउपवातामुभयीमुभयकामंउपरिसमिधंकृत्वांगामन्नंचब्राह्मणेभ्यःप्रदायगौदानिकंकर्मकुर्वीतांतमनि
मंत्रान्त्सन्नमयेदेकक्लीतकेनशीतोष्णाभिरद्भिःस्नात्वांयुवंवस्त्राणिपीवसावसाथेइत्यहतेवाससीआच्छाद्यांश्मनस्तेजो
सिचक्षुर्मेपाहीतिचक्षुषीआंजयीतांश्मनस्तेजोसिश्रोत्रंमेपाहीतिकुंडलेआवध्नीतांनुलेपनेनपाणीप्रलिप्यमुखमग्रेब्राह्मणो
नुलिंपेद्बाहूराजन्यउदरंवैश्यंउपस्थंस्त्र्यूरूसरणजीविनोनार्तास्यनार्तोहंभूयासमितिस्रजमपिवध्नीतनमालोक्तांमालेतिचे
दूब्रूयुःस्रगित्यभिधापयीतदेवानांप्रतिष्ठेस्थःसर्वतोमापातमित्युपानहावास्थायदिवश्छद्मासीतिछत्रमादत्तेवेणुरसिवान
स्पत्योसिसर्वतोमापाहीतिवैणवंदंडमायुष्यमितिसूक्तेनमणिंकंठेप्रतिमुच्योष्णीषंकृत्वांतिष्ठन्त्समिधमादध्यात् ॥ ८ ॥
स्मृतंनिंदाचविद्याचश्रद्धाप्रज्ञाचपंचमी ॥ इष्टंदत्तमधीतंचकृतंसत्यंश्रुतंव्रतं ॥ यदग्नेसेंद्रस्यसप्रजापतिकस्यसऋषिक
स्यसऋषिराजन्यस्यसपितृकस्यसपितृराजन्यस्यसमनुष्यस्यसमनुष्यराजन्यस्यसाकाशस्यसातीकाशस्यसानूकाशस्यस
प्रतीकाशस्यसदेवमनुष्यस्यसगंधर्वाप्सरस्कस्यसहारण्यैश्चपशुभिर्ग्राम्यैश्चयन्मआत्मनआत्मनिव्रतंतन्मेसर्वव्रतमिदम
हमग्नेसर्वव्रतोभवामिस्वाहेतिममाग्नेवर्चइतिप्रत्यृचंसमिधोभ्यादध्यांद्यत्रैनंपूजयिष्यंतोभवंतितत्रैतांरात्रींवसेद्द्वियांते
गुरुमर्थेननिमंत्र्यकृतानुज्ञातस्यवास्नानंतस्यैतानिव्रतानिभवंतिननक्तंस्नायान्ननग्नःस्नायान्ननग्नःशयीतनननग्नांस्त्रियमी
क्षेतान्यत्रमैथुनाद्वर्षतिनधावेन्नवृक्षमारोहेन्नकूपमवरोहेन्नबाहुभ्यांनदींतरेन्नसंशयमभ्यापद्येतमहद्वैभूतंस्नातकोभवती

तिविज्ञायते ॥ ९ ॥ गुरवेप्रस्रक्ष्यमाणोनामप्रब्रुवीतेदंवत्स्यामोभो३इत्युच्चैरूर्ध्वंनाम्नःप्राणापानयोरुपांश्वामंद्रैरिंद्रहरि
भिरितिचांतोवृद्धोजपतिंप्राणापानयोरुरुव्यचांस्तयाप्रपद्येदेवायसवित्रेपरिददामीत्यृचंचसमाप्योंप्राक्स्वस्तीतिजपि
त्वांमहित्रीणामित्यनुमंत्र्यैवमतिसृष्टस्यनकुतश्चिद्भयंभवतीतिविज्ञायतेंवयसाममनोज्ञावाचःश्रुत्वाकनिक्रदज्जनुषंप्रब्रु
वाणइतिसूक्तेजपेदेवींवाचमजनयंतदेवाइतिचंस्तुहिश्रुतंगर्तसदंयुवानमितिंमृगस्ययस्यादिशोबिभीयाद्यस्माद्वातांदि
शमुल्मुकंमुभयतःप्रदीप्तंप्रत्यस्यैन्मंथंवाप्रसव्यमालोड्यांभयंमित्रावरुणामह्यमस्त्वर्चिषाशत्रून्दहंतंप्रतीत्यमाज्ञातारं
माप्रतिष्ठांविंदंतुमिथोभिंदानाउभयंतुमृत्युमितिंसंसृष्टंधनमुभयंसमाकृतमितिंमंथंन्यंचंकरोति ॥ १० ॥ सर्वतोभया
दनाज्ञातांदष्टावाज्याहुतीर्जुहुयांत्पृथिवीवृतासाग्निनावृतांतयावृतयावत्र्यायस्माद्भयाद्बिभेमितद्वारयेस्वाहा ॥ अंत
रिक्षंवृतंतद्वायुनावृतंतेनवृतेनवर्त्रेणंयस्माद्भयाद्बिभेमितद्वारयेस्वाहा ॥ द्यौर्वृतासादित्येनवृतांतयावृतयावत्र्यायस्मा
द्भयाद्बिभेमितद्वारयेस्वाहा ॥ दिशोवृतास्ताश्चंद्रमसावृतांस्ताभिर्वृताभिर्वत्रींभिर्यस्माद्भयाद्बिभेमितद्वारयेस्वाहा ॥
आपोवृतास्तावरुणेनवृतांस्ताभिर्वृताभिर्वत्रींभिर्यस्माद्भयाद्बिभेमितद्वारयेस्वाहा ॥ प्रजावृतास्ताःप्राणेनवृतास्ताभिं
र्वृताभिर्वत्रींभिर्यस्माद्भयाद्बिभेमितद्वारयेस्वाहा ॥ वेदावृतास्तेछंदोभिर्वृतास्तैर्वृतैर्वत्रैर्यस्माद्भयाद्बिभेमितद्वारयेस्वा
हा ॥ सर्वंवृतंतद्ब्रह्मणावृतंतेनवृतेनवर्त्रेणंयस्माद्भयाद्बिभेमितद्वारयेस्वाहेत्यथापराजितायांदिश्यवस्थायंस्वस्त्यात्रेयं

जपतिंयतइंद्रभयामहइतिचसूक्तशेषं ॥ ११ ॥ संग्रामेसमुपोढ्हेंराजानंसंनाहयेंदात्वाहार्षमंतरेधीतिंपश्चाद्रथस्यावस्थाय
जीमूतस्येवभवतिप्रतीकमितिंकवचंप्रयच्छेंदुत्तरयाधनुरुत्तरांवाचयेंत्स्वयंचतुर्थींजपेंत्पंचम्येषुधिंप्रयच्छेंदभिप्रवर्तमा
नेषष्ठींसप्तम्याश्वानष्टमींमिषूनवेक्षमाणंवाचयंत्यहिरिवभोगैःपर्येतिबाहुमितिंतलंनह्यमानंमथैनंसारयमाणमुपारुह्यां
भीवर्तंवाचयतिंप्रयोवांमित्रावरुणेतिचद्वेंअथैनमन्वीक्षेतांप्रतिरथशाससौपर्णैःप्रधारयंतुमधुनोघृतस्यैंत्येतत्सौपर्णंस
र्वादिशोनुपर्यायांदादित्यमौशनसंवावस्थायप्रबोधयेंदुपश्वासयपृथिवीमुतद्यामितितृचेनंदुंदुभिमभिमृशेंदवसृष्टापरा
पतेतीषून्विसर्जयेंद्यत्रबाणाःसंपतंतीतिचंयुध्यमानेषुजपेंत्संशिष्याद्वासंशिष्याद्वा ॥ १२ ॥ ॥ इतिगृ. तृ. ॥ ३ ॥

अथचतुर्थाध्यायः ॥ हरिःॐ३म् ॥ ॥ आहिताग्निश्चेदुपतपेत्प्राच्यामुदीच्यांमपराजितायांवादिश्युदवस्येंद्ग्रा
मकामाअग्नयइत्युदाहरंत्याशंसंतएनंग्राममाजिगमिषंतोऽगदंकुर्युरितिहविज्ञायतेंऽगदःसोमेनंपशुनेष्ट्येष्ट्वावस्येदनिष्ट्वा
वासंस्थितेभूमिभागंखानयेद्दक्षिणपूर्वस्यांदिशिंदक्षिणापरस्यांवांदक्षिणाप्रवणंप्राग्दक्षिणाप्रवणंवांप्रत्यग्दक्षिणाप्रवण
मित्येकेंयावानूर्ध्वबाहुकःपुरुषस्तावदायामंव्याममात्रंतिर्यग्वितस्त्यर्वांगभितआकाशंश्मशानंबहुलौषधिकंकंटकिक्षी ॥ १४ ॥
रिणस्त्विर्तियथोक्तंपुरस्तांद्यत्रसर्वतआपःप्रस्यंदेरंन्नेतदादहनस्यलक्षणंश्मशानस्यंकेशश्मश्रुलोमनखानीत्युक्तंपुरस्तां
द्विगुल्फंबर्हिराज्यंचंदधन्यत्रसर्पिरानयंत्येतत्पित्र्यंपृषदाज्यम् ॥ १ ॥ अथैतांदिशमग्नीन्नयंतिंयज्ञपात्राणिचां

न्वंचंप्रेतंमयुजोमिथुनाःप्रवयसंःपीठचक्रेणगोयुक्तेनेत्येकेंनुस्तरणींगामजांवैकवर्णांकृष्णामेकेंसव्यबाहूबध्वानुसंकालयं
त्यन्वंचोमात्यांअधोनिवीताःप्रवृत्तशिखांज्येष्ठप्रथमाःकनिष्ठजघन्याःप्राप्यैवंभूमिभागंगर्तोदकेनशमीशाखयांत्रिःप्रस
व्यमायतनंपरिव्रजन्प्रोक्षंत्यपेतवीतविचसर्पतातइतिंदक्षिणपूर्वउद्धृतांतंआहवनीयंनिदधात्युत्तरपश्चिमेगार्हपत्यंदक्षि
णपश्चिमेदक्षिणंमथैनमंतर्वेदींध्मचितिंचिनोतियोजानातितस्मिन्बर्हिरास्तीर्यंकृष्णाजिनंचोत्तरलोमंतस्मिन्प्रेतंसंवेश
यंत्युत्तरेणगार्हपत्यंहृत्वांहवनीयमभिशिरसंमुत्तरतःपत्नींधनुश्चक्षत्रियायंतामुत्थापयेद्देवरःपतिस्थानीयोंतेवासीजरद्दा
सोवोंदीर्ष्वनार्यभिजीवलोकमितिंकर्तावृषलेजपेंद्धनुर्हस्तादाददानोमृतस्येतिधनुंरुक्तंवृषलेऽधिज्यंकृत्वांसंचितिमचि
त्वांसंशीर्यानुप्रहरेत् ॥ २ ॥ अथैतानिपात्राणियोजयेद्दक्षिणेहस्तेजुहूंसव्यऽउपभृतंदक्षिणेपार्श्वेस्फ्यंसव्येऽग्नि
होत्रहवणीमुरसिध्रुवांशिरसिकपालानिंदत्सुग्रावणोंनासिकयोःस्रुवौभित्त्वाचैकंकर्णयोःप्राशित्रहरणेभित्त्वाचैकंमुदरे
पात्रींसमवत्तधानंचचमसंमुपस्थेशम्यामरणीऊर्वोरुलूखलमुसलेजंघयोःपादयोःशूर्पेछित्त्वाचैकमासेचनवंतिपृषदाज्यं
पूरयंत्यमापुत्रोद्दृषदुपलेकुर्वीतंलौहायसंचकौलालंमनुस्तरण्यावपामुत्खिद्यंशिरोमुखंप्रच्छादयेंदग्नेर्वर्मपरिगोभिर्व्ययस्वे
तिवृक्काउद्धृत्यपाण्योरादध्यांदतिद्रवसारमेयौश्वानावितिंदक्षिणेदक्षिणंसव्येसव्यंहृदयेहृदयंपिंड्यौचैकेंवृक्कापचारइत्येकें
सर्वांयथांगंविनिक्षिप्यंचर्मणाप्रच्छाद्येंममग्नेचमसंमाविजिह्वरइतिंप्रणीताप्रणयनमनुमंत्रयतेंसव्यंजान्वाच्यदक्षिणाग्ना

वाज्याहुतीर्जुहुयादग्नयेस्वाहाकामायस्वाहालोकायस्वाहानुमतयेस्वाहेतिपंचमीमुरसिप्रेतस्यास्माद्वैत्वमजायथाअयं
त्वदधिजायतामसौस्वर्गायलोकायस्वाहेति ॥ ३ ॥ प्रेष्यतियुगपदग्नीन्प्रज्वालयतेत्याहवनीयश्चेत्पूर्वंप्राप्नुयात्स्वर्गलो
कएनंप्रापदितिविद्याद्रात्स्यत्यसावमुत्रैवमयमस्मिन्नितिपुत्रोगार्हपत्यश्चेत्पूर्वंप्राप्नुयादंतरिक्षलोकएनंप्रापदितिविद्याद्रा
त्स्यत्यसावमुत्रैवमयमस्मिन्नितिपुत्रोदक्षिणाग्निश्चेत्पूर्वंप्राप्नुयान्मनुष्यलोकएनंप्रापदितिविद्याद्रात्स्यत्यसावमुत्रैवमयम
स्मिन्नितिपुत्रोयुगपत्प्राप्तौपरामृद्धिंवदंतितंदह्यमानमनुमंत्रयतेप्रेहिप्रेहिपथिभिःपूर्व्येभिरितिसमानंसएवंविदादह्यमा
नःसहैवधूमेनस्वर्गंलोकमेतीतिविज्ञायतउत्तरपुरस्तादाहवनीयस्यजानुमात्रंगर्तंखात्वाद्भिपूरयित्वावकांशीपालमित्यव
धापयेत्ततोहवाएषनिष्क्रम्यसहैवधूमेनस्वर्गंलोकमेतीतिविज्ञायतइमेजीवाविमृतैरावव्रृत्रन्नितिसव्यावृतोव्रजेत्यनवेक्ष
माणायत्रोदकमवहद्भवतितत्प्राप्यसकृदुन्मृज्यैकांजलिमुत्सृज्यतस्यगोत्रंनामचगृहीत्वोत्तीर्यान्यानिवासांसिपरिधाय
सकृदेनान्पीड्योदग्दशानिविसृज्यासतआनक्षत्रदर्शनादादित्यस्यवादर्शनेप्रविशेयुःकनिष्ठप्रथमाज्येष्ठजघन्याःप्राप्या
गारमश्मानमग्निंगोमयमक्षतांस्तिलानपउपस्पृशंतिनैतस्यांरात्र्यामन्नंपचेरन्क्रीतोत्पन्नेनवावर्तेरन्त्रिरात्रमक्षारालवणा ॥ १५ ॥
शिनःस्युर्द्वादशरात्रंवामहागुरुषुदानाध्ययनेवर्जयेरन्दशाहंसपिंडेषुगुरौचासपिंडेप्रत्तासुचस्त्रीषुत्रिरात्रमितरेष्वाचार्ये
षुज्ञातौचासपिंडेप्रत्तासुचस्त्रीष्वदंतजातेपरिजातेचैकाहंसब्रह्मचारिणिसमानग्रामीयेचश्रोत्रिये ॥ ४ ॥ संचयनमूर्ध्वंद

शम्याः कृष्णपक्षस्यांयुजास्वेकनक्षत्रैंलक्षणेकुंभेपुमांसंमलक्षणायांस्त्रियंमयुजोमिथुनाःप्रवयसंःक्षीरोदकेनशमीशाखयां
त्रिःप्रसव्यमायतनंपरिव्रजन्प्रोक्षतिंशीतिकेशीतिकावतींत्यंगुष्ठोपकनिष्ठिकाभ्यांमेकैकमस्थ्यसंह्रादयंतोवदध्युंःपादौपू
र्वंशिरउत्तरंसुसंचितंसंचित्यंपवनेनसंपूर्यंयत्रसर्वतआपोनाभिस्यंदेरंन्नन्यावर्षाभ्यंस्तत्रगर्तेवदध्युंरुपसर्पमातरंभूमिमे
तांमित्युत्तरयापांसूनवकिरेंदवकीर्योत्तरांमुत्तेस्तभ्नामीतिंकपालेनापिधायांथानवेक्षन्प्रत्याव्रज्यांपउपस्पृश्यंश्राद्धमस्मै
दद्युः ॥ ५ ॥ गुरुणाभिमृतांअन्यतोवापक्षीयमाणांअमावास्यायांशांतिकर्मकुर्वीरंन्पुरोदयादग्निंसहभस्मानंसहायतनं
दक्षिणाहरेयुंःक्रव्यादमग्निंप्रहिणोमिदूरमित्यर्धर्चेनंतंचतुष्पथेन्युप्यंयत्रवात्रिःप्रसव्यंपरियंतिंसव्यैःपाणिभिंःसव्यानू
रूनाघ्नानांअथानवेक्षन्प्रत्याव्रज्यांपउपस्पृश्यंकेशश्मश्रुलोमनखानिवापयित्वोंपकल्पयीरंन्नवान्मणिकान्कुंभांनाचम
नीयांश्चंशमीसुमनोमलिनंःशमीमयमिध्मंशमीमय्यावरणीपरिधींश्चांनडुहंगोमयंचर्मचनवनीतमश्मानंयावत्योयुवतयं
स्तावंतिकुशपिंजूलांन्यग्निवेलायामाग्निंजनयेंदिहैवायमितरोजातवेदाऽइत्यर्धर्चेनंतंदीपयमानाआसतंआशांतरात्रांदा
युष्मतांकथाःकीर्तयंतोंमांगल्यानीतिहासपुराणानींत्याख्यापयमानांउपरतेषुशब्देषुंसंप्रविष्टेषुवांगृहंनिवेशनंवांदक्षि
णाद्द्वारपक्षात्प्रक्रम्यांविच्छिन्नामुदकधारांहरेंत्तंतुंतन्वन्रजसोभानुमन्विहीत्योत्तरस्मांदथाग्निमुपसमाधायंपश्चादस्यान
डुहंचर्मास्तीर्यंप्राग्ग्रीवमुत्तरलोमंतस्मिन्नमात्यानारोहयेंदारोहतायुर्जरसंवृणानाऽइतींमंजीवेभ्यःपरिधिंदधामीतिंपरि

धिंपरिदध्यांदंतर्मृत्युंदधतापर्वतेनेंत्यश्मानमुत्तरतोग्नेः कृत्वांपरंमृत्योअनुपरेहिपंथामितिंचतसृभिः प्रत्यृचंहुत्वांयथाहा
न्यनुपूर्वंभवंतींत्यमात्यानीक्षेतंयुवतयः पृथक्पाणिभ्यांदर्भतरुणकैर्नवनीतेनचांगुष्ठोपकनिष्ठाभ्यांमक्षिणीऽआंज्यंपरां
च्योविसृजेयुरिंमानारीरविधवाः सुपत्नीरिंत्यंजनाईक्षेतांश्मन्वतीरीयतेसंरभध्वंमित्यश्मानंकर्ताप्रथमोभिमृशेंदथापरा
जितायांदिश्यवस्थायांग्निनानडुहेनगोमयेनचांविच्छिन्नयाचोदकधारयांपोहिष्ठामयोभुवइतितृचेनंपरीमेगामनेषतेतिं
परिक्रामत्सुजपेंत्पिंगलोनड्वांन्परिणेयः स्यादित्युदाहरंत्यथोपविशंतियत्राभिरंस्यमानाभवंत्यहतेनवाससाप्रच्छाद्यांसते
स्वपंतओदयांदुदितआदित्येसौर्याणिंस्वस्त्ययनानिचजपित्वांन्नंसंस्कृत्यांपनः शोशुचदघमितिंप्रत्यृचंहुत्वांब्राह्मणान्भो
जयित्वांस्वस्त्ययनंवाचयीतंगौः कंसोहतंवासश्चदक्षिणा ॥१०॥ अथातः पार्वणेश्राद्धेंकाम्यआभ्युदयिकंएकोद्दिष्टेवांब्राह्म
णान्श्रुतशीलवृत्तसंपन्नांनेकेनवाकालेज्ञापितांन्स्नातान्कृतपच्छौचांनाचांतानुदङ्मुखांन्पितृवदुपवेश्यैकैकमेकैकस्यं
द्वौद्वौत्रींस्त्रीन्वांवृद्धौफलभूयस्त्वंनत्वेवैकंसर्वेषांकाममनाद्येंपिंडैर्व्याख्यातंमपः प्रदायंदर्भान्द्विगुणभुग्नानासनंप्रदायां
पः प्रदायंतैजसाश्ममयमृन्मयेषुंत्रिषुपात्रेष्वेकद्रव्येषुवांदर्भांतार्हितेष्वपआसिच्यंशंनोदेवीरभिष्टयइत्यनुमंत्रितासुंतिला
नावपंतितिलोसिसोमदेवत्योंगोसवेदेवनिर्मितः ॥ प्रत्नवद्भिः प्रत्तः स्वधयांपितृनिमाँल्लोकान्प्रीणयाहिनः स्वधानमऽइ
तिंप्रसव्येनेतरपाण्यंगुष्ठांतरेणोपवीतित्वांद्दक्षिणेनवासव्योपगृहीतेनंपितरिदंतेअर्घ्यंपितामहेदंतेअर्घ्यंप्रपितामहेदंते

अर्घ्यमित्यपूर्वीताःप्रतिग्राहयिष्यंन्त्सकृत्सकृत्स्वधाअर्घ्याइतिंप्रसृष्टाअनुमंत्रयेत यादिव्याआपःपृथिविसंबभूर्वुर्या
अंतरिक्ष्याउतपार्थिवीर्याः ॥ हिरण्यवर्णायज्ञियांस्तानआपःशंस्योनाभवंत्विर्तिसंस्रवान्समवनीयंताभिरद्भिःपुत्रका
मोमुखमनक्ति ॥ नोद्धरेत्प्रथमंपात्रंपितृणामर्घ्यपातितं ॥ आवृतास्तत्रतिष्ठंतिपितरःशौनकोब्रवीत् ॥ उद्धरेद्यदि
चेत्पात्रंविवृतंवायदाभवेत् ॥ तदासुरंभवेच्छ्राद्धंक्रुद्धैःपितृगणैर्गतैरिति ॥ ७ ॥ एतस्मिन्कालेगंधमाल्यधूपदीपा
च्छादनानांप्रदानंमुद्धृत्यघृताक्तमन्नमनुज्ञापयंत्यग्नौकरिष्येकरवैकरवाणीतिवांप्रत्यभ्यनुज्ञाक्रियतांकुरुष्वकुर्वित्यंथा
ग्नौजुहोतिंयथोक्तंपुरस्तादभ्यनुज्ञायांपाणिष्वेववांग्निमुखावैदेवाःपाणिमुखाःपितरइतिहिब्राह्मणंयदिपाणिष्वाचांतेष्व
न्यदन्नमनुदिशंत्यन्नमन्नेसृष्टंदत्तमृभ्रुकमिर्तितृप्तान्ज्ञात्वांमधुमतीःश्रावयेंदक्षन्नमीमदंतेतिचंसंपन्नमितिपृष्ट्वांयद्यदन्नमु
पभुक्तंतत्तत्स्थालीपाकेनंसहपिंडार्थमुद्धृत्यंशेषंनिवेदयेंदभिमतेनुमतेवांभुक्तवत्स्वनाचांतेषुपिंडान्निदध्यांदाचांतेष्वेकें
प्रकीर्यान्नमुपवीयौंस्वधोच्यतामितिविसृजेंदस्तुस्वधेतिवा ॥ ८ ॥ अथशूलगवःशरदिवसंतेवार्द्रयांश्रेष्ठंस्वस्ययूथस्यां
कुष्ठिपृषत्कल्माषमित्येकेंकामंकृष्णमालोहवांश्रेंव्रीहियवमतीभिरद्भिरभिषिच्यंशिरस्तऽआभसतोंरुद्रायमहादेवायंजु
ष्टोवर्धस्वेर्तितंवर्धयेंत्संपन्नदंतमृषभंवांयज्ञियायांदिश्यसंदर्शनेग्रामादूर्ध्वमर्धरात्रांदुदितइत्येकेंवैद्यंचरित्रवंतंब्राह्मणमु
पवेश्यंसपलाशामार्द्रशाखांयूपंनिखायंत्रतत्यौकुशरज्जूवारशनेअन्यतरयायूपंपरिवीयान्यतरयाऽर्धशिरसिपशुंबध्वांयूपे

रशनायांवानियुनक्तियस्मैनमस्तस्मैत्वाजुष्टंनियुनज्मीतिंप्रोक्षणादिसमानंपशुनाविशेषान्वक्ष्यामः पात्र्यापलाशेनवांव
पांजुहुयादितिहविज्ञायतेंहरायमृडायंशर्वायशिवायंभवायमहादेवायोंग्रायभीमायंपशुपतयेरुद्रायंशंकरायेशानाय
स्वाहेतिंषड्भिर्वोत्तरैरुद्रायस्वाहेतिवांचतसृषुचतसृषुकुशसूनासुंचतसृषुदिक्षुबलिंहरेंद्यास्तेरुद्रपूर्वस्यांदिशिंसेनास्ताभ्य
एनंनमस्तेअस्तुमामाहिंसीरित्येवंप्रतिदिशंत्वादेशनंचतुर्भिः सूक्तैश्चतस्रोदिशउपतिष्ठेतंकद्रुद्रायेमारुद्रायांतेपितरिमारु
द्रायस्थिरधन्वनइतिंसर्वरुद्रयज्ञेषुदिशामुपस्थानंतुषान्फलीकरणांश्चंपुच्छंचर्मशिरः पादानित्यग्नावनुप्रहरेंद्गोगंचर्मणा
कुर्वीतेतिशांवत्यंउत्तरतोग्नेर्दर्भवीतासुंकुशसूनासुवाशोणितंनिनयेच्छ्वासिनीर्घोषिणींर्विचिन्वतीः समश्नुतीः सर्पायएत
द्वोनेनवः प्रीणात्यथोदङ्ङावृत्यंश्वासिनीर्घोषिणींर्विचिन्वतीः समश्नुतीः सर्पायद्धोत्रतद्धरध्वमितिसर्पेभ्योयत्तत्रासृगूवध्यं
वांत्रस्नुतंभवंतितद्धरंतिसर्पाः सर्वाणिहवाअस्यनामधेयानिंसर्वाः सेनाः सर्वाण्युच्छ्रीमाणानींत्येवंविद्यजमानंप्रीणातिंना
स्यब्रुवाणंचंनहिनस्तीतिविज्ञायतेंनास्यप्राश्नीयांन्नास्यग्राममाहरेयुरभिमारुकोहैषदेवः प्रजाभवतीत्यंमात्यानंततः प्रति
षेधयेंन्नियोगात्तुप्राश्नीयांत्स्वस्त्ययनइतिंसएषशूलगवोंधन्योलोक्यः पुण्यः पुत्र्यंः पशव्यआयुष्योयशस्यंइष्ट्वान्यमुत्सृजें
न्नानुत्सृष्टः स्यांन्महापशुर्भवतीतिविज्ञायतेंशंतातीयंजपंन्गृहानियांत्पशूनामुपतापंएतमेवदेवंमध्येगोष्ठस्ययजेतंस्थाली

पाकंसर्वंहुतंबर्हिराज्यंचानुप्रहृत्यधूमतोगाआनयैच्छंतातीयंजपन्पशूनांमध्यमियान्मध्यमियांन्नमःशौनकायनमःशौनकायं ॥ ९ ॥ ॥ इत्याश्वलायनगृह्यसूत्रेचतुर्थोऽध्यायःसमाप्तः ॥ ४ ॥ इत्याश्वलायनगृह्यसूत्रंसमाप्तम् ॥ ॥

इदं पुस्तकं पणशीकरोपाह्वलक्ष्मणशर्मतनुजनुषा वासुदेवशर्मणा गोरेइत्युपनामक-
कृष्णंभट्टसाहाय्येन संस्कृतं तच्च मुंबय्यां **पांडुरंग जावजी** इत्येतैः
स्वीये निर्णयसागराख्येऽङ्कनयंत्रालये मुद्रयित्वा प्रकाशितम् ।

शाकः १८५६ सन १९३४.

॥ इत्याश्वलायनगृह्यसूत्रं समाप्तम् ॥

॥ अष्टाध्यायीसूत्रपाठप्रारंभः ॥

श्रीगणेशायनमः॥ ॥ हरिःॐम् ॥ येनाक्षरसमाम्नायमधिगम्यमहेश्वरात् । कृत्स्नंव्याकरणंप्रोक्तंतस्मैपाणिनयेनमः ॥ १ ॥ येनधौतागिरःपुंसांविमलैःशब्दवारिभिः । तमश्चाज्ञानजंभिन्नंतस्मैपाणिनयेनमः ॥ २ ॥ वाक्यकारंवररुचिंभाष्यकारंपतंजलिम् । पाणिनिंसूत्रकारंचप्रणतोऽस्मिमुनित्रयम् ॥ ३ ॥ अइउण् । ऋऌक् । एओङ् । ऐऔच् । हयवरट् । लण् । ञमङणनम् । झभञ् । घढधष् । जबगडदश् । खफछठथचटतव् । कपय् । शषसर् । हल् । इतिप्रत्याहारसूत्राणि ॥ वृद्धिरादैच् । अदेङ्गुणः । इकोगुणवृद्धी । नधातुलोपआर्धधातुके । क्ङितिच । दीधीवेवीटाम् । हलोऽनन्तराःसंयोगः । मुखनासिकावचनोऽनुनासिकः । तुल्यास्यप्रयत्नंसवर्णम् । नाज्झलौ । ईदूदेद्द्विवचनंप्रगृह्यम् । अदसोमात् । शे । निपातएकाजनाङ् । ओत् । संबुद्धौशाकल्यस्येतावनार्षे । उञः । ऊँ । ईदूतौचसप्तम्यर्थे । दाधाघ्वदाप् ॥१॥ आद्यन्तवदेकस्मिन् । तरप्तमपौघः । बहुगणवतुडतिसंख्या । ष्णान्ताषट् । डतिच । क्तक्तवतूनिष्ठा । सर्वादीनिसर्वनामानि । विभाषादिक्समासेबहुव्रीहौ । नबहुव्रीहौ । तृतीयासमासे । द्वन्द्वेच । विभाषाजसि । प्रथमचरमतयाल्पार्धकतिपयनेमाश्च । पूर्वपरावरदक्षिणोत्तरापराधराणिव्यवस्थायामसंज्ञायाम् । स्वमज्ञातिधनाख्यायाम् । अन्तरंबहिर्योगोपसंव्यानयोः । स्वरादिनिपातमव्ययम् । तद्धितश्चासर्वविभक्तिः । कृन्मेजन्तः । क्त्वातोसुन्कसुनः ॥ २ ॥ अव्ययीभावश्च । शिसर्वनामस्थानम् । सुडनपुंसकस्य । नवेतिविभाषा ।

इग्यणःसंप्रसारणम् । आद्यन्तौटकितौ । मिदचोऽन्त्यात्परः । एचइग्घ्रस्वादेशे । षष्ठीस्थानेयोगा । स्थानेऽन्तर
तमः । उरण्रपरः । अलोऽन्त्यस्य । ङिच्च । आदेःपरस्य । अनेकाल्शित्सर्वस्य । स्थानिवदादेशोऽनल्विधौ । अचःप
रस्मिन्पूर्वविधौ । नपदान्तद्विर्वचनवरेयलोपस्वरसवर्णानुस्वारदीर्घजश्चर्विधिषु । द्विर्वचनेऽचि । अदर्शनंलोपः
॥ ३ ॥ प्रत्ययस्यलुक्श्लुलुपः । प्रत्ययलोपेप्रत्ययलक्षणम् । नलुमताङ्गस्य । अचोऽन्त्यादिटि । अलोऽन्त्यात्पूर्वउप
धा । तस्मिन्निितिनिर्दिष्टेपूर्वस्य । तस्मादित्युत्तरस्य । स्वंरूपंशब्दस्याशब्दसंज्ञा । अणुदित्सवर्णस्यचाप्रत्ययः । तपर
स्तत्कालस्य । आदिरन्त्येनसहेता । येनविधिस्तदन्तस्य । वृद्धिर्यस्याचामादिस्तद्वृद्धम् । त्यदादीनिच । एङ्प्रा
चांदेशे ॥ ४ ॥ वृद्धिराद्यन्तवदव्ययीभावःप्रत्ययस्यलुक्पञ्चदश ॥ इतिप्रथमाध्यायेप्रथमःपादः ॥ १ ॥ ॥ छ ॥
गाङ्कुटादिभ्योऽञ्णिन्ङित् । विजइट् । विभाषोर्णोः । सार्वधातुकमपित् । असंयोगाल्लिट्कित् । इन्धिभवतिभ्यां
च । मृडमृदगुधकुषक्लिशवदवसःक्त्वा । रुदविदमुषग्रहिस्वपिप्रच्छःसंश्च । इकोझल् । हलन्ताच्च । लिङ्सिचावा
त्मनेपदेषु । उश्च । वागमः । हनःसिच् । यमोगन्धने । विभाषोपयमने । स्थाघ्वोरिच्च । नक्त्वासेट् । निष्ठाशी ॥ २ ॥
ङ्स्विदिमिदिक्ष्विदिधृषः । मृषस्तितिक्षायाम् ॥ १ ॥ उदुपधाद्भावादिकर्मणोरन्यतरस्याम् । पूङःक्त्वाच । नोप
धात्थफान्ताद्वा । वंचिलुंच्यृतश्च । तृषिमृषिकृषेःकाश्यपस्य । रलोव्युपधाद्धलादेःसंश्च । ऊकालोऽज्झ्रस्वदीर्घ

प्लुतः । अचश्च । उच्चैरुदात्तः । नीचैरनुदात्तः । समाहारःस्वरितः । तस्यादितउदात्तमर्धह्रस्वम् । एकश्रुतिदूरात्संबुद्धौ । यज्ञकर्मण्यजपन्यूंखसामसु । उच्चैस्तरांवावषट्कारः । विभाषाछन्दसि । नसुब्रह्मण्यायांस्वरितस्यतूदात्तः । देवब्रह्मणोरनुदात्तः । स्वरितात्संहितायामनुदात्तानाम् । उदात्तस्वरितपरस्यसन्नतरः ॥ २ ॥ अपृक्तएकाल्प्रत्ययः । तत्पुरुषःसमानाधिकरणःकर्मधारयः । प्रथमानिर्दिष्टंसमासउपसर्जनम् । एकविभक्तिचापूर्वनिपाते । अर्थवदधातुरप्रत्ययःप्रातिपदिकम् । कृत्तद्धितसमासाश्च । ह्रस्वोनपुंसकेप्रातिपदिकस्य । गोस्त्रियोरुपसर्जनस्य । लुक्तद्धितलुकि । इद्गोण्याः । लुपियुक्तवद्व्यक्तिवचने । विशेषणानांचाजातेः । तदशिष्यंसंज्ञाप्रमाणत्वात् । लुब्योगाप्रख्यानात् । योगप्रमाणेचतदभावेऽदर्शनंस्यात् । प्रधानप्रत्ययार्थवचनमर्थस्यान्यप्रमाणत्वात् । कालोपसर्जनेचतुल्यम् । जात्याख्यायामेकस्मिन्बहुवचनमन्यतरस्याम् । अस्मदोद्वयोश्च । फल्गुनीप्रोष्ठपदानांचनक्षत्रे ॥ ३ ॥ छन्दसिपुनर्वस्वोरेकवचनम् । विशाखयोश्च । तिष्यपुनर्वस्वोर्नक्षत्रद्वन्द्वेबहुवचनस्यद्विवचनंनित्यम् । सरूपाणामेकशेषएकविभक्तौ । वृद्धोयूनातल्लक्षणश्चेदेवविशेषः । स्त्रीपुंवच्च । पुमान्स्त्रिया । भ्रातृपुत्रौस्वसृदुहितृभ्याम् । नपुंसकमनपुंसकेनैकवच्चास्यान्यतरस्याम् । पितामात्रा । श्वशुरःश्वश्र्वा । त्यदादीनिसर्वैर्नित्यम् । ग्राम्यपशुसंघेष्वतरुणेषुस्त्री ॥ ४ ॥ गाङ्कुटाद्युदुपधादपृक्तश्छन्दसिपुनर्वस्वोस्त्रयोदश ॥ इतिप्रथमाध्यायेद्वितीयःपादः ॥ २ ॥ ॥ ७३ ॥ भूवादयो

धातवः । उपदेशेऽजनुनासिकइत् । हलन्त्यम् । नविभक्तौतुस्माः । आदिर्ञिटुडवः । षःप्रत्ययस्य । चुटू । लशक्वतद्धिते । तस्यलोपः । यथासंख्यमनुदेशःसमानाम् । स्वरितेनाधिकारः । अनुदात्तङितआत्मनेपदम् । भावकर्मणोः । कर्तरिकर्मव्यतिहारे । नगतिहिंसार्थेभ्यः । इतरेतरान्योन्योपपदाच्च । नेर्विशः । परिव्यवेभ्यःक्रियः । विपराभ्यांजेः । आङोदोऽनास्यविहरणे ॥ १ ॥ क्रीडोऽनुसंपरिभ्यश्च । समवप्रविभ्यःस्थः । प्रकाशनस्थेयाख्ययोश्च । उदोऽनूर्ध्वकर्मणि । उपान्मन्त्रकरणे । अकर्मकाच्च । उद्विभ्यांतपः । आङोयमहनः । समोगम्यृच्छिप्रच्छिस्वरत्यर्तिश्रुविदिभ्यः । निसमुपविभ्योह्वः । स्पर्धायामाङः । गन्धनावक्षेपणसेवनसाहसिक्यप्रतियत्नप्रकथनोपयोगेषुकृञः । अधेःप्रसहने । वेःशब्दकर्मणः । अकर्मकाच्च । संमाननोत्संजनाचार्यकरणज्ञानभृतिविगणनव्ययेषुनियः । कर्तृस्थेचाशरीरेकर्मणि । वृत्तिसर्गतायनेषुक्रमः । उपपराभ्याम् । आङउद्गमने ॥ २ ॥ वेःपादविहरणे । प्रोपाभ्यांसमर्थाभ्याम् । अनुपसर्गाद्वा । अपह्नवेज्ञः । अकर्मकाच्च । संप्रतिभ्यामनाध्याने । भासनोपसंभाषाज्ञानयत्नविमत्युपमन्त्रणेषुवदः । व्यक्तवाचांसमुच्चारणे । अनोरकर्मकात् । विभाषाविप्रलापे । अवाद्ग्रः । समःप्रतिज्ञाने । उदश्चरःसकर्मकात् । समस्तृतीयायुक्तात् । दाणश्चसाचेच्चतुर्थ्यर्थे । उपाद्यमःस्वकरणे । ज्ञाश्रुस्मृदृशांसनः । नानोर्ज्ञः । प्रत्याङ्भ्यांश्रुवः । शदेःशितः ॥३॥ म्रियतेर्लुङ्लिङोश्च । पूर्ववत्सनः । आम्प्रत्ययवत्कृञोऽनुप्रयोगस्य ।

प्रोपाभ्यांयुजेरयज्ञपात्रेषु । समःक्ष्णुवः । भुजोऽनवने । णेरणौयत्कर्मणौचेत्सकर्ताऽनाध्याने । भीस्म्योर्हेतुभये । गृधिवंच्योःप्रलम्भने । लियःसंमाननशालीनीकरणयोश्च । मिथ्योपपदात्कृञोऽभ्यासे । स्वरितञितःकर्त्रभिप्राये क्रियाफले । अपाद्वदः । णिचश्च । समुदाङ्भ्योयमोऽग्रन्थे । अनुपसर्गाज्ज्ञः । विभाषोपपदेनप्रतीयमाने । शेषा त्कर्तरिपरस्मैपदम् । अनुपराभ्यांकृञः । अभिप्रत्यतिभ्यःक्षिपः ॥ ४ ॥ प्राद्वहः । परेर्मृषः । व्याङ्परिभ्योरमः । उपाच्च । विभाषाकर्मकात् । बुधयुधनशजनेङ्प्रुद्रुस्रुभ्योणेः । निगरणचलनार्थेभ्यश्च । अणावकर्मकाच्चित्तवत्कर्तृ कात् । नपादम्याङ्यमाङ्यसपरिमुहरुचिनृतिवदवसः । वाक्यषः । द्युद्भ्योलुङि । वृद्भ्यःस्यसनोः । लुटिचक्लृपः ॥ ५ ॥ भूवादयःक्रीडोऽनुवेःपादम्रियतेःप्राद्वहस्त्रयोदश ॥ इतिप्रथमाध्यायेतृतीयःपादः ॥ ३ ॥ ॥ ६ ॥ आकडा रादेकासंज्ञा । विप्रतिषेधेपरंकार्यम् । यूस्त्र्याख्यौनदी । नेयङुवङ्स्थानावस्त्री । वामि । ङितिह्रस्वश्च । शेषोघ्य सखि । पतिःसमासएव । षष्ठीयुक्तश्छन्दसिवा । ह्रस्वंलघु । संयोगेगुरु । दीर्घंच । यस्मात्प्रत्ययविधिस्तदादिप्रत्य येऽङ्गम् । सुप्तिङन्तंपदम् । नःक्ये । सितिच । स्वादिष्वसर्वनामस्थाने । यचिभम् । तसौमत्वर्थे । अयस्मयादी निच्छन्दसि ॥ १ ॥ बहुषुबहुवचनम् । द्व्येकयोर्द्विवचनैकवचने । कारके । ध्रुवमपायेऽपादानम् । भीत्रार्थानांभय हेतुः । पराजेरसोढः । वारणार्थानामीप्सितः । अन्तर्धौयेनादर्शनमिच्छति । आख्यातोपयोगे । जनिकर्तुःप्रकृ

तिः । भुवःप्रभवः । कर्मणायमभिप्रैतिससंप्रदानम् । रुच्यर्थानांप्रीयमाणः । श्लाघह्नुङ्स्थाशपांज्ञीप्स्यमानः । धारेरुत्तमर्णः । स्पृहेरीप्सितः । क्रुधद्रुहेर्ष्यासूयार्थानांयंप्रतिकोपः । क्रुधद्रुहोरुपसृष्टयोःकर्म । राधीक्ष्योर्यस्यविप्रश्नः । प्रत्याङ्भ्यांश्रुवःपूर्वस्यकर्ता ॥ २ ॥ अनुप्रतिगृणश्च । साधकतमंकरणम् । दिवःकर्मच । परिक्रयणेसंप्रदानमन्यतरस्याम् । आधारोऽधिकरणम् । अधिशीङ्स्थासांकर्म । अभिनिविशश्च । उपान्वध्याङ्वसः । कर्तुरीप्सिततमंकर्म । तथायुक्तंचानीप्सितम् । अकथितंच । गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणिकर्तासणौ । हृक्रोरन्यतरस्याम् । स्वतन्त्रःकर्ता । तत्प्रयोजकोहेतुश्च । प्राग्रीश्वरान्निपाताः । चादयोऽसत्त्वे । प्रादयः । उपसर्गाःक्रियायोगे । गतिश्च ॥ ३ ॥ ऊर्यादिच्विडाचश्च । अनुकरणंचानितिपरम् । आदरानादरयोःसदसती । भूषणेऽलम् । अन्तरपरिग्रहे । कणेमनसीश्रद्धाप्रतीघाते । पुरोऽव्ययम् । अस्तंच । अच्छगत्यर्थवदेषु । अदोऽनुपदेशे । तिरोऽन्तर्धौ । विभाषाकृञि । उपाजेऽन्वाजे । साक्षात्प्रभृतीनिच । अनत्याधानउरसिमनसी । मध्येपदेनिवचनेच । नित्यंहस्तेपाणावुपयमने । प्राध्वंबन्धने । जीविकोपनिषदावौपम्ये । तेप्राग्धातोः ॥ ४ ॥ छन्दसिपरेऽपि । व्यवहिताश्च । ॥ ४ ॥
कर्मप्रवचनीयाः । अनुर्लक्षणे । तृतीयार्थे । हीने । उपोऽधिकेच । अपपरीवर्जने । आङ्मर्यादावचने । लक्षणेत्थंभूताख्यानभागवीप्सासुप्रतिपर्यनवः । अभिरभागे । प्रतिःप्रतिनिधिप्रतिदानयोः । अधिपरीअनर्थकौ । सुःपूजायाम् ।

अतिरतिक्रमणेच । अपिःपदार्थसंभावनान्ववसर्गगर्हासमुच्चयेषु । अधिरीश्वरे । विभाषाकृञि । लःपरस्मैपदम् । तङानावात्मनेपदम् ॥ ५॥ तिङस्त्रीणित्रीणिप्रथममध्यमोत्तमाः । तान्येकवचनद्विवचनबहुवचनान्येकशः । सुपः । विभक्तिश्च । युष्मद्युपपदेसमानाधिकरणेस्थानिन्यपिमध्यमः । प्रहासेचमन्योपपदेमन्यतेरुत्तमएकवच्च । अस्मद्युत्तमः । शेषेप्रथमः । परःसंनिकर्षःसंहिता । विरामोऽवसानम् ॥ ६ ॥ आकडाराद्बहुष्वनुप्रतिगृणऊर्यादिच्छन्दसि तिङोदश ॥ इतिप्रथमाध्यायेचतुर्थःपादः ॥ ४ ॥ ॥ इतिसूत्रपाठेप्रथमोऽध्यायः ॥ १ ॥ ॥ ॥

ॐ ॥ समर्थःपदविधिः । सुबामन्त्रितेपराङ्गवत्स्वरे । प्राक्कडारात्समासः । सहसुपा । अव्ययीभावः । अव्ययंविभक्तिसमीपसमृद्धिव्यृद्ध्यर्थाभावात्ययासंप्रतिशब्दप्रादुर्भावपश्चाद्यथानुपूर्व्ययौगपद्यसादृश्यसंपत्तिसाकल्यान्तवचनेषु । यथासादृश्ये । यावदवधारणे । सुप्प्रतिनामात्रार्थे । अक्षशलाकासंख्याःपरिणा । विभाषा । अपपरिबहिरंचवःपंचम्या । आङ्मर्यादाभिविध्योः । लक्षणेनाभिप्रतीआभिमुख्ये । अनुर्यत्समया । यस्यचायामः । तिष्ठद्गुप्रभृतीनिच । पारेमध्येषष्ठ्यावा । संख्यावंश्येन । नदीभिश्च ॥ १ ॥ अन्यपदार्थेचसंज्ञायाम् । तत्पुरुषः । द्विगुश्च । द्वितीयाश्रितातीतपतितगतात्यस्तप्राप्तापन्नैः । स्वयंक्तेन । खट्वाक्षेपे । सामि । कालाः । अत्यन्तसंयोगेच । तृतीयातत्कृतार्थेनगुणवचनेन । पूर्वसदृशसमोनार्थकलहनिपुणमिश्रश्लक्ष्णैः । कर्तृकरणेकृताबहुलम् । कृत्यैरधिकार्थवचने ।

अन्नेनव्यंजनम् । भक्ष्येणमिश्रीकरणम् । चतुर्थीतदर्थार्थबलिहितसुखरक्षितैः । पंचमीभयेन । अपेतापोढमुक्तप
तितापत्रस्तैरल्पशः । स्तोकान्तिकदूरार्थकृच्छ्राणिक्तेन । सप्तमीशौण्डैः ॥ २ ॥ सिद्धशुष्कपक्वबन्धैश्च । ध्वाङ्क्षेण
क्षेपे । कृत्यैर्ऋणे । संज्ञायाम् । क्तेनाहोरात्रावयवाः । तत्र । क्षेपे । पात्रेसमितादयश्च । पूर्वकालैकसर्वजरत्पुराण
नवकेवलाःसमानाधिकरणेन । दिक्संख्येसंज्ञायाम् । तद्धितार्थोत्तरपदसमाहारेच । संख्यापूर्वोद्विगुः । कुत्सिता
निकुत्सनैः । पापाणकेकुत्सितैः । उपमानानिसामान्यवचनैः । उपमितंव्याघ्रादिभिःसामान्याप्रयोगे । विशेषणंवि
शेष्येणबहुलम् । पूर्वापरप्रथमचरमजघन्यसमानमध्यमध्यमवीराश्च । श्रेण्यादयःकृतादिभिः । क्तेननञ्विशिष्टेनान
ञ् ॥ ३ ॥ सन्महत्परमोत्तमोत्कृष्टाःपूज्यमानैः । वृन्दारकनागकुंजरैःपूज्यमानम् । कतरकतमौजातिपरिप्रश्ने । किं
क्षेपे । पोटायुवतिस्तोककतिपयगृष्टिधेनुवशावेहद्बष्कयणीप्रवक्तृश्रोत्रियाध्यापकधूर्तैर्जातिः । प्रशंसावचनैश्च । युवा
खलतिपलितवलिनजरतीभिः । कृत्यतुल्याख्याअजात्या । वर्णोवर्णेन । कुमारःश्रमणादिभिः । चतुष्पादोगर्भिण्या ।
मयूरव्यंसकादयश्च ॥ ४ ॥ समर्थोऽन्यपदार्थेसिद्धशुष्कसन्महद्वादश ॥ इतिद्वितीयाध्यायेप्रथमःपादः ॥ १ ॥ ॥ छ ॥ ॥ ५ ॥
पूर्वापराधरोत्तरमेकदेशिनैकाधिकरणे । अर्धंनपुंसकम् । द्वितीयतृतीयचतुर्थतुर्याण्यन्यतरस्याम् । प्राप्तापन्नेचद्वि
तीयया । कालाःपरिमाणिना । नञ् । ईषदकृता । षष्ठी । याजकादिभिश्च । ननिर्धारणे । पूरणगुणसुहितार्थसदव्यय

तव्यसमानाधिकरणेन । क्तेनचपूजायाम् । अधिकरणवाचिनाच । कर्मणिच । तृजकाभ्यांकर्तरि। कर्तरिच । नित्यं क्रीडाजीविकयोः । कुगतिप्रादयः । उपपदमतिङ् । अमैवाव्ययेन ॥ १ ॥ तृतीयाप्रभृतीन्यन्यतरस्याम् । क्त्वाच । शेषोबहुव्रीहिः । अनेकमन्यपदार्थे । संख्ययाव्ययासन्नादूराधिकसंख्याःसंख्येये । दिङ्नामान्यन्तराले । तत्रतेनेद मितिसरूपे । तेनसहेतितुल्ययोगे । चार्थेद्वन्द्वः । उपसर्जनंपूर्वम् । राजदन्तादिषुपरम् । द्वन्द्वेघि । अजाद्यदन्तम् । अल्पाच्तरम् । सप्तमीविशेषणेबहुव्रीहौ । निष्ठा । वाहिताग्न्यादिषु । कडाराःकर्मधारये ॥ २ ॥ पूर्वापराधरोत्तरंतृ तीयाप्रभृतीन्यष्टादश ॥ इतिद्वितीयाध्यायेद्वितीयःपादः ॥ २ ॥ ॥ छ ॥ अनभिहिते । कर्मणिद्वितीया । तृतीया चहोश्छन्दसि । अन्तरान्तरेणयुक्ते । कालाध्वनोरत्यन्तसंयोगे । अपवर्गेतृतीया । सप्तमीपंचम्यौकारकमध्ये । कर्म प्रवचनीययुक्तेद्वितीया । यस्मादधिकंयस्यचेश्वरवचनंतत्रसप्तमी । पंचम्यपाङ्परिभिः । प्रतिनिधिप्रतिदानेचयस्मा त् । गत्यर्थकर्मणिद्वितीयाचतुर्थ्यौचेष्टायामनध्वनि । चतुर्थीसंप्रदाने । क्रियार्थोपपदस्यचकर्मणिस्थानिनः । तुम र्थाच्चभाववचनात् । नमःस्वस्तिस्वाहास्वधालंवषड्योगाच्च । मन्यकर्मण्यनादरेविभाषाप्राणिषु । कर्तृकरणयोस्तृती या । सहयुक्तेऽप्रधाने । येनाङ्गविकारः ॥१॥ इत्थंभूतलक्षणे । संज्ञोऽन्यतरस्यांकर्मणि । हेतौ । अकर्तर्यृणेपंचमी । विभाषागुणेऽस्त्रियाम् । षष्ठीहेतुप्रयोगे । सर्वनाम्नस्तृतीयाच । अपादानेपंचमी । अन्यारादितरर्तेदिक्छब्दांचूत्तरप

दाजाहियुक्ते। षष्ठ्यतसर्थप्रत्ययेन। एनपाद्वितीया। पृथग्विनानानाभिस्तृतीयान्यतरस्याम्। करणेचस्तोकाल्पकृच्छ्र कतिपयस्यासत्ववचनस्य। दूरान्तिकार्थैःषष्ठ्यन्यतरस्याम्। दूरान्तिकार्थेभ्योद्वितीयाच। सप्तम्यधिकरणेच। यस्यचभावेनभावलक्षणम्। षष्ठीचानादरे। स्वामीश्वराधिपतिदायादसाक्षिप्रतिभूप्रसूतैश्च। आयुक्तकुशलाभ्यां चासेवायाम् ॥२॥ यतश्चनिर्धारणम्। पंचमीविभक्ते। साधुनिपुणाभ्यामर्चायांसप्तम्यप्रतेः। प्रसितोत्सुकाभ्यांतृ तीयाच। नक्षत्रेचलुपि। प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रेप्रथमा। संबोधनेच। सामन्त्रितम्। एकवचनंसं बुद्धिः। षष्ठीशेषे। ज्ञोऽविदर्थस्यकरणे। अधीगर्थदयेशांकर्मणि। कृञःप्रतियत्ने। रुजार्थानांभाववचनानामज्वरेः। आशिषिनाथः। जासिनिप्रहणनाटक्राथपिषांहिंसायाम्। व्यवहृपणोःसमर्थयोः। दिवस्तदर्थस्य। विभाषोपसर्गे। द्वितीयाब्राह्मणे। प्रेष्यब्रुवोर्हविषोदेवतासंप्रदाने ॥३॥ चतुर्थ्यर्थेबहुलंछन्दसि। यजेश्चकरणे। कृत्वोर्थप्रयोगेकालेऽ धिकरणे। कर्तृकर्मणोःकृति। उभयप्राप्तौकर्मणि। क्तस्यचवर्तमाने। अधिकरणवाचिनश्च। नलोकाव्ययनिष्ठाख लर्थतृनाम्। अकेनोर्भविष्यदाधमर्ण्ययोः। कृत्यानांकर्तरिवा। तुल्यार्थैरतुलोपमाभ्यांतृतीयान्यतरस्याम्। चतुर्थी चाशिष्यायुष्यमद्रभद्रकुशलसुखार्थहितैः ॥ ४ ॥ अनभिहितइत्थंभूतयतश्चप्रेष्यब्रुवोस्त्रयोदश ॥ इतिद्वितीयाध्या येतृतीयःपादः ॥ ३ ॥ ७ ॥ द्विगुरेकवचनम्। द्वन्द्वश्चप्राणितूर्यसेनाङ्गानाम्। अनुवादेचरणानाम्। अध्वर्युक्र

तुरनपुंसकम् । अध्ययनतोऽविप्रकृष्टाख्यानाम् । जातिरप्राणिनाम् । विशिष्टलिङ्गोनदीदेशोऽग्रामाः । क्षुद्रजन्तवः । येषांचविरोधःशाश्वतिकः । शूद्राणामनिरवसितानाम् । गवाश्वप्रभृतीनिच । विभाषावृक्षमृगतृणधान्यव्यंजनपशुशकुन्यश्ववडवपूर्वापराधरोत्तराणाम् । विप्रतिषिद्धंचानधिकरणवाचि । नदधिपयआदीनि । अधिकरणैतावत्त्वेच । विभाषासमीपे । सनपुंसकम् । अव्यंयीभावश्च । तत्पुरुषोऽनञ्कर्मधारयः । संज्ञायांकन्थोशीनरेषु ॥ १ ॥ उपज्ञोपक्रमंतदाद्याचिख्यासायाम् । छायाबाहुल्ये । सभाराजामनुष्यपूर्वा । अशालाच । विभाषासेनासुराच्छायाशालानिशानाम् । परवल्लिङ्गंद्वन्द्वतत्पुरुषयोः । पूर्ववदश्ववडवौ । हेमन्तशिशिरावहोरात्रेचच्छन्दसि । रात्राह्नाहाःपुंसि । अपथंनपुंसकम् । अर्धर्चाःपुंसिच । इदमोऽन्वादेशेऽशनुदात्तस्तृतीयादौ । एतदस्त्रतसोस्त्रतसौचानुदात्तौ । द्वितीयाटौस्स्वेनः । आर्धधातुके । अदोजग्धिर्ल्यप्तिकिति । लुङ्सनोर्घस्लृ । घञपोश्च । वहुलंछन्दसि । लिट्यन्यतरस्याम् ॥ २ ॥ वेञोवयिः । हनोवधलिङि । लुङिच । आत्मनेपदेष्वन्यतरस्याम् । इणोगालुङि । णौगमिरवोधने । सनिच । इङश्च । गाङ्लिटि । विभाषालुङ्लृङोः । णौचसंश्चङोः । अस्तेर्भूः । ब्रुवोवचिः । चक्षिङःख्याञ् । वालिटि । अजेर्व्यघञपोः । वायौ । ण्यक्षत्रियार्षञितोयूनिलुगणिञोः । पैलादिभ्यश्च । इञःप्राचाम् ॥ ३ ॥ नतौल्वलिभ्यः । तद्राजस्यवहुषुतेनैवास्त्रियाम् । यस्कादिभ्योगोत्रे । यञञोश्च । अत्रिभृगुकुत्सवसिष्ठगोत

माङ्गिरोभ्यश्च । वह्वचइञः प्राच्यभरतेषु । नगोपवनादिभ्यः । तिककितवादिभ्योद्वन्द्वे । उपकादिभ्योऽन्यतरस्यामद्वन्द्वे । आगस्त्यकौण्डिन्ययोरगस्तिकुण्डिनच् । सुपोधातुप्रातिपदिकयोः । अदिप्रभृतिभ्यःशपः । वहुलंछन्दसि । यङोऽचिच । जुहोत्यादिभ्यःश्लुः । वहुलंछन्दसि । गातिस्थाघुपाभूभ्यःसिचःपरस्मैपदेषु । विभाषाघ्राधेट्शाच्छासः । तनादिभ्यस्तथासोः । मन्त्रेघसह्वरणशवृदहाद्वृच्कृगमिजनिभ्योलेः ॥ ४ ॥ आमः । अव्ययादाप्सुपः । नाव्ययीभावादतोऽम्त्वपंचम्याः । तृतीयासप्तम्योर्वहुलम् । लुटःप्रथमस्यडारौरसः ॥ ५ ॥ द्विगुरुपञ्चोपक्रमंवेजोवञ्जिर्नतौल्वलिभ्यआमःपञ्च ॥ इतिद्वितीयाध्यायेचतुर्थःपादः ॥ ४ ॥ इतिद्वितीयोऽध्यायः ॥ २ ॥ ॥ ॥

ॐ ॥ प्रत्ययः । परश्च । आद्युदात्तश्च । अनुदात्तौसुप्पितौ । गुप्तिज्किद्भ्यःसन् । मान्बधदान्शान्भ्योदीर्घश्चाभ्यासस्य । धातोःकर्मणःसमानकर्तृकादिच्छायांवा । सुपआत्मनःक्यच् । काम्यच्च । उपमानादाचारे । कर्तुःक्यङ्सलोपश्च । भृशादिभ्योभुव्यच्वेर्लोपश्चहलः । लोहितादिडाज्भ्यःक्यष् । कष्टायक्रमणे । कर्मणोरोमन्थतपोभ्यांवर्तिचरोः । बाष्पोष्मभ्यामुद्वमने । शब्दवैरकलहाभ्रकण्वमेघेभ्यःकरणे । सुखादिभ्यःकर्तृवेदनायाम् । नमोवरिवश्चित्रङः क्यच् । पुच्छभाण्डचीवराण्णिङ् ॥ १ ॥ मुण्डमिश्रश्लक्ष्णलवणव्रतवस्त्रहलकलकृततूस्तेभ्योणिच् । धातोरेकाचोहलादेःक्रियासमभिहारेयङ् । नित्यंकौटिल्येगतौ । लुपसदचरजपजभदहदशगॄभ्योभावगर्हायाम् । सत्यापपाशरूप ॥ ७ ॥

वीणातूलश्लोकसेनालोमत्वचवर्मवर्णचूर्णचुरादिभ्योणिच् । हेतुमतिच । कण्ड्वादिभ्योयक् । गुपूधूपविच्छिपणिपनिभ्यआयः । ऋतेरीयङ् । कमेर्णिङ् । आयादयआर्धधातुकेवा । सनाद्यन्ताधातवः । स्यतासीलृलुटोः । सिब्बहुलंलेटि । कास्प्रत्ययादाममन्त्रेलिटि । इजादेश्चगुरुमतोऽनृच्छः । दयायासश्च । उषविदजागृभ्योऽन्यतरस्याम् । भीह्रीभृहुवांश्लुवच्च । कृञ्चानुप्रयुज्यतेलिटि ॥ २ ॥ विदांकुर्वन्त्वित्यन्यतरस्याम् । अभ्युत्सादयांप्रजनयांचिकयांरमयामकःपावयांक्रियाद्विदामक्रन्निति‌च्छन्दसि । च्लिलुङि । च्लेःसिच् । शलइगुपधादनिटःक्सः । श्लिषआलिङ्गने । नदृशः । णिश्रिद्रुस्रुभ्यःकर्तरिचङ् । विभाषाधेट्श्व्योः । गुपेश्छन्दसि । नोनयतिध्वनयत्येलयत्यर्दयतिभ्यः । अस्यतिवक्तिख्यातिभ्योऽङ् । लिपिसिचिह्वश्च । आत्मनेपदेष्वन्यतरस्याम् । पुषादिद्युताद्यॢदितःपरस्मैपदेषु । सर्तिशास्त्यर्तिभ्यश्च । इरितोवा । जृस्तम्भुम्रुचुम्लुचुग्रुचुग्लुचुग्लुंचुश्विभ्यश्च । कृमृदृरुहिभ्यश्छन्दसि । चिण्तेपदः ॥ ३ ॥ दीपजनबुधपूरितायिप्यायिभ्योऽन्यतरस्याम् । अचःकर्मकर्तरि । दुहश्च । नरुधः । तपोऽनुतापेच । चिण्भावकर्मणोः । सार्वधातुकेयक् । कर्तरिशप् । दिवादिभ्यःश्यन् । वाभ्राशभ्लाशभ्रमुक्रमुक्लमुत्रसित्रुटिलषः । यसोऽनुपसर्गात् । संयसश्च । स्वादिभ्यःश्नुः । श्रुवःशृच । अक्षोऽन्यतरस्याम् । तनूकरणेतक्षः । तुदादिभ्यःशः । रुधादिभ्यःश्नम् । तनादिकृञ्भ्यउः । धिन्विकृण्व्योरच ॥ ४ ॥ क्र्यादिभ्यःश्ना । स्तंभुस्तुंभुस्कंभुस्कुंभुस्कु

ञ्भ्यः श्नुश्च । हलःश्नःशानज्झौ । छन्दसिशायजपि । व्यत्ययोबहुलम् । लिङ्याशिष्यङ् । कर्मवत्कर्मणातुल्यक्रियः । तपस्तपःकर्मकस्यैव । नदुहस्नुनमांयक्चिणौ । कुषिरजोःप्राचांश्यन्परस्मैपदंच । धातोः । तत्रोपपदंसप्तमीस्थम् । कृदतिङ् । वासरूपोस्त्रियाम् । कृत्याःप्राङ्ण्वुलः । तव्यत्तव्यानीयरः । अचोयत् । पोरदुपधात् । शकिसहोश्च । गदमदचरयमश्चानुपसर्गे ॥ ५ ॥ अवद्यपण्यवर्यागर्ह्यपणितव्यानिरोधेषु । वह्यंकरणम् । अर्यःस्वामिवैश्ययोः । उपसर्याकाल्याप्रजने । अजर्यंसंगतम् । वदःसुपिक्यप्च । भुवोभावे । हनस्तच । एतिस्तुशास्वृदृजुषःक्यप् । ऋदुपधाच्चाक्लृपिचृतेः । ईचखनः । भृञोऽसंज्ञायाम् । मृजेर्विभाषा । राजसूयसूर्यमृषोद्यरुच्यकुप्यकृष्टपच्याव्यथ्याः । भिद्योद्ध्यौनदे । पुष्यसिद्ध्यौनक्षत्रे । विपूयविनीयजित्यामुंजकल्कहलिषु । प्रत्यपिभ्यांग्रहेश्छन्दसि । पदास्वैरिबाह्यापक्ष्येषुच । विभाषाकृवृषोः ॥ ६ ॥ युग्यंचपत्रे । अमावस्यदन्यतरस्याम् । छन्दसिनिष्टर्क्यदेवहूयप्रणीयोन्नीयोच्छिष्यमर्यस्तर्याध्वर्यखन्यखान्यदेवयज्यापृच्छ्यप्रतिषीव्यब्रह्मवाद्यभाव्यस्ताव्योपचाय्यपृडानि । ऋहलोर्ण्यत् । ओरावश्यके । आसुयुवपिरपिलपित्रपिचमश्च । आनाय्योऽनित्ये । प्रणाय्योऽसंमतौ । पाय्यसांनाय्यनिकाय्यधाय्यामानहविर्निवाससामिधेनीषु । क्रतौकुण्डपाय्यसंचाय्यौ । अग्नौपरिचाय्योपचाय्यसमूह्याः । चित्याग्निचित्येच । ण्वुल्तृचौ । नन्दिग्रहिपचादिभ्योल्युणिन्यचः । इगुपधज्ञाप्रीकिरःकः । आतश्चोपसर्गे । पाघ्राध्माधेड्

॥ ८ ॥

दृशःशः । अनुपसर्गाल्लिम्पविन्दधारिपारिवेद्युदेजिचेतिसातिसाहिभ्यश्च । ददातिदधात्योर्विभाषा । ज्वलितिकसन्ते
भ्योणः ॥ ७ ॥ श्याद्व्यधास्रुसंस्रुवतीणवसावहृलिहश्लिषश्वसश्च । दुन्योरनुपसर्गे । विभाषाग्रहः । गेहेकः । शिल्पि
निष्वुन् । गस्थकन् । ण्युट्च । हश्चव्रीहिकालयोः । प्रुसृल्वःसमभिहारेवुन् । आशिषिच । प्रत्ययोमुण्डविदांदीपज
नक्त्यादिभ्योऽवद्ययुग्यंचश्याद्व्यधादश ॥ इतितृतीयाध्यायेप्रथमःपादः ॥ १ ॥ छ ॥ कर्मण्यण् । ह्वावामश्च । आ
तोऽनुपसर्गेकः । सुपिस्थः । तुन्दशोकयोःपरिमृजापनुदोः । प्रेदाज्ञः । समिख्यः । गापोष्टक् । हरतेरनुद्यमनेऽच् ।
वयसिच । आङिताच्छील्ये । अर्हः । स्तम्बकर्णयोरमिजपोः । शमिधातोःसंज्ञायाम् । अधिकरणेशेतेः । चरेष्टः ।
भिक्षासेनादायेषुच । पुरोऽग्रतोऽग्रेषुसर्तेः । पूर्वेकर्तरि । कृञोहेतुताच्छील्यानुलोम्येषु ॥ १ ॥ दिवाविभानिशाप्र
भाभास्कारान्तानन्तादिबहुनान्दीकिंलिपिलिबिबलिभक्तिकर्तृचित्रक्षेत्रसंख्याजङ्घाबाह्वहर्यत्तद्धनुररुःषु । कर्मणिभृ
तौ । नशब्दश्लोककलहगाथावैरचाटुसूत्रमन्त्रपदेषु । स्तम्बशकृतोरिन् । हरतेर्दृतिनाथयोःपशौ । फलेग्रहिरात्मंभ
रिश्च । छन्दसिवनसनरक्षिमथाम् । एजेःखश् । नासिकास्तनयोर्ध्माधेटोः । नाडीमुष्ट्योश्च । उदिकूलेरुजिवहोः ।
वहाभ्रेलिहः । परिमाणेपचः । मितनखेच । विध्वरुषोस्तुदः । असूर्यललाटयोर्दृशितपोः । उग्रंपश्येरंमदपाणिंध
माश्च । प्रियवशेवदःखच् । द्विषत्परयोस्तापेः । वाचियमोव्रते ॥ २ ॥ पूःसर्वयोर्दारिसहोः । सर्वकूलाभ्रकरीषेषुक

षः । मेघर्तिभयेषुकृञः । क्षेमप्रियमद्रेऽण्च । आशितेभुवःकरणभावयोः । संज्ञायांभृतृवृजिधारिसहितपिदमः ।
गमश्च । अन्तात्यन्ताध्वदूरपारसर्वानन्तेषुडः । आशिषिहनः । अपेक्लेशतमसोः । कुमारशीर्षयोर्णिनिः । लक्षणेजा
यापत्योष्टक् । अमनुष्यकर्तृकेच । शक्तौहस्तिकपाटयोः । पाणिघताडघौशिल्पिनि । आढ्यसुभगस्थूलपलितनग्ना
न्धप्रियेषुच्व्यर्थेष्वच्वौकृञःकरणेख्युन् । कर्तरिभुवःखिष्णुच्खुकञौ । स्पृशोऽनुदकेक्विन् । ऋत्विग्दधृक्स्रग्दिगु
ष्णिगंचुयुजिक्रुञ्चांच । त्यदादिषुदृशोनालोचनेकञ्च ॥२॥ सत्सूद्विषद्रुहदुहयुजविदभिदच्छिदजिनीराजामुपसर्गेऽपि
क्विप् । भजोण्विः । छन्दसिसहः । वहश्च । कव्यपुरीषपुरीष्येषुञ्युट् । हव्येऽनन्तःपादम् । जनसनखनक्रमगमोवि
ट् । अदोऽनन्ने । क्रव्येच । दुहःकब्घश्च । मन्त्रेश्वेतवहोक्थशस्पुरोडाशोण्विन् । अवेयजः । विजुपेच्छन्दसि । आ
तोमनिन्क्वनिब्वनिपश्च । अन्येभ्योऽपिदृश्यन्ते । क्विप्च । स्थःक्च । सुप्यजातौणिनिस्ताच्छील्ये । कर्तर्युपमाने ।
व्रते ॥ ४ ॥ बहुलमाभीक्ष्ण्ये । मनः । आत्ममानेखश्च । भूते । करणेयजः । कर्मणिहनः । ब्रह्मभ्रूणवृत्रेषुक्विप् ।
बहुलंछन्दसि । सुकर्मपापमन्त्रपुण्येषुकृञः । सोमेसुञः । अग्नौचेः । कर्मण्यग्न्याख्यायाम् । कर्मणीनिविक्रियः । ॥ ९ ॥
दृशेःक्वनिप् । राजनियुधिकृञः । सहेच । सप्तम्यांजनेर्डः । पंचम्यामजातौ । उपसर्गेचसंज्ञायाम् । अनौकर्मणि
॥ ५ ॥ अन्येष्वपिदृश्यते । निष्ठा । सुयजोर्ङ्वनिप् । जीर्यतेरतृन् । छन्दसिलिट् । लिटःकानज्वा । क्वसुश्च । भाषा

यांसदवसश्रुवः । उपेयिवाननाश्वाननूचानश्च । लुङ् । अनद्यतनेलङ् । अभिज्ञावचनेलृट् । नयदि । विभाषा साकाङ्क्षे । परोक्षेलिट् । हशश्वतोर्लङ्च । प्रश्नेचासन्नकाले । लट्स्मे । अपरोक्षेच । ननौपृष्टप्रतिवचने ॥६॥ नन्वो र्विभाषा । पुरिलुङ्चास्मे । वर्तमानेलट् । लटःशतृशानचावप्रथमासमानाधिकरणे । संबोधनेच । लक्षणहेत्वोः क्रियायाः । तौसत् । पूङ्यजोःशानन् । ताच्छील्यवयोवचनशक्तिषुचानश् । इङ्धार्योःशत्रकृच्छ्रिणि । द्विषोऽमि त्रे । सुञोयज्ञसंयोगे । अर्हःप्रशंसायाम् । आक्वेस्तच्छीलतद्धर्मतत्साधुकारिषु । तृन् । अलंकृञ्निराकृञ्प्रजनोत्पचो त्पतोन्मदरुच्यपत्रपवृतुवृधुसहचरइष्णुच् । णेश्छन्दसि । भुवश्च । ग्लाजिस्थश्चग्स्नुः । त्रसिगृधिधृषिक्षिपेःक्नुः ॥७॥ शमित्यष्टाभ्योघिनुण् । संपृचानुरुधाङ्यमाङ्यसपरिसृसंसृजपरिदेविसंज्वरपरिक्षिपपरिरटपरिवदपरिदहपरिमुह दुषद्विषद्रुहदुहयुजाक्रीडविविचत्यजरजभजातिचरापचरामुषाभ्याहनश्च । वौकषलसकत्थस्रम्भः । अपेचलषः । प्रेलपसृद्रुमथवदवसः । निन्दहिंसक्लिशखादविनाशपरिक्षिपपरिरटपरिवादिव्याभाषासूञोवुञ् । देविक्रुशोश्चोपस र्गे । चलनशब्दार्थादकर्मकाद्युच् । अनुदात्तेतश्चहलादेः । जुचङ्क्रम्यदन्द्रम्यसृगृधिज्वलशुचलषपतपदः । क्रुधम ण्डार्थेभ्यश्च । नयः । सूददीपदीक्षश्च । लषपतपदस्थाभूवृषहनकमगमशॄभ्यउकञ् । जल्पभिक्षकुट्टलुण्टवृङःषाक न् । प्रजोरिनिः । जिदृक्षिविश्रीण्वमाव्यथाभ्यमपरिभूप्रसूभ्यश्च । स्पृहिगृहिपतिदयिनिद्रातन्द्राश्रद्धाभ्यआलुच् ।

दाधेट्सिशदसदोरुः । सृघस्यदःक्मरच् ॥ ८ ॥ भंजभासमिदोघुरच् । विदिभिदिच्छिदेःकुरच् । इण्नशजिसर्तिभ्यःक्वरप् । गत्वरश्च । जागरूकः । यजजपदशांयङः । नमिकम्पिस्म्यजसकमहिंसदीपोरः । सनाशंसभिक्षउः । विंदुरिच्छुः । क्याच्छन्दसि । आद्दगमहनजनः किकिनौलिट्च । स्वपितृषोर्नजिङ् । शृवन्द्योरारुः । भियःक्रुक्लुकनौ । स्थेशभासपिसकसोवरच् । यश्चयङः । भ्राजभासधुर्विद्युतोर्जिपॄजुग्रावस्तुवःक्विप् । अन्येभ्योऽपिदृश्यते । भुवःसंज्ञान्तरयोः । विप्रसंभ्योड्वसंज्ञायाम् ॥ ९ ॥ धःकर्मणिष्ट्रन् । दाम्नीशसयुयुजस्तुतुदसिसिचमिहपतदशनहःकरणे । हलसूकरयोःपुवः । अर्तिलूधूसूखनसहचरइत्रः । पुवःसंज्ञायाम् । कर्तरिचर्षिदेवतयोः । ञीतःक्तः । मतिबुद्धिपूजार्थेभ्यश्च । कर्मणिदिवापूःसर्वसत्सूवहुलमन्येष्वपिनन्वोःशमितिभंजभासधःकर्मण्यष्टौ ॥ इतितृतीयाध्यायेद्वितीयःपादः ॥ २ ॥ छ ॥ उणादयोबहुलम् । भूतेऽपिदृश्यन्ते । भविष्यतिगम्यादयः । यावत्पुरानिपातयोर्लट् । विभाषाकदाकर्ह्योः । किंवृत्तेलिप्सायाम् । लिप्स्यमानसिद्धौच । लोडर्थलक्षणेच । लिङ्चोर्ध्वमौहूर्तिके । तुमुन्ण्वुलौक्रियायांक्रियार्थायाम् । भाववचनाश्च । अण्कर्मणिच । लृट्शेषेच । लृटःसद्वा । अनद्यतनेलुट् । पदरुजविशस्पृशोघञ् । सृस्थिरे । भावे । अकर्तरिचकारकेसंज्ञायाम् । परिमाणाख्यायांसर्वेभ्यः ॥ १ ॥ इङश्च । उपसर्गेरुवः । समियुद्रुदुवः । श्रिणीभुवोऽनुपसर्गे । वौक्षुश्रुवः । अवोदोर्नियः । प्रेद्रुस्तुस्रुवः । निरभ्योःपूल्वोः ।

उन्न्योर्ग्रः । कॄधान्ये । यज्ञेसमिस्तुवः । प्रेस्त्रोऽयज्ञे । प्रथनेवावशब्दे । छन्दोनाम्निच । उदिग्रहः । समिमुष्टौ । परिन्योर्नीणोर्द्यूताभ्रेषयोः । परावनुपात्ययइणः । व्युपयोःशेतेःपर्याये । हस्तादानेचेरस्तेये ॥ २ ॥ निवासचितिशरीरोपसमाधानेष्वादेश्चकः । संघेचानौत्तराधर्ये । कर्मव्यतिहारेणच्स्त्रियाम् । अभिविधौभावइनुण् । आक्रोशेऽवन्योर्ग्रहः । प्रेलिप्सायाम् । परौयज्ञे । नौवृधान्ये । उदिश्रयतियौतिपूद्रुवः । विभाषाडिरुप्लुवोः । अवेग्रहोवर्षप्रतिबन्धे । प्रेवणिजाम् । रश्मौच । वृणोतेराच्छादने । परौभुवोऽवज्ञाने । एरच् । ॠदोरप् । ग्रहवृदृणिश्चिगमश्च । उपसर्गेऽदः । नौणच ॥ ३ ॥ व्यधजपोरनुपसर्गे । स्वनहसोर्वा । यमःसमुपनिविषुच । नौगदनदपठस्वनः । क्वणोवीणायांच । नित्यंपणःपरिमाणे । मदोऽनुपसर्गे । प्रमदसंमदौहर्षे । समुदोरजःपशुषु । अक्षेषुग्लहः । प्रजनेसर्तेः । ह्वःसंप्रसारणंचन्यभ्युपविषु । आडियुद्धे । निपानमाहावः । भावेऽनुपसर्गस्य । हनश्चवधः । मूर्तौघनः । अन्तर्घनोदेशे । अगारैकदेशेप्रघणःप्रघाणश्च । उद्घनोऽत्याधानम् ॥ ४ ॥ अपघनोऽङ्गम् । करणेऽयोविद्रुषु । स्तम्बेकच । परौघः । उपघ्नआश्रये । संघोद्घौगणप्रशंसयोः । निघोनिमितम् । ड्वितःक्त्रिः । ट्वितोऽथुच् । यजयाचयतविच्छप्रच्छरक्षोनङ् । स्वपोनन् । उपसर्गेघोःकिः । कर्मण्यधिकरणेच । स्त्रियांक्तिन् । स्थागापापचोभावे । मन्त्रेवृषेषपचमनविदभूवीराउदात्तः । ऊतियूतिजूतिसातिहेतिकीर्तयश्च । व्रजयजोर्भावेक्यप् । संज्ञायांसमजनिष

दनिपतमनविदषुञ्शीङ्भृञिणः । कृञःशच ॥ ५ ॥ इच्छा । अप्रत्ययात् । गुरोश्चहलः । षिद्भिदादिभ्योऽङ् । चिन्तिपूजिकथिकुम्बिचर्चश्च । आतश्चोपसर्गे । ण्यासश्रन्थोयुच् । रोगाख्यायांण्वुल्बहुलम् । संज्ञायाम् । विभाषाख्यानपरिप्रश्नयोरिञ्च । पर्यायार्हर्णोत्पत्तिषुण्वुच् । आक्रोशेनञ्यनिः । कृत्यल्युटोबहुलम् । नपुंसकेभावेक्तः । ल्युट्च । कर्मणिचयेनसंस्पर्शात्कर्तुःशरीरसुखम् । करणाधिकरणयोश्च । पुंसिसंज्ञायांघःप्रायेण । गोचरसंचरवहव्रजव्यजापणनिगमाश्च । अवेतॄस्त्रोर्घञ् ॥ ६ ॥ हलश्च । अध्यायन्यायोद्यावसंहाराधारावायाश्च । उदङ्कोऽनुदके । जालमानायः । खनोघच । ईषद्दुःसुषुकृच्छ्राकृच्छ्रार्थेषुखल् । कर्तृकर्मणोश्चभूकृञोः । आतोयुच् । छन्दसिगत्यर्थेभ्यः । अन्येभ्योऽपिदृश्यते । वर्तमानसामीप्येवर्तमानवद्वा । आशंसायांभूतवच्च । क्षिप्रवचनेलृट् । आशंसावचनेलिङ् । नानद्यतनवत्क्रियाप्रबन्धसामीप्ययोः । भविष्यतिमर्यादावचनेऽवरस्मिन् । कालविभागेचानहोरात्राणाम् । परस्मिन्विभाषा । लिङ्निमित्तेलृङ्क्रियातिपत्तौ । भूतेच ॥ ७ ॥ वोताप्योः । गर्हायांलडपिजात्वोः । विभाषाकथमिलिङ्च । किंवृत्तेलिङ्लृटौ । अनवक्लृप्त्यमर्षयोरकिंवृत्तेऽपि । किंकिलास्त्यर्थेषुलृट् । जातुयदोर्लिङ् । यच्चयत्रयोः । गर्हायांच । चित्रीकरणेच । शेषेलृडयदौ । उताप्योःसमर्थयोर्लिङ् । कामप्रवेदनेकच्चिति । संभावनेऽलमितिचेत्सिद्धाप्रयोगे । विभाषाधातौसंभावनवचनेऽयदि । हेतुहेतुमतोर्लिङ् । इच्छार्थेषुलिङ्लोटौ । समानकर्तृकेषुतुमुन् ।

लिङ्च । इच्छार्थेभ्योविभाषावर्तमाने ॥ ८ ॥ विधिनिमन्त्रणामन्त्रणाधीष्टसंप्रश्नप्रार्थनेषुलिङ् । लोट्च । प्रैषातिसर्ग प्राप्तकालेषुकृत्याश्च । लिङ्चोर्ध्वमौहूर्तिके । स्मेलोट् । अधीष्टेच । कालसमयवेलासुतुमुन् । लिङ्यदि । अर्हेकृत्यतृ चश्च । आवश्यकाधमर्ण्ययोर्णिनिः । कृत्याश्च । शकिलिङ्च । आशिषिलिङ्लोटौ । क्तिच्क्तौचसंज्ञायाम् । माङिलुङ् । स्मोत्तरेलङ्च ॥ उणादयइङोनिवासव्यधजपोरपघनइच्छाहलश्चवोताप्योर्विंधिषोडश ॥ इतितृतीयाध्यायेतृतीयः पादः ॥ ३ ॥ ७ ॥ धातुसंबन्धेप्रत्ययाः । क्रियासमभिहारेलोट्लोटोहिस्वौवाचतध्वमोः । समुच्चयेऽन्यतरस्याम् । यथाविध्यनुप्रयोगःपूर्वस्मिन् । समुच्चयेसामान्यवचनस्य । छन्दसिलुङ्लङ्लिटः । लिङर्थेलेट् । उपसंवादाशङ्कयोश्च । तुमर्थेसेसेनसेअसेन्क्सेकसेनध्यैअध्यैन्कध्यैकध्यैन्शध्यैशध्यैन्तवैतवेङ्तवेनः । प्रयैरोहिष्यैअव्यथिष्यै । दृशेविख्येच । शकिणमुल्कमुलौ । ईश्वरेतोसुन्कसुनौ । कृत्यार्थेतवैकेन्केन्यत्वनः । अवचक्षेच । भावलक्षणेस्थेण्कृञ्वदिचरिहुत मिजनिभ्यस्तोसुन् । सृपितृदोःकसुन् । अलंखल्वोःप्रतिषेधयोःप्राचांक्त्वा । उदीचांमाङोव्यतीहारे । परावरयोगेच ॥ १ ॥ समानकर्तृकयोःपूर्वकाले । आभीक्ष्ण्येणमुल्च । नयद्यनाकाङ्क्षे । विभाषाग्रेप्रथमपूर्वेषु । कर्मण्याक्रोशेकृञः खमुञ् । स्वादुमिणमुल् । अन्यथैवंकथमित्थंसुसिद्धाप्रयोगश्चेत् । यथातथयोरसूयाप्रतिवचने । कर्मणिदृशिविदोः साकल्ये । यावतिविन्दजीवोः । चर्मोदरयोःपूरेः । वर्षप्रमाणऊलोपश्चास्यान्यतरस्याम् । चेलेक्नोपेः । निमूलसमू

लयोःकषः । शुष्कचूर्णरूक्षेषुपिषः । समूलाकृतजीवेषुहन्कृञ्ग्रहः । करणेहनः । स्नेहनेपिषः । हस्तेवर्तिग्रहोः । स्वेपुषः ॥ २ ॥ अधिकरणेबन्धः । संज्ञायाम् । कर्त्रोर्जीवपुरुषयोर्नशिवहोः । ऊर्ध्वेशुषिपूरोः । उपमानेकर्मणिच । कषादिषुयथाविध्यनुप्रयोगः । उपदंशस्तृतीयायाम् । हिंसार्थानांचसमानकर्मकाणाम् । सप्तम्यांचोपपीडरुधकर्षः । समासत्तौ । प्रमाणेच । अपादानेपरीप्सायाम् । द्वितीयायांच । स्वाङ्गेऽध्रुवे । परिक्लिश्यमानेच । विशिपतिपदिस्कन्दांव्याप्यमानासेव्यमानयोः । अस्यतितृषोःक्रियान्तरेकालेषु । नाम्न्यादिशिग्रहोः । अव्ययेऽयथाभिप्रेताख्यानेकृञःक्त्वाणमुलौ । तिर्यच्यपवर्गे ॥ ३ ॥ स्वाङ्गेतस्प्रत्ययेकृभ्वोः । नाधार्थप्रत्ययेच्व्यर्थे । तूष्णीमिभुवः । अन्वच्यानुलोम्ये । शकधृषज्ञाग्लाघटरभलभक्रमसहार्हास्त्यर्थेषुतुमुन् । पर्याप्तिवचनेष्वलमर्थेषु । कर्तरिकृत् । भव्यगेयप्रवचनीयोपस्थानीयजन्याप्लाव्यापात्यावा । लःकर्मणिचभावेचाकर्मकेभ्यः । तयोरेवकृत्यक्तखलर्थाः । आदिकर्मणिक्तःकर्तरिच । गत्यर्थाकर्मकश्लिषशीङ्स्थासवसजनरुहजीर्यतिभ्यश्च । दाशगोघ्नौसंप्रदाने । भीमादयोऽपादाने । ताभ्यामन्यत्रोणादयः । क्तोऽधिकरणेचध्रौव्यगतिप्रत्यवसानार्थेभ्यः । लस्य । तिप्तस्झिसिप्थस्थमिब्वस्मस्तातांझथासाथांध्वमिड्वहिमहिङ् । टितआत्मनेपदानांटेरे । थासःसे ॥ ४ ॥ लिटस्तझयोरेशिरेच् । परस्मैपदानांणलतुसुस्थलथुसणल्वमाः । विदोलटोवा । ब्रुवःपञ्चानामादितआहोब्रुवः । लोटोलङ्वत् । एरुः । सेर्ह्यपिच्च । वाछन्दसि ।

मेर्निः । आमेतः । सवाभ्यांवामौ । आडुत्तमस्यपिच्च । एतऐ । लेटोऽडाटौ । आतऐ । वैतोऽन्यत्र । इतश्चलोपः परस्मैपदेषु । सउत्तमस्य । नित्यंङितः । इतश्च ॥ ५ ॥ तस्थस्थमिपांतांतंतामः । लिङःसीयुट् । यासुट्परस्मैपदेषूदात्तोङिच्च । किदाशिषि । झस्यरन् । इटोऽत् । सुट्तिथोः । झेर्जुस् । सिजभ्यस्तविदिभ्यश्च । आतः । लङःशाकटायनस्यैव । द्विषश्च । तिङ्शित्सार्वधातुकम् । आर्धधातुकंशेषः । लिट्च । लिङाशिषि । छन्दस्युभयथा । धातुसंबन्धेसमानाधिकरणेस्वाङ्गेलिटस्तस्थस्थमिपांसप्तदश ॥ इतितृतीयाध्यायेचतुर्थःपादः ॥ ४ ॥ ॥ ७ ॥ इत्यष्टाध्यायीसूत्रपाठेतृतीयोऽध्यायः ॥ ३ ॥ ॥ ॥ ॥ ॥

ॐ ॥ ङ्याप्प्रातिपदिकात् । स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप् । स्त्रियाम् । अजाद्यतष्टाप् । ऋन्नेभ्योङीप् । उगितश्च । वनोरच । पादोऽन्यतरस्याम् । टाबृचि । नषट्स्वस्रादिभ्यः । मनः । अनोबहुव्रीहेः । डाबुभाभ्यामन्यतरस्याम् । अनुपसर्जनात् । टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रचतयप्ठक्ठञ्कञ्क्वरप्ख्युनां । यञश्च । प्राचांष्फतद्धितः । सर्वत्रलोहितादिकतन्तेभ्यः । कौरव्यमांडूकाभ्यांच । वयसिप्रथमे ॥ १ ॥ द्विगोः । अपरिमाणबिस्ताचितकम्बल्येभ्योनतद्धितलुकि । काण्डान्तात्क्षेत्रे । पुरुषात्प्रमाणेऽन्यतरस्याम् । बहुव्रीहेरूधसो ङीष् । संख्याव्ययादेर्ङीप् । दामहायनान्ताच्च । अनउपधालोपिनोऽन्यतरस्याम् । नित्यंसंज्ञाछन्दसोः । केवल

मामकभागधेयपापापरसमानार्यकृतसुमङ्गलभेषजाच्च । रात्रेश्चाजसौ । अन्तर्वत्पतिवतोर्नुक् । पत्युर्नोयज्ञसंयोगे । विभाषासपूर्वस्य । नित्यंसपत्न्यादिषु । पूतक्रतोरैच । वृषाकप्यग्निकुसितकुसिदानामुदात्तः । मनोरौवा । वर्णादनुदात्तात्तोपधात्तोनः । अन्यतोङीष् ॥ २ ॥ षिद्गौरादिभ्यश्च । जानपदकुण्डगोणस्थलभाजनागकालनीलकुशकामुककबराद्वृत्त्यमत्रावपनाकृत्रिमाश्राणास्थौल्यवर्णानाच्छादनायोविकारमैथुनेच्छाकेशवेशेषु । शोणात्प्राचाम् । वोतोगुणवचनात् । बह्वादिभ्यश्च । नित्यंछन्दसि । भुवश्च । पुंयोगादाख्यायाम् । इन्द्रवरुणभवशर्वरुद्रमृडहिमारण्ययवयवनमातुलाचार्याणामानुक् । क्रीतात्करणपूर्वात् । क्तादल्पाख्यायाम् । बहुव्रीहेश्चान्तोदात्तात् । अस्वाङ्गपूर्वपदाद्वा । स्वाङ्गाच्चोपसर्जनादसंयोगोपधात् । नासिकोदरौष्ठजङ्घादन्तकर्णशृङ्गाच्च । नक्रोडादिबह्वचः । सहनञ्विद्यमानपूर्वाच्च । नखमुखात्संज्ञायाम् । दीर्घजिह्वीचच्छन्दसि । दिक्पूर्वपदान्ङीप् ॥ ३ ॥ वाहः । सख्यशिश्वीतिभाषायाम् । जातेरस्त्रीविषयादयोपधात् । पाककर्णपर्णपुष्पफलमूलवालोत्तरपदाच्च । इतोमनुष्यजातेः । ऊङुतः । बाह्वन्तात्संज्ञायाम् । पङ्गोश्च । ऊरूत्तरपदादौपम्ये । संहितशफलक्षणवामादेश्च । कद्रुकमण्डल्वोश्छन्दसि । संज्ञायाम् । शार्ङ्गरवाद्यञोङीन् । यङश्चाप् । आवट्याच्च । तद्धिताः । यूनस्तिः । अणिञोरनार्षयोर्गुरूपोत्तमयोः ष्यङ्गोत्रे । गोत्रावयवात् । क्रौड्यादिभ्यश्च ॥ ४ ॥ दैवयज्ञिशौचिवृक्षिसात्यमुग्रिकाण्ठेविद्धिभ्योऽन्यतरस्याम् ।

समर्थानांप्रथमाद्वा । प्राग्दीव्यतोऽण् । अश्वपत्यादिभ्यश्च । दित्यदित्यादित्यपत्युत्तरपदाण्ण्यः । उत्सादिभ्योऽञ् । स्त्रीपुंसाभ्यांनञ्स्नञौभवनात् । द्विगोर्लुगनपत्ये । गोत्रेऽलुगचि । यूनिलुक् । फक्फिञोरन्यतरस्याम् । तस्यापत्यम् । एकोगोत्रे । गोत्राद्यून्यस्त्रियाम् । अतइञ् । बाह्वादिभ्यश्च । सुधातुरकङ् । गोत्रेकुंजादिभ्यश्च्फञ् । नडादिभ्यःफक् । हरितादिभ्योऽञः ॥ ५ ॥ यञिञोश्च । शरद्वच्छुनकदर्भाद्भृगुवत्साग्रायणेषु । द्रोणपर्वतजीवन्तादन्यतरस्याम् । अनृष्यानन्तर्येबिदादिभ्योऽञ् । गर्गादिभ्योञ् । मधुबभ्र्वोर्ब्राह्मणकौशिकयोः । कपिबोधादाङ्गिरसे । वतण्डाच्च । लुक्स्त्रियाम् । अश्वादिभ्यःफञ् । भर्गात्त्रैगर्ते । शिवादिभ्योऽण् । अवृद्धाभ्योनदीमानुषीभ्यस्तन्नामिकाभ्यः । ऋष्यन्धकवृष्णिकुरुभ्यश्च । मातुरुत्संख्यासंभद्रपूर्वायाः । कन्यायाःकनीनच । विकर्णशुङ्गच्छगलाद्वत्सभरद्वाजात्रिषु । पीलायावा । ढक्चमण्डूकात् । स्त्रीभ्योढक् ॥ ६ ॥ द्व्यचः । इतश्चानिञः । शुभ्रादिभ्यश्च । विकर्णकुषीतकात्काश्यपे । भ्रुवोवुक्च । कल्याण्यादीनामिनङ् । कुलटायावा । चटकायाऐरक् । गोधायाढ्रक् । आरगुदीचाम् । क्षुद्राभ्योवा । पितृष्वसुश्छण् । ढकिलोपः । मातृष्वसुश्च । चतुष्पाद्भ्योढञ् । गृष्ट्यादिभ्यश्च । राजश्वशुराद्यत् । क्षत्राद्घः । कुलात्खः । अपूर्वपदादन्यतरस्यांयड्ढकञौ ॥ ७ ॥ महाकुलादञ्खञौ । दुष्कुलाड्ढक् । स्वसुश्छः । भ्रातुर्व्यच्च । व्यन्सपत्ने । रेवत्यादिभ्यष्ठक् । गोत्रस्त्रियाःकुत्सनेणच । वृद्धा

ठक्सौवीरेषुबहुलम् । फेश्छच । फाण्टाहृतिमिमताभ्यांणफिञौ । कुर्वादिभ्योण्यः । सेनान्तलक्षणकारिभ्यश्च । उदीचामिञ् । तिकादिभ्यःफिञ् । कौशल्यकार्मार्याभ्यांच । अणोद्व्यचः । उदीचांवृद्धादगोत्रात् । वाकिनादीनां कुक्च । पुत्रान्तादन्यतरस्याम् । प्राचामवृद्धात्फिन्बहुलम् ॥ ८ ॥ मनोर्जातावञ्यतौषुक्च । अपत्यंपौत्रप्रभृतिगोत्रम् । जीवतितुवंश्येयुवा । भ्रातरिचज्यायसि । वान्यस्मिन्सपिण्डेस्थविरतरेजीवति । वृद्धस्यचपूजायाम् । यूनश्चकुत्सायाम् । जनपदशब्दात्क्षत्रियादञ् । साल्वेयगान्धारिभ्यांच । द्व्यञ्मगधकलिङ्गसूरमसादण् । वृद्धेत्कोसलाजादाञ्ञ्यङ् । कुरुनादिभ्योण्यः । साल्वावयवप्रत्यग्रथकलकूटाश्मकादिञ् । तेतद्राजाः । कम्बोजाल्लुक् । स्त्रियामवन्तिकुन्तिकुरुभ्यश्च । अतश्च । नप्राच्यभर्गादियौधेयादिभ्यः । ङ्याब्द्विगोःषिद्गौरादिवाहोदैवयज्ञियज्ञिञोर्द्र्यचोमहाकुलान्मनोर्जातावष्टादश ॥ इतिचतुर्थाध्यायेप्रथमःपादः ॥ १ ॥ छ ॥ तेनरक्तंरागात् । लाक्षारोचनाशकलकर्दमाट्ठक् । नक्षत्रेणयुक्तःकालः । लुबविशेषे । संज्ञायांश्रवणाश्वत्थाभ्याम् । द्वन्द्वाच्छः । दृष्टंसाम । कलेर्ढक् । वामदेवाड्ड्यड्ड्यौ । परिवृतोरथः । पाण्डुकम्बलादिनिः । द्वैपवैयाघ्रादञ् । कौमारापूर्ववचने । तत्रोद्धृतममत्रेभ्यः । स्थण्डिलाच्छयितरिव्रते । संस्कृतंभक्षाः । शूलोखाद्यत् । दध्नष्ठक् । उदश्वितोऽन्यतरस्याम् । क्षीराड्ढञ् ॥ १ ॥ सास्मिन्पौर्णमासीतिसंज्ञायाम् । आग्रहायण्यश्वत्थाट्ठक् । विभाषाफाल्गुनीश्रवणाकार्तिकीचैत्रीभ्यः ।

सास्यदेवता । कस्येत् । शुक्राद्घन् । अपोनप्त्रपांनप्तृभ्यांघः । छच । महेन्द्राद्घाणौच । सोमाट्ट्यण् । वाय्वृतुपित्रु षसोयत् । द्यावापृथिवीशुनासीरमरुत्वदग्नीषोमवास्तोष्पतिगृहमेधाच्छच । अग्नेर्ढक् । कालेभ्योभववत् । महाराज प्रोष्ठपदाट्ठञ् । पितृव्यमातुलमातामहपितामहाः । तस्यसमूहः । भिक्षादिभ्योऽण् । गोत्रोक्षोष्ट्रोरभ्रराजराजन्यराज पुत्रवत्समनुष्याजाद्वुञ् । केदाराद्यञ्च ॥ २ ॥ ठञ्कवचिनश्च । ब्राह्मणमाणववाडवाद्यत् । ग्रामजनबन्धुसहायेभ्यस्त ल् । अनुदात्तादेरञ् । खण्डिकादिभ्यश्च । चरणेभ्योधर्मवत् । अचित्तहस्तिधेनोष्ठक् । केशाश्वाभ्यांयञ्छावन्यतर स्याम् । पाशादिभ्योयः । खलगोरथात् । इनित्रकट्यचश्च । विषयोदेशे । राजन्यादिभ्योवुञ् । भौरिक्याद्यैषुका र्यादिभ्योविधल्भक्तलौ । सोऽस्यादिरितिच्छन्दसःप्रगाथेषु । संग्रामेप्रयोजनयोद्धृभ्यः । तदस्यांप्रहरणमितिक्रीडा यांणः । घञःसास्यांक्रियेतिञः । तदधीतेतद्वेद । क्रतूक्थादिसूत्रान्ताट्ठक् ॥ ३ ॥ क्रमादिभ्योवुन् । अनुब्राह्मणा दिनिः । वसन्तादिभ्यष्ठक् । प्रोक्ताल्लुक् । सूत्राच्चकोपधात् । छन्दोब्राह्मणानिचतद्विषयाणि । तदस्मिन्नस्तीतिदेशेत न्नाम्नि । तेननिर्वृत्तम् । तस्यनिवासः । अदूरभवश्च । ओरञ् । मतोश्चबह्वजङ्गात् । बह्वचःकूपेषु । उदक्चविपाशः । संकलादिभ्यश्च । स्त्रीषुसौवीरसाल्वप्राक्षु । सुवास्त्वादिभ्योऽण् । रोणी । कोपधाच्च । वुञ्छण्कठजिलसेनिरढञ्ण्यय फक्फिफिञिञ्ञ्यकक्ठकोऽरीहणकृशाश्वर्श्यकुमुदकाशतृणप्रेक्षाश्मसखिसंकाशबलपक्षकर्णसुतंगमप्रगदिन्वराहकुमुदा

दिभ्यः ॥ ४ ॥ जनपदेलुप् । वरणादिभ्यश्च । शर्करायावा । ठक्छौच । नद्यांमतुप् । मध्वादिभ्यश्च । कुमुदनडवेत सेभ्योड्मतुप् । नडशादाड्ड्वलच् । शिखायावलच् । उत्करादिभ्यश्छः । नडादीनांकुक्च । शेषे । राष्ट्रावारपारा द्घखौ । ग्रामाद्यखञौ । कत्र्यादिभ्योढकञ् । कुलकुक्षिग्रीवाभ्यःश्वास्यलंकारेषु । नद्यादिभ्योढक् । दक्षिणापश्चा त्पुरसस्त्यक् । कापिश्याःष्फक् । रङ्कोरमनुष्येऽण्च ॥ ५ ॥ द्युप्रागपागुदक्प्रतीचोयत् । कन्थायाष्ठक् । वर्णौवुक् । अव्ययात्त्यप् । ऐषमोह्यःश्वसोऽन्यतरस्याम् । तीररूप्योत्तरपदादञ्ञौ । दिक्पूर्वपदादसंज्ञायांञः । मद्रेभ्योञ् । उदीच्यग्रामाच्चबह्वचोऽन्तोदात्तात् । प्रस्थोत्तरपदपलद्यादिकोपधादण् । कण्वादिभ्योगोत्रे । इञश्च । नह्यचः प्राच्यभरतेषु । वृद्धाच्छः । भवतष्ठक्छसौ । काश्यादिभ्यष्ठञ्ञिठौ । वाहीकग्रामेभ्यश्च । विभाषोशीनरेषु । ओर्दे शेठञ् । वृद्धात्प्राचाम् ॥ ६ ॥ धन्वयोपधाद्वुञ् । प्रस्थपुरवहान्ताच्च । रोपधेतोःप्राचाम् । जनपदतदवध्योश्च । अवृद्धादपिबहुवचनविषयात् । कच्छाग्निवक्रवर्तोत्तरपदात् । धूमादिभ्यश्च । नगरात्कुत्सनप्रावीण्ययोः । अरण्या न्मनुष्ये । विभाषाकुरुयुगंधराभ्याम् । मद्रवृज्योःकन् । कोपधादण् । कच्छादिभ्यश्च । मनुष्यतत्स्थयोर्वुञ् । अप दातौसाल्वात् । गोयवाग्वोश्च । गर्तोत्तरपदाच्छः । गहादिभ्यश्च । प्राचांकटादेः । राज्ञःकच ॥ ७ ॥ वृद्धादकेका न्तखोपधात् । कन्थापलदनगरग्रामह्रदोत्तरपदात् । पर्वताच्च । विभाषामनुष्ये । कृकणपर्णाद्भारद्वाजे । तेनसास्मि

न्ठञ्कमादिभ्योजनपदेद्युप्रागपाग्धन्ववृद्धात्पञ्च ॥ इतिचतुर्थाध्यायेद्वितीयःपादः ॥ २ ॥ ७ ॥ युष्मदस्मदोरन्यतरस्यांखञ्च । तस्मिन्नणिचयुष्माकास्माकौ । तवकममकावेकवचने । अर्धाद्यत् । परावराधमोत्तमपूर्वाच्च । दिक्पूवपदाट्ठञ्च । ग्रामजनपदैकदेशादञ्ठञौ । मध्यान्मः । असांप्रतिके । द्वीपादनुसमुद्रंयञ् । कालाट्ठञ् । श्राद्धेशरदः । विभाषारोगातपयोः । निशाप्रदोषाभ्यांच । श्वसस्तुट्च । संधिवेलाद्यृतुनक्षत्रेभ्योऽण् । प्रावृषएण्यः । वर्षाभ्यष्ठक् । छन्दसिठञ् । वसन्ताच्च ॥ १ ॥ हेमन्ताच्च । सर्वत्राण्चतलोपश्च । सायंचिरंप्राह्णेप्रगेऽव्ययेभ्यष्ट्युट्युलौतुट्च । विभाषापूर्वाह्णापराह्णाभ्याम् । तत्रजातः । प्रावृषष्ठप् । संज्ञायांशरदोवुञ् । पूर्वाह्णापराह्णार्द्रामूलप्रदोषावस्कराद्वुन् । पथःपन्थच । अमावास्यायावा । अच । सिन्ध्वपकराभ्यांकन् । अणञौच । श्रविष्ठाफल्गुन्यनुराधास्वातितिष्यपुनर्वसुहस्तविशाखाषाढाबहुलाल्लुक् । स्थानान्तगोशालखरशालाच्च । वत्सशालाभिजिदश्वयुक्शतभिषजोवा । नक्षत्रेभ्योबहुलम् । कृतलब्धक्रीतकुशलाः । प्रायभवः । उपजानूपकर्णोपनीवेष्ठक् ॥ २ ॥ संभूते । कोशाड्ढञ् । कालात्साधुपुष्प्यत्पच्यमानेषु । उप्तेच । आश्वयुज्यावुञ् । ग्रीष्मवसन्तादन्यतरस्याम् । देयमृणे । कलाप्यश्वत्थयवबुसाद्वुन् । ग्रीष्मावरसमाद्वुञ् । संवत्सराग्रहायणीभ्यांठञ्च । व्याहरतिमृगः । तदस्यसोढम् । तत्रभवः । दिगादिभ्योयत् । शरीरावयवाच्च । दृतिकुक्षिकलशिवस्त्यस्त्यहेर्ढञ् । ग्रीवाभ्योऽणच । गम्भीराञ्ज्यः ।

अव्ययीभावाच्च । अन्तःपूर्वपदाट्ठञ् ॥ ३ ॥ ग्रामात्पर्यनुपूर्वात् । जिह्वामूलाङ्गुलेश्छः । वर्गान्ताच्च । अशब्देय
त्खावन्यतरस्याम् । कर्णललाटात्कनलंकारे । तस्यव्याख्यानइतिचव्याख्यातव्यनाम्नः । बह्वचोऽन्तोदात्ताट्ठञ् ।
क्रतुयज्ञेभ्यश्च । अध्यायेष्वेवर्षेः । पौरोडाशपुरोडाशात्ष्ठन् । छन्दसोयदणौ । द्व्यजृद्ब्राह्मणर्क्प्रथमाध्वरपुरश्चरणना
माख्याताट्ठक् । अणृगयनादिभ्यः । ततआगतः । ठगायस्थानेभ्यः । शुण्डिकादिभ्योऽण् । विद्यायोनिसंबन्धे
भ्योवुञ् । ऋतष्ठञ् । पितुर्यच्च । गोत्रादङ्कवत् ॥ ४ ॥ हेतुमनुष्येभ्योऽन्यतरस्यांरूप्यः । मयट्च । प्रभवति ।
विदूराञ्ञ्यः । तद्गच्छतिपथिदूतयोः । अभिनिष्क्रामतिद्वारम् । अधिकृत्यकृतेग्रन्थे । शिशुक्रन्दयमसभद्वन्द्वेन्द्र
जननादिभ्यश्छः । सोऽस्यनिवासः । अभिजनश्च । आयुधजीविभ्यश्छःपर्वते । शण्डिकादिभ्योञ्यः । सिन्धुतक्ष
शिलादिभ्योऽणञौ । तूदीशलातुरवर्मतीकूचवाराड्ढक्छण्ढञ्यकः । भक्तिः । अचित्तादेशकालाट्ठक् । महाराजा
ट्ठञ् । वासुदेवार्जुनाभ्यांवुन् । गोत्रक्षत्रियाख्येभ्योबहुलंवुञ् । जनपदिनांजनपदवत्सर्वंजनपदेनसमानशब्दानांब
हुवचने ॥ ५ ॥ तेनप्रोक्तम् । तित्तिरिवरतन्तुखण्डिकोखाच्छण् । काश्यपकौशिकाभ्यामृषिभ्यांणिनिः । कलापि
वैशम्पायनान्तेवासिभ्यश्च । पुराणप्रोक्तेषुब्राह्मणकल्पेषु । शौनकादिभ्यश्छन्दसि । कठचरकाल्लुक् । कलापिनो
ऽण् । छगलिनोढिनुक् । पाराशर्यशिलालिभ्यांभिक्षुनटसूत्रयोः । कर्मन्दकृशाश्वादिनिः । तेनैकदिक् । तसिश्च ।

उरसोयच्च । उपज्ञाते । कृतेग्रन्थे । संज्ञायाम् । कुलालादिभ्योवुञ् । क्षुद्राभ्रमरवटरपादपादञ् । तस्येदम् ॥ ६ ॥ रथाद्यत् । पत्रपूर्वादञ् । पत्राध्वर्युपरिषदश्च । हलसीराठ्ठक् । द्वन्द्वाद्वुन्वैरमैथुनिकयोः । गोत्रचरणाद्वुञ् । सङ्घाङ्कलक्षणेष्वञ्यञिञामण् । शाकलाद्वा । छन्दोगौक्थिकयाज्ञिकबह्वृचनटाञ्ज्यः । नदण्डमाणवान्तेवासिषु । रैवतिकादिभ्यश्छः । कौपिंजलहास्तिपदादण् । आथर्वणिकस्येकलोपश्च । तस्यविकारः । अवयवेचप्राण्यौषधिवृक्षेभ्यः । बिल्वादिभ्योऽण् । कोपधाच्च । त्रपुजतुनोःषुक् । ओरञ् । अनुदात्तादेश्च ॥ ७ ॥ पलाशादिभ्योवा । शम्याःष्लञ् । मयड्वैतयोर्भाषायामभक्ष्याच्छादनयोः । नित्यंवृद्धशरादिभ्यः । गोश्चपुरीषे । पिष्टाच्च । संज्ञायांकन् । व्रीहेःपुरोडाशे । असंज्ञायांतिलयवाभ्याम् । द्व्यचश्छन्दसि । नोत्वद्वर्ध्रबिल्वात् । तालादिभ्योऽण् । जातरूपेभ्यःपरिमाणे । प्राणिरजतादिभ्योऽञ् । ञितश्चतत्प्रत्ययात् । क्रीतवत्परिमाणात् । उष्ट्राद्वुञ् । उमोर्णयोर्वा । एण्याढञ् । गोपयसोर्यत् ॥ ८ ॥ द्रोश्च । मानेवयः । फलेलुक् । प्लक्षादिभ्योऽण् । जम्ब्वावा । लुप्च । हरीतक्यादिभ्यश्च । कंसीयपरशव्ययोर्यञञौलुक्च ॥ ९ ॥ युष्मद्धेमन्तात्संभूतेग्रामाद्धेतुतेनरथात्पलाशादिभ्योद्रोश्चाष्टौ ॥ इतिचतुर्थाध्यायेतृतीयःपादः ॥ ३ ॥ ध्व ॥ प्राग्वहतेष्ठक् । तेनदीव्यतिखनतिजयतिजितम् । संस्कृतम् । कुलत्थकोपधादण् । तरति । गोपुच्छाट्ठञ् । नौद्व्यचष्ठन् । चरति । आकर्षात्ष्ठल् । पर्पादिभ्यःष्ठन् । श्वग

णाठञ्च । वेतनादिभ्योजीवति । वस्नक्रयविक्रयाट्ठन् । आयुधाच्छच । हरत्युत्सङ्गादिभ्यः । भस्त्रादिभ्यष्ठन् ।
विभाषाविवधवीवधात् । अण्कुटिलिकायाः । निर्वृत्तेऽक्षद्यूतादिभ्यः । क्त्रेर्मम्नित्यम् ॥ १ ॥ अपमित्ययाचिता
भ्यांकक्नौ । संसृष्टे । चूर्णादिनिः । लवणाल्लुक् । मुद्गादण् । व्यंजनैरुपसिक्ते । ओजःसहोऽम्भसावर्तते । तत्प्र
त्यनुपूर्वमीपलोमकूलम् । परिमुखंच । प्रयच्छतिगर्ह्यम् । कुसीददशैकादशात्ष्ठन्ष्ठचौ । उञ्छति । रक्षति । शब्द
दर्दुरंकरोति । पक्षिमत्स्यमृगान्हन्ति । परिपन्थंचतिष्ठति । माथोत्तरपदपदव्यनुपदंधावति । आक्रन्दाठञ्च । पदोत्त
रपदंगृह्णाति । प्रतिकण्ठार्थललामंच ॥ २ ॥ धर्मंचरति । प्रतिपथमेतिठंश्च । समवायान्त्समवैति । परिषदोण्यः ।
सेनायावा । संज्ञायांललाटकुक्कुट्यौपश्यति । तस्यधर्म्यम् । अण्महिष्यादिभ्यः । ऋतोऽञ् । अवक्रयः । तदस्यप
ण्यम् । लवणाट्ठञ् । किसरादिभ्यष्ठन् । शलालुनोऽन्यतरस्याम् । शिल्पम् । मड्डुकझर्झरादणन्यतरस्याम् ।
प्रहरणम् । परश्वधाट्ठञ्च । शक्तियष्ट्योरीकक् । अस्तिनास्तिदिष्टंमतिः ॥ ३ ॥ शीलम् । छत्रादिभ्योणः । कर्माध्यय
नेवृत्तम् । बह्वच्पूर्वपदाट्ठच् । हितंभक्षाः । तदस्मैदीयतेनियुक्तम् । श्राणामांसौदनाट्टिठन् । भक्तादणन्यतरस्या ॥ १७ ॥
म् । तत्रनियुक्तः । अगारान्ताट्ठन् । अध्यायिन्यदेशकालात् । कठिनान्तप्रस्तारसंस्थानेषुव्यवहरति । निकटेवस
ति । आवसथात्ष्ठल् । प्राग्घिताद्यत् । तद्वहतिरथयुगप्रासङ्गम् । धुरोयड्ढकौ । खःसर्वधुरात् । एकधुराल्लुक् ।

शकटादण् ॥ ४ ॥ हलसीराट्ठक् । संज्ञायांजन्या । विध्यत्यधनुषा । धनगणंलब्धा । अन्नाण्णः । वशंगतः । पदम
स्मिन्दृश्यम् । मूलमस्यावर्हि । संज्ञायांधेनुष्या । गृहपतिनासंयुक्तेञ्यः । नौवयोधर्मविषमूलमूलसीतातुलाभ्यस्ता
र्यतुल्यप्राप्यवध्यानाम्यसमसमितसंमितेषु । धर्मपथ्यर्थन्यायादनपेते । छन्दसोनिर्मिते । उरसोऽण्च । हृदयस्य
प्रियः । बन्धनेचर्षौ । मतजनहलात्करणजल्पकर्षेषु । तत्रसाधुः । प्रतिजनादिभ्यःखञ् । भक्ताण्णः ॥ ५ ॥ परि
षदोण्यः । कथादिभ्यष्ठक् । गुडादिभ्यष्ठञ् । पथ्यतिथिवसतिस्वपतेर्ढञ् । सभायायः । ढश्छन्दसि । समानती
र्थेवासी । समानोदरेशयितओचोदात्तः । सोदराद्यः । भवेछन्दसि । पाथोनदीभ्यांड्यण् । वेशन्तहिमवद्भ्या
मण् । स्रोतसोविभाषाड्यड्ड्यौ । सगर्भसयूथसनुताद्यत् । तुग्राद्धन् । अग्राद्यत् । घच्छौच । समुद्राभ्राद्धः ।
बर्हिषिदत्तम् । दूतस्यभागकर्मणी ॥ ६ ॥ रक्षोयातूनांहननी । रेवतीजगतीहविष्याभ्यःप्रशस्ये । असुरस्यस्वम् ।
मायायामण् । तद्वानासामुपधानोमन्त्रइतीष्टकासुलुक्मतोः । अश्विमानण् । वयस्यासुमूर्ध्नोमतुप् । मत्वर्थेमासत
न्वोः । मधोर्ञच । ओजसोऽहनियत्खौ । वेशोयशआदेर्भगाद्यल् । खच । पूर्वैःकृतमिनयौच । अद्भिःसंस्कृतम् ।
सहस्रेणसंमितौघः । मतौच । सोममर्हतियः । मयेच । मधोः । वसोःसमूहेच ॥ ७ ॥ नक्षत्राद्धः । सर्वदेवात्ता

तिल् । शिवशमरिष्टस्यकरे । भावेच । प्राग्वहतेरपमित्यधर्मंशीलंहलपरिषदोरक्षोनक्षत्राच्चत्वारि ॥ इतिचतुर्थाध्या
येचतुर्थःपादः ॥ ४ ॥ इतिअष्टाध्यायीसूत्रपाठेचतुर्थोऽध्यायः ॥ ४ ॥ ॥ ॥

ॐ ॥ प्राक्क्रीताच्छः । उगवादिभ्योयत् । कम्बलाच्चसंज्ञायाम् । विभाषाहविरपूपादिभ्यः । तस्मैहितम् ।
शरीरावयवाद्यत् । खलयवमाषतिलवृषब्रह्मणश्च । अजाविभ्यांथ्यन् । आत्मन्विश्वजनभोगोत्तरपदात्खः । सर्वपु
रुषाभ्यांणढञौ । माणवचरकाभ्यांखञ् । तदर्थंविकृतेःप्रकृतौ । छदिरुपधिवलेर्ढञ् । ऋषभोपानहोर्ञ्यः । चर्म
णोऽञ् । तदस्यतदस्मिन्स्यादिति । परिखायाढञ् । प्राग्वतेष्ठञ् । आर्हादगोपुच्छसंख्यापरिमाणाट्ठक् । असमा
सेनिष्कादिभ्यः ॥ १ ॥ शताच्चठन्यतावशते । संख्यायाअतिशदन्तायाःकन् । वतोरिड्वा । विंशतित्रिंशद्भ्यांड्वुन्नसं
ज्ञायाम् । कंसाट्टिठन् । शूर्पादञन्यतरस्याम् । शतमानविंशतिकसहस्रवसनादण् । अध्यर्धपूर्वद्विगोर्लुगसंज्ञाया
म् । विभाषाकार्षापणसहस्राभ्याम् । द्वित्रिपूर्वान्निष्कात् । बिस्ताच्च । विंशतिकात्खः । खार्याईकन् । पणपादमा
षशताद्यत् । शाणाद्वा । द्वित्रिपूर्वादण्च । तेनक्रीतम् । तस्यनिमित्तंसंयोगोत्पातौ । गोद्व्यचोऽसंख्यापरिमाणाश्वा
देर्यत् । पुत्राच्छच ॥ २ ॥ सर्वभूमिपृथिवीभ्यामणञौ । तस्येश्वरः । तत्रविदितइतिच । लोकसर्वलोकाट्ठञ् ।
तस्यवापः । पात्रात्ष्ठन् । तदस्मिन्वृद्ध्यायलाभशुल्कोपदादीयते । पूरणार्धाट्ठन् । भागाद्यच्च । तद्धरतिवहत्यावह

तिभाराद्वंशादिभ्यः । वस्नद्रव्याभ्यांठन्कनौ । संभवत्यवहरतिपचति । आढकाचितपात्रात्खोऽन्यतरस्याम् । द्विगोष्ठंश्च । कुलिजाल्लुक्खौच । सोऽस्यांशवस्नभृतयः । तदस्यपरिमाणम् । संख्यायाःसंज्ञासंघसूत्राध्ययनेषु । पङ्क्तिविंशतित्रिंशच्चत्वारिंशत्पंचाशत्षष्टिसप्तत्यशीतिनवतिशतम् । पंचद्दशतौवर्गेवा ॥ ३ ॥ सप्तनोऽञ्छन्दसि । त्रिंशच्चत्वारिंशतोर्ब्राह्मणेसंज्ञायांडण् । तदर्हति । छेदादिभ्योनित्यम् । शीर्षच्छेदाद्यच्च । दण्डादिभ्योयः । छन्दसिच । पात्राद्घंश्च । कडंकरदक्षिणाच्छच । स्थालीबिलात् । यज्ञर्त्विग्भ्यांघखञौ । पारायणतुरायणचान्द्रायणंवर्तयति । संशयमापन्नः । योजनंगच्छति । पथःष्कन् । पन्थोणनित्यम् । उत्तरपथेनाहृतंच । कालात् । तेननिर्वृत्तम् । तमधीष्टोभृतोभूतोभावी ॥ ४ ॥ मासाद्वयसियत्खञौ । द्विगोर्यप् । षण्मासाण्ण्यच्च । अवयसिठंश्च । समायाःखः । द्विगोर्वा । रात्र्यहःसंवत्सराच्च । वर्षाल्लुक्च । चित्तवतिनित्यम् । षष्टिकाःषष्टिरात्रेणपच्यन्ते । वत्सरान्ताच्छश्छन्दसि । संपरिपूर्वात्खच । तेनपरिजय्यलभ्यकार्यसुकरम् । तदस्यब्रह्मचर्यम् । तस्यचदक्षिणायज्ञाख्येभ्यः । तत्रचदीयतेकार्यंभववत् । व्युष्टादिभ्योऽण् । तेनयथाकथाचहस्ताभ्यांणयतौ । संपादिनि । कर्मवेषाद्यत् ॥ ५ ॥ तस्मैप्रभवतिसंतापादिभ्यः । योगाद्यच्च । कर्मणउकञ् । समयस्तदस्यप्राप्तम् । ऋतोरण् । छन्दसिघस् । कालाद्यत् । प्रकृष्टेठञ् । प्रयोजनम् । विशाखाषाढादण्मन्थदण्डयोः । अनुप्रवनचादिभ्यश्छः । समापनात्सपूर्वपदात् ।

ऐकागारिकट्चौरे । आकालिकडाद्यन्तवचने । तेनतुल्यंक्रियाचेद्वतिः । तत्रतस्येव । तदर्हम् । उपसर्गाच्छन्दसि
धात्वर्थे । तस्यभावस्त्वतलौ । आचत्वात् ॥ ६ ॥ ननञ्पूर्वात्तत्पुरुषादचतुरसंगतलवणवटबुधकतरसलसेभ्यः ।
पृथ्वादिभ्यइमनिज्वा । वर्णदृढादिभ्यःष्यञ्च । गुणवचनब्राह्मणादिभ्यःकर्मणिच । स्तेनाद्यन्नलोपश्च । सख्युर्यः ।
कपिज्ञात्योर्ढक् । पत्यन्तपुरोहितादिभ्योयक् । प्राणभृज्जातिवयोवचनोद्गात्रादिभ्योऽञ् । हायनान्तयुवादिभ्यो
ऽण् । इगन्ताच्चलघुपूर्वात् । योपधाद्गुरूपोत्तमाद्वुञ् । द्वन्द्वमनोज्ञादिभ्यश्च । गोत्रचरणाच्छ्लाघात्याकारतदवेतेषु ।
होत्राभ्यश्छः । ब्रह्मणस्त्वः । प्राक्क्रीताच्छताच्चसर्वभूमिसप्तनोऽञ्मासात्तस्मैप्रभवतिननञ्पूर्वात्षोडश॥ इतिपञ्चमा
ध्यायेप्रथमःपादः ॥ १ ॥ ७ ॥ धान्यानांभवनेक्षेत्रेखञ् । व्रीहिशाल्योर्ढक् । यवयवकषष्टिकाद्यत् । विभाषातिलमा
षोमाभङ्गाणुभ्यः । सर्वचर्मणःकृतःखखञौ । यथामुखसंमुखस्यदर्शनःखः । तत्सर्वादेःपथ्यङ्गकर्मपत्रपात्रंव्याप्नोति ।
आप्रपदंप्राप्नोति । अनुपदसर्वान्नायानयंबद्धाभक्षयतिनेयेषु । परोवरपरंपरपुत्रपौत्रमनुभवति । अवारपारात्यन्तानु
कामंगामी । समांसमांविजायते । अद्यश्वीनावष्टब्धे । आगवीनः । अनुग्वलंगामी । अध्वनोयत्खौ । अभ्यमित्राच्छच । ॥ १९ ॥
गोष्ठात्खञ्भूतपूर्वे । अश्वस्यैकाहगमः । शालीनकौपीनेअधृष्टाकार्ययोः ॥ १ ॥ व्रातेनजीवति । साप्तपदीनंसख्यम् ।
हैयङ्गवीनंसंज्ञायाम् । तस्यपाकमूलेपील्वादिकर्णादिभ्यःकुणब्जाहचौ । पक्षात्तिः । तेनवित्तश्चुंचुप्चणपौ । विन

ञ्भ्यांनानाञौनसह । वेःशालच्छङ्कटचौ । संप्रोदश्चकटच् । अवात्कुटारच्च । नतेनासिकायाःसंज्ञायांटीटञ्नाटज्भ्रटचः । नेर्बिडज्बिरीसचौ । इनच्पिटच्चिकचिच । उपाधिभ्यांत्यकन्नासन्नारूढयोः । कर्मणिघटोऽठच् । तदस्यसंजातंतारकादिभ्यइतच् । प्रमाणेद्वयसज्दघ्नञ्मात्रचः । पुरुषहस्तिभ्यामण्च । यत्तदेतेभ्यःपरिमाणेवतुप् । किमिदंभ्यांवोघः ॥ २ ॥ किमःसंख्यापरिमाणेडतिच । संख्यायाअवयवेतयप् । द्वित्रिभ्यांतयस्यायज्वा । उभादुदात्तोनित्यम् । तदस्मिन्नधिकमितिदशान्ताड्डः । शदन्तविंशतेश्च । संख्यायागुणस्यनिमानेमयट् । तस्यपूरणेडट् । नान्तादसंख्यादेर्मट् । थट्चच्छन्दसि । षट्कतिकतिपयचतुरांथुक् । बहुपूगगणसंघस्यतिथुक् । वतोरिथुक् । द्वेस्तीयः । त्रेःसंप्रसारणंच । विंशत्यादिभ्यस्तमडन्यतरस्याम् । नित्यंशतादिमासार्धमाससंवत्सराच्च । षष्ट्यादेश्चासंख्यादेः । मतौछःसूक्तसाम्नोः । अध्यायानुवाकयोर्लुक् ॥ ३ ॥ विमुक्तादिभ्योऽण् । गोषदादिभ्योवुन् । तत्रकुशलःपथः । आकर्षादिभ्यःकन् । धनहिरण्यात्कामे । स्वाङ्गेभ्यःप्रसिते । उदराट्ठगाद्यूने । सस्येनपरिजातः । अंशंहारी । तन्त्रादचिरापहृते । ब्राह्मणकोष्णिकेसंज्ञायाम् । शीतोष्णाभ्यांकारिणि । अधिकम् । अनुकाभिकाभीकःकमिता । पार्श्वेनान्विच्छति । अयःशूलदण्डाजिनाभ्यांठक्ठञौ । तावतिथंग्रहणमितिलुग्वा । सएषांग्रामणीः । शृङ्खलमस्यबन्धनंकरभे । उत्कउन्मनाः ॥ ४ ॥ कालप्रयोजनाद्रोगे । तदस्मिन्नन्नंप्रायेसंज्ञायाम् । कुल्माषादञ् । श्रोत्रियँश्छन्दो

ऽधीते । श्राद्धमनेनभुक्तमिनिठनौ । पूर्वादिनिः । सपूर्वाच्च । इष्टादिभ्यश्च । छन्दसिपरिपन्थिपरिपरिणौपर्यवस्था
तरि । अनुपद्यन्वेष्टा । साक्षाद्द्रष्टरिसंज्ञायाम् । क्षेत्रियच्परक्षेत्रेचिकित्स्यः । इन्द्रियमिन्द्रलिङ्गमिन्द्रदृष्टमिन्द्रसृष्ट
मिन्द्रजुष्टमिन्द्रदत्तमितिवा । तदस्यास्त्यस्मिन्निति मतुप् । रसादिभ्यश्च । प्राणिस्थादातोलजन्यतरस्याम् । सिध्मा
दिभ्यश्च । वत्सांसाभ्यांकामबले । फेनादिलच्च । लोमादिपामादिपिच्छादिभ्यःशनेलचः ॥ ५ ॥ प्रज्ञाश्रद्धार्चा
भ्योणः । तपःसहस्राभ्यांविनीनी । अण्च । सिकताशर्कराभ्यांच । देशेलुबिलचौच । दन्तउन्नतउरच् । ऊषशु
षिमुष्कमधोरः । द्युद्रुभ्यांमः । केशाद्वोऽन्यतरस्याम् । गाण्ड्यजगात्संज्ञायाम् । काण्डाण्डादीरन्नीरचौ । रजःकृ
ष्यासुतिपरिषदोवलच् । दन्तशिखात्संज्ञायाम् । ज्योत्स्नातमिस्राशृङ्गिणोर्जस्विन्नूर्जस्वलगोमिन्मलिनमलीमसाः ।
अतइनिठनौ । व्रीह्यादिभ्यश्च । तुन्दादिभ्यइलच्च । एकगोपूर्वाट्ठञ्नित्यम् । शतसहस्रान्ताच्चनिष्कात् । रूपादा
हतप्रशंसयोर्यप् ॥ ६ ॥ अस्मायामेधास्रजोविनिः । बहुलंछन्दसि । ऊर्णायायुस् । वाचोग्मिनिः । आलजाटचौब
हुभाषिणि । स्वामिन्नैश्वर्ये । अर्शआदिभ्योऽच् । द्वन्द्वोपतापगर्ह्यात्प्राणिस्थादिनिः । वातातीसाराभ्यांकुक्च । ॥ २० ॥
वयसिपूरणात् । सुखादिभ्यश्च । धर्मशीलवर्णान्ताच्च । हस्ताज्जातौ । वर्णाद्ब्रह्मचारिणि । पुष्करादिभ्योदेशे ।
बलादिभ्योमतुबन्यतरस्याम् । संज्ञायांमन्माभ्याम् । कंशंभ्यांबभयुस्तितुतयसः । तुन्दिबलिवटेर्भः । अहंशुभमो

र्युस् ॥ ७ ॥ धान्यानांत्रातेनकिमोविमुक्तादिभ्यःकालप्रयोजनात्प्रज्ञाश्रद्धाम्नायामेधाविंशतिः ॥ इतिपञ्चमाध्याये
द्वितीयःपादः ॥ २ ॥ ७ ॥ प्राग्दिशोविभक्तिः । किंसर्वनामबहुभ्योऽद्व्यादिभ्यः । इदमइश् । एतेतौरथोः । एत
दोऽन् । सर्वस्यसोऽन्यतरस्यांदि । पञ्चम्यास्तसिल् । तसेश्च । पर्यभिभ्यांच । सप्तम्यास्त्रल् । इदमोहः । किमोऽ
त् । वाहचच्छन्दसि । इतराभ्योऽपिदृश्यन्ते । सर्वैकान्यकिंयत्तदःकालेदा । इदमोर्हिल् । अधुना । दानींच ।
तदोदाच । तयोर्दार्हिलौचच्छन्दसि ॥ १ ॥ अनद्यतनेर्हिलन्यतरस्याम् । सद्यःपरुत्परार्यैषमःपरेद्यव्यद्यपूर्वेद्युरन्ये
द्युरन्यतरेद्युरितरेद्युरपरेद्युरधरेद्युरुभयेद्युरुत्तरेद्युः । प्रकारवचनेथाल् । इदमस्थमुः । किमश्च । थाहेतौचच्छन्दसि ।
दिक्छब्देभ्यःसप्तमीपञ्चमीप्रथमाभ्योदिग्देशकालेष्वस्तातिः । दक्षिणोत्तराभ्यामतसुच् । विभाषापरावराभ्याम् ।
अञ्चेर्लुक् । उपर्युपरिष्टात् । पश्चात् । पश्चपश्चाचच्छन्दसि । उत्तराधरदक्षिणादातिः । एनबन्यतरस्यामदूरेऽपञ्च
म्याः । दक्षिणादाच् । आहिचदूरे । उत्तराच्च । पूर्वाधरावराणामसिपुरधवश्चैषाम् । अस्तातिच ॥ २ ॥ विभाषा
वरस्य । संख्यायाविधार्थेधा । अधिकरणविचालेच । एकाद्धोध्यमुञन्यतरस्याम् । द्वित्र्योश्चधमुञ् । एधाच्च ।
याप्येपाशप् । पूरणाद्भागेतीयादन् । प्रागेकादशभ्योऽछन्दसि । षष्ठाष्टमाभ्यांञच । मानपश्वङ्गयोःकन्लुकौच ।
एकादाकिनिच्चासहाये । भूतपूर्वेचरट् । षष्ठ्यारूप्यच । अतिशायनेतमबिष्ठनौ । तिङश्च । द्विवचनविभज्योपपदे

तरबीयसुनौ । अजादीगुणवचनादेव । तुश्छन्दसि । प्रशस्यस्यश्रः ॥ ३ ॥ ज्यच । वृद्धस्यच । अन्तिकवाढयो
र्नेदसाधौ । युवाल्पयोःकनन्यतरस्याम् । विन्मतोर्लुक् । प्रशंसायांरूपप् । ईषदसमाप्तौकल्पब्देश्यदेशीयरः । वि
भाषासुपोबहुच्पुरस्तात्तु । प्रकारवचनेजातीयर् । प्रागिवात्कः । अव्ययसर्वनाम्नामकच्प्राक्टेः । कस्यचदः ।
अज्ञाते । कुत्सिते । संज्ञायांकन् । अनुकम्पायाम् । नीतौचतद्युक्तात् । बह्वचोमनुष्यनाम्नष्ठज्वा । घनिलचौच ।
प्राचामुपादेरडज्वुचौच ॥ ४ ॥ जातिनाम्नःकन् । अजिनान्तस्योत्तरपदलोपश्च । ठाजादावूर्ध्वंद्वितीयादचः । शेव
लसुपरिविशालवरुणार्यमादीनांतृतीयात् । अल्पे । ह्रस्वे । संज्ञायांकन् । कुटीशमीशुण्डाभ्योरः । कुत्वाडुपच् ।
कासूगोणीभ्यांष्टरच् । वत्सोक्षाश्वर्षभेभ्यश्चतनुत्वे । किंयत्तदोर्निर्धारणेद्वयोरेकस्यडतरच् । वाबहूनांजातिपरिप्रश्ने
डतमच् । एकाच्चप्राचाम् । अवक्षेपणेकन् । इवेप्रतिकृतौ । संज्ञायांच । लुम्मनुष्ये । जीविकार्थेचापण्ये । देवप
थादिभ्यश्च ॥ ५ ॥ वस्तेर्ढञ् । शिलायाढः । शाखादिभ्योयः । द्रव्यंचभव्ये । कुशाग्राच्छः । समासाच्चतद्विष
यात् । शर्करादिभ्योऽण् । अङ्गुल्यादिभ्यष्ठक् । एकशालायाष्ठजन्यतरस्याम् । कर्कलोहितादीकक् । प्रत्नपूर्वविश्वे
मात्थाल्छन्दसि । पूगाञ्ञ्योऽग्रामणीपूर्वात् । व्रातच्फञोरस्त्रियाम् । आयुधजीविसंघाञ्ञ्यड्वाहीकेष्वब्राह्मणराज
न्यात् । वृकाट्टेण्यण् । दामन्यादित्रिगर्तषष्ठाच्छः । पर्श्वादियौधेयादिभ्योऽणञौ । अभिजिद्विदभृच्छालावच्छि

खावच्छमीवदूर्णावच्छ्रुमदणोयञ् । ञ्यादयस्तद्राजाः ॥ ६ ॥ प्राग्दिशोऽनद्यतनोर्विभाषाज्यचजातिनाम्नोवस्तेरेको नविंशतिः ॥ इतिपञ्चमाध्यायेतृतीयःपादः ॥ ३ ॥ ७ ॥ पादशतस्यसंख्यादेर्वीप्सायांवुन्लोपश्च । दण्डव्यवसर्गयोश्च । स्थूलादिभ्यःप्रकारवचनेकन् । अनत्यन्तगतौक्तात् । नसामिवचने । बृहत्याआच्छादने । अषडक्षाशितंग्वलंकर्मालंपुरुषाध्युत्तरपदात्खः । विभाषाञ्चेरदिक्स्त्रियाम् । जात्यन्ताच्छबन्धुनि । स्थानान्ताद्विभाषासस्थानेनेतिचेत् । किमेत्तिङव्ययघादाम्वद्रव्यप्रकर्षे । अमुचच्छन्दसि । अनुगादिनष्ठक् । णचःस्त्रियामञ् । अणिनुणः । विसारिणोमत्स्ये । संख्यायाःक्रियाभ्यावृत्तिगणनेकृत्वसुच् । द्वित्रिचतुर्भ्यःसुच् । एकस्यसकृच्च । विभाषाबहोर्धाविप्रकृष्टकाले ॥ १ ॥ तत्प्रकृतवचनेमयट् । समूहवच्चबहुषु । अनन्तावसथेतिहभेषजाञ्ञ्यः । देवतान्तात्तादर्थ्येयत् । पादार्घाभ्यांच । अतिथेर्ञ्यः । देवात्तल् । अवेःकः । यावादिभ्यःकन् । लोहितान्मणौ । वर्णेचानित्ये । रक्ते । कालाच्च । विनयादिभ्यष्ठक् । वाचोव्याहृतार्थायाम् । तद्युक्तात्कर्मणोऽण् । ओषधेरजातौ । प्रज्ञादिभ्यश्च । मृदस्तिकन् । सस्नौप्रशंसायाम् ॥ २ ॥ वृकज्येष्ठाभ्यांतिल्तातिलौचच्छन्दसि । बह्वल्पार्थाच्छस्कारकादन्यतरस्याम् । संख्यैकवचनाच्चवीप्सायाम् । प्रतियोगेपञ्चम्यास्तसिः । अपादानेचाहीयरुहोः । अतिग्रहाव्यथनक्षेपेष्वकर्तरितृतीयायाः । हीयमानपापयोगाच्च । षष्ठ्याव्याश्रये । रोगाच्चापनयने । अभूततद्भावेकृभ्वस्तियोगेसंपद्यकर्तरिच्विः ।

अरुर्मनश्चक्षुश्चेतोरहोरजसांलोपश्च । विभाषासातिकात्स्र्ये । अभिविधौसंपदाच । तदधीनवचने । देयेत्राच । देवम नुष्यपुरुषपुरुमर्त्येभ्योद्वितीयासप्तम्योर्बहुलम् । अव्यक्तानुकरणाद्द्व्यजवरार्धादनितौडाच् । कृञोद्वितीयतृतीयशम्ब बीजात्कृषौ । संख्यायाश्चगुणान्तायाः । समयाच्चयापनायाम् ॥ ३ ॥ सपत्रनिष्पत्रादतिव्यथने । निष्कुलान्निष्को षणे । सुखप्रियादानुलोम्ये । दुःखात्प्रातिलोम्ये । शूलात्पाके । सत्यादशपथे । मद्रात्परिवापणे । समासान्ताः । नपूजनात् । किमःक्षेपे । नञस्तत्पुरुषात् । पथोविभाषा । बहुव्रीहौसंख्येयेडजबहुगणात् । ऋक्पूरब्धूःपथामान क्षे । अच्प्रत्यन्ववपूर्वात्सामलोम्नः । अक्ष्णोऽदर्शनात् । अचतुरविचतुरसुचतुरस्त्रीपुंसधेन्वनडुहर्क्सामवाङ्मनसा क्षिभ्रुवदारगवोर्वष्ठीवपदष्ठीवनक्तंदिवरात्रिंदिवाहर्दिवसरजसनिःश्रेयसपुरुषायुषद्व्यायुषत्र्यायुषर्ग्यजुषजातोक्षमहोक्ष वृद्धोक्षोपशुनगोष्ठश्वाः । ब्रह्महस्तिभ्यांवर्चसः । अवसमन्धेभ्यस्तमसः । श्वसोवसीयःश्रेयसः ॥ ४ ॥ अन्ववत प्ताद्रहसः । प्रतेरुरसःसप्तमीस्थात् । अनुगवमायामे । द्विस्तावात्रिस्तावावेदिः । उपसर्गादध्वनः । तत्पुरुषस्या ङ्गुलेःसंख्याव्ययादेः । अहःसर्वैकदेशसंख्यातपुण्याच्चरात्रेः । अह्नोऽह्नएतेभ्यः । नसंख्यादेःसमाहारे । उत्तमैका भ्यांच । राजाहःसखिभ्यष्टच् । गोरतद्धितलुकि । अग्राख्यायामुरसः । अनोश्मायःसरसांजातिसंज्ञयोः । ग्राम कौटाभ्यांचतक्ष्णः । अतेःशुनः । उपमानादप्राणिषु । उत्तरमृगपूर्वाच्चसक्थ्नः । नावोद्विगोः । अर्धाच्च ॥५॥ खार्याः ॥ २२ ॥

प्राचाम् । द्वित्रिभ्यामञ्जलेः । अनसन्तान्नपुंसकाच्छन्दसि । ब्रह्मणोजानपदाख्यायाम् । कुमहद्भ्यामन्यतरस्याम् । द्वन्द्वाच्चुदषहान्तात्समाहारे । अव्ययीभावेशरत्प्रभृतिभ्यः । अनश्च । नपुंसकादन्यतरस्याम् । नदीपौर्णमास्या ग्रहायणीभ्यः । झयः । गिरेश्चसेनकस्य । बहुव्रीहौसक्थ्यक्ष्णोःस्वाङ्गात्षच् । अङ्गुलेर्दारुणि । द्वित्रिभ्यांषमूर्ध्नः । अप्पूरणीप्रमाण्योः । अन्तर्बहिर्भ्यांचलोम्नः । अग्नासिकायाःसंज्ञायांनसंचास्थूलात् । उपसर्गाच्च । सुप्रातसुश्वसुदि वशारिकुक्षचतुरश्रैणीपदाजपदप्रोष्ठपदाः ॥ ६ ॥ नञ्दुःसुभ्योहलिसक्थ्योरन्यतरस्याम् । नित्यमसिच्प्रजामेधयोः । बहुप्रजाश्छन्दसि । धर्मादनिच्केवलात् । जम्भासुहरिततृणसोमेभ्यः । दक्षिणेर्मालुब्धयोगे । इच्कर्मव्यतिहारे । द्विदण्ड्यादिभ्यश्च । प्रसंभ्यांजानुनोर्ज्ञुः । ऊर्ध्वाद्विभाषा । ऊधसोऽनङ् । धनुषश्च । वासंज्ञायाम् । जायायानिङ् । गन्धस्येदुत्पूतिसुसुरभिभ्यः । अल्पाख्यायाम् । उपमानाच्च । पादस्यलोपोऽहस्त्यादिभ्यः । कुम्भपदीषुच । संख्या सुपूर्वस्य ॥ ७ ॥ वयसिदन्तस्यदतृ । छन्दसि । स्त्रियांसंज्ञायाम् । विभाषाश्यावारोकाभ्याम् । अग्रान्तशुद्ध शुभ्रवृषवराहेभ्यश्च । ककुदस्यावस्थायांलोपः । त्रिककुत्पर्वते । उद्विभ्यांकाकुदस्य । पूर्णाद्विभाषा । सुहृदुर्हृदौ मित्रामित्रयोः । उरःप्रभृतिभ्यःकप् । इनःस्त्रियाम् । नद्यृतश्च । शेषाद्विभाषा । नसंज्ञायाम् । ईयसश्च । वन्दिते

भ्रातुः । ऋतश्छन्दसि । नाडीतन्त्र्योःस्वाङ्गे । निष्प्रवाणिश्च ॥ ८ ॥ पादशतस्यतत्प्रकृतवृकज्येष्ठाभ्यांसपत्रान्वव तप्तात्खार्यानन्दुःसुभ्योवयसिविंशतिः ॥ इतिपञ्चमाध्यायेचतुर्थःपादः ॥ ४ ॥ इतिपञ्चमोऽध्यायः ॥ ५ ॥ ॥

ॐ ॥ एकाचोद्वेप्रथमस्य । अजादेर्द्वितीयस्य । नन्द्राःसंयोगादयः । पूर्वोऽभ्यासः । उभेअभ्यस्तम् । जक्षित्यादयःषट् । तुजादीनांदीर्घोऽभ्यासस्य । लिटिधातोरनभ्यासस्य । सन्यङोः । श्लौ । चङि । दाश्वान्साह्वान्मीढ्वांश्च । ष्यङःसंप्रसारणंपुत्रपत्योस्तत्पुरुषे । बन्धुनिबहुव्रीहौ । वचिस्वपियजादीनांकिति । ग्रहिज्यावयिव्यधिवष्टिविचतिवृश्चतिपृच्छतिभृज्जतीनांङितिच । लिट्यभ्यासस्योभयेषाम् । स्वापेश्चङि । स्वपिस्यमिव्येञांयङि । नवशः ॥ १ ॥ चायःकी । स्फायःस्फीनिष्ठायाम् । स्त्यःप्रपूर्वस्य । द्रवमूर्तिस्पर्शयोःश्यः । प्रतेश्च । विभाषाभ्यवपूर्वस्य । शृतंपाके । प्यायःपी । लिड्यङोश्च । विभाषाश्वेः । णौचसंश्चङोः । ह्वःसंप्रसारणम् । अभ्यस्तस्यच । बहुलंछन्दसि । चायःकी । अपस्पृधेथामानृचुरानृहुश्चिच्युषेतित्याजश्राताःश्रितमाशीराशीर्ताः । नसंप्रसारणेसंप्रसारणम् । लिटिवयोयः । वश्चास्यान्यतरस्यांकिति । वेञः ॥ २ ॥ ल्यपिच । ज्यश्च । व्यश्च । विभाषापरेः । आदेचउपदेशे ऽशिति । नव्योलिटि । स्फुरतिस्फुलत्योर्घञि । क्रीङ्जीनांणौ । सिध्यतेरपारलौकिके । मीनातिमिनोतिदीङांल्यपिच । विभाषालीयतेः । खिदेश्छन्दसि । अपगुरोणमुलि । चिस्फुरोर्णौ । प्रजनेवीयतेः । बिभेतेर्हेतुभये । नित्यं

स्मयतेः । सृजिदृशोर्झल्यमकिति । अनुदात्तस्यचर्दुपधस्यान्यतरस्याम् । शीर्षश्छन्दसि ॥ ३ ॥ येचतद्धिते । अचिशीर्षः । पद्दन्नोमास्हृन्निशसन्यूषन्दोषन्यकञ्छकन्नुदन्नासञ्छस्प्रभृतिषु । धात्वादेःषःसः । णोनः । लोपोव्योर्वलि । वेरपृक्तस्य । हल्ङ्याब्भ्योदीर्घात्सुतिस्यपृक्तंहल् । एङ्ह्रस्वात्संबुद्धेः । शेश्छन्दसिबहुलम् । ह्रस्वस्यपितिकृतितुक् । संहितायाम् । छेच । आङ्माङोश्च । दीर्घात् । पदान्ताद्वा । इकोयणचि । एचोऽयवायावः । वान्तोयिप्रत्यये । धातोस्तन्निमित्तस्यैव ॥ ४ ॥ क्षय्यजय्यौशक्यार्थे । क्रय्यस्तदर्थे । भय्यप्रवय्येचच्छन्दसि । एकःपूर्वपरयोः । अन्तादिवच्च । षत्वतुकोरसिद्धः । आद्गुणः । वृद्धिरेचि । एत्येधत्यूठ्सु । आटश्च । उपसर्गादृतिधातौ । वासुप्यापिशलेः । औतोम्शसोः । एङिपररूपम् । ओमाङोश्च । उस्यपदान्तात् । अतोगुणे । अव्यक्तानुकरणस्यातइतौ । नाम्रेडितस्यान्त्यस्यतुवा । नित्यमाम्रेडितेडाचि ॥ ५ ॥ अकःसवर्णेदीर्घः । प्रथमयोःपूर्वसवर्णः । तस्माच्छसोनःपुंसि । नादिचि । दीर्घाज्जसिच । वाछन्दसि । अमिपूर्वः । संप्रसारणाच्च । एङःपदान्तादति । ङसिङसोश्च । ऋतउत् । ख्यत्यात्परस्य । अतोरोरप्लुतादप्लुते । हशिच । प्रकृत्यान्तःपादमव्यपरे । अव्यादवद्यादवक्रमुरव्रतायमवन्त्ववस्युषुच । यजुष्युरः । आपोजुषाणोवृष्णोवर्षिष्ठेम्बेऽम्बालेऽम्बिकेपूर्वे । अङ्गइत्यादौच । अनुदात्तेचकुधपरे ॥ ६ ॥ अवपथासिच । सर्वत्रविभाषागोः । अवङ्स्फोटायनस्य । इन्द्रेच । प्लुतप्रगृह्याअचिनित्यम् ।

आङोऽनुनासिकश्छन्दसि । इकोऽसवर्णेशाकल्यस्यह्रस्वश्च । ऋत्यकः । अप्लुतवदुपस्थिते । ई३चाक्रवर्मणस्य । दिव
उत् । एतत्तदोःसुलोपोऽकोरनञ्समासेहलि । स्यश्छन्दसिबहुलम् । सोऽचिलोपेचेत्पादपूरणम् । सुड्कात्पूर्वः ।
अडभ्यासव्यवायेऽपि । संपर्युपेभ्यःकरोतौभूषणे । समवायेच । उपात्प्रतियत्नवैकृतवाक्याध्याहारेषु । किरतौल
वने ॥ ७ ॥ हिंसायांप्रतेश्च । अपाच्चतुष्पाच्छकुनिष्वालेखने । कुस्तुम्बुरूणिजातिः । अपरस्पराःक्रियासातत्ये ।
गोष्पदंसेवितासेवितप्रमाणेषु । आस्पदंप्रतिष्ठायाम् । आश्चर्यमनित्ये । वर्चस्केऽवस्करः । अपस्करोरथाङ्गम् ।
विष्किरःशकुनिर्विकिरोवा । ह्रस्वाच्चन्द्रोत्तरपदेमन्त्रे । प्रतिष्कशश्चकशेः । प्रस्कण्वहरिश्चन्द्रावृषी । मस्करमस्करि
णौवेणुपरिव्राजकयोः । कास्तीराजस्तुन्देनगरे । कारस्करोवृक्षः । पारस्करप्रभृतीनिचसंज्ञायाम् । अनुदात्तंपदमेक
वर्जम् । कर्षात्वतोघञोऽन्तउदात्तः । उञ्छादीनांच ॥ ८ ॥ अनुदात्तस्यचयत्रोदात्तलोपः । धातोः । चितः ।
तद्धितस्य । कितः । तिसृभ्योजसः । चतुरःशसि । सावेकाचस्तृतीयादिर्विभक्तिः । अन्तोदात्तादुत्तरपदादन्यतर
स्यामनित्यसमासे । अञ्चेश्छन्दस्यसर्वनामस्थानम् । ऊडिदंपदाद्यप्पुम्रैद्युभ्यः । अष्टनोदीर्घात् । शतुरनुमोनद्यजा
दी । उदात्तयणोहल्पूर्वात् । नोङ्धात्वोः । ह्रस्वनुड्भ्यांमतुप् । नामन्यतरस्याम् । ङ्याश्छन्दसिबहुलम् । षट्त्रिच
तुर्भ्योहलादिः । झल्युपोत्तमम् ॥ ९ ॥ विभाषाभाषायाम् । नगोश्वन्सावर्णराड्क्रुड्कृञ्भ्यः । दिवोझल् ।

नृचान्यतरस्याम् । तित्स्वरितम् । तास्यनुदात्तेन्ङिदुपदेशाल्लसार्वधातुकमनुदात्तमन्ह्विङोः । आदिःसिचोऽन्यत
रस्याम् । स्वपादिर्हिंसामच्यनिटि । अभ्यस्तानामादिः । अनुदात्तेच । सर्वस्यसुपि । भीह्रीभृहुमदजनधनदरिद्रा
जागरांप्रत्ययात्पूर्वंपिति । लिति । आदिर्णमुल्यन्यतरस्याम् । अचःकर्तृयकि । थलिचसेटीडन्तोवा । ञ्नित्यादि
र्नित्यम् । आमन्त्रितस्यच । पथिमथोःसर्वनामस्थाने । अन्तश्चतवैयुगपत् ॥ १० ॥ क्षयोनिवासे । जयःकरणम् ।
वृषादीनांच । संज्ञायामुपमानम् । निष्ठाचद्व्यजनात् । शुष्कधृष्टौ । आशितःकर्ता । रिक्तेविभाषा । जुष्टार्पितेचच्छ
न्दसि । नित्यंमन्त्रे । युष्मदस्मदोर्ङसि । ङयिच । यतोऽनावः । ईडवन्दवृशंसदुहाण्यतः । विभाषावेण्विन्धान
योः । त्यागरागहासकुहश्वठक्रथानाम् । उपोत्तमंरिति । चङ्यन्यतरस्याम् । मतोःपूर्वमात्संज्ञायांस्त्रियाम् ।
अन्तोऽवत्याः ॥ ११ ॥ ईवत्याः । चौ । समासस्य ॥ १२ ॥ एकाचश्चायोल्यपिचयेचक्षय्यजय्यावकःसवर्णेऽवप
थाहिंसायामनुदात्तस्यविभाषाक्षयईवत्यास्त्रीणि ॥ इतिषष्ठाध्यायेप्रथमःपादः ॥ १ ॥ ७ ॥ बहुव्रीहौप्रकृत्यापूर्वप
दम् । तत्पुरुषेतुल्यार्थतृतीयासप्तम्युपमानाव्ययद्वितीयाकृत्याः । वर्णोवर्णेष्वनेते । गाधलवणयोःप्रमाणे । दाया
द्यंदायादे । प्रतिबन्धिचिरकृच्छ्रयोः । पदेऽपदेशे । निवातेवातत्राणे । शारदेऽनार्तवे । अध्वर्युकषाययोर्जातौ ।
शि. वे. ३५ सदृशप्रतिरूपयोःसादृश्ये । द्विगौप्रमाणे । गन्तव्यपण्यंवाणिजे । मात्रोपज्ञोपक्रमच्छायेनपुंसके । सुखप्रिययोर्हिते ।

 प्रीतौच । स्वंस्वामिनि । पत्यावैश्वर्ये । नभूवाक्चिद्दिधिषु । वाभुवनम् ॥ १ ॥ आशङ्काबाधनेदीयःसुसंभावने ।
पूर्वेभूतपूर्वे । सविधसनीडसमर्यादसवेशसदेशेषुसामीप्ये । विस्पृष्टादीनिगुणवचनेषु । अज्यावमकन्पापवत्सुभावे
 कर्मधारये । कुमारश्च । आदिःप्रत्येनसि । पूगेष्वन्यतरस्याम् । इगन्तकालकपालभगालशरावेषुद्विगौ । बह्वन्यत
रस्याम् । दिष्टिवितस्त्योश्च । सप्तमीसिद्धशुष्कपक्वबन्धेष्वकालात् । परिप्रत्युपापावर्ज्यमानाहोरात्रावयवेषु । राज
न्यबहुवचनद्वन्द्वेऽन्धकवृष्णिषु । संख्या । आचार्योपसर्जनश्चान्तेवासी । कार्तकौजपादयश्च । महान्व्रीह्यपराह्ण
गृष्टीष्वासजाबालभारतहैलिहिलरौरवप्रवृद्धेषु । क्षुल्लकश्चवैश्वदेवे । उष्ट्रःसादिवाम्योः ॥ २ ॥ गौःसादसादिसार
थिषु । कुरुगार्हपतरिक्तगुर्वसूतजरत्यश्लीलदृढरूपापारेवडवातैतिलकद्रूःपण्यकम्बलोदासीभाराणांच । चतुर्थीतद
र्थे । अर्थे । क्तेच । कर्मधारयेऽनिष्ठा । अहीनेद्वितीया । तृतीयाकर्मणि । गतिरनन्तरः । तादौचनितिकृत्यतौ ।
तवैचान्तश्चयुगपत् । अनिगन्तोऽञ्चतौवप्रत्यये । न्यधीच । ईषदन्यतरस्याम् । हिरण्यपरिमाणंधने । प्रथमोऽचि
रोपसंपत्तौ । कतरकतमौकर्मधारये । आर्योब्राह्मणकुमारयोः । राजाच । षष्ठीप्रत्येनसि ॥ ३ ॥ क्तेनित्यार्थे ।
ग्रामःशिल्पिनि । राजाचप्रशंसायाम् । आदिरुदात्तः । सप्तमीहारिणौधर्म्येऽहरणे । युक्तेच । विभाषाध्यक्षे ।
पापंचशिल्पिनि । गोत्रान्तेवासिमाणवब्राह्मणेषुक्षेपे । अङ्गानिमैरेये । भक्ताख्यास्तदर्थेषु । गोबिडालसिंहसैन्धवेषू

पमाने । अकेजीविकार्थे । प्राचांक्रीडायाम् । अणिनियुक्ते । शिल्पिनिचाकृञः । संज्ञायांच । गोतन्तियवंपाले । णिनि । उपमानंशब्दार्थप्रकृतावेव ॥ ४ ॥ युक्तारोह्यादयश्च । दीर्घकाशतुषभ्राष्ट्रवटंजे । अन्त्यात्पूर्वंवह्वचः । ग्रामेऽनिवसन्तः । घोषादिषुच । छात्र्यादयःशालायाम् । प्रस्थेऽवृद्धमकर्क्यादीनाम् । मालादीनांच । अमहन्नव न्नगरेऽनुदीचाम् । अर्मेचावर्णंद्व्यच्त्र्यच् । नभूताधिकसंजीवमद्राश्मकज्जलम् । अन्तः । सर्वंगुणकार्त्स्न्ये । संज्ञायां गिरिनिकाययोः । कुमार्यांवयसि । उदकेऽकेवले । द्विगौक्रतौ । सभायांनपुंसके । पुरेप्राचाम् । अरिष्टगौडपूर्वेच ॥ ५ ॥ नहास्तिनफलकमार्देयाः । कुसूलकूपकुम्भशालंबिले । दिक्छब्दाग्रामजनपदाख्यानचानराटेषु । आचार्यो पसर्जनश्चान्तेवासिनि । उत्तरपदवृद्धौसर्वंच । वहुव्रीहौविश्वंसंज्ञायाम् । उदराश्वेषुषु । क्षेपे । नदीबन्धुनि । निष्ठोपसर्ग पूर्वमन्यतरस्याम् । उत्तरपदादिः । कर्णोवर्णलक्षणात् । संज्ञौपम्ययोश्च । कण्ठपृष्ठग्रीवाजङ्घंच । शृङ्गमवस्थायांच । नञोजरमरमित्रमृताः । सोर्मनसीअलोमोषसी । क्रत्वादयश्च । आद्युदात्तंद्व्यच्छन्दसि । वीरवीर्यौच ॥ ६ ॥ कूल तीरतूलमूलशालाक्षसममव्ययीभावे । कंसमन्थशूर्पपाय्यकाण्डंद्विगौ । तत्पुरुषेशालायांनपुंसके । कन्थाच । आ दिश्चिहणादीनाम् । चेलखेटकटुककाण्डंगर्हायाम् । चीरमुपमानम् । पललसूपशाकंमिश्रे । कुरुसूदस्थलकर्षाःसंज्ञा याम् । अकर्मधारयेराज्यम् । वर्ग्यादयश्च । पुत्रःपुम्भ्यः । नाचार्यराजर्त्विक्संयुक्तज्ञात्याख्येभ्यः । चूर्णादीन्यप्रा

णिषष्ठ्याः । षट्चकाण्डादीनि । कुण्डंवनम् । प्रकृत्याभगालम् । शितेर्नित्याबह्वज्बहुव्रीहावभसत् । गतिकारको
पपदात्कृत् । उभेवनस्पत्यादिषुयुगपत् ॥७॥ देवताद्वन्द्वेच । नोत्तरपदेऽनुदात्तादावपृथिवीरुद्रपूषमन्थिषु । अन्तः ।
थाथघञ्क्ताजबित्रकाणाम् । सूपमानात्क्तः । संज्ञायामनाचितादीनाम् । प्रवृद्धादीनांच । कारकाद्दत्तश्रुतयोरेवा
शिषि । इत्थंभूतेनकृतमितिच । अनोभावकर्मवचनः । मन्क्तिन्व्याख्यानशयनासनस्थानयाजकादिक्रीताः । सप्त
म्याःपुण्यम् । ऊनार्थकलहंतृतीयायाः । मिश्रंचानुपसर्गमसंधौ । नञोगुणप्रतिषेधेसंपाद्यर्हहितालमर्थास्तद्धिताः ।
ययतोश्चातदर्थे । अच्कावशक्तौ । आक्रोशेच । संज्ञायाम् । कृत्योकेष्णुच्चार्वादयश्च ॥ ८ ॥ विभाषातृन्नन्नतीक्ष्णशु
चिषु । बहुव्रीहाविदमेतत्तद्भ्यःप्रथमपूरणयोःक्रियागणने । संख्यायाःस्तनः । विभाषाछन्दसि । संज्ञायांमित्राजि
नयोः । व्यवायिनोऽन्तरम् । मुखंस्वाङ्गम् । नाव्ययंदिक्छब्दगोमहत्स्थूलमुष्टिपृथुवत्सेभ्यः । निष्ठोपमानादन्यतर
स्याम् । जातिकालसुखादिभ्योऽनाच्छादनात्क्तोऽकृतमितप्रतिपन्नाः । वाजाते । नञ्सुभ्याम् । कपिपूर्वम् । ह्रस्वा
न्तेऽन्त्यात्पूर्वम् । बहोर्नञ्वदुत्तरपदभूम्नि । नगुणादयोऽवयवाः । उपसर्गात्स्वाङ्गंध्रुवमपर्शु । वनंसमासे । अन्तः ।
अन्तश्च ॥ ९ ॥ ननिविभ्याम् । परेरभितोभाविमण्डलम् । प्रादस्वाङ्गंसंज्ञायाम् । निरुदकादीनिच । अभेर्मुखम् ।
अपाच्च । स्फिगपूतवीणाञ्जोध्वकुक्षिसीरनामनामच । अधेरुपरिस्थम् । अनोरप्रधानकनीयसी । पुरुषश्चान्वादिष्टः ।

अतेरकृत्पदे । नेरनिधाने । प्रतेरंश्वादयस्तत्पुरुषे । उपाद्व्यजजिनमगौरादयः । सोरवक्षेपणे । विभाषोत्पुच्छे । द्वित्रिभ्यांपाद्दन्मूर्धसुबहुव्रीहौ । सक्थंचाक्रान्तात् । परादिश्छन्दसिबहुलम् ॥ १० ॥ बहुव्रीहावाशङ्कागौःसादक्के नित्यार्थेयुक्तानहास्तिनकुलतीरदेवताविभाषाननिव्येकोनविंशतिः ॥ इतिषष्ठाध्यायेद्वितीयःपादः ॥ २ ॥ ॥ ६ ॥

अलुगुत्तरपदे । पंचम्याःस्तोकादिभ्यः । ओजःसहोऽम्भस्तमसस्तृतीयायाः । मनसःसंज्ञायाम् । आज्ञायिनिच । आत्मनश्चपूरणे । वैयाकरणाख्यायांचतुर्थ्याः । परस्यच । हलदन्तात्सप्तम्याःसंज्ञायाम् । कारनाम्निचप्राचांहलादौ । मध्याद्गुरौ । अमूर्धमस्तकात्स्वाङ्गादकामे । बन्धेचविभाषा । तत्पुरुषेकृतिबहुलम् । प्रावृट्शरत्कालदिवांजे । विभाषावर्षक्षरशरवरात् । घकालतनेषुकालनाम्नः । शयवासवासिष्वकालात् । नेन्सिद्धबध्नातिषुच । स्थेचभाषायाम् ॥ १ ॥ षष्ठ्याआक्रोशे । पुत्रेऽन्यतरस्याम् । ऋतोविद्यायोनिसंबन्धेभ्यः । विभाषास्वसृपत्योः । आनङृतोद्वन्द्वे । देवताद्वन्द्वेच । ईदग्नेःसोमवरुणयोः । इद्वृद्धौ । दिवोद्यावा । दिवसश्चपृथिव्याम् । उषासोषसः । मातरपितरावुदीचाम् । पितरामातराचच्छन्दसि । स्त्रियाःपुंवद्भाषितपुंस्कादनूङ्समानाधिकरणेस्त्रियामपूरणीप्रियादिषु । तसिलादिष्वाकृत्वसुचः । क्यङ्मानिनोश्च । नकोपधायाः । संज्ञापूरण्योश्च । वृद्धिनिमित्तस्यचतद्धितस्यारक्तविकारे । स्वाङ्गाच्चेतोऽमानिनि ॥ २ ॥ जातेश्च । पुंवत्कर्मधारयजातीयदेशीयेषु । घरूपकल्पचेलड्ब्रुवगोत्रमत

हतेषुङ्योऽनेकाचोह्रस्वः । नद्याःशेषस्यान्यतरस्याम् । उगितश्च । आन्महतःसमानाधिकरणजातीययोः । द्व्यष्टनः
संख्यायामबहुव्रीह्यशीत्योः । त्रेस्त्रयः । विभाषाचत्वारिंशत्प्रभृतौसर्वेषाम् । हृदयस्यहृल्लेखयदण्लासेषु । वाशोक
ष्यञ्रोगेषु । पादस्यपदाज्यातिगोपहतेषु । पद्यत्यतदर्थे । हिमकाषिहतिषुच । ऋचःशे । वाघोषमिश्रशब्देषु । उद
कस्योदःसंज्ञायाम् । पेषंवासवाहनधिषुच । एकहलादौपूरयितव्येऽन्यतरस्याम् । मन्थौदनसक्तुबिन्दुवज्रभारहार
वीवधगाहेषुच ॥ ३ ॥ इकोह्रस्वोऽङ्योगालवस्य । एकतद्धितेच । ङ्यापोःसंज्ञाछन्दसोर्बहुलम् । त्वेच । इष्टकेषी
कामालानांचिततूलभारिषु । खित्यनव्ययस्य । अरुर्द्विषदजन्तस्यमुम् । इचएकाचोऽम्प्रत्ययवच्च । वाचंयमपुरंद
रौच । कारेसत्यागदस्य । श्येनतिलस्यपातेञे । रात्रेःकृतिविभाषा । नलोपोनञः । तस्मान्नुडचि । नभ्राण्नपान्न
वेदानासत्यानमुचिनकुलनखनपुंसकनक्षत्रनक्रनाकेषुप्रकृत्या । एकादिश्चैकस्यचादुक् । नगोऽप्राणिष्वन्यतरस्याम् ।
सहस्यसःसंज्ञायाम् । ग्रन्थान्ताधिकेच । द्वितीयेचानुपाख्ये ॥ ४ ॥ अव्ययीभावेचाकाले । वोपसर्जनस्य । प्रकृ
त्याशिष्यगोवत्सहलेषु । समानस्यच्छन्दस्यमूर्धप्रभृत्युदर्केषु । ज्योतिर्जनपदरात्रिनाभिनामगोत्ररूपस्थानवर्णवयो
वचनबन्धुषु । चरणेब्रह्मचारिणि । तीर्थेये । विभाषोदरे । दृग्दृशवतुषु । इदंकिमोरीश्की । आसर्वनाम्नः । वि
ष्वग्देवयोश्चटेरद्र्यञ्चतौवप्रत्यये । समःसमि । तिरसस्तिर्यलोपे । सहस्यसध्रिः । सधमादस्थयोश्छन्दसि । द्व्यन्तरुप

सर्गेभ्योऽपईत् । ऊदनोर्देशे । अषष्ठ्यतृतीयास्थस्यान्यस्य दुगाशीराशास्थास्थितोत्सुकोतिकारकरागच्छेषु । अर्थेवि भाषा ॥ ५ ॥ कोःकत्तत्पुरुषेऽचि । रथवदयोश्च । तृणेचजातौ । कापथ्यक्षयोः । ईषदर्थे । विभाषापुरुषे । कवंचोष्णे । पथिचच्छन्दसि । पृषोदरादीनियथोपदिष्टम् । संख्याविसायपूर्वस्याह्नस्याहनन्यतरस्यांङौ । ढ्रलोपेपूर्वस्यदीर्घोऽणः । सहिवहोरोदवर्णस्य । साढ्यैसाढ्वासाढेतिनिगमे । संहितायाम् । कर्णेलक्षणस्याविष्टाष्टपंचमणिभिन्नच्छिन्नच्छिद्रस्रुवस्वस्तिकस्य । नहिवृतिवृषिव्यधिरुचिसहितनिषुक्कौ । वनगिर्योःसंज्ञायांकोटरकिंशुलुकादीनाम् । वले । मतौवह्वचोऽनजिरादीनाम् । शरादीनांच ॥ ६ ॥ इकोवहेऽपीलोः । उपसर्गस्यघञ्यमनुष्येवहुलम् । इकःकाशे । दस्ति । अष्टनःसंज्ञायाम् । छन्दसिच । चितेःकपि । विश्वस्यवसुराटोः । नरेसंज्ञायाम् । मित्रेचर्षौ । मन्त्रेसोमाश्वेन्द्रियविश्वदेव्यस्यमतौ । ओषधेश्चविभक्तावप्रथमायाम् । ऋचितुनुघमक्षुतङ्कुत्रोरुष्याणाम् । इकःसुञि । द्व्यचोऽतस्तिङः । निपातस्यच । अन्येषामपिदृश्यते । चौ । संप्रसारणस्य ॥७॥ अलुक्षष्ठ्याजातेरिकोऽव्ययीभावेकोःकत्तदिकोवहएकोनविंशतिः । इतिषष्ठाध्यायेतृतीयःपादः ॥ ३ ॥ छ ॥ अङ्गस्य । हलः । नामि । नतिसृचतसृ । छन्दस्युभथा । नृच । नोपधायाः । सर्वनामस्थानेचासंबुद्धौ । वासपूर्वस्यनिगमे । सान्तमहतःसंयोगस्य । अप्तृन्तृच्स्वसृनप्तृनेष्टृत्वष्टृक्षत्तृहोतृपोतृप्रशास्तृणाम् । इन्हन्पूषार्यम्णांशौ । सौच । अत्वसन्तस्यचाधातोः । अनुनासि

कस्यक्विझलोःक्ङिति । अज्झनगमांसनि । तनोतेर्विभाषा । क्रमश्चक्त्वि । च्छ्वोःशूडनुनासिकेच । ज्वरत्वरस्रिव्यवि
मवामुपधायाश्च ॥ १ ॥ राल्लोपः । असिद्धवदत्राभात् । श्नान्नलोपः । अनिदितांहलउपधायाःक्ङिति । दंशसञ्जस्व
ञ्जांशपि । रञ्जेश्च । घञिचभावकरणयोः । स्यदोजवे । अवोदैधोद्मप्रश्रथहिमश्रथाः । नाञ्चेःपूजायाम् । क्त्विस्क
न्दिस्यन्दोः । जान्तनशांविभाषा । भञ्जेश्चचिणि । शासइदङ्हलोः । शाहौ । हन्तेर्जः । अनुदात्तोपदेशवनतित
नोत्यादीनामनुनासिकलोपोझलिक्ङिति । वाल्यपि । नक्तिचिदीर्घश्च । गमःक्वौ ॥ २ ॥ विड्वनोरनुनासिकःस्यात् ।
जनसनखनांसञ्झलोः । येविभाषा । तनोतेर्यकि । सनःक्तिचिलोपश्चास्यान्यतरस्याम् । आर्धधातुके । भ्रस्जोरोप
धयोरमन्यतरस्याम् । अतोलोपः । यस्यहलः । क्यस्यविभाषा । णेरनिटि । निष्ठायांसेटि । जनितामन्त्रे । शमिता
यज्ञे । अयामन्ताल्वाय्येत्न्विष्णुषु । ल्यपिलघुपूर्वात् । विभाषापः । युप्लुवोर्दीर्घश्छन्दसि । क्षियः । निष्ठायामण्य
दर्थे ॥३॥ वाक्रोशदैन्ययोः । स्यसिच्सीयुट्तासिषुभावकर्मणोरुपदेशेऽज्झनग्रहदृशांवाचिण्वदिट्च । दीङोयुडचि
क्ङिति । आतोलोपइटिच । ईद्यति । घुमास्थागापाजहातिसांहलि । एर्लिङि । वान्यस्यसंयोगादेः । नल्यपि । मय ॥ २८ ॥
तेरिदन्यतरस्याम् । लुङ्लङ्लृङ्क्ष्वडुदात्तः । आडजादीनाम् । छन्दस्यपिदृश्यते । नमाङ्योगे । बहुलंछन्दस्यमा
ङ्योगेऽपि । इरयोरे । अचिश्नुधातुभ्रुवांय्वोरियङुवङौ । अभ्यासस्यासवर्णे । स्त्रियाः । वाम्शसोः ॥ ४ ॥ इणो

यण् । एरनेकाचोऽसंयोगपूर्वस्य । ओःसुपि । वर्षाभ्वश्च । नभूसुधियोः । छन्दस्युभयथा । हुश्नुवोःसार्वधातुके । भुवोवुग्लुङ्लिटोः । ऊदुपधायागोहः । दोषोणौ । वाचित्तविरागे । मितांह्रस्वः । चिण्णमुलोर्दीर्घोऽन्यतरस्याम् । खचिह्रस्वः । ह्लादोनिष्ठायाम् । छादेर्घेऽद्व्युपसर्गस्य । इस्मन्त्रन्क्विषुच । गमहनजनखनघसांलोपःक्ङित्यनङि । तनिपत्योश्छन्दसि । घसिभसोर्हलिच ॥ ५ ॥ हुझल्भ्योहेर्धिः । श्रुशृणुपॄकृवृभ्यश्छन्दसि । अङितश्च । चिणोलुक् । अतोहेः । उतश्चप्रत्ययादसंयोगपूर्वात् । लोपश्चास्यान्यतरस्यांम्वोः । नित्यंकरोतेः । येच । अतउत्सार्वधातुके । श्नसोरल्लोपः । श्नाभ्यस्तयोरातः । ईहल्यघोः । इद्दरिद्रस्य । भियोऽन्यतरस्याम् । जहातेश्च । आचहौ । लोपोयि । घ्वसोरेद्धावभ्यासलोपश्च । अतएकहल्मध्येऽनादेशादेर्लिटि ॥६॥ थलिचसेटि । तॄफलभजत्रपश्च । राधोहिंसायाम् । वाजॄभ्रमुत्रसाम् । फणांचसप्तानाम् । नशसददवादिगुणानाम् । अर्वणस्त्रसावनञः । मघवाबहुलम् । भस्य । पादःपत् । वसोःसंप्रसारणम् । वाहऊठ् । श्वयुवमघोनामतद्धिते । अल्लोपोऽनः । षपूर्वहन्धृतराज्ञामणि । विभाषाङिश्योः । नसंयोगाद्वमन्तात् । अचः । उदईत् । आतोधातोः ॥ ७ ॥ मन्त्रेष्वाङ्यादेरात्मनः । तिविंशतेर्डिति । टेः । नस्तद्धिते । अह्नष्टखोरेव । ओर्गुणः । ढेलोपोऽकद्र्वाः । यस्येतिच । सूर्यतिष्यागस्त्यमत्स्यानांयउपधायाः । हलस्तद्धितस्य । आपत्यस्यचतद्धितेऽनाति । क्यच्व्योश्च । बिल्वकादिभ्यश्छस्यलुक् । तुरिष्ठेमेयःसुः । टेः । स्थूल

दूरयुवह्रस्वक्षिप्रक्षुद्राणांयणादिपरंपूर्वस्यचगुणः । प्रियस्थिरस्फिरोरुबहुलगुरुवृद्धतृप्रदीर्घवृन्दारकाणांप्रस्थस्फवर्बंहिगर्वर्षित्रब्द्राघिवृन्दाः । बहोर्लोपोभूचबहोः । इष्ठस्ययिट्च । ज्यादादीयसः ॥ ८ ॥ रऋतोहलादेर्लघोः । विभाषर्जोश्छन्दसि । प्रकृत्यैकाच् । इनण्यनपत्ये । गाथिविदथिकेशिगणिपणिनश्च । संयोगादिश्च । अन् । येचाभावकर्मणोः । आत्माध्वानौखे । नमपूर्वोऽपत्येऽवर्मणः । ब्राह्मोऽजातौ । कार्मस्ताच्छील्ये । औक्षमनपत्ये । दाण्डिनायनहास्तिनायनाथर्वणिकजैह्माशिनेयवाशिनायनिभ्रौणहत्यधैवत्यसारवैक्ष्वाकमैत्रेयहिरण्मयानि । ऋत्व्यवास्त्व्यवास्त्वमाध्वीहिरण्ययानिच्छन्दसि ॥ ९ ॥ अङ्गस्यराल्लोपोविड्वनोर्वाक्रोशेणोयणहुझल्भ्यस्थलिचमन्त्रेषुरऋतःपंचदश ॥ इतिषष्ठाध्यायेचतुर्थःपादः ॥ ४ ॥ इत्यष्टाध्यायीसूत्रपाठेषष्ठोऽध्यायः ॥ ६ ॥ ॥ ॥

ॐ ॥ युवोरनाकौ । आयनेयीनीयियःफढखछघांप्रत्ययादीनाम् । झोऽन्तः । अदभ्यस्तात् । आत्मनेपदेष्वनतः । शीङोरुट् । वेत्तेर्विभाषा । बहुलंछन्दसि । अतोभिसऐस् । बहुलंछन्दसि । नेदमदसोरकोः । टाङसिङसामिनात्स्याः । ङेर्यः । सर्वनाम्नःस्मै । ङसिङ्योःस्मात्स्मिनौ । पूर्वादिभ्योनवभ्योवा । जसःशी । औङआपः । ॥ २९ ॥
नपुंसकाच्च । जःशसोःशिः ॥ १ ॥ अष्टाभ्यऔश् । षड्भ्योलुक् । स्वमोर्नपुंसकात् । अतोऽम् । अद्ड्डतरादिभ्यःपञ्चभ्यः । नेतराच्छन्दसि । युष्मदस्मद्भ्यांङसोऽश् । ङेप्रथमयोरम् । शसोन । भ्यसोभ्यम् । पञ्चम्याअत् । एकव

चनस्यच । सामआकम् । आतऔणलः । तुह्योस्तातङाशिष्यन्यतरस्याम् । विदेःशतुर्वसुः । समासेऽनञ्पूर्वेक्त्वो ल्यप् । क्त्वापिच्छन्दसि । सुपांसुलुक्पूर्वसवर्णाच्छेयाडाड्यायाजालः । अमोमश् ॥ २ ॥ लोपस्तआत्मनेपदेषु । ध्वमोध्वात् । यजध्वैनमितिच । तस्यतात् । तप्तनप्तनथनाश्च । इदन्तोमसि । क्त्वोयक् । इष्ट्वीनमितिच । स्नात्व्यादयश्च । आज्जसेरसुक् । अश्वक्षीरवृषलवणानामात्मप्रीतौक्यचि । आमिसर्वनाम्नःसुट् । त्रेस्त्रयः । ह्रस्वनद्यापोनुट् । षट्चतुर्भ्यश्च । श्रीग्रामण्योश्छन्दसि । गोःपादान्ते । इदितोनुम्धातोः । शेमुचादीनाम् । मस्जिनशोर्झलि ॥ ३ ॥ रधिजभोरचि । नेट्यलिटिरधेः । रभेरशब्लिटोः । लभेश्च । आङोयि । उपात्प्रशंसायाम् । उपसर्गात्खल्घञोः । नसुदुर्भ्यांकेवलाभ्याम् । विभाषाचिण्णमुलोः । उगिदचांसर्वनामस्थानेऽधातोः । युजेरसमासे । नपुंसकस्यझलचः । इकोऽचिविभक्तौ । तृतीयादिषुभाषितपुंस्कंपुंवद्गालवस्य । अस्थिदधिसक्थ्यक्ष्णामनङुदात्तः । छन्दस्यपिदृश्यते । ईचद्विवचने । नाभ्यस्ताच्छतुः । वानपुंसकस्य । आच्छीनद्योर्नुम् ॥ ४ ॥ शप्श्यनोर्नित्यम् । सावनडुहः । दृक्स्ववःस्वतवसांछन्दसि । दिवऔत् । पथिमथ्यृभुक्षामात् । इतोऽत्सर्वनामस्थाने । थोन्थः । भस्यटेर्लोपः । पुंसोऽसुङ् । गोतोणित् । णलुत्तमोवा । सख्युरसंबुद्धौ । अनङ्सौ । ऋदुशनस्पुरुदंसोऽनेहसांच । तृज्वत्क्रोष्टुः । स्त्रियांच । विभाषातृतीयादिष्वचि । चतुरनडुहोरामुदात्तः । अम्संबुद्धौ । ऋतइद्धातोः ॥ ५ ॥

उपधायाश्च । उदोष्ठ्यपूर्वस्य । बहुलंछन्दसि ॥ ६ ॥ युवोरष्टाभ्योलोपोरधिशष्ट्यनोरुपधायास्त्रीणि ॥ इतिसप्तमा
ध्यायेप्रथमःपादः ॥ १ ॥ ॥ ७ ॥ सिचिवृद्धिःपरस्मैपदेषु । अतोल्रान्तस्य । वदव्रजहलन्तस्याचः । नेटि । ह्म्य
न्तक्षणश्वसजागृणिश्व्येदिताम् । ऊर्णोतेर्विभाषा । अतोहलादेर्लघोः । नेड्वशिकृति । तितुत्रतथसिसुसरकसेषुच ।
एकाचउपदेशेऽनुदात्तात् । श्र्युकःकिति । सनिग्रहगुहोश्च । कृसृभृवृस्तुद्रुस्रुश्रुवोलिटि । श्वीदितोनिष्ठायाम् ।
यस्यविभाषा । आदितश्च । विभाषाभावादिकर्मणोः । क्षुब्धस्वान्तध्वान्तलग्नम्लिष्टविरिब्धफाण्टबाढानिमन्थमन
स्तमःसक्ताविस्पष्टस्वरानायासभृशेषु । धृषिशसीवैयात्ये । दृढःस्थूलबलयोः ॥ १ ॥ प्रभौपरिवृढः । कृच्छ्रगहनयोः
कषः । घुषिरविशब्दने । अर्देःसंनिविभ्यः । अभेश्चाविदूर्ये । णेरध्ययनेवृत्तम् । वादान्तशान्तपूर्णदस्तस्पष्टच्छन्न
ज्ञप्ताः । रुष्यमत्वरसंघुषास्वनाम् । हृषेर्लोमसु । अपचितश्च । हुह्वरेश्छन्दसि । अपरिह्वृताश्च । सोमेह्वरितः ।
ग्रसितस्कभितस्तभितोत्तभितचत्तविकस्ताविशस्तृशंस्तृशास्तृतरुतृतरूतृवरुतृवरूतृवरूत्रीरुज्वलितिक्षरितिवमित्यमि
तीतिच । आर्धधातुकस्येड्वलादेः । स्नुक्रमोरनात्मनेपदनिमित्ते । ग्रहोऽलिटिदीर्घः । वृतोवा । नलिङि । सिचि
चपरस्मैपदेषु ॥ २ ॥ इट्सनिवा । लिङ्सिचोरात्मनेपदेषु । ऋतश्चसंयोगादेः । स्वरतिसूतिसूयतिधूञूदितोवा ।
रधादिभ्यश्च । निरःकुषः । इण्निष्ठायाम् । तीषसहलुभरुषरिषः । सनीवन्तर्धभ्रस्जदम्भुश्रिस्वृयूर्णुभरज्ञपिसनाम् ।

क्लिशःक्त्वानिष्ठयोः । पूङश्च । वसतिक्षुधोरिट् । अञ्चेःपूजायाम् । लुभोविमोहने । जॄव्रश्च्योःक्त्वि । उदितोवा । सेऽसिचिकृतचृतच्छृदतृदनृतः । गमेरिट्परस्मैपदेषु । नवृद्भ्यश्चतुर्भ्यः । तासिचक्लृपः ॥ ३ ॥ अचस्तास्वत्थल्यनिटोनित्यम् । उपदेशेऽत्वतः । ऋतोभारद्वाजस्य । बभूथाततन्थजगृभ्मववर्थेतिनिगमे । विभाषासृजिदृशोः । इडत्त्यर्तिव्ययतीनाम् । वस्वेकाजाद्घसाम् । विभाषागमहनविदविशाम् । सनिंससनिवांसम् । ऋद्धनोःस्ये । अञ्जेःसिचि । स्तुसुधूञ्भ्यःपरस्मैपदेषु । यमरमनमातांसक्च । स्मिपूङ्रञ्ज्वशांसनि । किरश्चपञ्चभ्यः । रुदादिभ्यःसार्वधातुके । ईशःसे । ईडजनोर्ध्वेच । लिङःसलोपोऽनन्त्यस्य । अतोयेयः ॥ ४ ॥ आतोङितः । आनेमुक् । ईदासः । अष्टनआविभक्तौ । रायोहलि । युष्मदस्मदोरनादेशे । द्वितीयायांच । प्रथमायाश्चद्विवचनेभाषायाम् । योऽचि । शेषेलोपः । मपर्यन्तस्य । युवावौद्विवचने । यूयवयौजसि । त्वाहौसौ । तुभ्यमह्यौङयि । तवममौङसि । त्वमावेकवचने । प्रत्ययोत्तरपदयोश्च । त्रिचतुरोःस्त्रियांतिसृचतसृ । अचिरऋतः ॥ ५ ॥ जरायाजरसन्यतरस्याम् । त्यदादीनामः । किमःकः । कुतिहोः । क्वाति । तदोःसःसावनन्त्ययोः । अदसऔसुलोपश्च । इदमोमः । दश्च । यःसौ । इदोऽय्पुंसि । अनाप्यकः । हलिलोपः । मृजेर्वृद्धिः । अचोञ्णिति । अतउपधायाः । तद्धितेष्वचामादेः । कितिच ॥ ७ ॥ सिचिप्रभाविट्सन्यचआतोजरायाअष्टादश ॥ इतिसप्तमाध्यायेद्वितीयःपादः ॥ २ ॥ ७ ॥

देविकाशिंशपादित्यवाड्दीर्घसत्रश्रेयसामात् । केकयमित्रयुप्रलयानांयादेरियः । नय्वाभ्यांपदान्ताभ्यांपूर्वौतुता भ्यामैच् । द्वारादीनांच । न्यग्रोधस्यचकेवलस्य । नकर्मव्यतिहारे । स्वागतादीनांच । श्वादेरिञि । पदान्तस्या न्यतरस्याम् । उत्तरपदस्यच । अवयवादृतोः । सुसर्वार्धाज्जनपदस्य । दिशोऽमद्राणाम् । प्राचांग्रामनगराणाम् । संख्यायाःसंवत्सरसंख्यस्यच । वर्षस्याभविष्यति । परिमाणान्तस्यासंज्ञाशाणयोः । जेप्रोष्ठपदानाम् । हृद्भगसि न्ध्वन्तेपूर्वपदस्यच । अनुशतिकादीनांच ॥ १ ॥ देवताद्वन्द्वेच । नेन्द्रस्यपरस्य । दीर्घाच्चवरुणस्य । प्राचांनगरा न्ते । जङ्गलधेनुवलजान्तस्यविभाषितमुत्तरम् । अर्धात्परिमाणस्यपूर्वस्यतुवा । नातःपरस्य । प्रवाहणस्यढे । तत्प्र त्ययस्यच । नञःशुचीश्वरक्षेत्रज्ञकुशलनिपुणानाम् । यथातथयथापुरयोःपर्यायेण । हनस्तोऽचिण्णलोः । आतोयुक् चिण्कृतोः । नोदात्तोपदेशस्यमान्तस्यानाचमेः । जनिवध्योश्च । अर्तिह्रीव्लीरीक्नूयीक्ष्माय्यातांपुङ्णौ । शाच्छा साह्वाव्यावेपांयुक् । वोविधूननेजुक् । लीलोर्नुग्लुकावन्यतरस्यांस्नेहविपातने । भियोहेतुभयेषुक् ॥ २ ॥ स्फायो वः । शदेरगतौतः । रुहःपोऽन्यतरस्याम् । प्रत्ययस्थात्कात्पूर्वस्यातइदाप्यसुपः । नयासयोः । उदीचामातःस्थाने यकपूर्वायाः । भस्त्रैषाजाज्ञाद्वास्वानञ्पूर्वाणामपि । अभाषितपुंस्काच्च । आदाचार्याणाम् । ठस्येकः । इसुसुक्तान्ता त्कः । चजोःकुघिण्ण्यतोः । न्यङ्क्वादीनांच । होहन्तेर्ञ्णिन्नेषु । अभ्यासाच्च । हेरचङि । सन्लिटोर्जेः । विभाषा

चेः । नक्कादेः । अजिव्रज्योश्च ॥ ३ ॥ भुजन्युब्जौपाण्युपतापयोः । प्रयाजानुयाजौयज्ञाङ्गे । वञ्चेर्गतौ । ओकउ
चःके । ण्यआवश्यके । यजयाचरुचप्रवचर्चश्च । वचोऽशब्दसंज्ञायाम् । प्रयोज्यनियोज्यौशक्यार्थे । भोज्यंभक्ष्ये ।
घोर्लोपोलेटिवा । ओतःश्यनि । क्सस्याचि । लुग्वादुहदिहलिहगुहामात्मनेपदेदन्त्ये । शमामष्टानांदीर्घःश्यनि ।
ष्ठिवुक्लमुचमांशिति । क्रमःपरस्मैपदेषु । इषुगमियमांछः । पाघ्राध्मास्थाम्नादाण्दृश्यर्तिसर्तिशदसदांपिबजिघ्रधमति
ष्ठमनयच्छपश्यर्च्छधौशीयसीदाः । ज्ञाजनोर्जा । प्वादीनांह्रस्वः ॥ ४ ॥ मीनातेर्निगमे । मिदेर्गुणः । जुसिच । सार्व
धातुकार्धधातुकयोः । जाग्रोऽविचिण्णल्ङित्सु । पुगन्तलघूपधस्यच । नाभ्यस्तस्याचिपितिसार्वधातुके । भूसुवो
स्तिङि । उतोवृद्धिर्लुकिहलि । ऊर्णोतेर्विभाषा । गुणोऽपृक्ते । तृणहइम् । ब्रुवईट् । यङोवा । तुरुस्तुशम्यमःसार्व
धातुके । अस्तिसिचोऽपृक्ते । बहुलंछन्दसि । रुदश्चपञ्चभ्यः । अड्गार्ग्यगालवयोः । अदःसर्वेषाम् ॥ ५ ॥ अतोदी
र्घोयञि । सुपिच । बहुवचनेझल्येत् । ओसिच । आङिचापः । संबुद्धौच । अम्बार्थनद्योर्ह्रस्वः । ह्रस्वस्यगुणः ।
जसिच । ऋतोङिसर्वनामस्थानयोः । घेर्ङिति । आण्नद्याः । याडापः । सर्वनाम्नःस्याड्ढ्रस्वश्च । विभाषाद्वितीया
तृतीयाभ्याम् । ङेराम्नद्याम्नीभ्यः । इदुद्भ्याम् । औत् । अच्चघेः । आङोनास्त्रियाम् ॥ ६ ॥ देविकादेवतास्फायो
भुजमीनातेरतोदीर्घोविंशतिः ॥ इतिसप्तमाध्यायेतृतीयःपादः ॥ ३ ॥ ७ ॥ णौचङ्युपधायाह्रस्वः । नाग्लोपिशा

अष्टा. स्वृदिताम् । भ्राजभासभाषदीपजीवमीलपीडामन्यतरस्याम् । लोपःपिबतेरीच्चाभ्यासस्य । तिष्ठतेरित् । जिघ्रते सूत्रपा.
र्वा । उर्ऋत् । नित्यंछन्दसि । दयतेर्दिगिलिटि । ऋतश्चसंयोगादेर्गुणः । ऋच्छत्यॄताम् । शॄदॄप्रांह्रस्वोवा । केऽणः । ७ । ४
॥ ३२ ॥ नकपि । आपोऽन्यतरस्याम् । ऋद्दशोऽङिगुणः । अस्यतेस्थुक् । श्वयतेरः । पतःपुम् । वचउम् ॥ १ ॥ शीङः
सार्वधातुकेगुणः । अयङियक्ङिति । उपसर्गाद्ध्रस्वऊहतेः । एतेर्लिङि । अकृत्सार्वधातुकयोर्दीर्घः । च्वौच । रीङृ
तः । रिङ्शयग्लिङ्क्षु । गुणोऽर्तिसंयोगाद्योः । यङिच । ईघ्राध्मोः । अस्यच्वौ । क्यचिच । अशनायोदन्यधना
याबुभुक्षापिपासागर्धेषु । नच्छन्दस्यपुत्रस्य । दुरस्युर्द्रविणस्युर्वृषण्यतिरिषण्यति । अश्वाघस्यात् । देवसुम्नयोर्य
जुषिकाठके । कव्यध्वरपृतनस्यार्चिलोपः । द्यतिस्यतिमास्थामित्तिकिति ॥ २ ॥ शाच्छोरन्यतरस्याम् । दधाते
र्हिः । जहातेश्चक्त्वि । विभाषाछन्दसि । सुधितवसुधितनेमधितधिष्वधिषीयच । दोदद्धोः । अचउपसर्गात्तः ।
अपोभि । सःस्यार्धधातुके । तासस्त्योर्लोपः । रिच । हएति । यीवर्णयोर्दीधीवेव्योः । सनिमीमाघुरभलभशकपत
पदामचइस् । आप्ज्ञप्यृधामीत् । दम्भइच्च । मुचोऽकर्मकस्यगुणोवा । अत्रलोपोऽभ्यासस्य । ह्रस्वः । हलादिःशेषः ॥ ३२ ॥
॥ ३ ॥ शर्पूर्वाःखयः । कुहोश्चुः । नकवतेर्यङि । कृषेश्छन्दसि । दाधर्तिदर्धर्तिदर्धर्षिबोभूतुतेतिक्तेऽलर्ष्यापनीफण
त्संसनिष्यदत्करिक्रत्कनिक्रदद्भरिभ्रद्दविध्वतोदविद्युतत्तरीत्रतःसरीसृपतंवरीवृजन्मर्मृज्यागनीगन्तीतिच । उरत् ।

द्युतिस्वाप्योःसंप्रसारणम् । व्यथोलिटि । दीर्घइणःकिति । अतआदेः । तस्मान्नुड्द्विहलः । अश्नोतेश्च । भवतेरः । ससूवेतिनिगमे । णिजांत्रयाणांगुणःश्लौ । भृञामित् । अर्तिपिपर्त्योश्च । बहुलंछन्दसि । सन्यतः । ओःपुयण्ज्यपरे ॥ ४ ॥ स्रवतिशृणोतिद्रवतिप्रवतिप्लवतिच्यवतीनांवा । गुणोयङ्लुकोः । दीर्घोऽकितः । नीग्वञ्चुस्रंसुध्वंसुभ्रंसुक सपतपदस्कन्दाम् । नुगतोऽनुनासिकान्तस्य । जपजभदहदशभञ्जपशांच । चरफलोश्च । उत्परस्यातः । तिच । रीगृदुपधस्यच । रुग्रिकौचलुकि । ऋतश्च । सन्वल्लघुनिचङ्परेऽनग्लोपे । दीर्घोलघोः । अत्स्मृदृत्वरप्रथम्रदस्तृ स्पशाम् । विभाषावेष्टिचेष्ट्योः । ईचगणः ॥ ५ ॥ णौचङ्युपधायाह्रस्वः ... शीङःशाच्छोःशर्पूर्वाःस्रवतिसप्तदश ॥ इतिसप्तमाध्यायेच तुर्थःपादः ॥ ४ ॥ इत्यष्टाध्यायीसूत्रपाठेसप्तमोऽध्यायः ॥ ७ ॥ ॥ ॥ ॥

ॐ ॥ सर्वस्यद्वे । तस्यपरमाम्रेडितम् । अनुदात्तंच । नित्यवीप्सयोः । परेर्वर्जने । प्रसमुपोदःपादपूरणे । उप र्यध्यधसःसामीप्ये । वाक्यादेरामन्त्रितस्यासूयासंमतिकोपकुत्सनभर्त्सनेषु । एकंबहुव्रीहिवत् । आबाधेच । कर्म धारयवदुत्तरेषु । प्रकारेगुणवचनस्य । अकृच्छ्रेप्रियसुखयोरन्यतरस्याम् । यथास्वेयथायथम् । द्वंद्वंरहस्यमर्यादाव चनव्युत्क्रमणयज्ञपात्रप्रयोगाभिव्यक्तिषु । पदस्य । पदात् । अनुदात्तंसर्वमपादादौ । आमन्त्रितस्यच । युष्मद स्मदोःषष्ठीचतुर्थीद्वितीयास्थयोर्वांनावौ ॥ १ ॥ बहुवचनस्यवस्नसौ । तेमयावेकवचनस्य । त्वामौद्वितीयायाः ।

नचवाहाहैवयुक्ते । पश्यार्थैश्चानालोचने । सपूर्वायाःप्रथमायाविभाषा । तिङोगोत्रादीनिकुत्सनाभीक्ष्ण्ययोः । तिङ्
तिङः । नलुट् । निपातैर्यद्यदिहन्तकुविन्नेच्चेच्चण्कच्चिद्यत्रयुक्तम् । नहप्रत्यारम्भे । सत्यंप्रश्ने । अङ्गात्प्रातिलोम्ये ।
॥ ३३ ॥ हिच । छन्दस्यनेकमपिसाकाङ्क्षम् । यावद्यथाभ्याम् । पूजायांनानन्तरम् । उपसर्गव्यपेतंच । तुपश्यपश्यताहैःपूजा
याम् । अहोच ॥ २ ॥ शेषेविभाषा । पुराचपरीप्सायाम् । नन्वित्यनुज्ञैषणायाम् । किंक्रियाप्रश्नेऽनुपसर्गमप्रतिषि
द्धम् । लोपेविभाषा । एहिमन्येप्रहासेलृट् । जात्वपूर्वम् । किंवृत्तंचचिदुत्तरम् । आहोउताहोचानन्तरम् । शेषेविभा
षा । गत्यर्थलोटालृण्नचेत्कारकंसर्वान्यत् । लोट्च । विभाषितंसोपसर्गमनुत्तमम् । हन्तच । आमएकान्तरमामन्त्रि
तमनन्तिके । यद्धितुपरंछन्दसि । चनचिदिवगोत्रादितद्धिताम्रेडितेष्वगतेः । चादिषुच । चवायोगेप्रथमा । हेति
क्षियायाम् ॥ ३ ॥ अहेतिविनियोगेच । चाहलोपएवेत्यवधारणम् । चादिलोपेविभाषा । वैवावेतिचच्छन्दसि ।
एकान्याभ्यांसमर्थाभ्याम् । यद्धृत्तान्नित्यम् । पूजनात्पूजितमनुदात्तंकाष्ठादिभ्यः । सगतिरपितिङ् । कुत्सनेचसु
प्यगोत्रादौ । गतिर्गतौ । तिङ्ङिचोदात्तवति । आमन्त्रितंपूर्वमविद्यमानवत् । नामन्त्रितेसमानाधिकरणेसामान्यव ॥ ३३ ॥
चनम् । विभाषितंविशेषवचनेबहुवचनम् ॥ ४ ॥ सर्वस्यबहुवचनस्यशेषेऽहेतिचतुर्दश ॥ इत्यष्टमाध्यायेप्रथमःपादः
॥ १ ॥ ७४ ॥ पूर्वत्रासिद्धम् । नलोपःसुप्स्वरसंज्ञातुग्विधिषुकृति । नमुने । उदात्तस्वरितयोर्यणःस्वरितोऽनुदात्त

स्य । एकादेशउदात्तेनोदात्तः । स्वरितोवानुदात्तेपदादौ । नलोपःप्रातिपदिकान्तस्य । नङिसंबुद्ध्योः । मादुपधाया
श्चमतोर्वोऽयवादिभ्यः । झयः । संज्ञायाम् । आसन्दीवदष्ठीवच्चक्रीवत्कक्षीवद्रुमण्वच्चर्मण्वती । उदन्वानुदधौच ।
राजन्वान्सौराज्ये । छन्दसीरः । अनोनुट् । नाद्धस्य । कृपोरोलः । उपसर्गस्यायतौ । ग्रोयङि ॥ १ ॥ अचिविभा
षा । परेश्चघाङ्कयोः । संयोगान्तस्यलोपः । रात्सस्य । धिच । झलोझलि । ह्रस्वादङ्गात् । इटईटि । स्कोःसंयोगा
द्योरन्तेच । चोःकुः । होढः । दादेर्धातोर्घः । वाद्रुहमुहष्णुहष्णिहाम् । नहोधः । आहस्थः । व्रश्चभ्रस्जसृजमृजय
जराजभ्राजच्छशांषः । एकाचोबशोभष्झषन्तस्यस्ध्वोः । दधस्तथोश्च । झलांजशोऽन्ते । झषस्तथोर्धोऽधः ॥ २ ॥
षढोःकःसि । रदाभ्यांनिष्ठातोनःपूर्वस्यचदः । संयोगादेरातोधातोर्यण्वतः । ल्वादिभ्यः । ओदितश्च । क्षियोदीर्घा
त् । श्योऽस्पर्शे । अञ्चोऽनपादाने । दिवोऽविजिगीषायाम् । निर्वाणोऽवाते । शुषःकः । पचोवः । क्षायोमः ।
प्रस्त्योऽन्यतरस्याम् । अनुपर्गात्फुल्लक्षीबकृशोल्लाघाः । नुदविदोन्दत्राघ्राह्रीभ्योऽन्यतरस्याम् । नध्याख्यापॄमूर्च्छि
मदाम् । वित्तोभोगप्रत्यययोः । भित्तंशकलम् । ऋणमाधमर्ण्ये ॥ ३ ॥ नसत्तनिषत्तानुत्तप्रतूर्तसूर्तगूर्तानिच्छन्दसि ।
क्विन्प्रत्ययस्यकुः । नशेर्वा । मोनोधातोः । म्वोश्च । ससजुषोरुः । अवयाःश्वेतवाःपुरोडाश्च । अहन् । रोऽसुपि ।
अम्नरूधरवरित्युभयथाछन्दसि । भुवश्चमहाव्याहृतेः । वसुस्रंसुध्वंस्वनडुहांदः । तिप्यनस्तेः । सिपिधातोरुर्वा ।

दश्च । वोंरुपधायादीर्घइकः । हलिच । उपाधायांच । नभकुर्छुराम् । अदसोऽसेर्दादुदोमः ॥४॥ एतईद्बहुवचने ।
वाक्यस्यटेःप्लुतउदात्तः । प्रत्यभिवादेऽशूद्रे । दूराद्धूतेच । हैहेप्रयोगेहैहयोः । गुरोरनृतोऽनन्त्यस्याप्येकैकस्यप्राचाम् ।
ओमभ्यादाने । येयज्ञकर्मणि । प्रणवष्टेः । याज्यान्तः । ब्रूहिप्रेष्यश्रौषड्वौषडावहानामादेः । अग्नीत्प्रेषणेपरस्यच ।
विभाषापृष्टप्रतिवचनेहेः । निगृह्यानुयोगेच । आम्रेडितंभर्त्सने । अङ्गयुक्तंतिङाकाङ्क्षम् । विचार्यमाणानाम् । पूर्वंतु
भाषायाम् । प्रतिश्रवणेच । अनुदात्तंप्रश्नान्ताभिपूजितयोः ॥ ५ ॥ चिदितिचोपमार्थेप्रयुज्यमाने । उपरिस्विदासी
दितिच । स्वरितमाम्रेडितेऽसूयासंमतिकोपकुत्सनेषु । क्षियाशीःप्रैषेषुतिङाकाङ्क्षम् । अनन्त्यस्यापिप्रश्नाख्यानयोः ।
प्लुतावैचइदुतौ । एचोऽप्रगृह्यस्यादूराद्धूतेपूर्वस्यार्धस्यादुत्तरस्येदुतौ । तयोर्य्वावचिसंहितायाम् ॥ ६ ॥ पूर्वत्राचि
षढोर्नसत्त्वैतईच्चिदित्यष्टौ ॥ इत्यष्टमाध्यायेद्वितीयःपादः ॥ २ ॥ छ ॥ मतुवसोरुसंबुद्धौछन्दसि । अत्रानुनासिकः
पूर्वस्यतुवा । आतोऽटिनित्यम् । अनुनासिकात्परोऽनुस्वारः । समःसुटि । पुमःखय्यम्परे । नश्छव्यप्रशान् । उभ
यथर्क्षु । दीर्घादटिसमानपादे । नॄन्पे । स्वतवान्पायौ । कानाम्रेडिते । ढोढेलोपः । रोरि । खरवसानयोर्विसर्ज
नीयः । रोःसुपि । भोभगोअघोअपूर्वस्ययोऽशि । व्योर्लघुप्रयत्नतरःशाकटायनस्य । लोपःशाकल्यस्य । ओतोगार्ग्य
स्य ॥ १ ॥ ञमिचपदे । हलिसर्वेषाम् । मोऽनुस्वारः । नश्चापदान्तस्यझलि । मोराजिसमःक्वौ । हेमपरेवा । नप

रेनः । ङ्णोःकुक्टुक्शरि । डःसिधुट् । नश्च । शितुक् । ङमोह्रस्वादचिङमुण्नित्यम् । मयउञोवोवा । विसर्जनीयस्यसः । शर्परेविसर्जनीयः । वाशरि । कुप्वोः≍क≍पौच । सोऽपदादौ । इणःषः । नमस्पुरसोर्गत्योः ॥ २ ॥ इदुदुपधस्यचाप्रत्ययस्य । तिरसोऽन्यतरस्याम् । द्विस्त्रिश्चतुरितिकृत्वोऽर्थे । इसुसोःसामर्थ्ये । नित्यंसमासेऽनुत्तरपदस्थस्य । अतःकृकमिकंसकुम्भपात्रकुशाकर्णीष्वनव्ययस्य । अधःशिरसीपदे । कस्कादिषुच । छन्दसिवाप्राम्रेडितयोः । कःकरत्करतिकृधिकृतेष्वनदितेः । पञ्चम्याःपरावध्यर्थे । पातौचबहुलम् । षष्ठ्याःपतिपुत्रपृष्ठपारपदपयस्पोषेषु । इडायावा । अपदान्तस्यमूर्धन्यः । सहेःसाडःसः । इण्कोः । नुम्विसर्जनीयशर्व्यवायेऽपि । आदेशप्रत्यययोः । शासिवसिघसीनांच ॥ ३ ॥ स्तौतिण्योरेवषण्यभ्यासात् । सःस्विदिस्वदिसहीनांच । प्राक्सितादड्व्यवायेऽपि । स्थादिष्वभ्यासेनचाभ्यासस्य । उपसर्गात्सुनोतिसुवतिस्यतिस्तौतिस्तोभतिस्थासेनयसेधसिचसञ्जस्वञ्जाम् । सदिरप्रतेः । स्तन्भेः । अवाच्चालम्बनाविदूर्ययोः । वेश्चस्वनोभोजने । परिनिविभ्यःसेवसितसयसिवुसहसुट्स्तुस्वञ्जाम् । सिवादीनांवाड्व्यवायेऽपि । अनुविपर्यभिनिभ्यःस्यन्दतेरप्राणिषु । वेःस्कन्देरनिष्ठायाम् । परेश्च । परिस्कन्दःप्राच्यभरतेषु । स्फुरतिस्फुलत्योर्निर्निर्विभ्यः । वेःस्कभ्नातेर्नित्यम् । इणःषीध्वंलुङ्लिटांधोऽङ्गात् । विभाषेटः । समासेऽङ्गुलेःसङ्गः ॥ ४ ॥ भीरोःस्थानम् । अग्नेःस्तुत्स्तोमसोमाः । ज्योतिरायुषःस्तोमः । मातृपितृभ्यांस्व

सा । मातुःपितुर्भ्यामन्यतरस्याम् । अभिनिसःस्तनःशब्दसंज्ञायाम् । उपसर्गप्रादुर्भ्यामस्तिर्यच्परः । सुविनिर्दुर्भ्यः
सुपिसूतिसमाः । निनदीभ्यांस्नातेःकौशले । सूत्रंप्रतिष्णातम् । कपिष्ठलोगोत्रे । प्रष्ठोऽग्रगामिनि । वृक्षासनयोर्वि
ष्टरः । छन्दोनाम्निच । गवियुधिभ्यांस्थिरः । विकुशमिपरिभ्यःस्थलम् । अम्बाम्बगोभूमिसव्यापद्वित्रिकुशेकुशङ्
क्वङ्गुमञ्जिपुञ्जिपरमेबर्हिर्दिव्यग्निभ्यःस्थः । सुषामादिषुच । एतिसंज्ञायामगात् । नक्षत्राद्वा ॥ ५ ॥ ह्रस्वात्तादौत
द्धिते । निसस्तपतावनासेवने । युष्मत्तत्ततक्षुष्वन्तःपादम् । यजुष्येकेषाम् । स्तुतस्तोमयोश्छन्दसि । पूर्वपदात् ।
सुञः । सनोतेरनः । सहेःपृतनर्ताभ्यांच । नरपरसृजिस्पृशिस्पृहिसवनादीनाम् । सात्पदाद्योः । सिचोयङि ।
सेधतेर्गतौ । प्रतिस्तब्धनिस्तब्धौच । सोढः । स्तम्भुसिवुसहांचङि । सुनोतेःस्यसनोः । सदेःपरस्यलिटि । निव्यभि
भ्योऽड्व्यवायेवाछन्दसि ॥ ६ ॥ मतुवसोरुञ्जिचेदुदुपधस्यस्तौतिण्योर्भीरोर्ह्रस्वात्तादेकोनविंशतिः ॥ इत्यष्टमाध्या
येतृतीयःपादः ॥ ३ ॥ छ ॥ रषाभ्यांनोणःसमानपदे । अट्कुप्वाङ्नुम्व्यवायेऽपि । पूर्वपदात्संज्ञायामगः । वनंपु
रगामिश्रकासिध्रकासारिकाकोटराग्रेभ्यः । प्रनिरन्तःशरेक्षुप्लक्षाम्रकार्श्यखदिरपीयूक्षाभ्योऽसंज्ञायामपि । विभाषौ
षधिवनस्पतिभ्यः । अह्नोऽदन्तात् । वाहनमाहितात् । पानंदेशे । वाभावकरणयोः । प्रातिपदिकान्तनुम्विभक्ति
षुच । एकाजुत्तरपदेणः । कुमतिच । उपसर्गादसमासेऽपिणोपदेशस्य । हिनुमीना । आनिलोट् । नेर्गदनदपतप


दघुमास्यतिहन्तियातिवातिद्रातिप्सातिवपतिवहतिशाम्यतिचिनोतिदेग्धिषुच। शेषेविभाषाकखादावषान्तउपदेशे। अनितेः। अन्तः॥ १॥ उभौसाभ्यासस्य। हन्तेरत्पूर्वस्य। वमोर्वा। अन्तरदेशे। अयनंच। छन्दस्यृदवग्रहात्। नश्चधातुस्थोरुषुभ्यः। उपसर्गाद्बहुलम्। कृत्यचः। णेर्विभाषा। हलश्चेजुपधात्। इजादेःसनुमः। वानिंसनिक्षनिन्दाम्। नभाभूपूकमिगमिप्यायीवेपाम्। षात्पदान्तात्। नशेःषान्तस्य। पदान्तस्य। पदव्यवायेऽपि। क्षुभ्नादिषुच। स्तोश्चुनाश्चुः॥ २॥ ष्टुनाष्टुः। नपदान्ताट्टोरनाम्। तोःषि। शात्। यरोऽनुनासिकेऽनुनासिकोवा। अचोरहाभ्यांद्वे। अनचिच। नादिन्याक्रोशेपुत्रस्य। शरोऽचि। त्रिप्रभृतिषुशाकटायनस्य। सर्वत्रशाकल्यस्य। दीर्घादाचार्याणाम्। झलांजश्झशि। अभ्यासेचर्च। खरिच। वावसाने। अणोऽप्रगृह्यस्यानुनासिकः। अनुस्वारस्ययियिपरसवर्णः। वापदान्तस्य। तोर्लि॥ ३॥ उदःस्थास्तम्भोःपूर्वस्य। झयोहोऽन्यतरस्याम्। शश्छोऽटि। हलोयमांयमिलोपः। झरोझरिसवर्णे। उदात्तादनुदात्तस्यस्वरितः। नोदात्तस्वरितोदयमगार्ग्यकाश्यपगालवानाम्। अअइति। रषाभ्यामुभौष्टुनोदःस्थाष्टौ॥ इत्यष्टमाध्यायेचतुर्थपादः॥ ४॥ इत्यष्टाध्यायीसूत्रपाठेऽष्टमोऽध्यायः॥८॥

॥ इतिश्रीपाणिनिमुनिप्रणीतोऽष्टाध्यायीसूत्रपाठःसमाप्तः॥

इदं पुस्तकं पणशीकरोपाह्वलक्ष्मणशर्मतनुजनुषा वासुदेवशर्मणा गोरेइत्युपनामक-
कृष्णंभट्टसाहाय्येन संस्कृतं तच्च मुंबय्यां **पांडुरंग जावजी** इत्येतैः
स्वीये निर्णयसागराख्येऽङ्कनयंत्रालये मुद्रयित्वा प्रकाशितम् ।

शाकः १८५६ सन १९३४.

PUBLISHER:-Pandurang Jawaji, } at the "Nirnaya-sagar" Press,
PRINTER:-Ramchandra Yesu Shedge, } 26-28, Kolbhat Lane, Bombay.


॥ इति शिक्षादिवेदषडङ्गानि ॥
REVISED
Rs 3.00